# संस्कृतभाषाव्याकरणम्

## कक्षा १२




नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

# संस्कृतभाषाव्याकरणम्

## कक्षा १२

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

**प्रकाशकः**
**नेपालसर्वकारः**
**शिक्षाविज्ञानप्रविधिमन्त्रालयः**
**पाठ्यक्रमविकासकेन्द्रम्**
**सानोठिमी-भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति । लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य अथवा एकांशस्य यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

**सर्वेऽधिकाराः प्रकाशकाधीनाः**

**प्रथमसंस्करणम् - २०७८**

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाचरणस्य विकासोऽप्यत्वे आवश्यको दृश्यते । अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षाद् निर्मितं २०७७ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते ।

शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं शिक्षातो नैतिकाचरणप्रदर्शिकायाः, सामाजिकसद्भावप्रवर्धिकायाः, पर्यावरणस्य सन्तोलनेन प्रयोगं कर्तुं संवेदनशीलायाः, दृढशान्तिं प्रति प्रतिबद्धायाश्च व्यक्तेरपेक्षां समाजो विदधाति । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनो, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवमेव कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य १२ कक्षायाः संस्कृतभाषाव्याकरणविषयकपाठ्यक्रमस्याधारेण पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं प्रा. ध्रुवप्रसादः ज्ञवाली, सहप्रा. ध्रुवप्रसादः भट्टराई, डा. वैकुण्ठः घिमिरे, निश्चलः अधिकारी, पुरुषोत्तमः घिमिरे-प्रभृतीनां महानुभावानां कार्यदलेन लिखितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य लेखने पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः अणप्रसादः न्यौपाने, प्रा.डा. नुरापतिः पोखरेल,

शिवराजः लामिछाने, टुकराजः अधिकारी-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य टङ्कणं रूपसज्जा च खडोससुनुवार इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम्। सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधानां स्रोतसां साधनानाञ्चोपयोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति। अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति। अत एतेषु विषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| | **भाषाखण्डः** | |
| प्रथमः | नेपाल-सञ्जीवनी | २ |
| द्वितीयः | समाना वृत्तिः समाना दृष्टिः | १७ |
| तृतीयः | हठयोगगुरुर्गोरक्षनाथः | २९ |
| चतुर्थः | हृत्कम्पको भूकम्पः | ४५ |
| पञ्चमः | चम्पूभारतम् | ५७ |
| | **व्याकरणखण्डः** | |
| प्रथमः | कृदन्तप्रकरणे कृत्यप्रक्रिया | ७८ |
| द्वितीयः | कृदन्तप्रकरणे पूर्वकृदन्तः | ८५ |
| तृतीयः | कृदन्तप्रकरणे अथोत्तरकृदन्तप्रकरणम् | १०९ |
| चतुर्थः | अथ समासप्रकरणम् | १२४ |
| पञ्चमः | अथाव्ययीभावसमासः | १२९ |
| षष्ठः | अथ तत्पुरुषसमासः | १३६ |
| सप्तमः | अथ बहुव्रीहिसमासः | १४७ |
| अष्टमः | अथ द्वन्द्वसमासः | १५२ |
| नवमः | तद्धितप्रकरणे अथापत्याधिकारप्रकरणम् | १६० |
| दशमः | अथ रक्ताद्यर्थकप्रकरणम् | १६९ |
| एकादशः | अथ चातुरर्थिकप्रकरणम् | १७६ |
| द्वादशः | अथ ठगधिकारादिप्रक्रिया | १८९ |
| त्रयोदशः | अथ मतुबर्थीयादिप्रक्रिया | २०७ |

| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| | **न्यायखण्डः** | |
| प्रथमः | जलतेजोवायुनिरूपणम् | २३० |
| द्वितीयः | आकाशकालदिङ्निरूपणम् | २४२ |
| तृतीयः | आत्मनिरूपणम् | २४९ |
| चतुर्थः | बुद्धिनिरूपणम् | २६४ |
| पञ्चमः | सन्निकर्षनिरूपणम् | २७९ |
| षष्ठः | परिभाषिकपदार्थपरिचयः | २९४ |

# भाषाखण्डः

# नेपाल-सञ्जीवनी

कस्यापि राष्ट्रस्योन्नतिः समृद्धिश्च राष्ट्रवासिनां निष्ठया, श्रमेण समर्पणेन च सम्भवति। राष्ट्रोन्नतेर्विविधानि कारकतत्त्वानि भवन्ति। तेषां सहयोगेन सदुपयोगेन च राष्ट्रस्य विकासो जायते, जनाः सुखञ्चाप्नुवन्ति। तत्र राष्ट्रवासिनामेकता सर्वातिशायिनीं भूमिकामावहति। एकं लक्ष्यं पुरस्कृत्य समेषां राष्ट्रवासिनामैक्यभावनया कार्येषु तत्परतैव राष्ट्रियैकता निगद्यते। एकतया न केवलं राष्ट्रस्य अपि तु जनस्य, समाजस्य ततो निखिलविश्वस्य च हितं भवति, उन्नतिः सम्भवति।

संसारस्य सर्वेषु देशेषु एकता परमावश्यकी वर्तते। एकतैव देशस्य देशवासिनाञ्चास्तित्वं रक्षति। एकता तादृशं बलमस्ति यच्छान्त्या संयमेन च देशमुन्नयति चिरञ्जीवयति च। अनेकत्वेन ग्रस्तो देशो विकासाद् वञ्चितो भवति, कालानन्तरं पराश्रयञ्च प्रयाति। बहुभिरुदाहरणैः सत्यमेतद्योतमानमस्ति।

नेपालेऽपि राष्ट्रियैकताऽपरिहार्या वेविद्यते। इह चिराय राष्ट्रियैकताया बहव आधारा विराजमानाः सन्ति। एतानेवाधृत्य देशोऽयं प्रतिष्ठितो वर्तते। वयं नेपालिनां रूपेण विश्वस्मिन् विश्वेऽन्तरराष्ट्रियसंस्थासु मञ्चेषु च सुपरिचिताः स्मः। एभिरेवाधारैर्नेपालश्चिरकालतः सबलः स्वतन्त्रश्च वर्तते।

नेपालो बहुविधभूगोलेन निर्मितं राष्ट्रमस्ति। हिमालय-पर्वत-तराईभागा नेपालस्य भौगोलिकं वैविध्यं दर्शयन्ति। इमानि सर्वाणि क्षेत्राणि वयं समानं स्निह्यामः। एतेषु अस्माकं सर्वेषामक्षयः प्रेमराशिर्द्रवति। यः कोऽपि नेपालिनागरिको निर्बाधमेकस्माद् भूगोलादपरभूगोलस्य स्थानमटितुम्, तत्र स्थातुम्, कार्यं सम्पादयितुमाजीविकां चालयितुम्, जीवनं सुखेन यापयितुञ्च शक्नोति। भूगोलस्याधारेण वयं कस्मिन्नपि जने, वर्गे समुदाये च भेदभावं न कदापि दर्शयामो येन राष्ट्रियैकता सबलायमाना वर्तते।

अस्माकं देशे बह्व्यो भाषाः सन्ति। तासां भिन्नानि स्वरूपाणि वैशिष्ट्यानि च विलोक्यन्ते। स्व-स्वसमुदाये इमा भाषा भाष्यन्ते। स्थानीयस्तरे बहुजनबोध्या भाषाः सर्वकारीयकार्यसञ्चालनेऽपि प्रयुज्यन्ते। परं सर्वा भाषाः सर्वे जना वक्तुं बोद्धुञ्च क्षमा न भवन्ति। ततस्तेषु वार्तायां व्यवहारे च सङ्कट उत्पद्यते। तन्निवारणाय सर्वजनबोध्या भाषा आवश्यकी भवति। नेपाले नेपालिभाषा सङ्कटममुं समाधातुं क्षमास्ति। अस्याः प्रयोगेण जनसञ्चारो भवति; व्यवहारश्चलति; द्वयोस्तदधिकानां वा भाषिकसमुदयानां मध्ये सम्पर्को वर्धते, अन्ततो राष्ट्रियैकता बलवती च भवति। एतदर्थं भाषाश्चास्माकमेकतायाः सूत्र-सम्पदः सन्ति।

धर्मः संस्कृतिश्च नेपालिन एकतायाः सूत्रे बध्नीतः। बहून् धर्मानाचर्य, भिन्नाः संस्कृतीः परिपाल्य स्वसंस्कारानुसृत्य चैकत्वावलम्बनं नेपालिनां वैशिष्ट्यमस्ति। अस्माकं संस्कृतिर्वैमनस्यमपाकरोति, सौमनस्यं च विशदीकरोति। षष्ठीपर्व (छठ) होलिकोत्सवश्च नेपालस्य तराई-पर्वत-हिमालयव्यापिनं भूगोलं नेपालिनां भावनाञ्च योजयतः। अनयोः पर्वणोः सर्वेषां जाति-धर्म-वर्ण-लिङ्ग-समुदायानां सोल्लासं सोत्साहञ्च सहभागिता भवति। परस्परं सहयोगश्च विधीयते। अन्ये धार्मिक-सांस्कृतिकपर्वोत्सवाश्च राष्ट्रियैकतां द्रढयन्ति।

पूर्वजानां स्मरणं सम्मानश्चास्माकं पुरातनी विशेषता वर्तते। तेषां कार्याणि अस्मान् सदैव प्रेरयन्ति। जनक-सीता-गौतमबुद्ध-गोरक्षनाथ-विद्यापति-अरनिको-पृथ्वीनारायण-बिसेनगर्ची-भानुभक्त-फाल्गुनन्द-योगिनरहरिनाथ-तेन्जिङशेर्पा-पासाङल्हामुशेर्पा-स्वामिप्रपन्नाचार्यप्रभृतयो महानुभावा नेपालस्य गौरवं वर्धयन्ति। तेषां संस्मरणेन सम्मानेन च वयं कार्तज्ञभावमभिव्यज्यानन्दमनुभवामः। अनेनाप्यस्माकमेकता प्रदीप्यते।

एकताया अभावे बह्व्यो हानयो भवन्ति। कार्यसिद्धये सर्वेभ्यो जनेभ्यः परेषामपि साहाय्यमपेक्ष्यते। यत्र परस्परमेकता दुर्लभा तत्र सहायतापि सुदुर्लभा भवति। अत्र पौराणिकवाङ्मयमस्मानुपदिशत्यादिशति सावधानान् च विदधाति। महाभारतस्य शान्तिपर्वणि भीष्मपितामहं सम्बोधयन् युधिष्ठिरः सत्यमेव वक्ति- स्वल्पमपि कार्यमन्येषां सहायतां विना न कोऽप्येकाकी कर्तुं शक्नोति, राज्यसञ्चालनस्य तु वार्तैव का ?

**यदप्यल्पतरं कर्म तदप्येकेन दुष्करम्।**

**पुरुषेणासहायेन किमु राज्ञा पितामह** ॥ ( ८० । १)

एकताया अभावेन कलहस्य वर्धनेन च राष्ट्रस्य सर्वत्र क्षयो जायते। अराजकत्वेन राष्ट्रवासिनो विनष्टा भवन्ति, शत्रूणामुत्साहो वर्धते, ते आक्रमितुञ्चोद्यता भवन्ति। विद्वेष-विवाद-विरोधा जनान् दुर्गतिं प्रापयन्ति। शान्तिपर्वण्येवोक्तम् - यदा ब्राह्मण-क्षत्रियजात्योः परस्परं विरोधो भवति तदा राष्ट्रं विखण्डनमेति –

**विद्धं राष्ट्रं क्षत्रियस्य भवति ब्रह्मक्षत्रं यत्र विरुद्धचतीह** । (७३ । ८)

ये राष्ट्रं सर्वसंक्षयाद्रक्षितुमिच्छन्ति जनान् च प्रीणयन्ति ते राष्ट्रियैकतां न विकारयन्ति। समाजे समुदाये च सौहार्दं संवर्धयन्ति। राष्ट्रियैकतैव सर्वेषां हितसाधिकास्ति। इयं नेपालस्य सञ्जीवनी वर्तते।

## अभ्यासः

### श्रवणं भाषणं च

१. **पाठस्य अनुच्छेदद्वयं परस्परं कक्षायां श्रावयत ।**

२. **सखिमुखादधस्तनपदानि श्रुत्वा उच्चारणे जायमानास्त्रुटीर्निराकुरुत ।**

राष्ट्रोन्नतेः, ऐक्यभावनया, यच्छान्त्या, पराश्रयञ्च, स्निह्यामः, राष्ट्रियैकता, बह्व्यः, चैकत्वावलम्बनम्, द्रढयन्ति, कार्तज्ञभावम्, साहाय्यम्, आक्रमितुञ्चोद्यताः, सर्वसंक्षयाद्रक्षितुम्, अनेनाप्यस्माकम्

३. **वर्णसम्मेलनेन मिलिते पदे पृथक्कृत्य तयोः शुद्धोच्चारणं विधत्त**

राष्ट्रस्योन्नतिः, भूमिकामावहति, तत्परतैव, पराश्रयञ्च, बहुभिरुदाहरणैः, नेपालेऽपि, एतानेव, प्रेमराशिर्द्रवति, ततस्तेषु, व्यवहारश्चलति, कोऽपि, द्वयोस्तदधिकानाम्, वैशिष्ट्यमस्ति, अनेनापि, शान्तिपर्वण्येव, हितसाधिकास्ति, आधारैर्नेपालः, उत्साहञ्च

४. **पदानां ध्यानेनानूच्चारणं विधाय तालुस्थानीयवर्णान् रेखाङ्कितान् कुरुत**

देशस्य, चिरञ्जीवयति, यच्छान्त्या, इह, चालयितुम्, इमानि, राज्यसञ्चालनस्य, विशदीकरोति, स्वतन्त्रश्च, जनसञ्चारः, सञ्जीवनी, सुखञ्चाप्नुवन्ति

५. **सन्धिविच्छेदं विधाय सन्धिनाम लिखत**

राष्ट्रियैकता, परमावश्यकी, देशोऽयम्, स्वतन्त्रश्च, तन्निवारणाय, क्षमास्ति, संस्कारराननुसृत्य, द्वयोस्तदधिकानाम्, चैकत्वम्, होलिकोत्सवः, संस्कृतिर्विद्यते, सर्वेभ्यो जनेभ्यः, उपदिशत्यादिशति, स्वल्पमपि, वार्तैव, पुरुषेणासहायेन, सर्वसंशयाद्रक्षितुम्, संवर्धयन्ति

६. **पाठस्य पञ्चमानुच्छेदं वाचयित्वा कक्षायां श्रावयत ।**

७. **पृथग्धातुर्भिर्निर्मितानि पाठे प्रयुक्तानि दशक्रियापदानि लिखित्वा शिक्षकं श्रावयत ।**

८. **रेखाङ्कितपदानां कारकविभक्ती कथयत**

(क) एकताया अभावेन बह्व्यो **हानयो** भवन्ति ।

(ख) ये **जनान्** प्रीणयन्ति ते राष्ट्रियैकतां न विकारयन्ति ।

(ग) **नेपालिनागरिको** निर्बाधं स्वदेशस्यैकस्माद् **भूभागाद**परस्मिन् भूभागे **जीवनं** सुखेन यापयितुं शक्नोति ।

(घ) अस्माकं **देशे** बह्व्यो भाषाः सन्ति ।

(ङ) स्व-स्वसमुदाये इमा **भाषा** भाष्यन्ते ।

९. 'सामाजिकैकता' इति विषये स्वविचारं कक्षायां श्रावयत ।

१०. 'आहारशुद्धिः' इति विषयेऽनुच्छेदमेकं विलिख्य कक्षायां श्रावयत ।

११. पाठमाधारीकृत्य राष्ट्रियैकताया महत्त्वं वर्णयत ।

१२. अस्माकं देशस्य राष्ट्रियैकता कथं सबला विद्यते ? पाठाधारेण स्वमतं प्रकटयत ।

१३. अधस्तनपदस्थान् उपसर्गान् पदात् पृथक्कृत्य वदत

संवर्धनम्, प्राप्नुवन्ति, निगद्यते, समुन्नतिः, सुपरिचिताः, निर्बाधम्, विलोक्यन्ते, निवारणाय, व्यवहारः, संस्कृतिः, प्रेरयन्ति, प्रदीप्यते, सुदुर्लभाः, स्वल्पम्, विखण्डनम्

१४. प्रदत्तगद्यंश्रुत्वा अधस्तनप्रश्नानामुत्तराणि वदत

## पर्यटनम्

मानवानां रुचिर्भिन्ना भिन्ना भवति । रुचिवैविध्यादेव संसारं परिवर्तयन्तो जना वैज्ञानिकोन्नत्या प्रतिदिनमेनं समृद्धशालिनं कुर्वन्तः सन्ति । स्वान्तर्हृदये समुत्पन्नानामाकाङ्क्षाणां परिपूर्तये जनाः पर्यटनमपि कुर्वन्ति । भौगोलिकप्राकृतिकसांस्कृतिकैतिहासिकादिक्षेत्राणां सोद्देश्यं भ्रमणमेव पर्यटनं निगद्यते । उद्देश्यविहीनं भ्रमणं पर्यटनं नाभवति । तादृशं भ्रमणं तु कालक्षेपणाय कृत उद्योग एव मन्यते । जिज्ञासवो जना जगतः प्रत्येकं स्थलस्य वस्तुनश्च यथासम्भवं ज्ञानमिच्छन्ति । तेषां श्रवणमात्रेण असन्तुष्टास्ते स्वयं तत्र गत्वा प्रत्यक्षं निरीक्षणायोत्सुका भवन्ति । तदर्थं जिज्ञासवो जनाः पर्यटन्ति ।

बाह्यमान्तरिकञ्चेति पर्यटनं द्विविधं दृश्यते । स्वस्यैव देशस्य विविधस्थानेषु कृतं पर्यटनमान्तरिकमुच्यते चेदन्येषु देशेषु गत्वा विधीयमानं पर्यटनं बाह्यमुच्यते ।। पर्यटकः स्वदेशस्याज्ञातस्थलानां भूक्षेत्राणां वनसम्पदां पुरातात्त्विकवस्तूनां च भ्रमणं विधाय मनोरञ्जनं कर्तुं सम्बद्धविषयज्ञानञ्चोपार्जयितुं शक्नोति । एवञ्च देशान्तरेषु गत्वा तत्तद्देशानां वैज्ञानिकोन्नतिः सामाजिकं जीवनं संस्कृतिः आर्थिकसमृद्धिरौद्योगिकोन्नतिः कृषिपद्धतिश्चेत्यादिविषयाणां ज्ञानाय अध्ययनानुसन्धानादिकार्याय च बाह्यं पर्यटनं विधीयते ।

पर्यटनं कस्यापि देशस्य भौतिकार्थिकसमृद्ध्या दृढतराधारशिला वर्तते । प्राकृतिकादिरूपेण समृद्धानां जलपर्यावरणादिदृष्ट्या समुन्नतानां सांस्कृतिकदृशा विविधतामयानां बहुजातिभाषायुक्तानां नेपालसदृशानां विकासोन्मुखानां देशानां कृते तु पर्यटनमार्थिकोन्नत्यर्थं वरदानं मन्यते । एतत्तदा सम्भवति यदा पर्यटकानां कृते आवासाहारविहारसञ्चारादेः समुचिता व्यवस्था विधीयते । दुर्गमक्षेत्रेष्वपि पदमार्गस्य द्रुतसञ्चारस्य च व्यवस्थायां कृतायां पर्यटकास्तत्र गत्वा पर्यटनं विधातुं कामयन्ते । अस्माकं व्यवहार आतिथ्यक्रिया सभ्यता सहयोगिभावना अपि पर्यटकस्य वृद्धये हेतुः । यत्र पर्यटकानां कृते आवश्यकानि सर्वाणि वस्तूनि सुप्राप्याणि भवन्ति तत्रैव पर्यटनमुद्योगरूपेण विकसितं भवति ।

अस्माकं देशे प्रतिवर्षं कोट्यधिकाः पर्यटकाः पर्यटनाय समागच्छन्ति । अत्र प्रकृत्या अपारसम्पदो वरीवर्तन्ते । अतोस्माकं देशे पर्यटनव्यवसायमुद्योगरूपेण स्वीकृतमस्ति । देशस्योत्तरदिशि पङ्क्तिबद्धा हिमालयाः सन्ति । अत्रत्या वन्यजन्तुसंरक्षिताः निकुञ्जाः, कोसीगण्डक्यादिहिमनद्यः, निर्झराः, वनोपवनानि, हरितप्राया पर्वतश्रेणी, शस्यशामला तराईभूमिश्च पर्यटकान् आकर्षन्ति । नेपालस्येयं मनोरमा प्राकृतिकदृश्यावली पर्यटकानां हृदयेऽपारानन्दं भरति । आनन्दमिदमास्वादयितुं समागताः पर्यटकाः अत्रत्यजनानां कृते जीविकां च सृजन्ति । दर्शने स्पर्शनेन वा अस्माकं सम्पदः विलुप्ताः नभवन्ति प्रत्युत इमा अस्माकं कृते द्रव्यसमुन्नत्याः दृढतरमाधारं समुत्पादयन्ति ।

(क) संसारपरिवर्तने हेतुः कः ?

(ख) कीदृशं भ्रमणं पर्यटनं निगद्यते ?

(ग) जिज्ञासवः कस्य ज्ञानमिच्छन्ति ?

(घ) पर्यटनं कतिविधम् ? किं किञ्च तत् ?

(ङ) कीदृशं पर्यटनं बाह्यपर्यटनमुच्यते ?

(च) पर्यटनं विकासोन्मुखानां देशानां कृते कथं वरदानम् ?

(छ) आन्तरिकबाह्यपर्यटनयोः को भेदः ?

(ज) नेपालः कीदृशो देशोऽस्ति ?

(झ) कस्यां स्थितौ पर्यटनमुद्योगरूपेण विकसितं भवति ?

(ञ) सम्पदः किं कुर्वन्ति ?

(ट) अस्माकं देशस्य काः काः सम्पदः पर्यटकान् आकर्षयन्ति ?

## पठनम्

१. पाठस्य चतुर्थानुच्छेदं लेख्यचिह्नानि विचार्य प्रवाचयत ।

२. पाठस्य द्वितीयमनुच्छेदं पठित्वा नामपदानि सङ्कलयत ।

३. पाठस्थं पद्यमिदं सस्वरं पठित्वा सखीन् श्रावयत ।

४. पाठस्य मौनपठनं विधाय अज्ञातार्थानि पदानि चिह्नीकुरुत ।

५. पाठं पठित्वा समस्तपदानामर्थापनाय सहपाठिभिः सह विमर्शं कुरुत ।

६. पाठस्य प्रथमानुच्छेदस्य द्रुतपठनं पठनगतिवर्धनाभ्यासञ्च कुरुत ।

७. पाठं पठित्वा समस्तानि सन्धियुतानि च पदानि सङ्कलयत ।

## ८. पाठस्य चतुर्थपञ्चमानुच्छेदौ पठित्वा अधस्तनप्रश्नानुत्तरयत

(क) नेपालः कीदृशं राष्ट्रमस्ति ?

(ख) अस्माकं प्रेमराशिः कुत्र द्रवति ?

(ग) वयं स्वदेशे किं किं कर्तुं शक्नुमः ?

(घ) राष्ट्रियैकता कथं सबला भवति ?

(ङ) अस्माकं भाषासु किं किं विलोक्यन्ते ?

(च) जनाः किं कर्तुं क्षमा न भवन्ति ?

(छ) सर्वजनबोध्या भाषा किमर्थमावश्यकी ?

(ज) नेपाले नेपालिभाषा कां समस्यां समादधति ?

(झ) भाषाप्रयोगेण किं किं भवति ?

(ञ) भाषाः कस्याः सूत्रसम्पदः सन्ति ?

(ट) 'स्निह्यामः' इत्यत्र को धातुः तदर्थश्च कः ?

(ठ) 'निर्मितम्' इति पदं कस्य विशेषणम् ?

(ड) 'जनसञ्चारः' इत्यस्य विग्रहं प्रदर्शयत ।

(ढ) 'विलोक्यन्ते' इत्यस्य कर्मपदं किम् ?

(ण) निर्दिष्टानुच्छेदद्वये समागतानि समस्तपदानि विलिख्य तेषां विग्रहञ्च कुरुत ।

## ७. पाठस्थस्य अधस्तनपद्यस्य अन्वयं प्रदर्शयत

यदप्यल्पतरं कर्म तदप्येकेन दुष्करम् ।
पुरुषेणासहायेन किमु राज्ञा पितामह ॥

## ८. पाठस्य अन्तिममुपान्तिमं चानुच्छेदमाधारीकृत्य स्वसखिं प्रति चतुरः प्रश्नान् पृच्छत ।

## ९. अधस्तनगद्यं पठित्वा तदनुवर्तिप्रश्नानुत्तरयत

### विकासाय सञ्चारः

सूचनायाः प्रसारणं सञ्चारशब्देन ज्ञायते । एकत्रघटितायाः घटनायाः नूतनानुसन्धानस्य आविष्कारस्य वा सूचना अन्यस्थानीयजनानां झटिति प्राप्तये प्रयोगार्हो माध्यम एव सञ्चारोऽस्ति । अत एष सूचनामाध्यमस्तु अस्त्येव नवीनज्ञानप्राप्तिसाधनमपि वर्तते । समाजस्य समग्रराष्ट्रस्य च विकासाय सञ्चारोऽत्यन्तमुपयोगी वर्तते । विकासो नाम व्यक्तेः समाजस्य देशस्य च रचनात्मकं परिवर्तनमस्ति ।

शैक्षिकार्थिकसामाजिकभौतिकादिक्षेत्रेषु तथा विज्ञानप्रविधौ च जायमाना प्रगतिर्देशस्य समृद्धिं प्रदर्शयति । एतादृश्याः समृद्ध्याः मूलं साधनं सञ्चार एवास्ति । सञ्चारः सूचनाप्रवाहेण व्यक्तिं सुसूचयति । सुसूचिता जनाः स्वाधिकारे स्वकर्तव्ये च सचेतसः संलग्नाश्च जायन्ते । ततः क्रमशः समाजविकासस्य द्वाराणि उद्घाटितानि भवन्ति । एतदर्थं सञ्चारो विकासस्य सर्वोत्तमं सर्वोपयोगि च साधनं मन्यते ।

विज्ञानप्रविधिक्षेत्रे समागतायाः सार्थकोपलब्ध्या वर्तमाने युगे सञ्चारस्य अपूर्वविकासो जातः । सञ्चारप्रविधौ सन्दृष्टा व्यापकता विराटता च वर्तमानं विश्वसमाजं लघिमानं कुर्वन्ती विद्यते । सञ्चारप्रयोगात् प्रत्येकं व्यक्तिसमाजदेशा मिथः सन्निकटा जायमानाः सन्ति । एतेन समयसुरक्षा, कार्यगततीव्रता, विश्वसनीयता इत्यादयो लाभाश्च प्राप्यन्ते । मिथो विचारविनिमयं सम्बन्धसहयोगादिं च वर्धयित्वा संसारमेकास्यां मालायां ग्रथितुं सञ्चारः समर्थो दृश्यते । सम्प्रति सञ्चारसंसाधनस्य प्रयोक्तार एधमानाः सन्ति । एतेन सञ्चारस्य महत्त्वं स्फुटीभवति । आधुनिकं जगत् सञ्चारं विना विकसितं न भवति; पूर्णतां च न प्राप्नोति । अतः सर्वे देशाः सञ्चारस्याधिकतरं प्रयोगं विधाय स्वदेशस्य द्रुतविकासाय केन्द्रिता दरीदृश्यन्ते । उद्योगव्यापारकृषिवाणिज्यशिक्षादिक्षेत्रस्य परराष्ट्रसम्बन्धस्य सुदृढीकरणाय विकासाय विस्ताराय च सञ्चारस्य स्तुत्या भूमिका वर्तते । संसारे सञ्चारस्य वर्धमानं प्रयोगं प्रभावमुपयोगितां च विलोक्य सहसा अनुमातुं शक्यते यत्, इतः सञ्चारं विना मानवजीवनमपूर्णमस्ति ।

पत्र-निवेदन-पत्रिकाकाशवाणी-दूरदर्शन-दूरभाष-हुलाक-कुरियर-इमेल-इन्टरनेट-फ्याक्सादयः वर्तमानसमाजे प्रचलितानि सञ्चारसाधनानि सन्ति । एतेषु मध्ये बहुशः साधनानि सुसाङ्ख्यसञ्चालितानि भवन्ति । अतो वर्तमानयुगस्य सञ्चारविकासाय विस्ताराय च सुसाङ्ख्यस्य स्थानं महत्त्वपूर्णमस्ति । विश्वस्य सर्वप्राचीनं सर्वविश्वसनीयं च सञ्चारसाधनं तु हुलाक इति मन्यते । देशस्य मानवशक्तिं विकासकार्ये प्रेरयितुं सञ्चारस्य भूमिका महत्त्वपूर्णा भवति । युवजागरणलक्षितं कार्यक्रमं सञ्चाल्य सत्सन्देशं प्रसारयितुं राष्ट्रियैकतां च सम्पादयितुं सञ्चारक्षेत्रस्य कर्तव्यमस्ति । सञ्चारः समग्रदेशवासिनां मार्गदर्शकेन निर्देशकेन च भवितव्यम् । सञ्चारप्रविधेः सत्प्रयोगादेव पाश्चात्त्यदेशा विकसिता अभवन् । तत्तथ्यं हृदि कृत्वा अस्माभिरपि सञ्चारक्षेत्रस्य विकासाय अधिकतरः प्रयासो विधेयः ।

### (अ) अनुच्छेदादनुवर्ति वाक्यद्वयमनुसृत्य प्रश्नानुत्तरयत

एकत्र-घटिताया-घटनाया नूतनानुसन्धानस्य आविष्कारस्य वा सूचना अन्यस्थानीयजनानां झटिति प्राप्तये प्रयोगार्हो माध्यम एव सञ्चारोऽस्ति ।

(क) प्रथमे वाक्ये कर्तृपदं किम् ? तत्र का विभक्तिरस्ति ?

(ख) 'माध्यमः' इत्यस्य विशेषणपदं किम् ?

(ग) वाक्ये कति षष्ठ्यन्तपदानि सन्ति ? कानि च तानि ?

(घ) 'आविष्कारस्य' इत्यस्य धातूपसर्ग-प्रत्यय-प्रातिपदिक-विभक्ति-वचनानि निर्दिशत ।

(ङ) वाक्ये समागतानि अव्ययपदानि कानि ?

(च) 'सञ्चारोऽस्ति' इत्यत्र सन्धिप्रक्रियां सन्धिनाम च निर्दिशत ।

(छ) 'सूचना' इति पदं प्रथमान्तं द्वितीयान्तं वा ?

(ज) 'प्राप्तये' इत्यस्य कारकं विभक्तिं च निर्दिशत ।

(झ) 'अन्यस्थानीयजनानाम्' इत्यस्य विग्रहं पुरस्कृत्य समासनाम च सङ्केतयत ।

(ञ) 'अस्ति' इति क्रियापदं सकर्मकमकर्मकं वा ? निर्दिशत ।

## (आ) एकवाक्येन प्रश्नानुत्तरयत

(क) सञ्चारशब्देन किं ज्ञायते ?

(ख) को नाम विकासः ?

(ग) देशस्य समृद्धिः कथं प्रदर्शिता भवति ?

(घ) सञ्चारः कथं व्यक्तिं सूचयति ?

(ङ) समाजविकासस्य द्वाराणि कथमुद्घाट्यन्ते ?

(च) सञ्चारप्रयोगात् के निकटा जाताः ?

(छ) सर्वे देशाः कुत्र केन्द्रिताः सन्ति ?

(ज) मानवजीवनं सञ्चारं विना कथमपूर्णं प्रतिभाति ?

(झ) सम्प्रति प्रचलितानि सञ्चारसाधनानि कानि ?

(ञ) सञ्चारक्षेत्रस्य कर्तव्यं किमस्ति ?

(झ) सञ्चारस्य दुरुपयोगेन जायामाना काचन एका हानिः का ? लिखत ।

## (इ) सङ्क्षेपेणोत्तरयत

(क) सञ्चारस्योपयोगितां पञ्चभिर्वाक्यैः प्रकाशयत ।

(ख) सञ्चार आधुनिकयुगस्य संवाहको मन्यते । कथम् ? पाठाधारेण तर्कयत ।

(ग) युष्मद्गृहे सञ्चारस्य कानि कानि उपकरणानि सन्ति ? तेषां प्रयोजनानि च कानि ? लिखत ।

(घ) देशविकासाय सञ्चारः कथमुपयोगी ?

(ङ) सञ्चारस्य केषु पञ्च लाभा लेखनीयाः ।

(च) सञ्चारं विना संसारोऽपूर्णः प्रतिभाति । इति कथने तव सम्मतिरसम्मतिर्वा ? कारणं पुरस्कृत्य लिखत ।

(छ) सञ्चारक्षेत्रे सुसाङ्ख्यस्य महत्त्वं वर्णयत ।

(ज) सञ्चारक्षेत्रस्य देशं प्रति कर्तव्यं किं भवेत् ?

(ञ) प्राचीनाधुनिकसञ्चारसाधनस्य वैविध्यं लिखत ।

## लेखनम्

### १. पदानामर्थप्रकाशनेन वाक्ये प्रयोगं प्रदर्शयत

(क) कारकतत्त्वानि (ख) पुरस्कृत्य (ग) केवलम् (घ) कालानन्तरम्

(ङ) देशवासिनः (च) परस्परम् (छ) चिरकालतः (ज) द्रवति

(झ) वैविध्यम् (ञ) सम्पादयितुम् (ट) ततः (ठ) तन्निवारणाय

(ड) सूत्रसम्पदः (ढ) सोल्लासम् (ण) कार्तज्ञभावम् (त) एकाकी

(थ) अन्येषाम् (द) प्रीणयन्ति (ध) सञ्जीवनी (न) राष्ट्रियता

### २. समासं कृत्वा तन्नाम च लिखत

राष्ट्रस्य उन्नतिः, कार्येषु तत्परता, हितम् उन्नतिश्च, सर्वेषु देशेषु, विकासाद् वञ्चिताः, अस्माकं देशः, व्यवहारे सङ्कटः, एकतायाः सूत्रम्, तेषां संस्मरणेन, शत्रूणाम् उत्साहः

### ३. प्रदत्तानां समस्तपदानां सविग्रहमर्थानन्विष्य सारिण्यां प्रदर्शयत

नेपालसञ्जीवनी, राष्ट्रवासिनाम्, कारकतत्त्वानि, ऐक्यभावनया, निखिलविश्वस्य, परमावश्यकी, यच्छ्रान्त्या, बहुविधभूगोलेन, प्रेमराशिः, सर्वकारीयकार्यसञ्चालने, सम्पर्कसम्बन्धौ, एकत्वावलम्बनम्, हिमालयव्यापिनम्, सोत्साहम्, पूर्वजानाम्, विद्वेषविवादविरोधाः

### ४. अविस्तरेण पाठानुकूलमुत्तरं लिखत

(क) केन राष्ट्रोन्नतिः सम्भवति ?

(ख) जनाः कथं सुखमाप्नुवन्ति ?

(ग) राष्ट्रियैकता का ?

(घ) एकता कीदृशं बलमस्ति ?

(ङ) केषु अस्माकं प्रेमराशिर्द्रवति ?

(च) वयं स्वदेशे किं किं कर्तुं शक्नुमः ?

(छ) कुत्र भिन्नानि स्वरूपाणि वैशिष्ट्यानि च विलोक्यन्ते ?

(ज) कीदृश्यो भाषाः सर्वकारीयकार्यसञ्चालने प्रयुज्यन्ते ?

(झ) एकतासूत्रेऽस्मान् को निबध्नाति ?

(ञ) उत्सवाः पर्वणश्च किं कुर्वन्ति ?

(ट) केषां कार्याणि अस्मान् प्रेरयन्ति ?

(ठ) सहायता कुत्र सुदुर्लभा ?

(ङ) राष्ट्रवासिनः कदा विनश्यन्ति ?

(ढ) कीदृशा जना राष्ट्रियैकतां न विकारयन्ति ?

५. **अधस्तनप्रश्नान् नातिविस्तरेणोत्तरयत**

(क) राष्ट्रियैकतायाः को लाभः ?

(ख) देशेषु एकता किमर्थमपेक्ष्यते ?

(ग) विद्यमानानेकत्वो देशः कीदृशीं क्षतिं लभते ?

(घ) सर्वजनबोध्या भाषा का ? तस्याः का आवश्यकता ?

(ङ) एकाकी स्वल्पमपि कार्यं कर्तुं न शक्यते इति युधिष्ठिरकथने तव विचारः कः ? विशदीकुरुत ।

६. **राष्ट्रियैकतां विना देशस्य शान्तिविकासौ न सम्भवतः । पुष्टिं कुरुत ।**

७. **लट्लकारस्य क्रियापदानि लङ्लकारे परिवर्त्य पाठस्य प्रथमानुच्छेदस्य पुनर्लेखनं कुरुत ।**

८. **प्रबन्धलेखने केषां तत्त्वानामावश्यकता भवति ? एतस्य संरचना च कीदृशी भवति ? विवेचयत ।**

९. **तृतीयांशे पञ्चमानुच्छेदस्य सारांशं लिखत ।**

१०. **'वन्यसम्पदः' इति विषयेऽनुच्छेदमेकं रचयत ।**

११. **राष्ट्रियैकतैव सर्वेषां हितसाधिकास्ति इति कथनस्य भावं विस्तारयत ।**

१२. **'राष्ट्रियैकता जनमनसि सदा जीविता भवति' इत्यस्याभिप्रायं प्रकाशयत ।**

१३. **पाठे प्रदत्तस्य पद्यस्य सरलार्थं नेपालीभाषायां लिखत ।**

१४. **'मम कल्पनाया नेपालः' इति विषये प्रबन्धं लिखत ।**

१५. **संस्कृतेऽनुवादं कुरुत**

हामी यो देशका भविष्य हौँ । हामी नै सम्पूर्ण नेपालीलाई शान्ति र समृद्धि प्रदान गर्ने छौँ । यो देश हाम्रो प्राण हो । देश नै नरहे हाम्रो अस्तित्व कसरी रहला ? त्यसैले देशको सुरक्षा र विकास हाम्रो पहिलो कर्तव्य हो । हाम्रो प्रयासले नै यो देशको गरिमा उच्च हुन्छ र पुर्खाको बलिदान सार्थक हुन्छ । त्यसैले राष्ट्रनिर्माणको महायज्ञमा हामी सबैले एक भएर कार्य गरौँ ।

१६. **नेपालीभाषायामनुवादं कुरुत**

नेपालेऽपि राष्ट्रियैकताऽपरिहार्या वेविद्यते । इह चिराय राष्ट्रियैकताया बहव आधारा विराजमानाः सन्ति । एतानेवाधृत्य देशोऽयं प्रतिष्ठितो वर्तते । वयं नेपालिनां रूपेण विश्वस्मिन्

विश्वेऽन्तरराष्ट्रियसंस्थासु मञ्चेषु च सुपरिचिताः स्मः। एभिरेवाधारैर्नेपालश्चिरकालतः सबलः स्वतन्त्रश्च वर्तते।

## १७. प्रदत्तसूत्राण्याधृत्य नातिदीर्घं प्रबन्धं विरचय्य यथोचितं शीर्षकं दत्त

नारीणां सर्वतोहिताय दीयमाना शिक्षा नारीशिक्षा

सैद्धान्तिकं व्यावहारिकं च ज्ञानं वर्तमाननारीणामत्यावश्यकम्

सम्प्रत्यपि शिक्षाया अभावेन कतिपयनारीणां जीवनं पुरुषाश्रितम्

नारीपुरुषौ रथचक्रवत् समानौ

अशिक्षिता नार्यः संसाररथचालनेऽसमर्थाः

स्वावलम्बिजीवनाय नारीणां शिक्षा आवश्यकी

प्राचीनकाले स्त्रीशिक्षा अनिवार्या

वैदिककाले पुरुषवत् नार्यः शिक्षिताः

मैत्रेयीगार्गीप्रभृतयो नार्यः शास्त्रार्थे प्रवीणाः

आधुनिककाले स्त्रीशिक्षा ततोऽपि महत्त्वपूर्णा

शिक्षिता नारी पुरुषतुल्यसमर्था कर्तव्याकर्तव्यविज्ञा च

शिक्षितपरिवारनिर्माणाय मात्रा शिक्षितया भवितव्यम्

कुलसमाजदेशविकासाय नारीशिक्षा अत्यावश्यकी

शिक्षिता नार्यो राज्यस्य विशिष्टपदेषु सम्प्रति आसीनाः

सुशिक्षिता नारी सर्वत्र पूज्या

## अनुप्रयुक्तव्याकरणम्

### कृदन्तप्रयोगः - शतृ/शानच्प्रत्ययान्तः

## १. वाक्यानि पठित्वा अधस्तनकार्यकलापान् कुरुत

- अनुजो गीतां <u>पठन्</u>नस्ति। अनुजा गीतां <u>पठन्ती</u> वर्तते। मित्रं गीतां <u>पठद</u>स्ति।
- गीतां पठतेऽनुजाय भोजनं ददातु।
- भो गुरवः! अद्य पठ्यमानः पाठः कः?
- सम्प्रति एधमानेन सङ्क्रामकेण रोगेण जनाः पीडिताः सन्ति।
- विद्यमानायामवस्थायां सर्वैः सावधानतया स्थातव्यम्।
- मया क्रीडन्तो बालका दृष्टाः।

- भवान् तत्र क्रीडतीर्बालिकाः पश्यतु ।
- उद्यमं <u>कुर्वाणो</u> जनः कदापि न खिद्यति ।
- अद्यैव क्रियमाणानि कार्याणि बहूनि सन्ति ।
- बालश्चलचित्रं पश्यन् गृहकार्यं करोति ।
- सा गोषु दुह्यमानासु गतवती ।
- विद्यालये वेदमधीयानाश्छात्राः कति सन्ति ?
- भोजनं कुर्वता जनेन वार्तालापो न कर्तव्यः ।
- मातुलो धावतोऽश्वादपतत् ।
- नर्तकी गीतं शृण्वन्ती नृत्यन्ती वर्तते ।
- माता पचन्तं/पचमानं पुत्रं प्रैरिरत् ।
- शयानान् बालान् न आह्वयतु ।
- प्रधानमन्त्रिणः पदे आसीनो जनः सम्माननीयो भवति ।
- जनेषु भेदभावे क्रियमाणे समाजे कलहो जायते ।
- दुर्भिक्षे जायमाने जनाः स्वग्रामात् पलायन्ते ।
- सम्यक् पठिते सति परीक्षायाः का चिन्ता ?
- श्वः करिष्यतां/करिष्यमाणानां कार्याणां सूचीमद्यैव निर्मात ।

(क) वाक्येषु रेखाङ्कितपदानां धातु-प्रत्ययौ निर्दिशत ।

(ख) रेखाङ्कितपदानि तद्विशेष्यपदैः सह मेलयित्वा सारिण्यां दर्शयत ।

(ग) रेखाङ्कितेषु कर्मणि भावे वा प्रयुक्तानि पदानि कानि ?

(घ) रेखाङ्कितपदानामर्थं लिखत ।

(ङ) शतृ-शानच्प्रत्ययौ धातोः कस्मिन्नर्थे भवतः ?

(च) शतृ-शानचौ कयोर्लकारयोः स्थाने विधीयेते ?

(छ) कीदृशाद्धातोः शतृप्रत्ययः कीदृशाच्च शानच्प्रत्ययः विधातव्यः ?

(ज) कर्मणि भावे वा प्रयोगे धातुभ्यः शतृशानचोः को विधेयः ?

(झ) पचत्-पचमानशब्दयोः त्रिषु लिङ्गेषु रूपाणि विलिखत ।

(ञ) प्रदत्तवाक्यानां वचनानन्तरं विधाय पुनर्लेखनं कुरुत ।

२. **प्रदत्तास्ववस्थासु जायमानानि प्रातिपदिकानि निर्दिश्य त्रिषु लिङ्गेषु तन्निष्पन्नस्य एकैकस्य पदस्य वाक्ये प्रयोगकौशलं प्रदर्शयत ।**

अस् + लट्(शतृ), वृत् + लट्(शानच्), गम् + यक् + शानच्, रच् + लट्(शतृ), भुज् + लट्(शानच्), आ + रभ् + लट्(शानच्), ज्ञा + लट्(शतृ), ब्रू + लट्(शानच्), पा + लृट्(शतृ), मृ + लट्(शतृ), भास् + लृट्(शानच्), मन् + लट्(शानच्), वि + धा + यक् + शानच्, छिद् + लट्(शतृ), श्रु + लट्(शतृ), गम् + णिच् + लट् (शतृ), स्था + णिच् + लट्(शतृ) ।

३. **अधस्तनपदानि स्त्रीलिङ्गे परिवर्त्य वाक्यानि रचयत**

श्रूयमाणः, धावन्, इच्छन्तः, क्रीडता, आरोहन्तौ, जिघ्रन्, रोचमानाः, सेवमानम्, जायमानान्, नयमानस्य, शयाने, यतमानाय, ददत्, उह्यमानः, दापयन्, अधीयानानाम्, दीव्यद्भिः, गच्छत्सु, करिष्यन् ।

४. **कृ-धातोर्लटि शत्रादेशे शानजादेशे च निष्पन्नप्रातिपदिकयोः त्रिषु लिङ्गेषु रूपाणि लिखत ।**

५. **अधस्तनपदानां कर्मणि रूपं विलिख्य उभयोर्वाक्येषु योजयत**

गच्छन्, हनन्, बध्नन्, पाठयन्, लभमानः, सेवमानः, भुञ्जानः, वहन् ।

६. **पाठं पठित्वा शतृ/शानजन्तानि पदानि रेखाङ्कितानि कृत्वा तद्विशेष्यपदानामन्वेषणं विदधत ।**

## समासप्रयोगः

१. **वाक्यानि पठित्वा सङ्केतितानां पदानां विग्रहं प्रदर्शयत**

- अस्माकं देशे अद्याप्यप्राप्तोदका ग्रामा बहवो विद्यन्ते ।
- पीताम्बरो विष्णुर्जगतः कर्ता वर्तते ।
- कण्ठेकालः शिवः सृष्टे रक्षायै विषं पीतवान् ।
- वीरपुरुषे ग्रामे सर्वे सुरक्षिता भवन्ति ।
- कृतविद्यो जनः श्रिया हीनोऽपि प्रकाशते ।
- मकरेण गृहीतपादः शङ्कराचार्यः सन्न्यासदीक्षायै अनुमतये मातरमन्वरुणत् ।

२. **पदानि प्रयुज्य वाक्यानि रचयत**

अधीतसंस्कृतः, दत्तभोजनम्, युक्तयोगः, ऊढरथः, नीलाम्बरः, कृतकटः, कृतनिश्चयः, अग्रेसरः ।

३. **अधस्तनपदानां विग्रहं प्रदर्श्य प्रत्येकमेकैकं विशेष्यपदानि च योजयत**

गृहीतकरः, प्राप्तोदकः, कृतकृत्यः, वीरपुरुषः, लम्बोदरः, श्वेताम्बरः, कृतसङ्कल्पः, द्विमूर्धः, सुपात्, सुहृद्, पूर्णकाकुदः ।

**४. प्रदत्तेषु विग्रहेषु समासेन निष्पन्नपदानि विलिख्य तेषां वक्ये प्रयोगकौशलञ्च प्रदर्शयत**

किशोरी भार्या यस्य सः, दत्ता दक्षिणा यस्मै सः, उधृतम् ओदनं यस्याः, उपहृतः पशुर्यस्मै, अविद्यमानः पुत्रो यस्य, चित्रा गावो यस्य, रूपवती भार्या यस्य, जलजे इव अक्षिणी यस्याः, स्त्री प्रमाणी यस्य, त्रयो मूर्धानो यस्य, दीर्घे सक्थिनी यस्याः, व्यूढमुरो यस्य ।

**५. संस्कृतभाषापुस्तकस्थपाठेषु प्रयुक्तानि बहुव्रीहिसमासनिष्पन्नपदान्यन्विष्य तेषां विग्रहान् पर्यायाँश्च निदर्शयत ।**

## तद्धितान्तप्रयोगः

**१. अधस्तनवाक्येषु प्रयुक्तानि तद्धितान्तपदानि रेखाङ्कितानि विधाय तेषां व्युत्पत्तिं प्रदर्शयत**

- अस्माकं सामाजिकी परम्परा दीर्घतमा विद्यते ।
- सर्वे जना धार्मिका भूयासुः ।
- मम पित्रे दाधिकं व्यञ्जनं रोचते ।
- धानुष्कः पार्थो धानुष्कं कर्णं बाणेन जघान ।
- क्षये धर्मे आधर्मिकाः कार्यकलापा वर्धन्ते ।
- शेषकार्याणि पूर्ववत् सम्पादयत ।
- नैकटिकानि मित्राणि मम साफल्याय प्रार्थयन्ते ।
- अस्माभिः स्वकर्तव्ये सदैव दृढता प्रदर्शनीया ।
- लुप्ते मानवत्वे मानवाः पशुवदाचरन्ति ।
- दुर्जनेन समं सख्यं वैरञ्चापि न कारयेत् ।
- सभ्याः सदैव सत्यं वदन्ति ।
- पूर्णिमायां चन्द्रस्य शौक्ल्यं शोभते ।
- नकुलश्चतुर्थः पाण्डवो बभूव ।
- वयं द्वादश्यां कक्षायां पठामः ।
- दशावतारेषु परशुरामः षष्ठो वर्तते ।

**२. अधस्तनपदानां वाक्ये प्रयोगं दर्शयत**

सप्तमी, नवमः, नैकटिकः, सभ्यः, एकत्वम्, ब्राह्मणवत्, हास्तिकः, सामाजिकः, नैतिकम्, मासिकी, पल्लवितः, सख्यम्, औडुपिकः, गोता, पुंस्त्वम्, तारकितम्, द्वितयम्, तृतीयः ।

३. **अधस्तनपदानां व्युत्पत्तिं प्रदर्शयत**

पशुत्वम्, पुष्पितः, मनुष्यवत्, आर्थिकः, सभ्यः, द्रव्यत्वम्, मानवता, सुन्दरता, शौक्ल्यम्, सौन्दर्यम्, दाढर्यम्, द्रव्यवत्, देवत्वम्, आधर्मिकः, पञ्चमः, प्रथमः, पुंस्ता ।

४. **प्रदत्तास्ववस्थासु निष्पन्नपदानामर्थं विलिख्य वाक्येषु तत्प्रयोगं दर्शयत**

असि + ठक्, पृथिवी + अञ्, उडुप + ठक्, कृष्ण + ष्यञ्, मित्र + तल्, सखि + य, फल + इतच्, पण्डा + इतच्, मातृ + त्वल्, त्रि + तीयः, गो + तल् ।

५. **सामाजिक-शब्दस्य त्रिषु लिङ्गेषु रूपाणि लिखत ।**

६. **ठक्-तल्-वतिप्रत्ययान्तपदानां प्रयोगमेकस्मिन्ननुच्छेदे प्रदर्शयत ।**

७. **संस्कृतभाषाव्याकरणपाठ्यपुस्तकस्य भाषाखण्डस्थपाठेषु प्रयुक्तानां तद्धितान्तपदानामन्वेषणं विधाय तेषां पदार्थ-प्रकृति-प्रत्ययान् सारिण्यां दर्शयत ।**

# समाना वृत्तिः समाना दृष्टिः

कदाचित् कुरुदेशे घनोत्पलानां भीषणवर्षाभिः फुल्लायमानमन्नं विनष्टं भयानकं दुर्भिक्षञ्च सृष्टम् । तेन पीडिता जनाः स्वदेशं परित्यज्य दूरदेशं पलायिता अभवन् । चक्रस्य पुत्रः किशोरभार्य उषस्तिरपि आटकीनाम्नीं पत्नीं सहैव नीत्वा स्वस्थानमत्यजत् । इतस्ततो भ्रान्तौ दम्पती कञ्चन ग्रामं प्राप्तौ । तत्र एको हस्तिचालको निवसति स्म । बुभुक्षया मरणासन्न उषस्तिर्हस्तिचालकं ददर्श । हस्तिचालको माषं भुञ्जान आसीत् । उषस्तिस्तं माषमभ्ययाचत । हस्तिचालकोऽवदत्, "अहमेतस्मिन् पात्रे स्थापितं माषं खादन्नस्मि; एतदुच्छिष्टं वर्तते । एतद् विहाय मम पार्श्वे माषस्य लेशोऽपि नास्ति । कुत आनीय तुभ्यं दातुं शक्नोमि ? क्षम्यताम् ।"

हस्तिचालकस्य वचनं श्रुत्वा खिन्नमानस उषस्तिः प्रत्युवाच, "मह्यं तत एव ईषद्देहि, नान्यद् याचे ।" हस्तिचालकस्तत एव स्वल्पं माषमुषस्तयेऽदात् । स जलञ्च दत्त्वा निजगाद, "गृहाण, माषं भुक्त्वा एतच्च पिब ।" हस्तिचालकस्य सौहृदेनौदार्येण चात्यन्तं पुलकित उषस्तिरवदत्, "तृप्तोऽस्मि मित्र ! करुणया । परमहं जलमिदं न पिबामि । यदि पिबामि तर्हि परोच्छिष्टभोजनस्य दोषभाग्भविष्यामि ।" उषस्तेर्वचनेनाश्चर्यचकितो हस्तिचालकः प्रावोचत्, "मया दत्तं माषम् अभुङ्क्थाः, किं तदुच्छिष्टं नासीत् ? इदानीमुच्छिष्टे जले कोऽस्ति दोषः ?"

हस्तिचालकस्य संशयं शमयन् उषस्तिरुवाच, "तन्न मित्र ! यदि माषं न अभोक्ष्ये तर्हि प्राणसङ्कटः समभविष्यत् । आपद्धर्मं परिपाल्यैव माषं भुञ्जानोऽस्मि । जलं तु अन्यत्र अपि सौविध्येन मिलति । तद् यथेच्छमन्यत्रापि पातुं शक्नोमि । माषवद् यदि तवोच्छिष्टं जलं पिबामि तदा तत् स्वेच्छया भवति, न त्वापद्धर्माय । तेन तवोच्छिष्टं जलं न पिबामि ।" एवमाभाष्योषस्तिः स्वल्पं माषम् अभुक्त, ईषदवशिष्टं पत्न्यै च अदात् । तस्यै पूर्वमेव किञ्चिद् भोजनं प्राप्तमासीत् । पत्या दत्तं माषं सा न चखाद, केवलं जुगोप ।

अपरेद्युः सम्पादितप्रातःकृत्य उषस्तिः पत्नीमुवाच, "किं करवाणि । यदि स्वल्पमात्रं भोजनं मिलति तर्हि प्राणान् रक्षितुं क्षमो भवामि । यावत् प्राणा रक्ष्यन्ते तावत् किञ्चिद्धनमानेतुं शक्नोमि । नातिदूरे राजयज्ञो जायमानोऽस्ति । राजा ऋत्विजः कार्येषु मां वरीष्यति । तद्धनेन जीवनं सुखेन यास्यति ।" तदाकर्ण्य पत्नी उक्तवती, "मया सह ह्योऽवशिष्टः स्वल्पो माषो वर्तते । अमुं जग्ध्वा शीघ्रं यज्ञाय गच्छतु ।"

अशक्त उषस्तिः स्वल्पं माषं भुक्त्वा शक्तिं समर्ज्य च राजयज्ञं जगाम । तत्र स आस्तवमुपागम्य न्यवसत् । स्तोतारो देवान् स्तुवन्त आसन् । स्तुत्यां बह्वीस्त्रुटीः श्रुत्वा उषस्तिस्स्तोतॄन् उपागच्छदवदच्च, "यं

स्तुथ, कोऽसौ देवः ?; अधिष्ठातुर्ज्ञानेन विना यदि स्तुतिं कुरुथ तर्हि वः शिरः पतिष्यति ।" स उद्गातॄन् सम्बोधयन् प्रत्यादिशत्, "उद्गीथभागस्य देवता अविज्ञायैव उद्गायथ चेन्नूनं शिरःपतनं भवति ।" उषस्तिः प्रतिहारस्य गायकान् उपागम्य एवमेवाब्रवीत्, "प्रतिहारस्य गायका हे प्रतिहर्तारः ! देवता अविज्ञायैव यदि प्रतिहारं कुरुथ तदा शिरोऽधःपतनं निश्चितं जानीथ ।"

उषस्तेर्वचनेन स्तोतारः, उद्गातारः, प्रतिहर्तारश्च चिन्ताकुला अभवन् । सर्वे ऋत्विग्गणाः शिरःपतनभयेन स्व-स्वकार्यं सन्त्यज्य तूष्णीं तस्थुः । ऋत्विग्गणानां दशां दृष्ट्वा विस्मितमानसो राजा जगाद, "भगवन्, कोऽस्ति भवान् ? कृपया परिचयो दीयताम् ।" उषस्तिरुवाच, "हे राजन् ! चक्रस्य पुत्र उषस्तिरेष जनः । दिष्ट्या इदानीं भवन्तमुपागतोऽस्मि । यज्ञञ्च पश्यन्नस्मि ।" सविनयं प्रणम्य राजा अवदत्, "अहो ! भगवन्, भवानेव उषस्तिरिति हर्षस्य विषयः । भवतो गुणगणान् बहु श्रुतवानस्मि । ऋत्विजां कार्याय भवान् सर्वत्र अन्विष्टः परं न कुत्रापि लब्धः । इदानीं मम भाग्यं यदिह भवानेव समागतोऽस्ति । भगवन्, ऋत्विजां सकलानि कार्याणि कृपया भवानेव करोतु ।"

राज्ञः प्रार्थनां क्षणं विचिन्त्य उषस्तिरवोचत्, "भवतु तावत्तथैव । परमिमे ऋत्विजो यज्ञकर्मणो न वञ्चनीया न चापसारणीयाः । मम आज्ञानुसारेण एते स्व-स्वकार्याणि साधु सम्पादयन्तु । राजन् ! एतेभ्यो यावतीर्दक्षिणा दास्यसि मह्यमपि तावतीरेव दातुमर्हति, किमधिकाभिः ? अहमेतान् यज्ञादपसारयितुं नेच्छामि न च दक्षिणासु तदधिकं धनमादाय अवगन्तुमीहे । मम आचार्यत्वेनाज्ञया चैते सकलानि कर्माणि निर्विघ्नं विदधतु ।" लब्धकामा राजा चोषस्तिं यज्ञस्य प्रधानाचार्यत्वेन ववार ।

उषस्तेर्वचनेन स्तोतारः, उद्गातारः, प्रतिहर्तारश्च हर्षमुपजग्मुः । तेषां भयञ्च क्षणेन व्यपगतम् । ऋत्विग्गणा उषस्तिमुपगम्य सविनयं सर्वं यज्ञविधिं शिशिक्षिरे । उषस्तिश्च सर्वाणि कर्माणि प्रशिक्ष्य तैरेव राजयज्ञं पूर्णं चकार ।

## अभ्यासः

### श्रवणं भाषणं च

१. **संस्कृतभाषया मातृभाषया वा श्रुतपूर्वां कथां कक्षायां श्रावयत ।**

२. **सखिमुखाच्छ्रुत्वाऽधस्तनपदानि शुद्धमनूच्चारयत**

ऋत्विग्गणाः, स्तोतारः, उषस्तिः, प्रशिक्ष्य, तूष्णीम्, बह्वीः, प्रातःकृत्य, किशोरभार्यः, क्षम्यताम्, अपरेद्युः ।

३. **वर्णसम्मेलनेन मिलिते पदे पृथक्कृत्य तयोः शुद्धोच्चारणं विधत्त**

फुल्लायमानमन्नम्, स्वस्थानमत्यजत्, अहमेतस्मिन्, माषमुषस्तये, परमहम्, जलमिदम्, इदानीमुच्छिष्टे, यथेच्छमन्यत्र, एवमाभाष्य, प्राप्तमासीत्, पत्नीमुवाच, धनमानेतुम्, आस्तवमुपागम्य, एवमेवाब्रवीत्, श्रुतवानस्मि, भवानेव, परमिमे, मह्यमपि, दातुमर्हति,

किमधिकाभिः, अहमेतान्, धनमादाय, अवमन्तुमीहे, हर्षमुपाजग्मुः, उषस्तिमुपागम्य ।

४. **पदानां ध्यानेनानुच्चारणं विधाय ओष्ठ्यवर्णान् रेखाङ्कितान् कुरुत**

परम्, इमे, उद्गातारः, सम्पादयन्तु, नेच्छामि, भवतु, बहु, अब्रवीत्, बुभुक्षया, फुलायमानम् ।

५. **सन्धिं विच्छेद्य ससन्धि च पदानामुच्चारणेन उभयोर्ध्वनिगतपार्थक्यमनुभवत**

खादन्नस्मि, नास्ति, तवोच्छिष्टम्, बह्वीस्त्रुटीः, अवदच्च, अविज्ञायैव, चेन्नूनम्, शिरोऽधः, ऋत्विग्गणाः, विस्मितमानसो राजा, उषस्तिरेषः, कुत्रापि, समागतोऽस्ति, नेच्छामि, चैते ।

६. **पाठस्य द्वितीयमनुच्छेदं वाचयित्वा कक्षायां श्रावयत ।**

७. **अधस्तनक्रियापदानां धातूपसर्गलकारान् कथयत**

उपजग्मुः, विदधतु, सम्पादयन्तु, उपागच्छत्, प्रावोचत्, निजगाद, अभ्ययाचत, निवसति स्म ।

८. **पाठे प्रत्यक्षकथनत्वेनागतानि वाक्यानि साभिनयं कथयत ।**

९. **'चरित्रनिर्माणम्' इति विषये कक्षायां स्वमतं प्रकटयत ।**

१०. **पाठस्थकथां स्वशब्दैः श्रावयत ।**

११. **पाठस्थकथायाः सन्देशमेकस्मिन् वाक्ये कथयत ।**

१२. **विविधमाध्यमेभ्यश्चरित्रनिर्माणविषयिणीस्तिस्रः सूक्तीरन्विष्य कक्षायां श्रावयत ।**

१३. **उषस्तेश्चारित्रिकवैशिष्ट्यं पाठाधारेण कथयत ।**

## पठनम्

१. **पाठस्य प्रथमानुच्छेदं लेख्यचिह्नानां परिपालनेन सस्वरं पठत ।**

२. **पाठस्योपन्तिममनुच्छेदं प्रवाहपूर्वकं पठित्वा विशेषणपदानि विशेष्यपदैस्सह चिह्नीकुरुत ।**

३. **पाठस्य पञ्चमानुच्छेदस्यानेकवारं द्रुतपठनं विधाय प्रतिवारं पठनगतिवर्धनाभ्यासं कुरुत ।**

४. **पाठस्य मौनपठनेनाज्ञातार्थानि पदानि सङ्कलय्य तेषां पाठगतसन्दर्भानुकूलार्थान्वेषणाय प्रयतध्वम् ।**

५. **पाठं पठित्वा समस्तानि सन्धियुतानि च पदानि सङ्कलयत ।**

६. **पाठस्यान्तिमस्यानुच्छेदस्य मौनपठनं विधाय अधस्तनप्रश्नानुत्तरयत**

(क) कस्य वचनेन स्तोत्रादयो हर्षमुपजग्मुः ?

(ख) स्तोत्रादीनां भयं केन कथं व्यपगतम् ?

(ग) ऋत्विग्गणाः कथं यज्ञविधिं शिशिक्षिरे ?

(घ) उषस्तिः कान् किं प्रशिक्षयाञ्चकार ?

(ङ) राजयज्ञः कथं पूर्णतां ययौ ?

(च) 'उद्गातारः' इति पदस्य वचननिर्देशं कुरुत ।

(छ) 'चकार' इति क्रियापदस्य धातुं लकारं कालञ्च निर्दिशत ।

(ज) 'तैरेव' इत्यत्र द्वितीयं पदं किम् ?

(झ) 'सर्वाणि' इति कस्य विशेषणपदमत्र प्रयुक्तम् ?

(ञ) 'उपजग्मुः' इति क्रियापदस्य कर्तृपदानि कानि ?

**७. अस्मिन् पाठे कति पात्राणि सन्ति ? तेषां नामानि लिखत ।**

**८. पाठतः कृदन्तानि तद्धितान्तानि च पदानि अन्विष्य लिखत ।**

**९. प्रदत्तगद्यमाधृत्य अधस्तनप्रश्नानामुत्तरं वदत ।**

## धैर्यधारणम्

विवेकानन्दो रामकृष्णपरमहंसस्य शिष्येषु प्रमुख आसीत् । पूर्वं तदीयं नाम नरेन्द्रनाथ आसीत् । गुरुवर्यस्य रामकृष्णस्य दिवङ्गतेरनन्तरं । स्वकीयगुरोः सन्देशान् प्रसारयितुं विवेकानन्द एकवारं देशाटनं व्यदधात् ।

कदाचित् स वाराणसीनगरे निर्जनेन पथा कुत्रचिद् गच्छन्नासीत् । तदा केषाञ्चन धृष्टानां वानराणां गणस्तमन्वसरत् । स गमनवेगमवर्धयत् । वानरा अपि वेगेनैव तमनुसृतवन्तः । यदा स धावितुमारब्धवान् । तेऽपि तमन्वधावन् । विवेकानन्दवानरगणयोर्मध्ये स्वल्पमेवान्तरमवशिष्टमभवत् । तावता मार्गपार्श्वे स्थितः कश्चन साधुरुच्चैरवदत्, "मा पलायस्व । तान् दुष्टान् सम्मुखीकुरुष्व" इति ।

साधोर्वचनं श्रुत्वा विवेकानन्दस्तत्रैवातिष्ठत्, वानरास्तस्य समीपमागताः । विवेकानन्दो धैर्येण तान् तीक्ष्णदृष्ट्याऽपश्यत् । एतस्मात् ते सर्वे वानराः क्षणादेव भीतास्ततः पलायितवन्तः ।

न्यूयोर्कनगरे एतामेव घटनामुदाहरन् स्वामी विवेकानन्द उपादिशत् - "मया तत्रोत्तमः पाठः पठितः, अपायो धैर्येण सम्मुखीकरणीयः । ते वानरा अस्माकं समस्या इव सन्ति । वयं समस्याभ्यो भीताः सन्तो यावत् पलायेमहि तावत् समस्या द्रुततरमस्माननुसरन्ति । समस्याभ्यो विजयप्राप्तये अस्माभिर्धैर्यं तावत् प्रथमं धारणीयम् । धैर्येण समस्याः सम्मुखीकर्तव्याः । धीर एव सम्यग् जीवति । कापुरुषः किमपि कर्तुं न शक्नोति ।"

अतो यावत् समस्या आपतिता न सन्ति तावदेव ताभ्यो भीतवद् व्यवहारः करणीयः । समस्या न आगच्छेयुस्तथा व्यवहारः कर्तव्यः । किन्तु यदा समस्या आपतितास्तदा निर्भयं तेषां समाधानाय यतनीयम् । समस्याभ्यः पलायनं सर्वथा नोचितम् । अत एव नीतौ उक्तम् -

**भीतवत् संविधातव्यं यावद् भयमनागतम् ।**

**आगतं तु भयं दृष्ट्वा प्रहर्तव्यमभीतवत् ॥ इति ।**

## (क) अनुच्छेदस्याधस्तनं वाक्यं पठित्वा प्रश्नानुत्तरयत

**कदाचित् स वाराणसीनगरे निर्जनेन पथा कुत्रचिद् गच्छन्नासीत् ।**

(अ) अस्मिन् वाक्ये कर्तृपदं किम् ? लिखत ।

(आ) वाराणसीनगरे, निर्जनेन, गच्छन् एतेषां पदानां लिङ्ग-वचन-विभक्तीर्निर्दिशत ।

(इ) वाक्यत एकं विशेषणपदमेकं च क्रियापदमन्विष्य लिखत ।

(ई) 'गच्छन्नासीत्' इत्यस्य सन्धिविच्छेदं विधाय लिखत ।

(उ) 'आसीत्' इत्यस्य धातु-लकार-पुरुष-वचनानि निर्दिशत ।

(ऊ) शिक्षकस्य साहाय्येन निर्जनशब्दस्य विग्रहवाक्यं लिखत ।

## (ख) एकवाक्येनोत्तरं लिखत

(अ) विवेकानन्दः कस्य शिष्य आसीत् ?

(आ) विवेकानन्दस्य नाम पूर्वं किमासीत् ?

(इ) मार्गपार्श्वे कः स्थित आसीत् ?

(ई) विवेकानन्दः कुत्र उपदेशं कुर्वाण आसीत् ?

(उ) समस्याभ्यो विजयप्राप्तये किं धारणीयम् ?

## (ग) सङ्क्षिप्तमुत्तरं लिखत

(अ) विवेकानन्दः क आसीत् ? स किमर्थं देशाटनं चकार ?

(आ) देशाटनसमये किमभवत् ?

(इ) समस्यानां समाधानाय किं कर्तव्यम् ?

(ई) अस्यानुच्छेदस्य सारांशं मातृभाषया वर्णयत ।

(उ) अनुच्छेदतः प्रथमाबहुवचनान्तानि पदान्यन्विष्य तानि वाक्येषु योजयत ।

(ऊ) समस्यासमाधानाय के उपाया विधेयाः ? विमृशत ।

(ए) पूर्वश्रुतं कस्यचन महापुरुषस्यैकं प्रेरकप्रसङ्गं वदत ।

## (घ) 'धैर्यधारणम्' इत्यस्मिन् विषयेऽनुच्छेदमेकं लिखत ।

## लेखनम्

१. **शब्दकोशस्य शिक्षकस्य वा साहाय्येन अधस्तनपदानां अर्थानन्विष्य लिखत**

भीषणवर्षाभिः, फुल्लायमानम्, दुर्भिक्षम्, हस्तिचालकः, उच्छिष्टम्, निजगाद, औदार्यम्, अभुङ्क्ष्वाः, प्राणसङ्कटः, नातिदूरे, न्यवसत्, प्रत्यादिशत्, चिन्ताकुलाः, ऋत्विजाम्, अपसारणीयाः, हर्षम् उपाजग्मुः

२. **अधस्तनपदानां प्रयोगं विधाय ललितमेकमनुच्छेदं रचयत**

कदाचित्, परित्यज्य, दम्पती, बुभुक्षया, विहाय, खिन्नमानसः, करुणया, शक्नोमि, अपरेद्युः ।

३. **पाठे प्रयुक्तानि दश भूतकालिकक्रियापदानि लिखत ।**

४. **अतिसङ्क्षेपेणोत्तरं लिखत**

(क) दुर्भिक्षस्य कारणं किम् ?
(ख) उषस्तिः कस्य पुत्र आसीत् ?
(ग) बुभुक्षया मरणासन्न उषस्तिः किं ददर्श ?
(घ) हस्तिचालकस्य कीदृशेन व्यवहारेणोषस्तिः पुलकितः ?
(ङ) नातिदूरे को यज्ञः सञ्चाल्यमानोऽस्ति ?
(च) शिरःपतनं कथं भविष्यति ?
(छ) कस्मै कार्याय राजा उषस्तेरन्वेषणं चकार ?

५. **अधस्तनप्रश्नान् नातिविस्तरेणोत्तरयत**

(क) उषस्तिः किमर्थं कुरुदेशं विहायान्यत्र गतः ?
(ख) माषं याचमानं उषस्तिं हस्तिचालकः किमवदत् ?
(ग) उषस्तिरुच्छिष्टं माषमभुक्त, उच्छिष्टं जलं नापिबदित्यत्र किं कारणम् ?
(घ) उषस्तिः किमर्थं राजयज्ञं गन्तुकामोऽभवत् ?
(ङ) राजयज्ञे किं किं जायमानमासीत् ?
(च) ऋत्विग्गणाः किमर्थं स्वीयानि कार्याणि विहाय तूष्णीं तस्थुः ?
(छ) उषस्तिरेष इति ज्ञात्वा राजा किमवदत् ?
(ज) राज्ञः प्रार्थनां श्रुतवानुषस्तिः किमवोचत् ?

६. **कथाधारेण उषस्तिचरितं वर्णयत ।**

७. **अधस्तनं पद्यं पठित्वा तदनुवर्तिप्रश्नान् उत्तरयत**

नोच्छिष्टं कस्यचिद् दद्यान्नाद्याच्चैव तथान्तरा ।

न चैवात्यशनं कुर्यान्न चोच्छिष्टः क्वचिद् व्रजेत् ॥

## प्रश्नाः

(क) अस्य पद्यस्य चतुर्णां पादानां पदक्रमविन्यासं मेलयित्वा वाक्यानि लिखत ।

(ख) उपर्युक्तं पद्यं किं निर्दिशति ? द्वित्रैर्वाक्यैर्विवेचयत ।

(ग) एतस्य पद्यस्य पाठगतकथायाः सन्देशेन सह सम्बन्धो वर्तते न वा ? लिखत ।

**८. पाठगतकथायां पात्राणि कति सन्ति ? तेषां नामानि लिखत ।**

**९. पञ्चममनुच्छेदं पठित्वा उत्तराणि लिखत**

(क) राजयज्ञे स्तोतारः किं कार्यं कुर्वन्ति ?

(ख) राजयज्ञे ये उद्गायन्ति ते केन नाम्ना उच्यन्ते ?

(ग) प्रतिहारस्य गायकानां किं नाम भवति ?

**१०. उच्छिष्टभोजनमुचितमनुचितं वा ? विमृश्य अनुच्छेदेनैकेन निष्कर्षं लिखत ।**

**११. पाठानुसारं हस्तिचालकस्य चरित्रगतं वैशिष्ट्यं प्रकाशयत ।**

**१२. पाठस्यास्य कः सन्देशः ? नातिविस्तरेण वर्णयत ।**

**१३. अधस्तनसङ्केतानाधृत्य कथामेकां विरचय्य शीर्षकम् अपि लिखत**

कश्चन एको ग्रामः..., तत्र एकः पुरुषः..., तस्य ज्ञानप्राप्तेरिच्छा..., ग्रामान्निर्गमनम्..., ग्रामाद् बहिरेको वटवृक्षः..., वटवृक्षस्य छायायामेकः साधुः..., तेन सह ज्ञानप्राप्तये किं कर्तव्यमिति प्रश्नः..., वाराणसी-वृन्दावनादितीर्थेषु भ्रमणाय, बहूनां गुरूणां सेवायै, देशाटनाय चानुरोधः..., मार्गस्यचोपदेशः ।

द्वादशवर्षेभ्यः पश्चात् पुनः पुरुषस्य तत्रैवागमनम्..., साधुस्तत्रैव तपस्यायां लीनः..., तस्य दर्शनेन पुरुषस्चकितः..., साधोर्ज्ञानोपदेशः..., 'पूर्वमेव कथं ज्ञानं नोपदिष्टवान्' इति तस्य प्रश्नः..., पूर्वं तव शुद्धं चित्तं नासीत्..., उपदिष्टेऽपि ज्ञाने विश्वासो न जायेत..., अधुना तीर्थाटनेन, गुरुसेवया, देशाटनेन च तव चित्तं शुद्धम्..., त्वं ज्ञानस्याधिकारी वर्तसे इति साधूपदेशः..., साधनया विना ज्ञानं न लभ्यत इति सन्देशः ।

**१४. संस्कृतेऽनुवादं कुरुत**

(क) जुठो खानाले रोग लाग्छ, त्यसैले जुठो खानु हुँदैन ।

(ख) जीवनरक्षा मानव जीवनको मुख्य कर्तव्य हो ।

(ग) जीवनको रक्षा भए मात्र अरू काम गर्न सकिन्छ ।

(घ) प्राण नै रक्षा गर्नुपर्ने अवस्थामा जुठो खाँदा चाहिँ दोष लाग्दैन ।

(ङ) प्राण रक्षा गर्नका लागि शुद्ध आहार र योगाभ्यास गर्नुपर्छ ।

## १५. नेपालीभाषायामनुवादं कुरुत

संसारे सर्वेषां जीवानां प्राणात् प्रियतरं किम् अपि नास्ति। तस्माद् यथा अस्माकं प्राणास्तथैवान्येषामपि प्राणिनां भवतीति विचारणीयम्। सर्वेषु प्राणिषु दयाभावेन व्यवहारः करणीयः। प्राणानां रक्षायै पौष्टिकाहारविहारयोः कृते पर्यावरणस्य स्वच्छतायै च यत्नः करणीयः। तस्मादस्माकं संस्कृतौ आहारविहारयोः शुद्धताया विषयो, पर्यावरणस्य रक्षणविषये च विशेषेण चर्चा विहिताऽस्ति।

## १६. लोकश्रुतिं कल्पनां वाधृत्य नातिदीर्घामेकां कथां लिखत।

## अनुप्रयुक्तव्याकरणम्

### कृदन्तप्रयोगः - क्त्वा/ल्यप्-तुमुन्नन्तः

## १. अधस्तनवाक्यानि पठित्वा यथानिर्देशं कुरुत

- छात्रो रात्रौ शीघ्रं गृहकार्यं **समाप्य** दुग्धं **पीत्वा** शेते।
- वयं प्रतिदिनं गुरून् **प्रणम्य** कक्षारम्भं कुर्मः।
- दुर्भिक्षेण पीडिता जनाः स्वदेशं **परित्यज्य** दूरदेशं पलायिता बभूवुः।
- उषस्तिः पत्नीं **नीत्वा** स्वस्थानमत्यजत्।
- उषस्ति**तत्र**र्त्विजः **प्रशिक्ष्य** राजयज्ञं पूर्णं चकार।
- उषस्तिः स्वल्पं माषं **जग्ध्वा** शक्तिं **समर्ज्य** अर्थोपार्जनाय जगाम।
- यज्ञे सम्बद्धदेवता**विज्ञायैव** उद्गीयते चेत् शिरःपतनं भविष्यति।
- सर्वे ऋत्विग्गणाः शिरःपतनभयेन स्व-स्वकार्यं **सन्त्यज्य** तूष्णीं तस्थुः।
- ऋत्विग्गणानां दशां **दृष्ट्वा** राजा विस्मितो जातः।
- मम पार्श्वे धनं नास्ति, कुत **आनीय** तुभ्यं ददानि ?
- संशये जाते क्षणं **विचिन्त्यैव** निर्णयः कार्यः।
- स **क्रीडित्वा खादित्वा पीत्वा** पठति।
- गावो जलं **पातुं** तडागं प्राप्नुवन्ति।
- अन्नेन जलेन प्राणवायुना च विना प्राणी **जीवितुं** नैव शक्नोति।
- अहमुच्चशिक्षायां व्याकरणविषय**मवलम्ब्य अध्येतु**मिच्छामि।
- माता पूजार्थं पुष्पं **चेतुमु**द्यानं गच्छति।
- धनबलाभ्यां विद्या **अर्जयितुं** न शक्यते।
- अयं **भोक्तुं** कालः, सर्वे पाकशालां प्राप्नुवन्तु।

- त्वं किञ्चिद् **वक्तु**कामोऽसि ।

- भवन् ! अहं किञ्चन **प्रष्टुमना** अस्मि ।

(क) उपरितनवाक्येषु प्रयुक्तानां स्थूलाक्षरयुतानां पदानां प्रकृतिप्रत्ययौ निर्दिशत ।

(ख) स्थूलाक्षरयुक्तेषु सोपसर्गपदानां निरुपसर्गस्वरूपाणि कानि भवेयुः ?

(ग) स्थूलाक्षरयुक्तपदानां कर्मपदानि रेखाङ्कितानि कुरुत ।

(घ) क्त्वा-प्रत्ययो कस्मात् कस्मिन्नर्थे विधीयते ?

(ङ) 'दृष्ट्वा' इति पदस्य कोऽर्थः ?

(च) अन्तिमे वाक्ये विद्याशब्दे द्वितीयाविभक्तेरभावे कारणं किम् ?

(छ) स्थूलाक्षरयुक्तपदानां लिङ्ग-वचन-विभक्त्याधारेण रूपवैविध्यं भवति न वा ?

(ज) कीदृशाद्धातोः कस्मिन्नर्थे च ल्यप्-प्रत्ययो जायते ?

(झ) क्त्वा-तुमुन्प्रत्यययो को भविष्यत्यर्थे विधीयते ? कश्च भूतेऽर्थे भवति ?

## २. सङ्केतिते पदे पदानि वा एकपदेन प्रतिष्ठाप्य वाक्यानां पुनर्लेखनं कुरुत

(क) बालाः **क्रीडनं कर्तुं** चत्वरं प्राप्नुवन्ति ।

(ख) विद्यार्थिनो विद्यालये **पठनं कृत्वा** गृहं प्रत्यागच्छन्ति ।

(ग) गायको गीतस्य **सम्यक् श्रवणं कारयित्वा** जनानां मनो हरति ।

(घ) ऋत्विजो मन्त्राणां **प्रकर्षेण वाचनं कृत्वा** देवान् आह्वयन्ति ।

(ङ) पुत्रः पित्रोः **प्रकृष्टेन नमनं कृत्वा** आशीर्वचांसि गृह्णाति ।

## ३. क्त्वाप्रत्ययान्तैः, तुमुन्प्रत्ययान्तैर्वाक्यद्वयं योजयित्वा एकवाक्यं निर्मात

(क) भ्राता निद्रामत्यजत् । स स्नानं करोति ।

(ख) माता आपणं गच्छति । सा फलमानेष्यति ।

(ग) यूयमत्रागच्छत । गृहस्य स्वच्छीकरणे मम साहाय्यञ्च कुरुत ।

(घ) गुरुर्नीतिवाक्यानि न्यगदत् । स छात्राणां प्रेरणञ्च व्यदधात् ।

(ङ) शिष्यो व्याकरणमधीते । तदनु स वेदाध्ययनं कुरुते ।

(च) कोकिलो वृक्षशाखायां वसति । स मधुरं गायति ।

(छ) यूयं ध्वनिमुद्रिकया इमां वार्तामाकर्णयत । एतस्य वक्तारं परिचिनुत ।

## ४. प्रदत्तानि पदानि प्रयुज्य वाक्यानि रचयत

लब्धुम्, निर्देष्टुम्, आदाय, पाठयितुम्, श्रावयित्वा, विरचय्य, बोद्धुम्, चिन्तयित्वा, समालोच्य, परिचित्य, जग्ध्वा, विचार्य, उत्थाय, भोक्तुम्, विधाय, उपकृत्य, नमस्कृत्य, पृथग्भूय, उषित्वा, सम्पठ्य, स्थातुम्, गन्तुकामः, भोक्तुमनाः ।

५. **पाठे प्रयुक्तान् क्त्वा-तुमुन्प्रत्ययान्तशब्दान् अन्विष्य तेषां धातुनिदर्शनं कुरुत ।**

६. **अधस्तनीष्ववस्थासु निष्पन्नपदानि विलिख्य तेषां वाक्येषु प्रयोगं दर्शयत**

कृ + णिच् + क्त्वा, प्र + दा + ल्यप्, दृश् + तुमुन्, पच् + णिच् + तुमुन्, आ(ङ्) + वृत् + ल्यप्, दा + क्त्वा, स्था + क्त्वा, भुज् + क्त्वा, या + तुमुन् ।

७. **क्त्वा-ल्यप्-तुमुन्प्रत्यान्तपदानां प्रयोगेण स्वस्य दिनचर्यां दशसु वाक्येषु वर्णयत ।**

## समासप्रयोगः

१. **अधस्तनवाक्येष्वागतानां स्थूलाक्षरपदानां व्युत्पत्तिं प्रदर्शयत**

(क) दुःखापन्नानां जनानामुपहासो नैव कर्तव्यः ।

(ख) गुरुरस्मान् पाणिनिकृतं व्याकरणं पाठयति ।

(ग) पितृकृतं धनं पुत्रार्थं भवति ।

(घ) जना भूतबलिमुपहरन्ति ।

(ङ) माता देवपूजनार्थं पुष्पं चिनोति ।

(च) सम्प्रति सर्वत्र चोरभयं वर्धमानं वर्तते ।

(छ) राजपुरुषो राज्ञ आज्ञां पालयति ।

(ज) हे सरस्वति ! मह्यं विद्यादानं करोतु ।

(झ) व्यवहारकुशलो जनः सुखेन जीवनं यापयति ।

(ञ) पुष्करिण्यां नीलोत्पलानि विकसितानि सन्ति ।

(ट) घनश्यामः श्रीकृष्णोऽर्जुनं गीतामृतं पाययाञ्चकार ।

(ठ) कुपुत्रः सदैव दुःखदायको भवति ।

२. **अधस्तनपदानामर्थलेखनपुरःसरं वाक्येषु प्रयोगं कुरुत**

कल्पनातीतः, कष्णाश्रितः, ज्ञानतृप्तः, धान्यार्थः, नखभिन्नः, द्विजार्थम्, भूतबलिः, चोरभयम्, मात्रनुमतिः, विद्यादानम्, शास्त्रनिपुणः, व्यवहारकुशलः, घनश्यामः, नीलोत्पलम्, अब्राह्मणः, अनद्यतनः, कुम्भकारः, कुपुरुषः, नवनीतकोमलम्, असत्यम्, राजप्रासादः, गुरुकृतम् ।

३. **विग्रहवाक्यानि समुचितसमस्तपदैर्विष्ठाप्य वाक्यानां पुनर्लेखनं विधत्त**

(क) मूर्खाः कुत्सितानि कार्याणि सततं कुर्वन्ति ।

(ख) सहायेन हीनानां शोषणं न मानवीयं कार्यम् ।

(ग) सा कालिदासेन कृतं महत् काव्यमधीत्य प्रसन्नास्ति ।

(घ) ज्ञानस्य दानेन साधवो लोकानामुपकारं विदधति ।

(ङ) जनाः प्रकोपाद् भयेन नगरात् पलायिताः ।

(च) सुखमापन्ना जना दुःखिनां कष्टं न जानन्ति ।

(छ) गेहे शूरः पुरुषः शत्रोर्बिभेति ।

(ज) राज्ञः पुरुषाश्चौरं दण्डयन्ति ।

### ४. अधस्तनविग्रहेषु निष्पन्नानि समस्तपदानि विलिख्य तेषां स्वशब्दैर्वाक्ये प्रयोगं दर्शयत

अङ्कुशेन उद्धृतः, मात्रा कृतम्, पित्रा दत्तम्, अङ्गस्य दानम्, कालम् अतीतः, नीलं च तदुत्पलम्, न अधीतः, कुत्सितं कार्यम्, शोभनः पुरुषः, विद्युदिव चलम्, गुग्धमिव श्वेतम्, न मानवः, अक्षेषु धूर्तः, चोराद् भयम्, पुत्राय अयम्, गोभ्यो रक्षितम् ।

### ५. अधस्तनानां समस्तपदानां विग्रहवाक्यानि प्रदर्श्य प्रत्येकं समासनाम च लिखत

ग्रामगतः, तरङ्गात्यस्तः, घटकारः, ब्राह्मणकम्बलः, गोहितम्, चोरभीतिः, अक्षशौण्डः, द्विजार्थम्, हरित्रातः, धान्यार्थः, रक्तोत्पलम्, घनश्यामः, राजगृहम्, कुपुरुषः, कमलनयनम् ।

### ६. पाठस्थकथायां प्रयुक्तानि समस्तपदानि रेखाङ्कितानि विधाय तेषामर्थान्वेषणं कुरुत ।

## तद्धितान्तप्रयोगः

### १. वाक्यानि पठित्वा स्थूलाक्षरपदानां सव्युत्पत्ति प्रकृतिप्रत्ययविभागं कुरुत

- विश्वस्मिन् विश्वे सम्प्रति यत्र तत्र सर्वत्रैव अशान्तिरनुभूयते ।
- त्वत्तो ममानुजो वयसा लघीयान् वर्तते ।
- गोमन्तो जना गोरसं पिबन्ति ।
- रूपवती भार्या कदाचित् शत्रुर्भवतीति कथ्यते ।
- कदाऽऽगतोऽसि ? कदा च गमिष्यसि ?
- यदा भगिन्यागमिष्यति तदाऽहं गमिष्यामि ।
- भवतोऽवस्था कुत ईदृग् जाता ?
- कुतो भवान् ?
- यथा गुरुः कथयति तथैवाचरणं कुरु ।
- अहं सदैव गुरोराज्ञां पालयामि ।
- इतः परं किमारभ्यते ?
- अङ्गारः स्पृष्टः सन् करं कृष्णीकरोति ।

- पाश्चात्त्याः प्राच्येभ्यो मोदन्तेतराम् ।
- कुवेरः सर्वेभ्य आढ्यतमो बभूव ।
- विद्यालयं परितस्तरवः सन्ति ।
- मामभितः सखायौ तिष्ठन्तौ स्तः ।
- संस्कृतं विश्वस्य प्राचीनतमा भाषाऽस्ति ।
- रामायणो माहाभारताल्लघुतरो ग्रन्थो वर्तते ।

## २. अधस्तनवाक्येषु रेखाङ्कितपदान्याधृत्य प्रश्ननिर्माणं कुरुत

(क) पितृव्योऽद्य **सायं** आगन्ता ।

(ख) भवत्याः स्थायिनिवासः **पर्वतजनपदे** वर्तते ।

(ग) प्रजातन्त्रदिवसः फाल्गुनमासस्य **सप्तमे** दिनाङ्के समायोज्यते ।

(घ) मातुली **पोखरात** आगतवती ।

(ङ) कृष्णो **गोवर्धनपर्वतमुत्थाय** जनान् ररक्ष ।

## ३. पदानि प्रयुज्य वाक्यानि रचयत

लघिष्ठः, श्रीमान्, कुतः, क्व, कर्हि, कतरत्, कथम्, तथा, इतः, परितः, अभितः, तत्र, बहुत्र, अमुतः, यतः, धनवान्, यथा, सदा, कदा, पचतितमाम्, पटुतरः, कृष्णीकरोति, शीघ्रतमः, मलिनीभवति ।

## ४. निर्दिष्टेष्वर्थेषु जायमानानि तद्धितान्तरूपाणि विलिख्य तेषां वाक्ये प्रयोगकौशलं दर्शयत

मेधाऽत्यस्य, लोमानि सन्त्यस्य, पामास्त्यस्य, दण्डोऽस्यास्ति, उन्नता दन्ताः सन्त्यस्य, यशोऽस्त्यस्य, वाचः सन्त्यस्य

## ५. अर्थं विलिख्य प्रकृतिप्रत्ययौ च विश्लेषयत

इत्थम्, ततः, बुद्धिमान्, एकदा, यत्र, अन्यथा, अभितः, व्रीहिकः, दण्डी, आयुष्मान्, रूपवान्, शीघ्रतरः ।

## ६. प्रदत्तावस्थासु निष्पन्नपदानां वाक्ये प्रयोगं दर्शयत

गुरु + तरप्, विद्वस् + मतुप्, शुक्ल + मतुप्, दण्ड + इष्ठन्, व्रीहि + इनि, किम् + तसिल्, इदम् + तसिल्, परि + तसिल्, किम् + त्रल्, तद् + दा, यद् + थाल्, लघु + इष्ठन्, धावति + तमप्, योग्य + तमप्, द्रुत + तरप्, लघु + ईयसुन्, खादति + तरप्, पुत्र + मतुप्, दण्ड + मतुप् ।

## ७. तरप्प्रत्ययान्तपदैरात्मानं सखिभ्यस्तोलयत ।

## ८. तमप्प्रत्ययान्तपदानां प्रयोगेण दशवाक्यात्मकेऽनुच्छेदे स्वराष्ट्रं वर्णयत ।

# हठयोगगुरुर्गोरक्षनाथः

नेपालो विभिन्नानां धर्म-संस्कृति-दर्शन-परम्परा-सम्प्रदायानां साधनाभूमिर्वर्तते । दिव्यदृष्टयः साध्वर्षि-महर्ष्युपदेष्टारोऽत्रैव जनिं लेभिरे, येषां प्रज्ञालोकेन लोक इदानीमपि भासमानोऽस्ति । त एव महानुभावा राष्ट्रगौरवमभिवर्ध्याशीर्वचोभिर्नः सदैव सत्कर्मणि योजयन्ति । एतादृशीषु विभूतिषु नाथसम्प्रदायस्य गुरुर्गोरक्षनाथः शीर्षस्थानमध्यास्ते ।

गोरक्षनाथः सिद्धयोगी महापुरुष आसीत् । हठयोगप्रदीपिकायां सिद्धयोगिषु गोरक्षनाथस्य गणना विहिता वर्तते–



**श्रीआदिनाथ-मत्स्येन्द्र-शावरानन्द-भैरवाः ।**

**चौरङ्गी-मीन-गोरक्ष-विरूपाक्ष-बिलेशयाः ॥**

असौ नाथसम्प्रदायस्य बहूनां मठमन्दिराणाञ्च प्रवर्तनं व्यदधात् । नाथसम्प्रदाये शिष्यपरम्परा नितरां पुरातनी वर्तते । नाथयोगिनो वर्षाणां चतुर्दशशतकाद् गोरक्षनाथस्याग्निं ज्वालयन्तः सन्ति । नेपालस्य

दाङजनपदे त्रयोदशशतवर्षेभ्यः पूर्वतो विद्यमानं सिद्धरत्ननाथस्य मन्दिरमपि एतस्याः परम्परायाः प्राचीनतां प्रमाणीकरोति । एतस्मिन् मन्दिरे गुरुणा गोरक्षनाथेन दत्तममृतपात्रमधुनापि विद्यते । तदेव पात्रं देवं परिकल्प्य साम्प्रतं प्रपूज्यते । थारू-मगरप्रभृतयः सर्वजातयः स्थानीयवासिनः सप्रेम सश्रद्धञ्चं तत् पूजयन्ति । प्रतिवर्षमृषितर्पण्यामत्र महती मेला समायोज्यते । प्रसादं गृहीतुमाजनपदं भक्ता उपतिष्ठन्ते । गोरक्षनाथस्य विचारस्यानुयायिनो द्वादशशाखासु विभक्ताः सन्ति । इमा एव शाखा द्वादशपन्थानो निगद्यन्ते । एतस्याः परम्पराया योगिनः कर्णौ प्रभिद्य मुद्रां परिदधति । जनैरिमे कर्णविदारका योगिन उच्यन्ते ।

'नाथः' इति शब्दो गूढरहस्यं बोधयति । यस्याथ प्रारम्भो नास्ति स नाथः । यो नाथस्तस्यान्तोऽपि न भवति । भगवान् शिवोऽथान्तेन रहितोऽजन्माविनाशीति शास्त्रैर्वर्णितमस्ति । एतदेवाश्रित्य नाथसम्प्रदायः शैवपरम्परामनुगच्छति । गोक्षनाथपरम्परा अयोनिजपरम्परा वर्तते । एतस्याः परम्परायाः सिद्धपुरुषाः समये समये स्थाने स्थाने प्रादुर्भवन्ति । भगवान् शिव एव गोरक्षनाथरूपेणावातरदिति शास्त्रं प्रमाणयति । महाकालयोगशास्त्रकल्पद्रुमो निर्दिशति -

**अहमेवास्मि गोरक्षो मद्रूपं तन्निबोधत ।**
**योगमार्गप्रचाराय मया रूपमिदं धृतम् ॥**

नाथपरम्परायामादिनाथो भगवान् शिव एव मन्यते । अत्र महादेव एव महागुरुरिति मतं सर्वसम्मतमस्ति । आदिनाथस्य शिष्यो मत्स्येन्द्रनाथस्तस्य च शिष्यो गोरक्षनाथः । मत्स्येन्द्रनाथो यदा तपः समाचरत्तदा योगप्रचाराय केवलमेकस्य जनस्य सामर्थ्यमपर्याप्तमिति शिवं बभाषे, कस्यचन साहाय्यञ्च ययाच । शिवश्चाचिरात्तस्य शिष्यत्वं स्वीकृत्यावातरद्येन गोरक्षनाथोऽपि शिवस्वरूपो बभूवेत्युक्तिः प्रथिता वर्तते ।

नाथपरम्परायां नवानां नाथानां प्रसिद्धिर्महिमा च वर्तेते । ते यथा – आदिनाथः, अनादिनाथः, कूर्मनाथः, भवनाथः, सत्यनाथः, सन्तोषनाथः, मत्स्येन्द्रनाथः, गोपीनाथः, गोरक्षनाथश्च । एतेषु ब्रह्म-विष्णु-महेशानामन्यासां देवदेवीनामशेषसृष्टिविज्ञानस्य चान्तर्भावो विभाव्यते । नाथसम्प्रदाये चतुरशीतेः सिद्धानां परम्परा च विशिष्टस्थानं बिभर्ति । तिब्बतक्षेत्रस्य लामावर्गीयबौद्धानां तन्त्रविद्यायां गुरोर्गोरक्षनाथस्य महिमा वर्णितो वर्तते ।

नेपाले गोरक्षनाथस्य बलिकः सम्बन्धो विद्यते । लिच्छविकाले राज्ञो नरेन्द्रदेवस्य समयेऽसौ प्रादुर्बभूव । स मृगस्थल्यां तपः समाचरत् । भिक्षाटनायोपदेशाय चासौ काष्ठमण्डपमाटत् परमत्रत्या जनास्तं न जज्ञुः, न च मानयाञ्चक्रुः, येन एष काष्ठमण्डपस्थान् जनान् किञ्चित् शिक्षितुमियेष । गुरुर्निखिलान् नागान् योगसिद्ध्या प्रबाध्य मृगस्थल्यां तपश्चकार । ततो वृष्टिरवरुद्धा दुर्भिक्षञ्च बभूव । राजा नरेन्द्रदेवो गुरुभिराचार्यैस्तन्त्रविद्याप्रवीणैर्ज्योतिर्विद्भिश्च समं परामर्शमकरोत् । ते तथ्यं निवेद्य गुरुं तपस उत्थापयितुं परामृष्टवन्तः । उपायहीनेषु तेषु बन्धुदत्तगुभाजुनामा गुरुर्गोरक्षनाथस्यासामराज्यस्य कामरुकामाक्षस्थितं गुरुं मत्स्येन्द्रनाथमानेतुं परामर्शं प्रायच्छत् । तदनुरूपं गुरौ मत्स्येन्द्रनाथे काष्ठमण्डपे समागते तद्दर्शनाय गोरक्षनाथस्तपस उदतिष्ठत् । नागा मुक्ता जाता वृष्टिश्च समभवत् ।

गुरोर्गोरक्षनाथस्य प्राकट्यं द्रव्यशाहस्य समयेऽपि अभवत् । गोरक्षनाथो द्रव्यशाहं पायसमादयत् । गोरक्षनाथो राजकुमारं पृथ्वीनारायणशाहमाशीर्वचांसि व्याहरत् । गुरुः पृथ्वीनारायणं दधि भक्षयन् प्रोवाच, "यत्र यत्र तव पादौ प्राप्नुतस्तत्र तत्र तव राज्यानि भविष्यन्ति" इति जनश्रुतिर्विद्यते । गोरक्षनाथो नेपालराष्ट्रम्, नेपालवासिनो नेपालपालकाँश्चापालयत् । गोरक्षनाथस्याशीर्वचनैर्वयं सर्वे नेपालिनः कृतार्थाः स्म इति विश्वस्यते ।

गोरखाजनपदो गोरक्षनाथस्यैव नाम्ना विश्वविश्रुतो वर्तते । तत्र विराजमाना गोरक्षकाली तन्नाम स्मारयति । गोरखाजनपदे पाशुपतक्षेत्रवर्तिन्यां मृगस्थल्याञ्च गोरक्षमठमन्दिराणि सन्ति । नेपालिसेनायां गोरक्षनाथगणो वर्तते । राष्ट्रस्य मुद्रायां 'श्रीगोरक्षनाथः' इत्युल्लिखितं प्राप्यते । बुद्धजयन्ती, गोरक्षजयन्ती च युगपद् वैशाखपूर्णिमायामायोज्येते । षोडशसंस्कारेषु कर्णवेधो नाथसम्प्रदायस्य नैरन्तर्यमनुसरति । वैदेशिकसैन्यसङ्घटने 'गोरक्षगणः' (गोरखा रेजिमेन्ट) नामा पृथक् समूहः सङ्घट्यते येनान्तरराष्ट्रियशान्तिसुरक्षासंस्थापनादिकार्येषु निखिलविश्वस्य विश्वासोऽर्जितोऽस्ति । भारते नेपालान्नातिदूरे गोरक्षपुरनामा प्रसिद्धो जनपदः सर्वैः परिचितोऽस्ति । नैपालका गोरक्षनाथं पशुपतिनाथस्यावताररूपेण सम्मानयन्ति । 'गोरक्षः' इति पदं शिवस्यैव पर्यायो वर्तते । अत्र गोरक्षमतमाधिक्येन प्रचलितमस्ति ।

'गो' इति शब्दो गाम्, इन्द्रियाणि च बोधयति । गोरक्षनाथो गोधनं ररक्ष, इन्द्रियाणि च वशं जग्राह । असावखण्डब्रह्मचर्यं रक्षितुं सदाचारमनुपालयितुञ्चोपादिशत् ।

गोरक्षनाथस्य नाम्ना संस्कृतभाषायामाधुनिकभाषासु च चत्वारिंशतोऽधिका ग्रन्था उल्लिख्यन्ते । गोरक्षनाथः सिद्धसिद्धान्तपद्धतिः, अमरौघप्रबोधः, विवेकमार्तण्डः, शिवस्वरोदयसंहिता, योगबीजम्, महार्थमञ्जरी, योगसूत्रञ्चेति दुर्लभग्रन्थान् व्यलिखत् । काशी-नागरी-प्रचारिणी-सभया गोरक्षनाथस्य नाम्ना हिन्दीभाषायां सप्तत्रिंशत्तोऽधिकानां ग्रन्थानां सूची निर्मितास्ति । सामान्यतो जनश्चतुर्विंशत्यां घण्टासु षट्शताधिकैकविंशतिसहस्रवारं निःश्वसिति । एतत्तथ्यं गुरोर्गोरक्षनाथस्य योगमार्तण्डे, सिद्धसिद्धान्तपद्धतौ चाधृतमस्ति । गोरक्षनाथपरम्परायां योगविद्यायाः सातिशयं महत्त्वं प्रतिपादितं वर्तते । विद्येयमधुनाविश्वं विस्तारिता दृश्यते ।

पातञ्जलयोगसूत्रे योगश्चित्तवृत्तिनिरोध इत्यादिना योगः परिभाषितः । बुद्धचहङ्कारमनसामैक्यं चित्तं तस्य निरोधो योग इत्यर्थः । गीतायां समत्वं योग उच्यते, योगः कर्मसु कौशलम् इत्युक्तिभिर्योगस्यार्थः प्रतिपाद्यते । गोरक्षनाथो विवेकमार्तण्डे जीवात्मपरमात्मनोः संयोगमेव योगमुवाच– संयोगं योगमित्याहुर्जीवात्मपरमात्मनोः । राजयोग-ध्यानयोग-लययोग-भक्तियोग-ज्ञानयोग-कर्मयोग-साङ्ख्ययोग-हठयोगभेदैर्योगो बहुत्वमाश्रयते । एतेषु हठयोगस्य प्रवर्तको गुरुर्गोरक्षनाथ एवासीत् ।

'हठः' इति पदस्य सामान्यार्थः 'शक्त्यनुशासनम्' भवति । अमरकोशे प्रसभं तु बलात्कारो हठः इति पदावल्या बलेन कर्मकरणं हठनाम्ना प्रतिपादितमस्ति । इन्द्रियाणि बलेन वशीकृत्य येन कठोरोपायेनान्तर्जगति परमात्मदर्शनं विधीयते, तद्धठ इत्यभिप्रायः । 'हठयोगः' इत्यत्र 'ह', 'ठ' वर्णौ विशेषार्थं निर्वहतः ।

'ह'वर्णेन सूर्यस्य, 'ठ'वर्णेन च चन्द्रमसो ज्ञानं भवति । अतः सूर्यशक्ति-चन्द्रशक्त्योर्मेलनमेव हठयोगो भवति । उक्तञ्च-

**हकारेण तु सूर्योऽसौ ठकारेणेन्दुरुच्यते ।**
**सूर्यचन्द्रमसोर्योगाद् हठयोगोऽभिधीयते ॥**

हठयोगः परमात्मप्राप्तेरुत्तम उपायोऽस्ति, यत्र षट्कर्मभिर्धौति-वस्ति-नेति-नौलि-त्राटक-कपालभातिभिः सप्तभिः साधनैरासन-मुद्रा-प्रत्याहार-प्राणायाम-धारणा-ध्यान-समाधिभिश्च मनो नियम्य तच्छक्तिमन्तर्मुखं नीत्वा च सूक्ष्मशरीरस्य चित्तवृत्त्या परमात्मा साक्षात्क्रियते । अत्र शरीरं धार्मिककृत्यैः, शारीरकक्रियाभिश्च शुद्धं विधाय मस्तिष्कस्य सर्वोत्तमैकाग्रता समाधिर्वावगम्यते । योगेऽस्मिन् श्वासं निरुध्य कुण्डलिन्युपरि जागर्यते, ततः परमात्मानुभूयते च ।

गोरक्षनाथस्य ग्रन्थेषु योगविद्यायाः, शरीरविज्ञानस्य मनोविज्ञानस्य च गूढरहस्यं सूक्ष्मातिसूक्ष्मरूपेण व्याख्यातं वर्तते । हठयोगोऽयमेव रहस्यभरितो योगोत्तमविषयोऽस्ति । योगस्य नैके लाभाः सन्ति । कायिक-मानसिकारोग्याप्तये योगो जगदौषधं सिद्धमस्ति । योगश्चित्तं परिष्करोति; सच्चिन्तनमाविष्करोति; शरीरञ्च स्वस्थं सम्पादयति । सर्वेषां योगाभ्यासिनां प्रत्यक्षमनुभवेनैतदेव सिद्ध्यति । हठयोगश्च चिन्तां नयति, निद्रां चानमति । अस्याभ्यासेन मांसपेशी बलवती भवति, औदासिन्यं च दूरं पलायते । अयमेव शान्तिमनुभावयति; रोगान्निवारयति; दुर्वृत्तमपाकरोति; कुटुम्बकमातनोति च । विभिन्नानां मानसिक-शारीरकप्रणालीनां शोधनं हठयोगेन सम्भवति । हठयोगे ध्यानासनप्राणायामानां सर्वातिशायिनी भूमिकाऽऽकल्यते । दिव्यशक्तिप्राप्त्यर्थं विभिन्नानामासनप्रक्रियाणाम्, प्राणायामस्य, नैकासां मुद्राणाञ्च संयोगेन विस्मयकारिणी सिद्धिर्हठयोगस्य लक्ष्यं भवति । गोरक्षनाथस्य हठयोगविद्याप्यारोग्यान्दोलनस्य पुरातनं निदर्शनमास्ते ।

अवतारपुरुषाः सिद्धयोगिनश्च कदा जायन्ते, कदा तिरोभवन्ति चेति वक्तुं न कोऽपि क्षमः । तेषां स्थितिकालस्य गणना केवलं वाग्विलासस्य विषयो भवति । गोरक्षनाथो नवमशताब्दीत एकादशशताब्द्या मध्यकालेऽवातरदिति केषाञ्चन विदुषां तर्कः । तन्नासौ द्वादशशताब्द्यां बभूवेतीतरेषां वितर्कः । केचनायमिदानीमप्यत्रैवाटन्नस्तीति विश्वसन्ति । भारतस्य गोरक्षपुरं सिद्धपुरुषस्यास्य समाधिस्थलम्, यतस्तन्नामकरणं प्रसिद्धम् । जगद्गुरोः शङ्कराचार्यस्य कालानन्तरं न कोऽपि गोरक्षनाथसमः प्रभावशाली महिममण्डितश्च महापुरुषो जात इहास्माकं सनातनसांस्कृतिकपुण्यभुवि । अतो गोरक्षनाथोऽस्मत्संस्कृतौ, परम्परायाम्, दर्शने च महन्महिमानं बिभर्ति ।

## अभ्यासः

### श्रवणं भाषणं च

१. **अधस्तनानां पदानां शुद्धोच्चारणं कुरुत**

हठयोगः, परमात्मप्राप्तिः, उपायोऽस्ति, षट्कर्मभिः, धौतिः, वस्तिः, नेतिः, नौलिः, त्राटकम्, कपालभातिः, मुद्रा, प्रत्याहारः, प्राणायामः, धारणा, ध्यानम्, समाधिः, तच्छक्तिः, अन्तर्मुखम्, सूक्ष्मशरीरम्, चित्तवृत्तिः, साक्षात्क्रियते, धार्मिककृत्यैः, शारीरकक्रियाभिः, मस्तिष्कस्य, सर्वोत्तमा, एकाग्रता, अवगम्यते, योगेऽस्मिन्, निरुध्य, कुण्डलिन्युपरि, जागर्यते, अनुभूयते ।

२. **पाठस्य प्रथममनुच्छेदं शिक्षकात् श्रुत्वा तस्य वाचनाभ्यासं कुरुत ।**

३. **पाठस्य कक्षायां श्रवणानन्तरं स्वमातृभाषया पाठसारं श्रावयत ।**

४. **गोरक्षनाथस्य विषयेऽन्विष्य कञ्चन नवीनं सन्दर्भं श्रावयत ।**

५. **उदाहरणानुसारेण पदविच्छेदं कृत्वा श्रावयत**

यथा, सिद्धयोगी = सिद्ध + योगी

दिव्यदृष्टयः, राष्ट्रगौरवम्, सत्कर्मणि, नाथसम्प्रदायस्य, शीर्षस्थानम्, आदिनाथः, मठमन्दिराणाम्, शिष्यपरम्परा, चतुर्दशशतकाद्, दाङजनपदे, अमृतपात्रम्, सर्वजातयः, स्थानीयवासिनः, द्वादशशाखासु, कर्णविदारकाः

६. **लोककल्याणाय कृतकार्याणां त्रयाणां महापुरुषाणां नामानि श्रावयत ।**

७. **अधस्तनानां पदानां परिचयमुदाहरणानुसारेण कथयत**

यथा, येषाम्

शब्दः – यत्

लिङ्गम् – पुंलिङ्गम्

विभक्तिः – षष्ठी

वचनम् – बहुवचनम्

महिमा, नेपाले, गोरक्षनाथस्य, सम्बन्धः, राज्ञः, असौ, मृगस्थल्याम्, तपः, एषः, वृष्टिः, गुरुम्, तेषु, जनपदः, सर्वैः, रूपेण, पदम्, शिवस्य, आधिक्येन, गाम्, इन्द्रियाणि, सदाचारम् ।

८. **गुरोर्गोरक्षनाथस्य जीवनवृत्ताद् ज्ञातं प्रेरकं तथ्यमेकं वदत ।**

९. **पाठमधीत्य गोरक्षनाथस्य विषये स्वशैल्या वदत ।**

१०. **गुरुर्गोरक्षनाथः सिद्धपुरुष आसीदिति विषये पाठाधारेण तर्कान् प्रस्तुत ।**

११. **पाठाधारेण नाथशब्दस्य व्युत्पत्तिप्रदर्शनपूर्वकमर्थं वदत ।**

१२. **जीवनवृत्तस्य लेखनाय योग्यव्यक्तेर्विषये कक्षायां विमृशत ।**

१३. **सर्वे मिलित्वा पाठस्य अनुच्छेदान् क्रमेण साभिनयं पठित्वा श्रावयत ।**

१४. **अधस्तने पद्ये सामूहिकरूपेण वाचयत**

श्रीआदिनाथ-मत्स्येन्द्र-शावरानन्द-भैरवाः ।
चौरङ्गी-मीन-गोरक्ष-विरूपाक्ष-बिलेशयाः ॥
अहमेवास्मि गोरक्षो मद्रूपं तन्निबोधत ।
योगमार्गप्रचाराय मया रूपमिदं धृतम् ॥

## पठनम्

१. **पाठस्य उपान्तिममनुच्छेदं तारस्वरेण पठत ।**

२. **अधस्तनं पद्यं पठित्वा हठयोगस्य विषये वदत**

हकारेण तु सूर्योऽसौ ठकारेणेन्दुरुच्यते ।
सूर्यचन्द्रमसोर्योगाद् हठयोगोऽभिधीयते ॥

३. **मौनेन पाठं पठित्वा दश समस्तपदानि चित्वा वदत ।**

४. **पाठस्य द्वितीयमनुच्छेदं पठित्वा प्रश्नानुत्तरयत**

(क) के कर्णविदारका योगिन उच्यन्ते ?
(ख) के द्वादशशाखासु विभक्ताः सन्ति ?
(ग) गोरक्षनाथः केषां प्रवर्तनं व्यदधात् ?
(घ) सिद्धरत्ननाथस्य मन्दिरं कुत्रास्ति ?
(ङ) गोरक्षनाथः कीदृशो महापुरुष आसीत् ?
(च) अमृतपात्रं कं परिकल्प्य साम्प्रतं प्रपूज्यते ?
(छ) नाथसम्प्रदाये शिष्यपरम्परा कीदृशी वर्तते ?
(ज) नाथयोगिनः कस्य अग्निं ज्वालयन्तः सन्ति ?
(झ) कुत्र गोरक्षनाथस्य गणना सिद्धयोगिषु विहिता ?
(ञ) प्रतिवर्षमृषितर्पण्यां कुत्र महती मेला समायोज्यते ?

५. **पाठं सम्यक् पठित्वा परस्मैपदिन आत्मनेपदिनश्च दश दश क्रियापदानि चित्वा कथयत ।**

## ६. अधस्तनं गद्यं पठित्वा पृष्टान् प्रश्नान् उत्तरयत

संसारे विविधाः प्राणिनः सन्ति । तेषु मनुष्यः सर्वोत्तमः प्राणी मन्यते । विवेको महान् गुणोऽस्ति । एष हि मनुष्येषु सर्वोत्तमतामादधाति । मनुष्यः स्वस्य विवेकबलस्य प्रयोगेण भौतिकीमाध्यात्मिकीञ्च समुन्नतिं विदधाति । विवेकस्य वर्धनाय सोऽनेकानि कार्याणि करोति । स सद्ग्रन्थान् पठति, विद्वद्भिः सह सङ्गतिञ्च करोति ।

काव्यानां पठने प्रायो मनुष्याणां रुचिर्दृश्यते । काव्यानि कान्तासम्मितवचनैर्जनान् सन्मार्गे प्रेरयन्ति । काव्यरसिकाः काव्यरसममृतमिव मन्यन्ते । काव्यरसस्यास्वादनं तेषां कृते परमसुखदं भवति । सुजनैः सह मेलनेन, काव्यामृतरसास्वादनेन च ते नित्यं रमन्ते । अतः संसारस्य सारवस्तुरूपेण धीमन्तः तयोरेव द्वयोः परिगणनं कुर्वन्ति–

**संसारविषवृक्षस्य द्वे फले ह्यमृतोपमे ।**

**काव्यामृतरसास्वादः सङ्गमः सुजनैः सह ॥**

काव्यानां प्रयोजनं समुल्लिखन् आचार्यो मम्मटः कथयति–

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये**

**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे, इति ।**

रसास्वादनेन आनन्दग्रहणमेव नहि काव्यानां प्रयोजनम्, अपि तु यशोवित्तादीनां लब्धिश्च । काव्यानि यशः प्रापयन्ति, वित्तं दापयन्ति, व्यवहारं शिक्षयन्ति, अकल्याणं नाशयन्ति, सद्यः परममानन्दञ्च भावयन्ति । अतः काव्यानां लेखन-श्रवण-पठनाद्यनुशीलनं नितरां लाभकरम् ।

**(अ) एकपदेन प्रश्नानुत्तरयत**

(क) कः महान् गुणोऽस्ति ?

(ख) काव्यानि किं भावयन्ति ?

(ग) कुत्र विविधाः प्राणिनः सन्ति ?

(घ) केभ्यो यशोवित्तादीनां लब्धिर्भवति ?

(ङ) काव्यरसिकाः काव्यरसं किमिव मन्यन्ते ?

(च) विविधेषु प्राणिषु मनुष्यः कीदृशः प्राणी मन्यते ?

**(आ) एकवाक्येन प्रश्नानुत्तरयत**

(क) किं नितरां लाभकरम् ?

(ख) रसिका जना नित्यं कथं रमन्ते ?

(ग) किमेव नहि काव्यानां प्रयोजनम् ?

(घ) प्रायो मनुष्याणां रुचिः कुत्र दृश्यते ?

(ङ) किं रसिकानां कृते परमसुखदं भवति ?

(च) काव्यानि कथं जनान् सन्मार्गे प्रेरयन्ति ?

(छ) आचार्यो मम्मटः काव्यानां प्रयोजनं किं वदति ?

(ज) कस्य वर्धनाय मनुष्योऽनेकानि कार्याणि करोति ?

(झ) मनुष्यः स्वस्य विवेकबलस्य प्रयोगेण किं विदधाति ?

(ञ) धीमन्तः संसारस्य सारवस्तुरूपेण कयोः परिगणनं कुर्वन्ति ?

**(इ) गद्यान्तर्गतं प्रथमं पद्यमाधृत्य प्रश्नान् उत्तरयत**

(क) पद्ये तृतीयान्तं पदं किम् ?

(ख) 'फले' इत्यत्र का विभक्तिः ?

(ग) 'द्वे' इति पदस्य शब्दमूलं किम् ?

(घ) पद्यस्थस्य 'हि' इति पदस्य कोऽर्थः ?

(ङ) 'सहयोगे' अत्र का विभक्तिः प्रयुक्ता ?

(च) 'काव्यामृतरसास्वादः' इति पदस्य विग्रहं प्रदर्शयत ।

(छ) पद्यप्रयुक्तस्य विषशब्दस्य कोशनिर्दिष्टान् पर्यायान् प्रस्तुत ।

(ज) पद्यस्य 'सुजनैः' इति पदं प्रयुज्य नवीनानि त्रीणि वाक्यानि रचयत ।

**७. उपरि पठितं गद्यमाधृत्य काव्यानां पञ्च लाभान् कथयत ।**

**८. उपरि पठितस्य पाठस्याधारेण विलुप्तानि पदानि वदत**

काव्यानां पठने .......... मनुष्याणां .......... दृश्यते । .......... कान्तासम्मितवचनैः .......... सन्मार्गे .......... । काव्यरसिकाः .......... अमृतमिव मन्यन्ते । काव्यरसस्य .......... तेषां कृते परमसुखदं .......... । सुजनैः .......... मेलनेन, काव्यामृतरसास्वादनेन .......... ते नित्यं .......... । अतः .......... सारवस्तुरूपेण धीमन्तः तयोरेव .......... परिगणनं कुर्वन्ति ।

## लेखनम्

**१. गोरखामण्डलस्य गोरक्षनाथगुहाया विषये तथ्यानि सङ्कलय्य अनुच्छेदमेकं रचयत ।**

**२. अधस्तनैः पाठप्रयुक्तैः पदैर्नवीनानि सार्थानि वाक्यानि रचयत ।**

अवतारपुरुषाः, क्षमः, गणना, मध्यकाले, तर्कः, अटन्, विश्वसन्ति, समाधिस्थलम्, प्रसिद्धम्, प्रभावशाली, महिममण्डितः, महापुरुषः, इह ।

## ३. सन्धिच्छेदं प्रदर्शयत

यस्याथ, प्रारम्भो वा, शिवोऽथान्तेन, रहितोऽजन्माविनाशीति, एतदेवाश्रित्य, शास्त्रं प्रमाणयति, मद्रूपम्, तन्निबोधत, शिव एव, महागुरुरिति, बभूवेत्युक्तिः, सम्बन्धो विद्यते, समयेऽसौ, चासौ, जनास्तम्, दुर्भिक्षञ्च, गुरुभिराचार्यैः, प्रायच्छत्, उदतिष्ठत्, वृष्टिश्च ।

## ४. विग्रहं प्रदर्शयत

विश्वविश्रुतः, तन्नाम, पाशुपतक्षेत्रवर्तिन्याम्, बुद्धजयन्ती, वैशाखपूर्णिमायाम्, षोडशसंस्कारेषु, कर्णवेधः, अन्तरराष्ट्रियशान्तिसुरक्षासंस्थापनादिकार्येषु, निखिलविश्वस्य, अखण्डब्रह्मचर्यम्, दुर्लभग्रन्थान्, गोरक्षनाथपरम्परायाम्, योगविद्यायाः, चित्तवृत्तिनिरोधः, बुद्धचहङ्कारमनसाम्, जीवात्मपरमात्मनोः ।

## ५. उदाहरणानुसारेण अधस्तनानां पदानां परिचयं यच्छत

यथा, अस्ति

धातुः – अस्

लकारः – लट्

पुरुषः – प्रथमः

वचनम् – एकवचनम्

योजयन्ति, वर्तते, करोति, विद्यते, पूजयन्ति, बोधयति, भवति, मन्यते, ययाच, अभवताम्, बभाषे, बिभर्ति, चकार, जग्राह, जायन्ते ।

## ६. पाठाधारेण सङ्क्षेपेण प्रश्नानुत्तरयत

(क) शास्त्रं किं प्रमाणयति ?

(ख) गोरक्षनाथः कस्य शिष्यः ?

(ग) का अयोनिजपरम्परा वर्तते ?

(घ) कः शब्दो गूढरहस्यं बोधयति ?

(ङ) आदिनाथस्य शिष्यः क आसीत् ?

(च) नाथपरम्परायां क आदिनाथो मन्यते ?

(छ) के समये समये स्थाने स्थाने प्रादुर्भवन्ति ?

(ज) नाथसम्प्रदायः कां परम्परामनुगच्छति ?

(झ) महाकालयोगशास्त्रकल्पद्रुमः किं निर्दिशति ?

(ञ) भगवतः शिवस्य विषये शास्त्रैः किं वर्णितमस्ति ?

### ७. पाठाधारेण सम्यग् विचार्य प्रश्नान् उत्तरयत

(क) नव नाथाः के ?

(ख) हठयोगस्य लक्षणं किम् ?

(ग) परमात्मा कथं साक्षात्क्रियते ?

(घ) मत्स्येन्द्रनाथः शिवं किं बभाषे ?

(ङ) गोरक्षनाथः किं किं कर्तुमुपादिशत् ?

(च) गोरक्षनाथस्य के ग्रन्थाः प्रसिद्धाः सन्ति ?

(छ) 'हठयोगः' इत्यनेन कीदृशो योगो ज्ञायते ?

(ज) गोरक्षनाथः कस्य प्रवर्तकः, किञ्च तन्मते योगलक्षणम् ?

(झ) गोरक्षनाथस्य स्थितिकालविषये कानि मतानि प्रसिद्धानि सन्ति ?

(ञ) वैदेशिकसैन्यसङ्घटने गोरक्षनाम्ना कः समूहः किं कार्यं करोति ?

### ८. पाठादन्विष्य विपर्ययपदानि लिखत

(क) चञ्चलता – एकाग्रता

(ख) वैषम्यम् – ...........

(ग) चिरेण – ...........

(घ) विषपात्रम् – ...........

(ङ) मृत्युम् – ...........

(च) गुरुपरम्परा – ...........

### ९. पञ्चदशभिर्वाक्यैर्जीवनवृत्तस्य सारांशं लिखत ।

### १०. पाठात् पञ्च कर्तृवाच्यप्रयुक्तानि वाक्यानि चित्वा कर्मवाच्ये परिवर्तयत ।

### ११. जीवनवृत्तस्य रचनायै प्रमुखानि कानि तथ्यानि सङ्कलनीयानीति विवरणं प्रस्तुत ।

### १२. अपेक्षितानि तथ्यानि सङ्कलय्य महात्मनो बुद्धस्य जीवनवृत्तं लिखत ।

### १३. अधो दत्तानि सूत्राण्याधृत्य जीवनवृत्तं रचयत

| | |
|---|---|
| नाम | अङ्गुरबाबा जोशी |
| जन्म | वि.सं. १९८८ श्रावणः ३१, शनिवासरः (१५ अगस्त १९३१) |
| जन्मस्थानम् | डिल्लीबजार, काष्ठमण्डपः |
| माता | दीपकुमारी पन्तः |
| पिता | पीताम्बरप्रसादः पन्तः |

| | |
|---|---|
| शिक्षा | राजनीतिशास्त्रे स्नातकोत्तरोपाधिः काशीहिन्दुविश्वविद्यालयात्<br>विधिशास्त्रे स्नातकोपाधिः पटनाविश्वविद्यालयात्<br>साहित्ये स्नातकोपाधिः, अक्सफोर्डविश्वविद्यालयात् |
| विवाहः | बलरामजोशिना सह बाल्ये वयसि । विवाहसमये एकादशवर्षीयैषा । |
| कार्याणि | काष्ठमण्डपस्थे महाविद्यालये प्राचार्या (नेपालस्य प्रथमा महिला प्राचार्या) । तत्र महाविद्यालयस्य भवननिर्माणम् । सनातनधर्मसेवासमितौ, विश्वहिन्दुमहासङ्घे च धार्मिकं सांस्कृतिकं जागरणम् । त्रिभुवनविश्वविद्यालयसभायाः, समाजकल्याणपरिषदः, नेपालस्काउटसंस्थायाः परामर्शपरिषदः, नेपालबालसङ्गठनस्य, युनेस्कोसङ्घस्य नेपालराष्ट्रियसमितेः, गुठीसंस्थानस्य विद्वत्समितेश्च सदस्यत्वेन कार्यसम्पादनम् । गार्गीकन्यागुरुकुलस्य संस्थापिका संरक्षिका च । तारागाउँविकाससमितेरध्यक्षत्वेन देशस्य पर्यटनक्षेत्रे च योगदानम् । पत्युर्नाम्नि 'बलरामजोशी ज्ञानविज्ञानपुरस्कारः' अस्य स्थापना । |
| कृतयः | कल्पना (कथासङ्ग्रहः), मुक्तिमुक्तकमाला (विचारसङ्ग्रहः), क्यान्सरको वरदान, के लेखूँ ? (अनुभूतिसङ्ग्रहौ), Thoughts on Roots (लेखसङ्ग्रहः) इत्याद्याः । |
| सम्मानपदव्यः | महेन्द्रविद्याभूषणपदकम् (प्रथमम्), गोरखादक्षिणबाहु (द्वितीयम्), त्रिशक्तिपट्टम् (तृतीयम्), शुभराज्याभिषेकपदकम् (द्वितीयम्), रत्नश्रीस्वर्णपदकम्, दीर्घसेवापदकम्, श्रीवेदनिधिपुरस्कारः, इत्यादयः । |
| विचाराः | नारीणां कृते आध्यात्मिकी शिक्षा अनिवार्या वर्तते । मानवीयं नैतिकमूल्यं जीवनस्य सञ्जीवनी अस्ति । सुखं दुःखञ्च मानवस्य स्वस्यैव नियन्त्रणे वर्तेते, इत्यादयः । |
| तिरोभावः | २०७७ आषाढः ६, शनिवासरः । |

## अनुप्रयुक्तव्याकरणम्

### कृदन्तप्रयोगः- कृत्यप्रत्ययान्तः

### १. अधस्तनानि वाक्यानि पठित्वा यथानिर्देशं कुरुत

- नागरिकैः सदा राष्ट्रसेवा करणीया ।
- सर्वैः परोपकारः करणीयः ।
- सज्जनैर्यत् कृतं तन्मयापि करणीयम् ।
- शिष्यैर्गुरोराज्ञा पालनीया ।
- अस्माभिः सर्वदा श्रद्धावद्भिर्भाव्यम् ।
- श्रद्धया देयम् ।

- स्वाध्यायान्मा प्रमदितव्यम् ।
- अस्माभिः भगवद्भक्तिः कार्या ।
- ज्ञानार्थं शास्त्रं पठितव्यम् ।
- प्रयोजनेन विना पुष्पाणि न चेतव्यानि ।
- भेदभावेन विना सर्वेभ्यो ज्ञानं दातव्यम् ।
- शिक्षकैश्छात्रकेन्द्रितविधिना पाठनीयम् ।
- नेपालदेशे द्रष्टव्याः प्राकृतसम्पदो बह्व्यः सन्ति ।
- लुम्बिनी पर्यटकैर्गन्तव्या स्थलं वर्तते ।
- त्वया बहूनि कार्याणि सम्पादनीयानि सन्ति ।
- दिवा न शयितव्यम् ।
- पुरस्कारोऽयं युष्माभिर्लभ्यः ।
- इमे माषाः पचेलिमाः ।
- इन्द्रियाणि शत्रवश्च जेतव्या भवन्ति ।

(क) उपरितनवाक्येषु प्रयुक्तानां कृत्यप्रत्ययान्तपदानां प्रकृतिप्रत्ययौ निर्दिशत ।

(ख) कृत्यप्रत्ययान्तपदानां विशेष्यपदानि परिचित्य तानि विशेषणपदैः सह सारिण्यां दर्शयत ।

(ग) भाववाच्ये प्रयुक्तानि वाक्यानि परिचित्य तेषां वचनं निर्दिशत ।

(घ) कृत्यप्रत्ययाः कस्मिन्नर्थे भवन्ति ?

(ङ) 'पठितव्यम्' इति पदस्य कोऽर्थः ?

(च) 'दिवा न शयितव्यम्' इति वाक्ये समुचितं कर्तृपदं योजयत ।

(छ) कर्मणि भावे च कर्तृपदे का विभक्तिर्भवेत् ?

(ज) कर्मणि प्रयोगे कर्मपदे का विभक्तिः प्रयोक्तव्या ?

(झ) एकवचनस्य वाक्यानि बहुवचने बहुवचनस्य चैकवचने परिवर्तयत ।

(ञ) द्रष्टव्य, देय इत्यनयोः शब्दयोः त्रिषु लिङ्गेषु रूपाणि लिखत ।

योग्यं शक्यं वेत्यर्थे धातोः कर्मणि भावे चार्थे कृत्यप्रत्यया भवन्ति । तव्यत्, तव्य, अनीयर्, यत्, ण्यत्, क्यप्, केलिमर् इत्येते कृत्प्रत्ययाः कृत्यसंज्ञकाः सन्ति । अकर्मकधातुभ्यो भावे सकर्मकधातुभ्यश्च कर्मणि प्रत्ययविधानात् कृत्यप्रत्ययान्तपदानां कर्तरि अनुक्ततया तृतीयाविभक्तिर्भवति, कर्मणि च उक्ततया प्रथमा भवति । सर्वेऽपि कृत्यप्रत्ययान्तशब्दाः विशेष्यनिघ्ना भवन्तीति एतेषां त्रिषु लिङ्गेषु रूपाणि निष्पद्यन्ते । धातूनां णिजन्त-सन्नन्तादिस्वरूपेभ्योऽपि कृत्यप्रत्यया जायन्ते ।

### २. अधस्तनविशेषणपदानां कृते एकैकं विशेष्यपदं विलिखत

कर्तव्यानि .................... चेतव्यम् .................... दातव्यौ ....................

द्रष्टव्येन .................... स्मर्तव्या .................... वदनीयम् ....................

जेयानि .................... हरणीयाः .................... पाठ्यौ ....................

### ३. अधो लिखितानि पदानि प्रयुज्य वाक्यानि रचयत

श्रव्यम्, चेया, गन्तव्यम्, करणीयानि, हार्यम्, कर्तव्यः, भवनीयम्, शप्यम्, पठितव्यान्, लेखनीयस्य, शयितव्यम्, पचेलिमः, स्थापनीयम्, कार्या, पूजनीयाय, वन्दनीयायै, विधातव्यम्, स्तुत्या ।

### ४. अधस्तनपदानामर्थं विलिख्य प्रकृतिप्रत्ययौ पृथक् कुरुत

ग्लेयम्, भवितव्यम्, क्रीडनीयम्, दातव्यम्, हार्यम्, जेयम्, कार्यम्, स्थेयम्, पानीयम्, भिदेलिमाः, वक्तव्यम्, द्रष्टव्यम्, क्रेयम्, श्रवणीयम्, एधनीयम्, शप्यम्, विधेयम्, शिष्यम्, इत्यम्, भोज्यम् ।

### ५. अधस्तनधातुप्रत्ययैर्निष्पन्नरूपाणि प्रयुज्य प्रतिपदं वाक्यानि रचयत

भू + अनीयर्, हृ + ण्यत्, लभ् + तव्यत्, कृ + तव्य, पा + अनीयर्, दा + यत्, चि + अनीयर्, श्रु + तव्य, पच् + ण्यत्, भिद् + केलिमर्, पठ् + णिच् + तव्यत्, वच् + ण्यत्, जि + यत्, ग्लै + यत्, गम् + णिच् + अनीयर्, स्तु + क्यप् ।

### ६. समुचितैः कृत्यप्रत्ययान्तपदैः स्थूलाक्षरयुतानि पदानि विष्ठाप्य प्रदत्तवाक्यानां पुनर्लेखनं कुरुत

(क) पुस्तकमिदं **पठितुं योग्यं** वर्तते ।

(ख) वेदवाक्यानि **स्मर्तुं योग्यानि** भवन्ति ।

(ग) धनिकाय धनं **दातुमयोग्यम्** ।

(घ) शत्रुरयं **जेतुं शक्यो** वर्तते ।

(ङ) सरस्वती **स्तोतुं योग्या** देवी अस्ति ।

(च) कतिपया मनोरथा **लब्धुमशक्या** भवन्ति ।

६. कृत्यप्रत्ययान्तानि पदानि प्रयुज्य अनुच्छेदमेकं विलिखत ।

## समासप्रयोगः

१. वाक्यानि पठित्वा अधस्तनकार्यकलापान् कुरुत

- स्वरोऽयं मया श्रुतपूर्व इव अनुभूयते ।
- वागर्थाविव नित्यमिलितौ पार्वतीपरमेश्वरौ शब्दार्थज्ञानप्रदानसमर्थौ स्तः ।
- अद्य भूतपूर्वेण प्रधानमन्त्रिणा महोत्सवस्योद्घाटनं विहितम् ।
- दृष्टपूर्वस्य चलचित्रस्य दर्शने किमौत्सुक्यम् ?
- छात्र उपगुरु तिष्ठति ।
- अस्माभिर्यथाशक्ति सहायहीनानां रक्षा करणीया ।
- प्रत्येकं नागरिकेण राष्ट्रसेवा कर्तव्या ।
- शीतकाले गृहे निर्मक्षिकं भवति ।
- माता अनुपुत्रमापणं गच्छति ।
- पत्नी सपति प्रातर्भ्रमणं करोति ।
- सम्प्रति प्रतिगृहं संस्कृतमित्यभियानं प्रचलद् वर्तते ।
- वयं सुनेपालं भवत्विति कामयामहे ।

(अ) स्थूलाक्षरकपदानि समस्तपदैर्विष्ठाप्य अधस्तनवाक्यानां पुनर्लेखनं कुरुत ।

(क) सीता **रामस्य समीपं** गच्छति ।

(ख) वयं **पूर्वं कृतं** कार्यं पुनः पुनः कुर्मः ।

(ग) मरुप्रदेशे **जलस्य अभावो** वर्तते ।

(घ) **एकमेकं प्रति** छात्रैर्गुरोराज्ञा पालनीया ।

(ङ) पण्डितो **मतिमनतिक्रम्य** हरिकथां विस्तारयति ।

(आ) अधस्तनपदानां वाक्ये प्रयोगं दर्शयत

अधिराजम्, यथार्थम्, अतिनिद्रम्, ससखि, परोक्षम्, प्रत्यक्षम्, निर्धनम्, उपशरदम्, सतृणम्, सुमित्रम्, अतिहिमम्, अनुरूपम् ।

(इ) अधस्तनपदानां कृते समुचितविशेषणपदं योजयित्वा वाक्यानि रचयत

अधीतपूर्वा ................. गतपूर्वम् .................

| | | | |
|---|---|---|---|
| भूतपूर्वः | ................ | कथितपूर्वा | ................ |
| श्रुतपूर्वः | ................ | ज्ञातपूर्वम् | ................ |

(ई) पाठे प्रयुक्तानि समस्तपदानि रेखाङ्कितानि विधाय तेष्वव्ययीभावसमासेन निष्पन्नानां पदानां स्वशब्दैर्वाक्ये प्रयोगं कुरुत ।

## २. समासजान्यव्ययपदानि प्रयुज्य अनुच्छेदमेकं लिखत ।

## तद्धितान्तप्रयोगः

## १. वाक्यानि पठित्वा अधस्तनकार्यकलापान् कुरुत

- वासुदेवः कृष्णः स्वमातुलं कंसं जघान ।
- दाशरथी रामो जानक्या सह विवाहं चक्रे ।
- गाङ्गेयो भीष्म आजीवनं ब्रह्मचर्ये तस्थौ ।
- कानीनो व्यासोऽष्टादशपुराणानि व्यरचयत् ।
- मम भगिनी भागिनेयं भागिनेयाञ्च शाययति ।
- शैवो गणेशो द्वैमातुरो वर्तते ।
- कार्तिकेयः कुमार एव षाण्मातुरोऽपि नाम्ना ख्यातो विद्यते ।
- दैत्या आदित्यैः सह युद्धं कुर्वन्ति ।
- वैनतेयो गरुडो विष्णोर्वाहनं वर्तते ।
- युधिष्ठिरो ज्येष्ठः पाण्डवोऽस्ति ।
- वासुदेवः कौन्तेयाय ज्ञानं ददौ ।

(अ) समुचिततद्धितान्तपदै रेखाङ्कितानि व्युत्पत्तिवाक्यानि समस्तपदानि वा प्रतिष्ठाप्य वाक्यानां पुनर्लेखनं विधत्त

(क) **सुमित्राया अपत्यं पुमान्** सरामं वनं जगाम ।

(ख) **विश्वामित्रापत्याय** फलं बहु रोचते स्म ।

(ग) **कुरोरपत्यानि पुमांसो**ऽतिगर्भेण विनष्टाः ।

(घ) **पञ्चालानां राजा** जनप्रिय आसीत् ।

(ङ) **राधाया अपत्यं** कर्णो महादानी बभूव ।

(च) **द्रोणापत्यं** दुर्योधनस्य हितमिच्छति स्म ।

(छ) अर्जुनः **पृथाया अपत्य**मासीत् ।

(ज) **<u>गर्गस्य गोत्रापत्यं</u>** पुरुषश्चतुरो वर्तते ।

(झ) **<u>दक्षस्यापत्यस्य दक्षस्य युवापत्ये</u>** महान् स्नेहो विद्यते ।

(ञ) पितामहः **<u>पुत्रस्यापत्यं स्त्रियं</u>** ज्योतिषमध्यापयति ।

(आ) अधस्तनानां पदानामर्थं विलिख्य वाक्येषु प्रयोगञ्च दर्शयत

दौहित्री, नाकुलः, गर्गाः, रैवतिकः, राजन्या, यवनः, पौत्रः, गाङ्गः, आश्वपतः, स्त्रैणः, गव्यम्, बाहीकः, गाणपतम्, दाशरथिः, आङ्गः, काश्यपः, वासिष्ठः, वैष्णवः, बाहविः, शैवेयः ।

(इ) अधस्तनविग्रहेष्वपत्यार्थप्रत्ययैर्जायमानानि रूपाणि विलिख्य वाक्येषु तत्प्रयोगं दर्शयत

सुपर्णाया अपत्यं पुमान्, मगधस्य राजा, भृगोरपत्यम्, भगिन्या अपत्ये स्त्रियौ, पुत्रस्यापत्यानि पुमांसः, विदेहस्यापत्यं स्त्री, जनकस्यापत्यं स्त्री ।

(ई) वेदव्यासः कर्णश्च किमर्थं कानीनावुच्येते ?

(उ) उपरितनवाक्येषु स्थूलाक्षरयुक्तपदानां सव्युत्पत्ति प्रकृतिप्रत्ययान् पृथक्कुरुत ।

**२. अपत्यार्थप्रत्ययैर्निष्पन्नानि कानिचन दश तद्धितान्तपदानि सङ्कलय्य तेषां वाक्येषु प्रयोगकौशलं प्रदर्शयत ।**

# हृत्कम्पको भूकम्पः

जगदनादिकालाद् विभिन्नाभिर्विपत्तिभिर्व्यथमानमस्ति । एतासु प्रकृतिजा विपत्तिर्दुःखातिशयं सृजति । अनया जनधनानां महती क्षतिर्जायते, लक्षशो जनाः पीडया जीवनं यापयन्ति । अनावृष्ट्यतिवृष्टि-जलविप्लव-भूस्खलन-वज्रपात-भूकम्पादयः प्राकृतिकविपत्तयः सन्ति । एतास्वपि भूकम्पो दुर्दान्त एव योऽखिलेषु प्राणिषु दुर्दशां जनयति । नेपालोऽपि मुहुर्मुहुर्भूकम्पेन पीडितदेशो वर्तते । नवत्युत्तरैकोनविंशतिशततमे वैक्रमाब्दे दुरापन्नं प्रलयसमं महाभूकम्पं वयं बहु शृण्मः, पठामश्च । तदनन्तरं द्वासप्तत्यधिकद्विसहस्रतमे विक्रमवर्षे दुरागतो भूकम्पो भीषणतरो मन्यते । दशमलवाष्टोत्तरसप्तायतन (म्याग्निच्युड)-परिमापनेनाभिलिखितोऽसौ भूकम्पोऽधुनावधि आसंसारं घटितेषु भूकम्पेषु विपुल उक्तः । बहवो जना गोरखाभूकम्पनाम्ना परिचितस्यास्य प्रभावमधुनाप्यनुभवन्ति, संस्मृत्य कम्पन्ते च । करालभूकम्पो न कदापि पुनर्वर्ततामिति ते कामयन्ते ।

वैशाखमासस्य द्वादशे दिवसे शनैश्चरवासरे षट्पञ्चाशत्कलाधिकैकादशवादनस्य मध्याह्ने भूकम्पोऽयं दुरापन्नः । जनाश्चतुरस्रमधावन्, सर्वत्र कोलाहलः श्रुतः । केचन ससम्भ्रमं दूरभाषेण वक्तुं प्रायतन्त परं तस्य सञ्जालो विच्छिन्न आसीत् । दूरदेशादपि सम्बन्धिजनाः स्वजनैस्सह दूरभाषसम्पर्कं विधातुमयतन्त । वारंवारं भूः कम्पमाना एवासीत् । भीत्या त्वरमाणा जना निर्गतचेतस इव दृष्टाः । कतिचित्कालानन्तरं वैद्युतसञ्चारमाध्यमा जनधनानां क्षतेर्विवरणं प्रासारयन् । भयातुरा जनास्तच्छ्रुत्वा दृष्ट्वा च वैक्लव्यं गताः । हताहतानां जनानां व्यवस्थापनोपचारौ तीव्रं कारितौ । सर्वकारेण, सामाजिकसङ्घसंस्थाभिः, स्वयंसेवकैश्चोद्धारसहायतयोः कार्याणि विहितानि । वैदेशिकराष्ट्राण्यपि सहयोक्तुं तत्पराणि अभवन् । देशस्य विभिन्नेभ्यो भागेभ्योऽपि हृद्विदारिणी वार्ता श्रुता । आहतानां जनानां विपुलसम्मर्देन चिकित्सालया भरिताः । विद्यालय-महाविद्यालयाः, सार्वजनिकभवनानि, रिक्तभूमयश्च पीडितानां जनानामाश्रयस्थलान्यभवन् । राष्ट्रेणाब्जशो रूप्यकाणां हानिः सोढा, अर्थतन्त्रं दुष्प्रभावितम्, विपन्नतावर्धत । उद्धारसहायतापुनस्स्थापनकार्याणि भूकम्पोत्तरपुनर्निर्माणानि युगपदचलन् । पुनर्निर्माणमन्तिमचरणं प्राप्तमस्ति । शीघ्रं पूर्णतामेतीति सर्वकारः कथयति ।

तस्य भूकम्पस्य भयावहास्तथ्याङ्काः सन्ति । तेन नेपाल एवाष्टौ सहस्राणि, अष्टशतम्, सप्तपञ्चाशच्च जना अम्रियन्त परं योगतोऽष्टौ सहस्राणि, नवशतम्, चतुःषष्टिश्च जना मृता इति तथ्याङ्काः सङ्केतयन्ति । एकविंशतिसहस्राणि, नवशतम्, द्वादश च जना आहता अभवन् ।

सहस्रशो जना अपाङ्गतां प्राप्ताः, त्रिंशल्लक्षाणि, पञ्चाशत्सहस्राणि च जना आवासहीना अजायन्त। लक्षषट्कादप्यधिकानि भवनानि क्षतिग्रस्तानि जातानि। राजधान्या भीमसेनस्तम्भ-काष्ठमण्डपसहिता राष्ट्रगौरववर्धिन्यः संरचना ध्वस्ता अभवन्। मन्दिराणीतराणि स्मारकस्थलान्यप्यत्रुटन्। भूकम्पस्य गभीरता दशमलवद्व्यधिकाष्टकिलोमिटरमिता दशमलवैकोत्तरपञ्चमाइलमिता वा परिमापिता आसीत्। भूकम्पस्य केन्द्रविन्दुर्गोरखाजनपदस्य वारपाकस्थानमासीत्। स्थानमेतद्राजधान्याः काष्ठमण्डपत उत्तर-पश्चिमदिग्भागे षष्टिकिलोमिटरदूरत्वे वर्तते।

भूकम्पनकाले लोकोऽकथयत्, "गृहं न निर्मामि, तत्र न निवसामि; कुटीरमाश्रयामि। विशालानि भवनानि खण्डयामि; न च तत्र कदाचिद्यामि। गृहस्य द्व्यधिकानि तलानि सद्य एव पातयामि।" परं यदा भूकम्पस्य प्रभावः शैथिल्यं प्राप्तस्तज्जभयञ्च निवृत्तं तदा सर्वं कथनं विस्मृतिपथं गतम्। भूकम्पनमेकवारमेव न वारंवारं भवति येन सर्वे प्राणिनो दूयन्ते। एतद् जीवान् हरति; धनानि क्षयं नयति; आजीवनमस्मान् व्यथयति च। अनेन सर्वैः शिक्षितव्यं भवति तदपि लोकोऽत्र पराङ्मुखो दृश्यते इति महदाश्चर्यस्य विषयो वर्तते।

भूकम्पः कदा, केन, कथं, कुत्र घटते इति जिज्ञासाया विषयो वर्तते। महापर्वतानां मध्यस्थायाः समतलभूमेरन्तभागौ यदा तीव्रं घर्षतस्तदा भूकम्पनं भवतीत्युच्यते। द्वासप्तत्यधिकद्विसहस्रतमविक्रमाब्दस्य भूकम्पश्च भारतीय-युरोपैसयिकसीमाक्षेत्रे विद्यमानयोः समतलभूमेरन्तभागयोः सङ्घर्षणाद्दुरापन्न इति विज्ञानां सम्मतिरस्ति। विज्ञानमाविश्वं विस्मयमाविष्कुर्वदस्ति। इदं जलवाय्वोर्गतिं वेत्ति, भविष्यञ्च वक्ति परं भूकम्पं नाकलयति। यदि विज्ञानं भूकम्पमकथयिष्यत्तत्कृता हानिर्नाभविष्यत्। स्वाभ्यन्तरतापोच्छलनेन भूर्वेपते इति भूगर्भविदस्तर्कयन्ति परमेतत् कदा भवतीति कथनाद् विरमन्ति। काले व्यतीते केचन विज्ञा भूकम्पं विश्लिष्यन्ति, तर्कान् श्रावयन्ति, जनान् सचेष्टाँश्च कारयन्ति। भूकम्पनात् प्राग् यदीत्थं क्रियेत तदा सर्वनाशो रोद्धुं शक्येत।

ज्योतिर्विदो भूकम्पने ग्रहगणस्य स्थितिं कारणं मन्वते। विपुलग्रहाणां परस्परं केन्द्रत्रिकोणेन भूकम्पो जायते। बहुषु ग्रहेषु एकस्मिन् राशाववस्थितेषु सत्स्वपि भूकम्पो दुर्घटते। भूकम्पनाय कालश्च कारणं भवति। भूकम्पः प्रायो मध्याह्नकालतः सूर्यास्तात् प्राग् दुरागच्छति। एवमेव मध्यरात्रात् सूर्योदयं यावदस्य घटनं सम्भवति। ग्रहवक्रता भूकम्पस्यापरं कारणं निर्णीयते। शनि-मङ्गल-बृहस्पतीनां मध्ये कस्मिन्नपि ग्रहे वक्रतां प्राप्ते भूकम्पनस्याधिकसम्भावनाकल्यते। नवत्यधिकैकोनविंशतिशततमवैक्रमाब्दस्य माघमासस्य द्वितीयदिवसे दुरापन्नस्य महाभूकम्पनस्यावधौ पञ्चानां सूर्य-शनि-चन्द्र-मङ्गल-राहुग्रहाणां मकरराशाववस्थितिरासीत्। समयश्चापराह्नकाल आसीत्। द्वासप्तत्यधिकद्विसहस्रतमवैक्रमाब्दस्य वैशाखमासस्य द्वादशदिवसे घटितस्य भूकम्पनस्य क्षणे शनिर्वक्रतां प्राप्त आसीत्। सूर्य-मङ्गल-बुधा मेषराशिमुपविष्टा आसन्। कालश्च मध्याह्न एव। भूकम्पनमिदमेतस्मादेव हेतोर्घटितमिति ज्योतिषशास्त्रमनुसरन्तो जना विश्वसन्ति।

धार्मिकग्रन्थेषु बहुविधप्रलया उल्लिखिताः सन्ति, यथा– नैमित्तिकः, प्राकृतिकः, आत्यन्तिकः, नित्यश्च। नैयायिकाः खण्डप्रलयो महाप्रलयश्चेति द्विविधं प्रलयं प्रवदन्ति। भावार्थरामायणं

नित्यप्रलय-मरणप्रलय-दैनन्दिनप्रलय-ब्रह्मप्रलयात्यन्तिकप्रलयभेदेन पञ्चप्रलयान्निर्दिशति । भूकम्पोऽपि विनाशहेतुत्वात् प्रलयविशेषो वर्तते । धर्ममनुपालयन्तः शास्त्रेषु कृतधियश्च जना गतं भूकम्पं प्राकृतिकप्रलयमेवामन्यन्त ।

## अभ्यासः

### श्रवणं भाषणं च

१. **भूकम्पस्य हानेर्निराकरणायावलम्बनीयान् ज्ञातोपायान् कक्षायां श्रावयत ।**

२. **पदानां शुद्धोच्चारणं कुरुत**

हृत्कम्पकः, विपत्तिभिः, दुःखातिशयम्, वैक्रमाब्दे, संस्मृत्य, मध्याह्ने, हृद्विदारिणी, दुष्प्रभावितम्, शैथिल्यम्, पराङ्मुखम्, आविष्कुर्वद्, आत्यन्तिकः ।

३. **पाठस्य तृतीयानुच्छेदस्य वाचनं श्रुत्वा वाचनाभ्यासं कुरुत ।**

४. **पदानां विभक्तिवचननिर्देशनपुरस्सरमधस्तनसारिण्यां लिखित्वा वाचयत**

कालाद्, एतासु, दुर्दशाम्, वैशाखमासस्य, दिवसे, कोलाहलः, सर्वकारेण, जनानाम्, तस्य, भवनानि, राजधान्याः, येन, जिज्ञासायाः, तर्कान्, भूकम्पनात्, ग्रहेषु, धर्मम्, पञ्चानाम् ।

| पदम् | विभक्तिः | वचनम् |
|---|---|---|
| | | |

५. **प्राकृतिकसौन्दर्ययुतानि केषाञ्चित् पञ्चानांस्थलानां नामानि कथयत ।**

६. **प्रदत्तेभ्यः पदेभ्य उपसर्गान् पृथक्कृत्य वदत**

विभिन्नाभिः, दुरागतः, परिचितस्य, प्रायतन्त, सञ्जालः, विच्छिन्नः, विधातुम्, उपचारः, आहतानाम्, दुष्प्रभावितम्, सङ्केतयन्ति, अपाङ्गता, संरचना, परिमापिता, निर्मामि, निवसामि, प्रभावः, निवृत्तम्, निर्णीयते, प्राप्तः, उपविष्टाः, अनुसरन्तः, उल्लिखिताः ।

७. **'शरत्कालः' अस्मिन् विषये परस्परं विमृश्य वर्णयत ।**

८. **पाठं पठित्वाधिगतं विषयं स्वशब्दैः श्रावयत ।**

९. **'भूकम्प एकविधः प्रलय' इति विषये कक्षायां स्वमतमुपस्थापयत ।**

१०. **भूकम्पः कथं जायते ? वदत ।**

११. **पाठस्योपान्तिममनुच्छेदं सस्वरं वाचयत ।**

## पठनम्

१. **पाठस्य प्रथमानुच्छेदमुच्चैः स्वरेण पठत ।**

२. **पाठस्य द्वितीयमनुच्छेदं पठित्वा क्तप्रत्यान्तपदानां सूचीं निर्मात ।**

३. **पाठस्य मौनपठनेनाज्ञातार्थानि पदानि सङ्कलय्य कोशसाहाय्येनार्थानन्विषत**

४. **पाठस्यान्तिममनुच्छेदं पठित्वा समस्तपदानि सङ्कलयत ।**

५. **पाठस्य पञ्चममनुच्छेदं पठित्वा प्रश्नानुत्तरयत**

(क) भूकम्पनं कथं भवतीत्युच्यते ?

(ख) विज्ञानां कस्मिन् विषये सम्मतिरस्ति ?

(ग) विज्ञानं किं कुर्वदस्ति ?

(घ) किं भविष्यं वक्ति ?

(ङ) विज्ञानं किं नाकलयति ?

(च) भूगर्भविदः किं कथयन्ति ?

(छ) कथं सर्वनाशो रोद्धुं शक्यते ?

(ज) 'भूकम्पः कदा, केन, कथं, कुत्र घटते इति जिज्ञासाया विषयो वर्तते' अस्मिन् वाक्ये कानिचन त्रीणि अव्ययपदानि चिह्नीकुरुत ।

(झ) 'प्राक्' इति पदस्य योगे कस्या विभक्तेः प्रयोगो भवति ?

(ञ) 'इदं जलवाय्वोर्गतिं वेत्ति, भविष्यञ्च वक्ति परं भूकम्पं नाकलयति' अत्र सर्वनामपदं किमस्ति ?

(ट) 'यदा-तदा' प्रयुज्य वाक्यमेकं रचयत ।

(ठ) 'विरमन्ति' अस्य उपसर्गधातुलकारवचनपुरुषान् निर्दिशत ।

(ड) 'मध्यस्थायाः' इति कस्य विशेषणम् ?

(ढ) अनुच्छेदात् किञ्चनैकं लृङ्लकारान्तपदमन्विष्य लिखत ।

(ण) 'कथनाद्' अस्य प्रातिपदिकविभक्तिलिङ्गवचनं निर्दिश्य अर्थापनञ्च कुरुत ।

६. **अधस्तनगद्यं पठित्वा तदनुवर्तिप्रश्नानुत्तरयत**

अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः । एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोकविमोकः कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य । अयमेव अहोरात्रं जनयति । अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति । अयमेव कारणं

षण्णामृतूणाम् । एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम् । अनेनैव सम्पादिता युगभेदाः । अनेनैव कृताः कल्पभेदाः । एनमेवाश्रित्य भवति परमेष्ठिनः परार्द्धसङ्ख्या । असावेव चर्करीर्ति, बर्भर्ति, जर्हर्ति च जगत् । वेदा एतस्यैव वन्दिनः । ब्रह्मनिष्ठा ब्राह्मणा अमुमेवाहरहरूपतिष्ठन्ते । गायत्री अमुमेव गायति । धन्य एष कुलमूलं श्रीरामचन्द्रस्य । प्रणम्य एष विश्वेषाम् । (शिवराजविजयः)

## प्रश्नाः

### (अ) अनुच्छेदाद् गृहीतवाक्यं पठित्वा प्रश्नानुत्तरयत

अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति ।

(क) अत्र अव्ययपदं किम् ?

(ख) अस्मिन् वाक्येऽधिकरणपदं किम् ? किञ्च तस्य विशेषणम् ?

(ग) प्रस्तुतस्य वाक्यस्य क्रियापदे कस्य उपसर्गस्य प्रयोगोऽस्ति ?

(घ) 'विभनक्ति' अस्य धातुः कः ?

(ङ) 'वत्सरम्' अस्य कारकं किम् ?

(च) उपसर्गयुतानि कानिचन पञ्च क्रियापदानि लिखत ।

### (आ) एकवाक्येनोत्तरयत

(क) प्रकाशः कीदृशोऽस्ति ?

(ख) दिनस्येनः कः ?

(ग) केन कल्पभेदाः कृताः ?

(घ) वेदाः कस्य वन्दनां कुर्वन्ति ?

(ङ) 'नक्तन्दिवम्' अस्य पर्यायोऽनुच्छेदे कः प्रयुक्तः ?

(च) 'उपतिष्ठते' अस्य स्वशब्दैर्वाक्ये प्रयोगं कुरुत ।

(छ) 'मरीचिमाली' अस्य विग्रहं कुरुत ।

### (इ) सङ्क्षेपेणोत्तरयत

(क) अनुच्छेदाधारेण सूर्यः को वर्तते ? इति लिखत ।

(ख) आदित्यः किं किं करोति ?

(ग) ऋतुनामान्युल्लिख्य वत्सरस्य द्वादश भागाः के ? इति स्पष्टयत ।

(घ) भास्करः कथं श्रीरामचन्द्रस्य कुलमूलं वर्तते ?

(ङ) अनुच्छेदात् पञ्च क्रियापदानि अन्विष्य तेषां वाक्येषु प्रयोगं कुरुत ।

(च) अनुच्छेदमाधृत्य सूर्यस्य विषये पञ्चवाक्यात्मकमेकमनुच्छेदं रचयत ।

### (ई) सन्ध्याकालं स्वगिरा वर्णयत ।

## ७. गद्यं सम्पठ्य प्रश्नानुत्तरयत

विश्वतापमानवृद्धेः कारणेन ऋतुषु जायमानं परिवर्तनमेव जलवायुपरिवर्तनं कथ्यते। पृथ्वीं लक्ष्यीकृत्य सौर्यविकिरणाः यथा निपतन्ति तथैव निश्चितपरिमाणयुताः विकिरणाः पृथ्वीतोऽपि अन्तरिक्षं प्रति निष्क्रामन्ति । अस्मात् कारणात् पृथ्व्या वायुमण्डलस्य तापक्रमः सन्तुलितो जायते परन्तु अस्यां प्रक्रियायां न्यूनतोच्चता वा भवति चेत् तापक्रमोऽसन्तुलितो भवति। सम्प्रति कार्बनडाइअक्साइड-मिथेन-नाइट्रोजनअक्साइडनामकानां हरितगृहे प्रभावोत्पादकानां वायूनाम्, ओजोनग्रेण्याश्च विनाशाय प्रभावोत्पादकानां क्लोरोफोराकार्बनसदृशानां विषालुवायूनामुत्सर्जनं प्रतिदिनं वर्धमानमस्ति । यतः परावर्तिता विकिरणा वायुमण्डले एव अवरुद्धाः सन्तः पृथ्व्यास्तापमानं वर्धयन्तः सन्ति। पर्यावरणविद इमामेव परिस्थितिं भूमण्डलीयोष्णतानाम्ना विश्वव्यापि-उष्णीकरणाभिधेयेन वा सम्बोधयन्ति। अनेनैव कारणेन परिणामतो जलवायुसम्बद्धतथ्याङ्कस्य नियमिततायां स्थायि परिवर्तनं दृश्यमानमस्ति। एतदेव परिवर्तनं जलवायुपरिवर्तनमिति ज्ञायते। औद्योगिकीकरणवनसम्पद्विनाशादयो गतिविधयः जलवायुपरिवर्तनस्य कारकाः सन्ति। जनसङ्ख्यावृद्धया सह १९६० ईशवीयाब्दानन्तरं जातस्य औद्योगिकविकासस्य विस्तारस्य च प्रतिकूलप्रभावो जलवायुपरिवर्तनस्य प्रमुखं कारणमस्तीति तथ्यं सिद्धं वर्तते। जीवावशेषेन्धनानामत्यधिकप्रयोगेणोत्सृज्यमानानां हरितगृहवायूनां प्रभावं वनसम्पदवशोषयति। अतो वनविनाशेन हरितगृहवायोः प्रभावो वर्धते। वनविनाशेन भूक्षयीकरणेन च कार्बनडाइ-अक्साइडवायवः वायुमण्डले सम्प्रेष्यन्ते। ततो वातावरणीयमसन्तुलनमुत्पद्यते। एतेन पृथ्व्या औसततापमानं प्रतिदिनं वर्धमानमस्ति। अस्य प्रभावं न्यूनीकर्तुं मानव एव क्षमोऽस्ति। यदि अधुनाऽस्य हानिं निराकर्तुं मानवो न प्रयतते चेन्मानवानामस्तित्वं सङ्कटापन्नं भवत्येव।

### प्रश्नाः

(क) कथं पृथ्व्यास्तापमानं वर्धमानमस्ति ?

(ख) जलवायुपरिवर्तनस्य कारकान् विलिख्य प्रमुखं कारणञ्च लिखत।

(ग) अनुच्छेदमाधृत्य वनसम्पदो महत्त्वं वर्णयत।

(घ) गद्यतः पञ्चसूत्रवाक्यानि उद्धृत्य लिखत।

(ङ) भूमण्डलीयोष्णतां न्यूनीकर्तुमवलम्बनीयान् काँश्चनोपायान् निर्दिशत।

## लेखनम्

## १. प्रदत्तपदानां पाठानुकूलमर्थापनं कुरुत

| | | |
|---|---|---|
| (क) प्रकृतिजा | (ख) प्राकृतिकविपत्तयः | (ग) दुर्दान्तः |
| (घ) मुहुर्मुहुः | (ङ) दुरापन्नः | (च) भीषणतरः |

(छ) आसंसारम्　　(ज) ससम्भ्रमम्　　(झ) त्वरमाणाः

(ञ) वैद्युतसञ्चारमाध्यमाः　　(ट) हृद्विदारिणी　　(ठ) युगपद्

(ड) राष्ट्रगौरववर्धिन्यः　　(ढ) विस्मृतिपथम्　　(ण) पराङ्मुखाः

(त) ज्योतिर्विदः　　(थ) कृतधियः

## २. वाक्येषु प्रयोगं कुरुत

लक्षशः, विपुलः, संस्मृत्य, करालभूकम्पः, कोलाहलः, भयातुराः, तत्पराणि, शीघ्रम्, सर्वकारः, कुटीरम्, आजीवनम्, तीव्रम्, प्राक्, निर्णीयते, मध्याह्नः, प्रलयः ।

## ३. सन्धिं विच्छेदयत

विपत्तिर्दुःखातिशयम्, लक्षशो जनाः, एतास्वपि, योऽखिलेषु, नवत्युत्तरैकोनविंशतिशततमे, तदनन्तरम्, विपुल उक्तः, जनाश्चतुरस्रम्, प्रायतन्त, स्वजनैस्सह, तच्छ्रुत्वा, विपन्नतावर्धत, एवाष्टौ, सप्तपञ्चाशच्च, मन्दिराणीतराणि, द्व्यधिकानि, समतलभूमेरन्तभागौ, भवतीत्युच्यते, नाकलयति, भूगर्भविदस्तर्कयन्ति, सचेष्टाँश्च, राशावस्थितेषु, सूर्योदयम्, कस्मिन्नपि, हेतोर्घटितम्, कृतधियश्च ।

## ४. अविस्तरेण उत्तरयत

(क) कीदृशी विपत्तिर्दुःखातिशयं सृजति ?

(ख) कया जनधनानां महती क्षतिर्जायते ?

(ग) कदा दुरागतो भूकम्पो भीषणतरो मन्यते ।

(घ) जनाः कुत्राधावन् ?

(ङ) कुतो हृद्विदारिणी वार्ता श्रुता ?

(च) कान्यप्यत्रुटन् ?

(छ) ज्योतिर्विदो भूकम्पने किं कारणं मन्वते ?

(ज) नैयायिकाः कतिविधं प्रलयं प्रवदन्ति ?

## ५. अधस्तनान् प्रश्नान् नातिविस्तरेण उत्तरयत

(क) प्रकृतिजया विपत्त्या किं किं भवति ?

(ख) काः प्राकृतिकविपत्तयः सन्ति ? तासु भूकम्पः कीदृशो वर्तते ?

(ग) नेपाले कदा कदा भीषणतरो भूकम्पो दुरागतः ?

(घ) वैशाखमासस्य द्वादशे दिवसे भूकम्पस्य दुरागमनपश्चात् कीदृशी स्थितिः समुत्पन्ना ?

(ङ) भूकम्पनपश्चाद् मनुष्याः कुत्र कुत्राश्रिताः ?

(च) भूकम्पनेन विहितायाः क्षतेर्विवरणं प्रस्तुत ।

(छ) भूकम्पनकाले मानवाः किमकथयन् ?

(ज) महदाश्चर्यस्य विषयः कः ?

(झ) ज्योतिर्विदां मतानुसारेण भूकम्पः कदा सङ्घटते ?

(ञ) प्रलयस्य वर्गीकरणे कीदृशं वैविध्यं प्राप्यते ?

६. **पाठस्य प्रथमानुच्छेदं भूतकाले परिवर्त्य लिखत ।**

७. **प्रबन्धलेखनस्यावश्यकतत्त्वानि विवेचयत ।**

८. **'हरितं वनम्, नेपालस्य धनम्' इत्यस्याशयं स्फुटीकुरुत ।**

९. **भूकम्पः किमर्थं प्रलयः कथ्यते ? पाठाधारेण लिखत ।**

१०. **'पर्यावरणम्' इति विषये एकमनुच्छेदं रचयत ।**

११. **'मम देशः' अस्मिन् शीर्षके प्रदत्तविषयान् समाविश्यैकं प्रबन्धं रचयत**

(क) भौगोलिकी अवस्थितिः

(ख) प्रकृतिः

(ग) संस्कृतिः

(घ) इतिहासः

(ङ) निष्कर्षः

## अनुप्रयुक्तव्याकरणम्

### कृदन्तप्रयोगः - क्त-क्तवत्वन्तः

१. **वाक्यानि पठित्वा यथानिर्देशं कुरुत**

- स कवितां **श्रुतवान्** । स द्वे कविते **श्रुतवान्** । स तिस्रः कविताः **श्रुतवान्** ।
- तेन कविता **श्रुता** । तेन द्वे कविते **श्रुते** । तेन तिस्रः कविताः **श्रुताः** ।
- श्रोतारौ कवितां **श्रुतवन्तौ** । श्रोतारः कवितां **श्रुतवन्तः** ।
- श्रोतृभ्यां कविता **श्रुता** । श्रोतृभिः कविता **श्रुता** ।
- सा कवितां **श्रुतवती** । द्वे सख्यौ कवितां **श्रुतवत्यौ** । बह्व्यः सख्यः कवितां **श्रुतवत्यः** ।
- मित्रं कवितां **श्रुतवत्** । मित्रे कवितां **श्रुतवती** । मित्राणि कवितां **श्रुतवन्ति** ।
- तया कविता **श्रुता** । सखीभ्यां कविता **श्रुता** । मित्रैः कविता **श्रुता** ।

- मया श्लोकौ **श्रुतौ** । त्वया समाचाराः **श्रुताः** । अस्माभिः प्रवचनं **श्रुतम्** ।
- युवाभ्यां पाठाः **पठिताः** । गायकैर्गीतानि **गीतानि** । अनुच्छेदं छात्रेण **वाचितम्** ।
- मया प्रातः स्नातम् । बालेन शय्यायां शयितम् ।
- विद्यार्थिनां शिक्षणे विद्यालयेन यथाशक्ति प्रयासो **विहितो**ऽस्ति ।
- बालिका श्वेतानि वस्त्राणि **धृतवती** विद्यते ।
- **शुष्कं** पुष्पं कस्मै रोचते ?
- वयं **पक्वानि** फलानि स्वादेन **खादितवन्तः** ।
- **कृते** यत्ने किमप्यसम्भवं नास्ति ।
- **पीतं** दुग्धं बलं वर्धयति ।
- **छिन्ने** पुच्छेऽपि कुक्कुरो गौर्न भवति ।
- घोटको रज्ज्वा **बद्धो** वर्तते ।
- 'प्रेजते' इत्यत्र **प्राप्तायाम**पि वृद्धौ पररूपं विधेयम् ।
- आपणं **गतेन** पित्रा मम कृते पुस्तक**मानीतम्** ।
- शिक्षकः सर्वोत्कृष्टानङ्कान् **लब्धवते** छात्राय पुरस्कारमयच्छत् ।
- एते जन्तवोऽत्र पूर्वं **दृष्टा** नास्ति ।
- भवती प्रातः कदा **उत्थितवती** ?
- त्वया **पृष्टेन** प्रश्नेन गुरुः **क्रुद्धो जातः** ।
- पूर्वजैः **स्थापितनां** सम्पदां संरक्षणमस्माकं कर्तव्यमस्ति ।

(क) वाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ निर्दिशत ।

(ख) रेखाङ्कितपदानि तद्विशेष्यपदैः सह मेलयित्वा सारिण्यां दर्शयत ।

(ग) उपरितनवाक्येषु कर्तरि कर्मणि च प्रयोगान् पृथक्कुरुत ।

(घ) रेखाङ्कितपदानामर्थं निदर्शयत ।

(ङ) क्त-क्तवतुप्रत्ययौ धातोः कस्मिन्नर्थे भवतः ?

(च) क्तप्रत्ययः कर्तरि कर्मणि/भावे वा भवति ?

(छ) भूतार्थवृत्तेर्धातोः कर्तरि कः कृत्प्रत्ययो विधातव्यः ?

(ज) भावे प्रयोगे क्तान्तस्य पदस्य लिङ्ग-वचने के भवेताम् ?

(झ) स्तुत-स्तुतवच्छब्दयोः त्रिषु लिङ्गेषु रूपाणि लिखत ।

(ञ) उपरितनवाक्यानां वचनानन्तरं विधाय पुनर्लेखनं कुरुत ।

२. **प्रदत्तेष्वर्थेषु क्त/क्तवतुप्रत्ययेन निष्पन्नप्रातिपदिकेभ्यो जायमानानां पदानां त्रिषु लिङ्गेषु वाक्ये प्रयोगं दर्शयत**

अकार्षीत्, अस्तावि, अकारि, अभेदि, अस्नासीत्, अपाक्षीत्, अपात्, अनैषीत्, अचूचुरत्, आसिष्ट, अपक्त, अमृत, अमोदिष्ट, अन्वभावि, अभावि, अदायि, अलम्भि ।

३. **प्रदत्तास्ववस्थासु जायमानानि प्रातिपदिकानि निर्दिश्य त्रिषु लिङ्गेषु तन्निष्पन्नस्य एकैकस्य पदस्य वाक्ये प्रयोगं कुरुत**

अस् + क्त, सेव् + क्त, गम् + क्तवतु, वि + रच् + क्तवतु, भुज् + क्त, आ + रभ् + क्त, बुध् + क्त, वच् + क्त, स्था + क्त, पा + क्तवतु, भिद् + क्त, वद् + क्तवतु, वि + धा + क्त, छिद् + क्तवतु, शुष् + क्त, ग्रह् + क्त, नश् + क्त, स्था + णिच् + क्तवतु, पठ् + णिच् + क्त ।

४. **अधस्तनपदानि पुंलिङ्गे परिवर्त्य वाक्यानि रचयत**

श्रुतवती, धावितम्, गतायाः, क्रीडतीम्, शिक्षितानि, ध्वस्तया, प्रेरिता, भाषितायाम्, मुक्तम् ।

५. **अधस्तनपदानामर्थं विलिख्य प्रकृतिप्रत्ययौ च विच्छेदयत**

हितम्, भावितः, दृढः, सुप्तः, सिक्तः, रक्तः, यातवान्, भक्तवान्, सोढवान्, दुग्धवान्, कृष्टः, अधीतवान्, अध्यापितः, पक्वः, जीनः, क्षमः ।

६. **नम्-धातोः क्तप्रत्यये वह्-धातोः क्तवतुप्रत्यये च निष्पन्नप्रातिपदिकयोस्त्रिषु लिङ्गेषु रूपाणि लिखत ।**

७. **पाठे प्रयुक्तानि क्त-क्तवतुप्रत्ययान्तानि पदानि रेखाङ्कितानि कृत्वा तद्विशेष्यपदानामन्वेषणं विधत्त ।**

## समासप्रयोगः

१. **अधस्तनवाक्येषु रेखाङ्कितानां पदानां विग्रहं प्रदर्शयत**

(क) अहं जगतः **पितरौ पार्वतीपरमेश्वरौ** वन्दे ।

(ख) चराचरस्य जगतः पालनकर्तारौ **ईशकृष्णौ** वयं नमामः ।

(ग) **हरिव्याघ्रौ** परस्परं शत्रू भवतः ।

(घ) अहं **सिंहव्याघ्रगण्डकेभ्यो** बिभेमि ।

(ङ) **हरिहरौ** जगतो रक्षकौ स्तः ।

(च) **उष्ट्रखरं** भारवहनाय उपयोगि भवति ।

(छ) चौरस्य **पाणिपादं** राजपुरुषेण बद्धमस्ति ।

(ज) **मातापितरौ** सदैव हितकर्तारौ भवतः ।

(झ) पत्नी **वाङ्मनःकर्मभिः** पत्युर्हितमिच्छति ।

## २. अधस्तनपदानि प्रयुज्य वाक्यानि रचयत

धवखदिरौ, शिवकेशवौ, मांसशोणितम्, अर्थधर्मौ, अग्निमारुतौ, पाणिपादम्, निद्राहारविहारम्, मुखनासिकम्, वटपिप्पलौ ।

## ३. अधस्तनपदानां विग्रहं प्रदर्श्य समाहारेतरेतरयोगद्वन्द्वसमासोदाहरणानि पृथक्कुरुत

दंशमशकम्, अहिनकुलम्, रामलक्ष्मणौ, उमामहेश्वरौ, अजाविकम्, इन्द्रवायू, हरिव्याघ्रौ, स्थानप्रयत्नौ, लक्षणोदाहरणे, भीमार्जुनौ, ब्रह्माच्युतशङ्कराः ।

## ४. अधस्तनविग्रहेषु निष्पन्नानि समस्तपदानि विलिख्य तेषां वाक्येषु प्रयोगं निदर्शत

शिशिरश्च वसन्तश्च, पाणी च पादौ च, सङ्ख्या च परिभाषा च, अश्वश्च वृषश्च, माता च पिता च, विरञ्चिश्च नारायणश्च शङ्करश्च, कपिश्च काकश्च, विष्णुश्च शिवश्च, धर्मश्च अर्थश्च, इन्द्रश्च अग्निश्च ।

## ५. पाठे आगतानि समस्तपदानि चिह्नीकृत्य तेषां विग्रहं समासनाम च लिखत ।

## ६. द्वन्द्वसमासस्य प्रयोगप्रदर्शकमनुच्छेदमेकं विरचय्य कक्षायां श्रावयत ।

# तद्धितान्तप्रयोगः

## १. वाक्यानि पठित्वा सङ्केतितानां पदानां सार्थं प्रकृतिप्रत्ययौ निर्दिशत

- हे गोविन्द ! **त्वदीयं** वस्तु तुभ्यमेव समर्पयामि ।
- **ग्रामीणा** जनाः सारल्येन जीवनं यापयन्ति ।
- **पाणिनीयं** व्याकरणं समृद्धं वर्तते ।
- अस्माकं **राष्ट्रिया** संस्कृतिः संस्कृताश्रिता विद्यते ।
- **हैमवती** गङ्गा परमपवित्रा मुक्तिदायिका च मन्यते ।
- हे सरस्वति ! **मदीये** हृदये निवासं कुरु ।
- **आस्माकीनं** राष्ट्रं बहुजातीयं वर्तते ।
- **तावका मामका**श्च पुत्राः सहपाठिनः स्तः ।
- **युष्मदीया**याः सफलतायाः किं रहस्यम् ?
- **तावकीने**न कर्मणा लोकोपकारो भूयात् ।
- छात्राः ! **मूर्धन्या**नां वर्णानामुच्चारणे **यौष्माकं** काठिन्यं मयानुभूयते ।

## २. पदानि प्रयुज्य वाक्यानि रचयत

मदीयः, जिह्वामूलीयम्, तालव्याः, अस्मदीया, मामकीनः, यौष्माकीणः, तावकः, युष्मदीयः, राष्ट्रियः, अवारपारीणः, श्रावणः, चाक्षुषः, ग्राम्यः, पौरस्त्यः, पाश्चात्त्यः, त्वत्पुत्रः, स्रौघ्नः, अङ्गुलीयम्, हैमवती ।

## ३. पदानामर्थं विलिख्य प्रकृतिप्रत्ययौ विच्छेदयत

तावकीनः, चातुर्दशम्, मामकः, तदीयः, औपगवम्, दन्त्यम्, स्रौघ्नः, आस्माकः, अवारपारीणः, मध्यमः, कालिकम्, मासिकम्, मालीयः, पाश्चात्यः, चातुरम्, पौनःपुनिकः, सायन्तनम् ।

## ४. प्रत्ययान् संयोज्य निष्पन्नरूपाणां वाक्येषु प्रयोगं दर्शयत

मध्य + म, श्रवण + अण्, राष्ट्र + घ, ग्राम + खञ्, शाला + छ, पुरस् + त्यक्, तद् + छ, युष्मद् + खञ्, अस्मद् + छ, युष्मद् + अण्, मास + ठञ्, उत्स + अञ्, स्रुघ्न + अण्, हिमवत् + अण्, पाणिनि + छ, उपगु + अण्, ग्राम + य ।

## ५. पाठात् तद्धितान्तपदानि सङ्कलय्य तेषामर्थं लिखत ।

## ६. अधस्तनानां पदानां प्रयोगेणानुच्छेदमेकं रचयत

ग्रामीणाः, मदीयाय, राष्ट्रियः, तदीयः, मामकः, आस्माकीनः, वार्षिकः ।

# चम्पूभारतम्

**एकदा तु ते सर्वे सुपर्वसरितः सलिलेषु विहृत्य समुत्तीर्णा वीचीभिरनीचीभिरुत्कूलितफेनकूटेष्विव पटगृहवाटेषु परिगृहीत-मनोहराम्बरपटीरहाराभ्यवहाराः कुमाराः कुशलकुशीलवकुलशीलित-विचित्रवादित्रकलशीरवविवशीकृतमनसः सुखमासामासुः ।**

**व्याख्या** - एकदा एकस्मिन् दिने कस्मिंश्चित् समये ते सर्वे कुमाराः राजपुत्राः कौरवाश्च सुपर्वणां देवानां सरितो गङ्गायाः सलिलेषु जलेषु विहृत्य जलक्रीडापूर्वकं स्नानं कृत्वा समुत्तीर्णाः तटभुवमायाताः सन्तः अनीचीभिः उन्नताभिः वीचीभिः तरङ्गैः उत्कूलितेषु तटदेशं प्रापितेषु फेनपटलेषु गाङ्गपयःफेनराशिष्विव स्थितेषु पटगृहवाटेषु वस्त्रनिर्मितगृहकक्ष्यान्तरेषु परिगृहीताः आसादिताः - मनोहरम् अम्बरं वस्त्रम्, पटीरः चन्दनलेपः, हारो मणिमाला, अभ्यवहारः भोजनम्- मनोहाराम्बरपटीरहाराभ्यवहारा यैस्ते तथोक्ताः सन्तः कुशलानां गानविद्यानिपुणानां कुशीलवानां गायकानां कुलेन समुदायेन शीलितानां वाद्यमानानां विचित्रवादित्राणाम् नानाविधवाद्यानाम् कलशीनां घटवाद्यानां च रवैः शब्दैः वशीकृतानि आकृष्टानि मनांसि येषां ते तथोक्ताः सुखम् अक्लेशम् आसामासुः अवर्तन्त ।

**सरलार्थः** - एकस्मिन् काले कौरवाः पाण्डवाश्च सर्वे राजपुत्राः देवगङ्गायाः जले विहारं कृत्वा गङ्गातटे आगच्छन् । महातरङ्गैः तटप्रापितफेनराशिस्थितेषु इव वस्त्रनिर्मितगृहेषु उषित्वा मनोहराणि वस्त्राणि चन्दनं मणिमाल्यञ्च परिधाय भोजनमकुर्वन् । ततः कुशीलवैर्वादितानां वाद्यानां कलशीवाद्यस्य च शब्दैर्मनोविनोदं कुर्वन्तस्ते ससुखं अवर्तन्त ।

**रहसि नलिनतल्पे रत्नपर्यङ्ककल्पे**
**दिनविरतिसमीरैः सेव्यमानः स भीमः ।**
**तटभुवि कुसुमानां तादृशैर्गन्धपूरै-**
**रधिकमलसताया हानिदद्रौ निदद्रौ ॥१॥**

**व्याख्या** - कुसुमानां पुष्पाणां तादृशैः वचनाऽप्रकाश्यैः गन्धपूरैः सुगन्धैः अलसताया निद्रायाः अनुष्ठाने आलस्यस्य हानिदाः ह्रासकराः द्रवः वृक्षा यस्यां तादृश्यां तथोक्तायाम् तटभुवि गङ्गातटभूमौ दिनविरतिसमीरैः सायङ्कालिकवायुभिः सेव्यमान आराध्यमानः स प्रसिद्धपराक्रमो भीमः द्वितीयपाण्डुः रहसि एकान्ते रत्नपर्यङ्ककल्पे रत्ननिर्मितखट्वोपमेये नलिनतल्पे कमलदलशयनीये अधिकं गाढं निदद्रौ सुष्वाप ।

**भावार्थः** - सायङ्कालिकपवनेन सेव्यमानो द्वितीयपाण्डुर्भीमो वृक्षच्छायायुतस्य गङ्गातटस्य रहसि रत्ननिर्मितपर्यङ्कतुल्यायां कमलदलशय्यायां सुष्वाप । पुष्पाणां सुगन्धस्तस्यालसं जहार ।

**अथ निशीथे तथाभूतस्य तस्य जिघांसया कुरुनरेन्द्रनन्दनेन चोदितैर्नरेन्द्रैरुपेत्य युगपदेव झटिति निभृतं समुद्घाटितेषु नियन्त्रणपेटकेषु-**

**व्याख्या** - अथ भीमे निद्रामग्ने सति निशीथे अर्धरात्रे तथाभूतस्य गाढसुप्तस्य भीमस्य जिघांसया हन्तुमिच्छया कुरुनरेन्द्रस्य धृतराष्ट्रस्य नन्दनेन पुत्रेण दुर्योधनेन चोदितैः भीमवधार्थमादिष्टैः नरेन्द्रैः मान्त्रिकैर्विषवैद्यैः उपेत्य भीमसकाशमागत्य युगपदेव सहैव झटिति शीघ्रं निभृतं प्रच्छन्नभावेन नियन्त्रणपेटकेषु सर्पधारणमञ्जूषासु समुद्घाटितेषु विवृतमुखेषु कृतेषु-

**सरलार्थः** - अर्धरात्रे गाढनिद्रायां सुप्ते भीमे तं हन्तुकामेन दुर्योधनेन प्रेषिता विषवैद्या भीमसमीपं प्रच्छन्नभावेन शीघ्रं गत्वा सर्पस्थापितमञ्जूषायास्छदनमुदघाटयन् ।

**सुप्तस्य तस्य तु सुयोधनभृत्यमुक्ता**
**वाताशनाश्च सकला वनदेवताश्च ।**
**आशीर्द्वयं वपुषि चायुषि च प्रतेनुः**
**पूर्वा न तत्र चरमैव पुपोष वीर्यम् ॥३॥**

**व्याख्या** - दुर्योधनभृत्यमुक्ता दुर्योधनविषवैद्यप्रेरिता वाताशनाः सर्पाश्च सकला वनदेवताश्च तस्य सुप्तस्य भीमस्य वपुषि काये आयुषि जीवनादृष्टे च आशीर्द्वयं द्विविधा आशिषो दंष्ट्राव्यापारान् शुभकामनाश्च चक्रुः । तत्र द्वयोराशिषोर्मध्ये पूर्वा प्रथमा सर्पदंष्ट्राव्यापृतिरूपाऽऽशीर्वीर्यं भीमप्राणहरणसामर्थ्यं न पुपोष न चरितार्थवती ।

**भावार्थः** - सर्पैः कृतेऽपि शतशो दंष्ट्राव्यापारे वनदेवताप्रसादाद् भीमो नाम्रियत ।

**अन्येद्युरपि पुनराजीवन्तं निद्रारुणनयनराजीवं तं स मुग्धधीः स्निग्ध इव सजग्धिकेलिकायामारालिकदापितकवलनिचोलितकरालगरलविह्वलं प्रलम्बितशिरसं रज्जुभिः परिणाह्य परिणाहिनीभिरसुहृदां हृदयशूलमपि शूलकीलिते निर्जरसरिदन्तर्जले विसर्जयामास ।**

**व्याख्या**- मुग्धा अज्ञानोपहता धीर्यस्य सः दुर्योधनः स्निग्धः प्रेमयुतः सुहृत् मित्रमिव अन्येद्युः परस्मिन् वासरे आजीवन्तं प्राणान् धारयन्तं निद्रया अरुणे रक्ताभे नयने एव राजीवे रक्तकमले यस्य तं तथोक्तम् भीमम् पुनः भूयः सजग्धिकेलिकायाम् सहभोजनक्रीडाप्रसङ्गे आरालिकैः पाचकैः दापितैः कवलैर्ग्रासैः निचोलितेन अन्तर्हितेन करालेन गरलेन भीषणविषेण विह्वलम् मूर्च्छितम् अत एव प्रलम्बितशिरसम् अस्तचैतन्यतया स्थिरोर्ध्वमस्तकम् विषवेगवशेनोत्थितकचकलापं वा परिणाहिनीभिः विशालाभिः रज्जुभिः परिणाह्य बन्धयित्वा असुहृदाम् अमित्राणाम् दुर्योधनादीनाम् हृदयशूलम् मनोदुःखम् अपि शूलकीलिते स्थूणाभिर्व्याप्ते निर्जरसरितः गङ्गाया अन्तर्जले पयसि विसर्जयामास पातितवान् ।

**सरलार्थः** - अपरस्मिन् दिने दुर्योधनः सर्पदशितमपि निद्रारक्तनयनं भीमं जीवन्तमपश्यत् तदा स तं सहभोजनाय न्यमन्त्रयत्। तत्र च तस्मै सूदद्वारा प्रच्छाद्य विषमदापयत्। तद्विषवेगेन विह्वलं घूर्णमानमस्तकं च भीमं रज्जुभिर्वन्धयित्वा गङ्गाजलेऽपातयत्, यस्मिन् जले प्रागेव तच्छरीरस्य अबहिर्भावाय स्थूणा निखाताः स्थापिता आसन्। भीमस्य जलविसर्जनेन दुर्योधनः स्वं मनोदुःखमपि विसर्जितवान्।

**ततः पातालभुवि तदागमनकौतुकिना वासुकिना संमानितः स धृतिमानितस्ततोऽष्टासु दिशासु तदनुगुणपरिगणनं दिनगणमत्ययशङ्किभिरितरैरपत्यैः सह विचित्य 'हा वत्स ! रिपुभर्त्सन भीम ! क्व वा निषीदसि ?' इति विषीदन्त्याः कुन्त्या नवममपि वासरमनवममेव सञ्जनयन् प्रभञ्जनभूरमृताञ्जनैरिव दृशौ रञ्जयामास।**

**व्याख्या** - ततो भीमस्य जले निपातनात् परतः पातालभुवि नागलोके तदागमनकौतुकिना भीमागमनजन्याश्चर्ययुतेन कुतोऽयमागत इति सम्भ्रान्तेन वासुकिना नागलोकाधिपेन सम्मानितः कृतातिथ्यः सः धृतिमान् गम्भीरः भीमः इतस्ततः समन्ततः अष्टासु दिशासु पूर्वादिषु तदनुगुणपरिगणनं दिनगणं दिक्सङ्ख्यासमानसङ्ख्यकमष्टौ वासरानित्यर्थः, अत्ययशङ्किभिर्भीमापायशङ्कायुतैः अपत्यैः युधिष्ठिरादिभिः स्वपुत्रैः सह साकं विचित्य अन्विष्य 'हा वत्स पुत्र, रिपुभर्त्सन शत्रुमर्दन, भीम, क्व वा कुत्र निषीदसि तिष्ठसि ? इति एवं प्रकारेण विषीदन्त्याः खेदमनुभवन्त्याः कुन्त्याः नवमम् अपि वासरम् दिनम् अनवमम् अशून्यम् एव सञ्जनयन् कुर्वन् प्रभञ्जनसूनुः वायुसुतः भीमः अमृताञ्जनैरिव सुधानिर्मितचक्षुःप्रसाधनद्रव्यैरिव कुन्त्या दृशौ रञ्जयामास स्वागमनेन प्रसादं गमयामास।

**सरलार्थः** - भीमस्य पातालागमनं दृष्ट्वा आश्चर्यचकितो वासुकिनागस्तं सत्कृतवान्। दिक्संख्यकान् अष्टौ दिवसान् भीमस्तत्रैवोस्थायानैषीत्। तदानीं कुन्ती युधिष्ठिरादिभिः पुत्रैः सह भीममन्वेषमाणा आसीत्। अमिलिते च तस्मिन् 'हा पुत्र, हा शत्रुमर्दन भीम' इत्येवं भृशं विलपन्त्याः मातुः कुन्त्याः पुरतः नवमेऽहनि उपस्थाय भीमः मातुर्दृशौ प्रसन्ने चकार।

## तदनन्तरम्,

> **काष्ठां परां कार्मुककौशलस्य काष्ठाः परास्तानपि तद्यशोऽपि।**
> **प्रज्ञादृगारोपयितुं प्रवृत्तो व्यज्ञापयद् विष्णुपदीतनूजम् ॥६॥**

**व्याख्या** - तदनन्तरम् प्रज्ञादृग् अन्धः धृतराष्ट्रः तान् कौरवान् पाण्डवाँश्च कार्मुककौशलस्य धनुर्विद्यायाः परां काष्ठां चरमं शिखरम् आरोपयितुम्, तेषां कौरवाणां पाण्डवानां च यशः कार्मुककौशलजनितां कीर्तिम् अपि पराः काष्ठाः सर्वा दिशः आरोपयितुम् अपि प्रवृत्तः कृतमतिः सन् विष्णुपद्याः गङ्गायाः तनूजं पुत्रं भीष्मं व्यज्ञापयत् स्वाभिप्रायमसूचयत्।

**भावार्थः** - ततः प्रज्ञालोचनो धृतराष्ट्रः पञ्चपाण्डवानां पाण्डुपुत्राणां शतकौरवाणां स्वपुत्राणां च धनुर्विद्यायां दक्षताप्राप्तये प्राच्यादिदिक्षु प्राप्तदक्षताजन्यकीर्तिविस्ताराय च गङ्गापुत्रं भीष्मं प्रति स्वाभिप्रायं प्रकटितवान्।

**ततस्ते सर्वोत्तरा अपि शरासनेषु दक्षिणाः 'गुरुदक्षिणां कुरुत मह्यं द्रुह्यतो द्रुपदस्य युधि बलाद्गृहीतस्य समर्पणम्' इति गुरुदक्षिणा चोदिताः सर्वेऽप्यहंपूर्विकया कयापि विमतेषु कृतावज्ञसेनं याज्ञसेनं पुरं निरुध्य चिरमयुध्यन्त ।**

**व्याख्या** - ततः तदनन्तरम् ते युधिष्ठिरादयः सर्वोत्तराः सर्वविधधनुर्वेदपारगाः अपि शरासनेषु वाणनिक्षेपेषु दक्षिणाः कुशलाः द्रुह्यतः प्रतिज्ञाभङ्गद्वारा द्रोहं कुर्वतः द्रुपदस्य तदाख्यस्य राज्ञो युधि युद्धे बलाद् गृहीतस्य द्रुपदस्य समर्पणम् मह्यम् अर्पणम् गुरुदक्षिणां कुरुत, इति एवम् गुरुणा द्रोणेन चोदिताः आदिष्टाः सर्वे कौरवाः पाण्डवाश्च कयापि अहम्पूर्विकया अहं पूर्वमहं पूर्वमिति प्रतिस्पर्द्धया विमतेषु शत्रुषु कृतावज्ञसेनम् तिरस्कारपरायणसेनासहितम् याज्ञसेनं पुरं द्रुपदनगरं निरुध्य समन्ततः परिवार्य चिरं बहुकालपर्यन्तम् अयुध्यन्त युद्धं कृतवन्तः ।

**सरलार्थः** - तत एकस्मिन् दिने आचार्य द्रोणो धनुर्विद्यायां नैपुण्यं गतान् युधिष्ठिरादिराजकुमारान् 'प्रतिज्ञाभङ्गं विधाय मयि द्रोहं कुर्वन्तं द्रुपदं बलाद् गृहीत्वा गुरुदक्षिणारूपेण मह्यमर्पयत इति' आदिष्टवान् । ततोऽहं पूर्वमहंपूर्वमिति स्पर्द्धमानाः राजकुमारास्तिरस्कृतशत्रुसेनं द्रुपदनगरं समन्ततः अवरुध्य द्रुपदेन सह बहुकालपर्यन्तमयुध्यन्त ।

**तातोऽपि धर्मतनयं तपनीयपीठ-**
**मारोप्य चक्षुरिव लब्धममुं तपोभिः ।**
**आवर्जितैः कलशवारिभिरभ्यषिञ्च-**
**दानन्दबाष्पसलिलैरवनीं च पौराः ॥१४॥**

**व्याख्या** - तातः धृतराष्ट्रः अपि तपोभिः तपस्याभिः लब्धं पुनरासादितं चक्षुः नेत्रमिव धर्मतनयम् युधिष्ठिरं तपनीयपीठम् कनकासनम् आरोप्य उपवेश्य आवर्जितैः नानातीर्थोपहृतैः कलशवारिभिः घटस्थितजलैः अभ्यषिञ्चत् यौवराज्यं प्रदत्तवान्, पौराः च नागरिकाश्च आनन्दवाष्पसलिलैः हर्षाश्रुप्रवाहैः अवनीम् पृथिवीम् अभ्यषिञ्चन् अभिषिक्तवन्तः ।

**भावार्थः** - तातो धृतराष्ट्रः स्वाचरितैर्व्रतोपवासादिभिः पुनः प्राप्तं नेत्रमिव प्रियं युधिष्ठिरं नानातीर्थसमानीतैः घटस्थजलैः यौवराज्येऽभिषिक्तवान् । नगरवासिनस्तु हर्षोत्पन्ननेत्रजलैस्तद्भोग्यां पृथिवीमभिषिक्तवन्तः ।

**तदनु सौबलीजानिरसौ बलीयसाऽमर्षेण धर्षितः सहजविनयं धर्मतनयमाहूय कृतावहित्थो गिरमित्थमुत्थापयामास ।**

**व्याख्या** - तदनु युधिष्ठिरादिविषये प्रेमत्यागात्परः सौबली गान्धारी जाया यस्यासौ सौबलीजानिः धृतराष्ट्रः बलीयसा महता अमर्षेण द्वेषेण धर्षितः पीडितः सन् सहजविनयं स्वाभाविकनम्रतोपेतं धर्मतनयं युधिष्ठिरं नाम पाण्डुतनयप्रथमं आहूय आकार्य कृतावहित्थः विहिताकारगोपनः इत्थं वक्ष्यमाणप्रकारेण गिरं वाचमुत्थापयामास प्रारेभे ।

**सरलार्थः** - तत्पश्चाद् गान्धारीपतिर्धृतराष्ट्रोऽन्तर्मनसि द्वेषमवधार्यापि तद् गोपायित्वा स्वाभाविकनम्रतासम्पन्नं ज्येष्ठपाण्डुपुत्रं युधिष्ठिरमाहूय वक्ष्यमाणं वचनं निजगाद ।

**'वत्स ! सम्प्रति वारणावतं पुरमुपेत्य वारणाननगुरोरुत्सवं वारणाय विपदां निषेव्य सहानुजैस्तत्र वास्तव्यपौरजनभव्यया गिरा स्तव्यो निरवधिसुखामनुशाधि वसुधाम्' इति ।**

**व्याख्या** - वत्स इति बालेषु प्रीतिसम्बोधनम्, सम्प्रति अधुना वारणावतं नाम पुरं नगरमुपेत्य गत्वा विपदां सम्भाव्यमानानामापदां वारणाय दूरीकरणाय वारणाननः गणेशः तद्गुरोः पितुः शिवस्य उत्सवं पूजनादिकम् निषेव्य अनुष्ठाय तत्र वारणावतपुरे वास्तव्याः वासिनो ये पौरजनाः नागरिकाः तेषां भव्यया कुशलयुतया गिरा वाचा सह अनुजैः भ्रातृगणसहितः स्तव्यः प्रशंसनीयः सन् निरवधि मर्यादारहितं कालं यावत् सुखम् आनन्दो यस्यां तादृशीम्, अपरिमितसुखयुक्तां वा, वसुधां पृथिवीम् अनुशाधि पालय ।

**सरलार्थः** - पुत्र, भीमादिभ्रातृसहितस्त्वमिदानीं वारणावतनगरं गत्वा तत्र सर्वविपत्तिहरस्य महादेवस्य अनुष्ठानं कुरु । तत्र त्वं वारणावतनगरवासिनां जनानां कुशलैर्वचोभिः संस्तुतः सन्ननन्तसुखसम्पन्नायाः पृथिव्याः पालनं च विधेहि ।

**तस्याशयं हृदि विदन्नपि धर्मसूनु-**

**स्तातस्य वाचमविलम्ब्य तथेत्यगृह्णात् ।**

**तत्तादृशेषु गुरुशासनपालनेषु**

**कूलङ्कषं गुणगणेन कुलं हि पूरोः ॥१७॥**

**व्याख्या** - तस्य धृतराष्ट्रस्य आशयं गूढमभिप्रायं हृदि स्वचित्ते विदन् जानन् अपि धर्मसूनुः युधिष्ठिरः तातस्य पितृव्यस्य वाचम् वारणावतपुरप्रस्थानाज्ञां तथा भवदुक्तं तथास्तु इति एवम् अविलम्ब्य शीघ्रम् अगृह्णात् स्वीचकार । तादृशेषु गुरुशासनपालनेषु श्रेष्ठजनाज्ञास्वीकरणेषु तत् प्रसिद्धं पूरोः कुलं पूरुवंशः गुणगणेन स्वगुणराशिना कूलङ्कषं परिपूर्णम् ।

**भावार्थः** - केनापि प्रकारेण पाण्डवाः पुरान्तरे भवेयुरिति पितृव्यस्य धृतराष्ट्रस्य गूढमनोभावं जानन्नपि युधिष्ठिरः पितृव्यस्य आज्ञां स्वीचकार । यतो हि श्रेष्ठजनप्रदत्ताया आज्ञायाः हृदयतः परिपालने पूरुवंशीयाः स्वगुणगणेन सम्पन्ना एव आसन् ।

**धर्मभूरनुजैः साकं तद्गिरा तत्पुरं ययौ ।**

**कर्मचोदनया जीवः कायमन्यमिवेन्द्रियैः ॥१८॥**

**व्याख्या** - जीवः यथा सप्तदशपदार्थसमष्टिरूपः लिङ्गदेहः (प्राणी) इन्द्रियैः सह कर्मणः धर्माधर्मचरितस्य चोदनया प्रेरणया अन्यं कायं शरीरं याति तथैव धर्मभूः युधिष्ठिरः अनुजैः भ्रातृभिः सह तद्गिरा धृतराष्ट्रवचसा (चोदितः) तत् वारणावतं नाम पुरं ययौ जगाम ।

**भावार्थः** - यथा जीवः पापपुण्यरूपेण स्वकर्मणा प्रेरितः सन् देहत्यागानन्तरं देहान्तरं गृह्णाति तथैव सानुजो धर्मज्ञो युधिष्ठिरो धृतराष्ट्रस्य आज्ञया प्रेरितः सन् वारणावतपुरं जगाम ।

**प्रपश्यतां पौरनृणां प्रभाते सांक्रामिकं रोगमिवाधितापम् ।**

**आबिभ्रतामश्रुभिरेव शान्तिरापादि तत्राग्निहठात्क्रियायाः ॥२३॥**

**व्याख्या** - प्रभाते प्रातः काले (ज्वलल्लाक्षागृहम्) प्रपश्यताम् वीक्षमाणानाम् साङ्क्रामिकं सङ्क्रमणशीलम् रोगमिव अधितापम् वह्निदाहम् आबिभ्रताम् धारयताम् पौरनृणां पुरवासिमनुष्याणाम् अश्रुभिः नेत्रजलैः एव तत्र लाक्षाभवने अग्निहठात्क्रियायाः वह्निकृतस्य बलाद् दाहनस्य शान्तिः समाप्तिः आपादि ।

**भावार्थः** - प्रातः काले ज्वलल्लाक्षागृहदर्शकाः पुरवासिनः सन्तप्ता बभूवुः । मन्ये, लाक्षागृहाग्निदाहः सङ्क्रामको रोग इव दर्शकेषु प्राप्तः । तदानीं सन्तप्ताः पुरवासिनः स्वाश्रुप्रवाहैः तमग्निमुपशमितवन्तः ।

**वृक्षेण वृक्षं गिरिणा गिरीन्द्रं हस्तेन हस्तं वचसा वचश्च ।**

**परस्परेण प्रतिरुध्य घोरं समीकमेतौ सममादधाते ॥३४॥**

**व्याख्या** - एतौ भीमहिडिम्बौ वृक्षेण तरुणा वृक्षं तरुम्, गिरिणा पर्वतेन गिरीन्द्रम् पर्वतश्रेष्ठं, हस्तेन भुजेन हस्तम् भुजं, वचसा वाण्या वचः वाणी च प्रतिरोध्य वारयित्वा समम् एकसमानम् घोरं दारुणं च समीकम् युद्धम् आदधाते चक्राते ।

**भावार्थः** - भीमहिडिम्बौ युद्धकाले वृक्षप्रहारे एकेन कृतेऽपरेणापि वृक्षप्रहारेणैव तमवारयताम् । एवमेव गिरिप्रहारस्य गिरिणैव वाक्प्रहारस्य वाचैव च वारयन्तौ समबलावुभौ मिथो भीषणं युद्धं चक्रतुः ।

**बाणेन संप्रति नृपा ! दिवि लक्ष्यमेतत्**

**तच्छायवद्भुवि निपातयितुं पटुर्यः ।**

**मौर्वीमिमामिव स दक्षिण एव पाणौ**

**कुर्यात् स्वसारमभिदर्श्य मम स्वसारम् ॥७७॥**

**व्याख्या** - नृपाः हे पार्थिवाः, सम्प्रति अधुना यः कोऽपि दिवि आकाशे स्थितम् एतत् लक्ष्यं यन्त्ररूपम् तच्छायवत् (यन्त्रच्छायातुल्यम्) बाणेन भुवि निपातयितुं भ्रंशयितुं पटुः दक्षः स्यात्, सः दक्षिणे पाणौ हस्ते इमां मौर्वीम् इव स्वसारम् जिनपराक्रमम् अभिदर्श्य प्रदर्श्य मम धृष्टद्युम्नस्य स्वसारं भगिनीम् द्रौपदीम् अपि दक्षिणे पाणौ कुर्यात् परिणयेत ।

**भावार्थः** - हे नृपाः ! यथाऽऽकाशे दृश्यमानस्यास्य यन्त्रस्य छाया भूमौ पतति तथा यः कोऽपि वीरो बाणेन यन्त्रस्यास्य भेदनं विधाय भुवि पातयितुं समर्थो भवति, स एव वीरो दक्षिणे पाणौ यथा मौर्वीं धारयन् भविष्यति तथैव तेन हस्तेन मद्भगिनीं द्रौपदीमपि पत्नीरूपेण ग्रहीष्यति ।

**ततः परमीदृशोत्सवश्रवणात्परमानन्दमनुभवन्तीभिरन्तःपुरिकाभिः परिवृतां तां सखीजना मण्डनमण्डपिकामुपनीय प्रसाधयितुमारभन्त ।**

**व्याख्या** - ततः परं राज्ञा कन्यादानं स्वीकृत्य प्रारब्धे तत्संभारे सति ईदृशोत्सवश्रवणात् द्रौपदी पतिपञ्चकं प्राप्नोतीति हर्षविषयं निशम्य परमानन्दम् उत्कटकोटिकहर्षम् अनुभवन्तीभिः अन्तःपुरिकाभिः अवरोधजनैः परिवृतां वेष्टितां तां द्रौपदीं सखीजनाः वयस्याः मण्डनमण्डपिकाम् मण्डनार्थं कल्पितां शालाम् उपनीय प्रापय्य प्रसाधयितुम् उद्वर्त्तनशिरोजसंयमनालङ्कारपरिधापनादिना सज्जयितुम् आरभन्त प्रारब्धवत्यः ।

**सरलार्थः** - राज्ञः कन्यादानस्वीकृत्यनन्तरं पञ्चपाण्डवैः सह द्रौपद्या विवाहो भविष्यतीति संश्रुत्य महामोदं गता अन्तःपुरस्थाः सखीगणा आगत्य द्रौपदीं परिवृत्य तस्थुः । ततः प्रसाधनार्थं निर्मितायां शालायां तां नीत्वा अलङ्कारपरिधानादिभिरलङ्कर्तुं प्रारेभिरे ।

**तत्र मुहूर्तगुणेष्विव समन्तादोजायमानेषु दीपेषु मन्त्रविदां वदनेष्विव शब्दायमानेषु वाद्येषु कुलपालिकाः कमनीयमणिकोरकितैः कनकभूषणैरविकृतसहजरामणीयकां कन्यकाममीषां सकाशे निवेशयामासुः ।**

**व्याख्या** - तत्र विवाहमण्डपवेद्यां मुहूर्तगुणेषु वैवाहिकलग्नेषु इव समन्तात् सर्वतः ओजायमानेषु ओजोवद् भासमानेषु प्रकाशशालासु इत्यर्थः । मन्त्रविदाम् मन्त्रोच्चारमाचरतां वैदिकानां वदनेषु मुखेषु इव वाद्येषु मङ्गलसूचकपटहादिषु शब्दायमानेषु शब्दं कुर्वाणेषु, कुलपालिकाः प्रसिद्धाः पतिव्रताः स्त्रियः कमनीयमणिकोरचितैः सुन्दररत्नराशिखचितैः कनकभूषणैः स्वर्णालङ्कारैः अविकृतसहजरामणीयकाम् अक्षुण्णस्वाभाविकसौन्दर्यां कन्यकां कुमारीं द्रौपदीम् अमीषां पाण्डवानां सकाशे पार्श्वे निवेशयामासुः स्थापितवत्यः ।

**सरलार्थः** - विवाहवेद्यां सर्वतः दीपाः प्रदीप्ताः आसन् । वैदिका मन्त्रान् उच्चारयन्त आसन् । मङ्गलसूचकाः पटहगोमुखादिवाद्यानि शब्दायमानान्यासन् । तदानीमेव शुभमुहूर्ते कुलस्त्रियो रम्यरत्नजडितैरलङ्कारपरिधानादिभिर्भूषितां अक्षुण्णलावण्यवतीं द्रौपदीं पाण्डवानां पार्श्वे आनीय निवेशयामासुः ।

**द्विरदं द्विरदस्तुरगं तुरगो रथिकं रथिकः पदगं पदगः ।**
**इतरेतरमेत्य रणं विदधे दिवि नारदविस्मयनाकतरुम् ॥११०॥**

**व्याख्या** - द्विरदः हस्त्यारूढो योद्धा द्विरदं स्वसमानं हस्त्यारूढं योद्धारम्, तुरगः अश्वारोही तुरगम् अश्वारोहिणं योद्धारम्, रथिकः रथिकं रथस्थं योद्धारम्, पदगः पदातिः पदगम् पादचारिणं योद्धारम्, एवं रीत्या इतरेतरम् अन्योन्यम् एत्य संयुज्य दिवि स्वर्गे नारदस्य यो विस्मयः आश्चर्यरसस्तस्य नाकतरुम् कल्पवृक्षम् रणं युद्धं विदधे चकार ।

**भावार्थः** - हस्त्यारूढो योद्धा हस्त्यारूढेन योद्धा सह अश्वारूढोऽश्वारूढेन सह रथी रथिना सह पादचारी च पादचारिणा योद्धा सह युद्धमकुर्वन् । इत्थं परस्परं समानबलिना सह संयुध्य नारदस्यापि विस्मयकरं स्वर्गस्थकल्पतरुमिव बह्वाश्चर्यप्रदं रणं चकार ।

(अनन्तभट्टकृतस्य चम्पूभारतस्य द्वितीयस्तवके रामचन्द्रेण विहितां व्याख्यामाश्रित्य प्रचितः सम्पादितश्चांशः)

## अभ्यासः

### श्रवणं भाषणं च

### १. अधस्तनानां पदानां शुद्धोच्चारणं कुरुत

उत्कूलितफेनकूटेषु, परिगृहीतमनोहराम्बरपटीरहाराभ्यवहाराः, रत्नपर्यङ्ककल्पे, सुयोधनभृत्यमुक्ताः, निर्जरसरिदन्तर्जले, प्रभञ्जनभूः, विष्णुपदीतनूजम्, आनन्दबाष्पसलिलैः, कृतावहित्थः, वास्तव्यपौरजनभव्यया, अग्निहठात्क्रियायाः, मण्डनमण्डपिकाम्, कमनीयमणिकोरकितैः, नारदविस्मयनाकतरुम्

### २. अधस्तनयोः पद्ययोः अनुवाचनं कुरुत

(क) तातोऽपि धर्मतनयं तपनीयपीठ-
मारोप्य चक्षुरिव लब्धममुं तपोभिः ।
आवर्जितैः कलशवारिभिरभ्यषिञ्च-
दानन्दबाष्पसलिलैरवनीं च पौराः ॥

(ख) बाणेन सम्प्रति नृपा ! दिवि लक्ष्यमेतत्
तच्छायवद्भुवि निपातयितुं पटुर्यः ।
मौर्वीमिमामिव स दक्षिण एव पाणौ
कुर्यात् स्वसारमभिदर्श्य मम स्वसारम् ॥

### ३. अधस्तनस्य गद्यांशस्य शुद्धोच्चारणं कृत्वा तस्य स्वभाषया सरलार्थं च प्रकाशयत

एकदा तु ते सर्वे सुपर्वसरितः सलिलेषु विहृत्य समुत्तीर्णा वीचीभिरनीची भिरुत्कूलितफेनकूटेष्विव पटगृहवाटेषु परिगृहीतमनोहराम्बरपटीरहाराभ्यवहाराः कुमाराः कुशलकुशीलवकुलशीलित-विचित्रवादित्रकलशीरवविवशीकृतमनसः सुखमासामासुः ।

### ४. प्रदत्तस्य पद्यस्य अन्वयं कथयित्वा तस्य प्रतिपदमर्थं सखायं श्रावयत

वृक्षेण वृक्षं गिरिणा गिरीन्द्रं हस्तेन हस्तं वचसा वचश्च ।
परस्परेण प्रतिरुध्य घोरं समीकमेतौ सममादधाते

### ५. अधस्तनानां पदानां पर्यायपदानि कथयत

जिघांसया, अन्येद्युः, विचित्य, चिरम्, धर्षितः, सम्प्रति, मन्त्रविदाम् ।

**६. प्रदत्तवाक्यस्थानां समस्तपदानां शुद्धोच्चारणं कृत्वा तेषां विग्रहवाक्यानि च कथयत**

तदनु सौबलीजानिरसौ बलीयसाऽमर्षेण धर्षितः सहजविनयं धर्मतनयमाहूय कृतावहित्थो गिरमित्थमुत्थापयामास ।

**७. काञ्चित् प्रेरणास्पदां नीतिकथां कक्षायां श्रावयित्वा तत्सन्देशज्ञापकं नीतिपद्यं च कथयत ।**

## पठनम्

**१. गतियतिनिर्धारणेन प्रदत्तं पद्यं सलयं वाचयत**

बाणेन सम्प्रति नृपा ! दिवि लक्ष्यमेतत्

तच्छायवद्भुवि निपातयितुं पटुर्यः ।

मौर्वीमिमामिव स दक्षिण एव पाणौ

कुर्यात् स्वसारमभिदर्श्य मम स्वसारम् ॥

**२. अधस्तनस्य गद्यस्य द्रुतवाचनं कुरुत**

ततः पातालभुवि तदागमनकौतुकिना वासुकिना संमानितः स धृतिमानितस्ततोऽष्टासु दिशासु तदनुगुणपरिगणनं दिनगणमत्ययशङ्किभिरितरैरपत्यैः सह विचित्य 'हा वत्स ! रिपुभर्त्सन भीम ! क्व वा निषीदसि ?' इति विषीदन्त्याः कुन्त्या नवममपि वासरमनवममेव सञ्जनयन् प्रभञ्जनसूनुरमृताञ्जनैरिव दृशौ रञ्जयामास ।

**३. अधस्तनयोर्गद्यपद्ययोर्व्याख्यां भावार्थं च मौनतया पठित्वा प्रदत्तानां प्रश्नानामुत्तराणि दत्त**

'वत्स ! सम्प्रति वारणावतं पुरमुपेत्य वारणाननगुरोरुत्सवं वारणाय विपदां निषेव्य सहानुजैस्तत्र वास्तव्यपौरजनभव्यया गिरा स्तव्यो निरवधिसुखामनुशाधि वसुधाम्' इति ।

तस्याशयं हृदि विदन्नपि धर्मसूनु-

स्तातस्य वाचमविलम्ब्य तथेत्यगृह्णात् ।

तत्तादृशेषु गुरुशासनपालनेषु

कलङ्कषं गुणगणेन कुलं हि पूरोः

(क) प्रदत्तस्य गद्यस्य वक्ता कः ?

(ख) गद्ये युधिष्ठिरः किं कर्तुमादिष्टो वर्तते ?

(ग) धृतराष्ट्रः पाण्डवान् किमर्थं वारणावतं प्रेषयितुमिच्छति स्म ?

(घ) युधिष्ठिरः किमर्थं पितृव्यस्याज्ञां स्वीचकार ?

(ङ) पूरुवंशीयाः केन सम्पन्ना आसन् ?

(च) 'अनुशाधि' इत्यस्य उपसर्ग-धातु-लकार-पुरुष-वचनानि निर्दिशत ।

(छ) 'सम्प्रति' इत्यस्य पर्यायपदं किम् ?

(ज) 'धर्मसूनुः' इत्यस्य कोऽर्थः ?

(झ) 'सहानुजैस्तत्र' 'तथेत्यगृह्णात्' इत्यनयोः सन्धिविच्छेदं विधत्त ।

(ञ) 'निरवधिसुखाम्' 'गुरुशासनपालनेषु' इति पदयोर्विग्रहं कथयत ।

(ट) श्लोकेऽस्मिन् किं वृत्तं वर्तते ? किञ्च तल्लक्षणम् ?

(ठ) युधिष्ठिरस्य पितृव्याज्ञास्वीकरणं यूयं समुचितं मन्यध्वे उतासमीचीनम् ? सतर्कमुपस्थापयत ।

## ४. प्रदत्तं पद्यं पठित्वा स्वभाषया भीमहिडिम्बयोर्युद्धस्य वर्णनं कुरुत

वृक्षेण वृक्षं गिरिणा गिरीन्द्रं हस्तेन हस्तं वचसा वचश्च ।
परस्परेण प्रतिरुध्य घोरं समीकमेतौ सममादधाते ॥३४॥

## ५. प्रदत्तं गद्यांशं पठित्वा तत्रत्यानि समस्तपदानि सङ्गृह्य तेषां विग्रहं च प्रदर्शयत

ततस्ते सर्वोत्तरा अपि शरासनेषु दक्षिणाः 'गुरुदक्षिणां कुरुत मह्यं द्रुह्यतो द्रुपदस्य युधि बलाद् गृहीतस्य समर्पणम्' इति गुरुदक्षिणा चोदिताः सर्वेऽप्यहम्पूर्विकया कयापि विमतेषु कृतावज्ञसेनं याज्ञसेनं पुरं निरुध्य चिरमयुध्यन्त ।

## ६. अधस्तनीं कथां पठित्वा प्रदत्तान् प्रश्नानुत्तरयत

आसीत् कल्याणकटकवास्तव्यो भैरवो नाम व्याधः । स चैकदा मांसलुब्धो धनुरादाय मृगमन्विष्यन् विन्ध्याटवीमध्यं गतः । तत्र तेन मृग एको व्यापादितः । ततो मृगमादाय गच्छता तेन घोराकृतिः शूकरो दृष्टः । ततस्तेन मृगं भूमौ निधाय शूकरः शरेण हतः । शूकरेणाागत्य प्रलयघनघोरगर्जनं कुर्वाणेन स व्याधो मुष्कदेशे हतश्छिन्नद्रुम इव पपात । तथा चोक्तम्-

जलमग्निर्विषं शस्त्रं क्षुद्व्याधिः पतनं गिरेः ।
निमित्तं किञ्चिदासाद्य देही प्राणैर्विमुच्यते ॥

अथ तयोः पादास्फालनेन एकः सर्पोऽपि मृतः । अत्रान्तरे दीर्घरावो नाम जम्बुकः परिभ्रमन्नाहारार्थी तान् मृतान् मृगव्याधसर्पशूकरानपश्यत् । आलोक्याचिन्तयच्च- 'अहो भाग्यम् ! अद्य महद् भोज्यं मे समुपस्थितम् ।

अथवा-

अचिन्तितानि दुःखानि यथैवायान्ति देहिनाम् ।
सुखान्यपि तथा मन्ये दैवमत्रातिरिच्यते ॥
भवतु, एषां मांसैर्मासत्रयं ममाधिकं भोजनं भविष्यति ।
मासमेकं नरो याति द्वौ मासौ मृगशूकरौ ।
अहिरेकं दिनं याति अद्य भक्ष्यो धनुर्गुणः ॥

ततः प्रथमबुभुक्षायामिदं निःस्वादु कोदण्डलग्नं स्नायुबन्धनं खादामि' इत्युक्त्वा तथाकरोत्। ततश्छिन्ने स्नायुबन्धने द्रुतमुत्पतितेन धनुषा हृदि निर्भिन्नः स दीर्घरावः पञ्चत्वं गतः। अतोऽहं ब्रवीमि-

कर्तव्यः सञ्चयो नित्यं कर्तव्यो नातिसञ्चयः।

पश्य सञ्चयशीलोऽसौ धनुषा जम्बुको हतः॥

(हितोपदेश-मित्रलाभः)

(अ) प्रश्नाधारेण व्याकरणकार्यं कुरुत

(क) 'चैकदा' 'अतोऽहम्' अनयोः सन्धिं विच्छेदयत।

(ख) 'मुष्कदेशः' 'कोदण्डः' इत्यनयोरर्थं प्रकाशयत।

(ग) 'परिभ्रमन्' 'छिन्नः' अनयोः प्रकृतिप्रत्ययविभागं कुरुत।

(घ) 'मांसलुब्धः' 'सञ्चयशीलः' अनयोर्विग्रहं कुरुत।

(ङ) 'पपात' 'ब्रवीमि' अनयोर्लकारनिर्देशं कुरुत।

(आ) एकवाक्येनोत्तरयत

(क) कः कल्याणकटकवास्तव्यः ?

(ख) व्याधेन शरेण को हतः ?

(ग) सर्पः कथं मृतः ?

(घ) को मृतान् मृगव्याधशूकरानपश्यत् ?

(ङ) भोजनाय को मासमेकं याति ?

(इ) सङ्क्षेपेणोत्तरयत

(क) व्याधः किमर्थं छिन्नद्रुम इव पपात ?

(ख) देही कथं प्राणैर्विमुच्यते ?

(ग) कुत्र दैवमतिरिच्यते ?

(घ) दीर्घरावः कथं पञ्चत्वं गतः ?

(ङ) किं कर्तव्यम् ? किञ्चाकर्तव्यम् ?

(ई) कथायाः प्रसङ्गमाधृत्य 'अचिन्तितानि....' इति श्लोकस्य आशयं कथयत।

(उ) 'मासमेकं नरो याति....' इति पद्यस्यान्वयं प्रदर्शयत।

(ऊ) अस्याः कथायाः सन्देशो वर्तते- 'अतिसञ्चयो हानिकरो भवति' इति। एतत् सत्यमस्ति, उतासत्यम् ? स्वमतमुपस्थापयत।

७. **अधस्तनं पद्यं पठित्वा तत्प्रतिपादितवित्तबलविषयस्य पक्षे विपक्षे वा स्वमतं प्रकटयत**

यदुत्साही सदा मर्त्यः पराभवति यज्जनान् ।
यदुद्धतं वदेद् वाक्यं तत्सर्वं वित्तजं बलम् ॥

## लेखनम्

१. **अधस्तनानां पदानां शुद्धलेखनं कुरुत**

परिगृहीतमनोहराम्बरपटीरहाराभ्यवहाराः, कुरुनरेन्द्रनन्दनेन, सुयोधनभृत्यमुक्ता, सजग्धिकेलिकायामारालिकदापितकवलनिचोलितकरालगरलविह्वलम्, प्रभञ्जनसूनुरमृताञ्जनैरिव, कार्मुककौशलस्य, सर्वेऽप्यहम्पूर्विकया, कलशवारिभिरभ्यषिञ्चदानन्दबाष्पसलिलैरवनी, गिरमित्थमुत्थापयामास, कायमन्यमिवेन्द्रियैः, आबिभ्रतामश्रुभिरेव, मौर्वीमिमामिव, परमीदृशोत्सवश्रवणात्परमानन्दमनुभवन्तीभिरन्तःपुरिकाभिः, कनकभूषणैरविकृतसहजरामणीयकाम् ।

२. **प्रदत्तानां समस्तपदानां विग्रहवाक्यं प्रदर्शयत**

सुपर्वसरितः, पटगृहवाटेषु, कुरुनरेन्द्रनन्दनेन, प्रलम्बितशिरसम्, तदागमनकौतुकिना, कार्मुककौशलस्य, प्रज्ञादृग्, कृतावज्ञसेनम्, आनन्दबाष्पसलिलैः, कृतावहित्थः, निरवधिसुखाम्, गुरुशासनपालनेषु, कर्मचोदनया, पौरनृणाम्, ईदृशोत्सवश्रवणात्, कमनीयमणिकोरकितैः, नारदविस्मयनाकतरुम् ।

३. **अधस्तनानां संहितानां पदानां सन्धिं विच्छिद्य प्रदर्शयत**

वीचीभिरनीचीभिरुत्कूलितफेनकूटेष्विव, गन्धपूरैरधिकमलसताया, चोदितैर्नरेन्द्रैरुपेत्य, चायुषि, अन्येद्युरपि, पुनराजीवन्म्, प्रभञ्जनसूनुरमृताञ्जनैरिव, तद्यशोऽपि, सर्वेऽप्यहम्पूर्विकया, कलशवारिभिरभ्यषिञ्चदानन्दबाष्पसलिलैरवनी, बलीयसाऽमर्षेण, सहानुजैस्तत्र, तथेत्यगृह्णात्, कायमन्यमिवेन्द्रियैः, रोगमिवाधितापम्, वचश्च, परमानन्दमनुभवन्तीभिरन्तःपुरिकाभिः, मुहूर्तगुणेष्विव ।

४. **अधस्तनयोः पद्ययोरन्वयं लिखत**

(क) सुप्तस्य तस्य तु सुयोधनभृत्यमुक्ता
वाताशनाश्च सकला वनदेवताश्च ।
आशीर्द्वयं वपुषि चायुषि च प्रतेनुः
पूर्वा न तत्र चरमैव पुपोष वीर्यम् ॥

(ख) धर्मभूरनुजैः साकं तद्गिरा तत्पुरं ययौ ।
कर्मचोदनया जीवः कायमन्यमिवेन्द्रियैः ॥

## ५. अधस्तनानां पदानां पर्यायं तदनुसारेण कोशवाक्यं चान्विष्य लिखत

| | | | | |
|---|---|---|---|---|
| (क) सलिलम् | (ख) सुखम् | (ग) निशीथः | (घ) झटिति | (ङ) वपुः |
| (च) सूनुः | (छ) चक्षुः | (ज) अमर्षः | (झ) रोगः | (ञ) गिरिः |
| (ट) समीकम् | (ठ) मौर्वी | (ड) कनकम् | (ढ) नाकः | (ण) तरुः |

## ६. प्रदत्तस्य पद्यस्य भावार्थं प्रकाशयत

द्विरदं द्विरदस्तुरगं तुरगो रथिकं रथिकः पदगं पदगः ।
इतरेतरमेत्य रणं विदधे दिवि नारदविस्मयनाकतरुम् ॥

## ७. अधस्तनयोर्गद्यांशयोः सन्दर्भादिनिदर्शनेन व्याख्यां कुरुत

(क) अन्येद्युरपि पुनराजीवन्तं निद्रारुणनयनराजीवं तं स मुग्धधीः स्निग्ध इव सजग्धिकेलिकायामारालिकदापितकवलनिचोलितकरालगरलविह्वलं प्रलम्बितशिरसं रज्जुभिः परिणाह्य परिणाहिनीभिरसुहृदां हृदयशूलमपि शूलकीलिते निर्जरसरिदन्तर्जले विसर्जयामास ।

(ख) तदनु सौबलीजानिरसौ बलीयसाऽमर्षेण धर्षितः सहजविनयं धर्मतनयमाहूय कृतावहित्थो गिरमित्थमुत्थापयामास ।

## ८. प्रदत्ते पद्ये सप्रसङ्गं व्याख्यात

(क) काष्ठां परां कार्मुककौशलस्य काष्ठाः परास्तानपि तद्यशोऽपि ।

प्रज्ञादृगारोपयितुं प्रवृत्तो व्यज्ञापयद् विष्णुपदीतनूजम् ॥

(ख) रहसि नलिनतल्पे रत्नपर्यङ्कल्पे

दिनविरतिसमीरैः सेव्यमानः स भीमः ।

तटभुवि कुसुमानां तादृशैर्गन्धपूरै-

रधिकमलसताया हानिदद्रौ निदद्रौ ॥

## ९. अधस्तनीं लघ्वीं नीतिकथां पठित्वा तत्सारांशं सन्देशं च स्वगिरा लिखत

कस्मिंश्चित्सरोवरे भारुण्डनामा पक्षी एकोदरः पृथग्ग्रीवः प्रतिवसति स्म । तेन च समुद्रतीरे परिभ्रमता कञ्चित्फलममृतकल्पं तरङ्गक्षिप्तं सम्प्राप्तम् । सोऽपि भक्षयन्निदमाह- 'अहो ! बहूनि मयामृतप्रायाणि समुद्रकल्लोलाहृतानि फलानि भक्षितानि । परमपूर्वोऽस्यास्वादः । तत्किं पारिजातहरिचन्दनतरुसम्भवम् ? किं वा, किञ्चिदमृतमयफलमिदमव्यक्तेनापि विधिनापातितम् ।' एवं तस्य ब्रुवतो द्वितीयमुखेनाभिहितम् 'भो ! यद्येवं तन्ममापि स्तोकं प्रयच्छ, येनाहमपि जिह्वासौख्यमनुभवामि ।' ततो विहस्य प्रथमवक्त्रेणाभिहितम्- 'आवयोस्तावदेकमुदरम् । एका तृप्तिश्च भवति । ततः किं पृथग्भक्षितेन ? वरमनेन शेषेण प्रिया तोष्यते ।' एवमभिधाय तेन शेषं

भारुण्ड्यै प्रदत्तम्। सापि तदास्वाद्य प्रहृष्टतमालिङ्गनचुम्बनसम्भावनाद्यनेकचाटुपरा च बभूव। द्वितीयं मुखं तद्दिनादेव प्रभृति सोद्वेगं सविषादं च तिष्ठति।

अथान्येद्युर्द्वितीयमुखेन विषफलं प्राप्तम्। तद् दृष्ट्वा अपरमाह- 'भो निस्त्रिंश! पुरुषाधम! निरपेक्ष! मया विषफलमासादितम्। तत्तवापमानाद् भक्षयामि।' अपरेणाभिहितम्- 'मूर्ख! मा मैवं कुरु। एवं कृते द्वयोरपि विनाशो भविष्यति।' अथैवं वदता तेनापमानेन तत्फलं भक्षितम्। किं बहुना, द्वावपि विनष्टौ।

अतः प्रोच्यते-

एकः स्वादु न भुञ्जीत नैकः सुप्तेषु जागृयात्।

एको न गच्छेदध्वानं नैकश्चार्थान् प्रचिन्तयेत्॥

एकोदराः पृथग्ग्रीवा अन्यान्यफलभक्षिणः।

असंहता विनश्यन्ति भारुण्डा इव पक्षिणः॥

(पञ्चतन्त्रम्)

**१०. अधस्तनानि पद्यान्याधृत्य स्वभाषयाऽतिथिसत्कारमहत्त्वविषये एकमनुच्छेदं रचयत**

सम्प्राप्तो योऽतिथिः सायं सूर्योढे गृहमेधिनाम्।

पूजया तस्य देवत्वं प्रयान्ति गृहमेधिनः॥

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता।

सतामेतानि हर्म्येषु नोच्छिद्यन्ते कदाचन॥

स्वागतेनाग्नयस्तृप्ता आसनेन शतक्रतुः।

पादशौचेन पितरो ह्यर्घाच्छम्भुस्तथातिथेः॥

**११. चम्पूकाव्यस्य परिचयप्रदायकमधस्तनं गद्यं पठित्वा प्रदत्तान् प्रश्नान् सङ्क्षेपेणोत्तरयत**

चुरादिगणे 'चपि गतौ' इति धातुर्वर्तते। तत ऊप्रत्ययविधानेन चम्पूशब्दो निष्पद्यते। गमन-ज्ञान-मोक्ष-प्राप्तिरूपेषु चतुर्ष्वर्थेषु मोक्षरूपेऽर्थे साहित्यस्य चम्पूः सम्बद्धाऽस्तीति कथयन्ति केचिद् विद्वांसः। अतस्ते 'चम्पयति मोक्षतुल्यमानन्दं प्रददातीति चम्पूः' इति चम्पूशब्दस्य व्युत्पत्तिं कुर्वन्ति। सर्वमपि काव्यं ब्रह्मानन्दसहोदरमानन्दमास्वादयतीति चम्पूशब्दस्यैव वैशिष्ट्यसाधनेऽक्षमामिमां व्युत्पत्तिं वीक्ष्य हरिदासो भट्टाचार्यः 'चमत्कृत्य सहृदयान् विस्मयीकृत्य पुनाति प्रसादयतीति चम्पूः' इति चम्पूब्दं व्युत्पादयति। अत्र च हरिदासनिर्दिष्टा चमत्कृतिः शाब्दी वर्तत इति नलचम्प्वादीनां चम्पूकाव्यानाममनुशीलनेन ज्ञायते। चम्प्वां प्रायेण रसादिभ्यो वाग्वैदग्ध्यमेव कामयन्ते चम्पूकाराः।

अग्निपुराणे मिश्रकाव्यभेदत्वेन प्रकीर्णाख्यातयोर्नामनिर्देशेन चम्पूकाव्यस्य बीजं निर्दिष्टमस्ति। 'गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते' इति कथयता दण्डिना काव्यादर्शे काव्यक्षेत्रे चम्पूनाम्नी

मिश्रशैली च विराजत इति सङ्केतितमस्ति। तदनुवर्तिभिः काव्यशास्त्रिभिश्चम्पूविषये प्रायेण दण्डिमत एवानुसृतोऽनुभूयते। काव्यानुशासने 'गद्यपद्यमयी साङ्का सोच्छ्वासा चम्पूः' इति कथयता हेमचन्द्रेण चम्प्वां गद्यपद्यमयत्वेन साकं साङ्कत्वस्य सोच्छ्वासत्वस्य वाऽऽवश्यकता निरूपिता वर्तते। विश्वनाथेनापि 'गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते' इति वाक्येन चम्पूलक्षणे दण्डी एवानुसृतो विद्यते। गद्यपद्यमयत्वं नाटके वीक्ष्य कुनचित् काव्यशास्त्रिणा उक्तिप्रत्युक्तिविष्कम्भशून्यत्वं चम्प्वां निक्षिप्तं वर्तते। तेन कथितमस्ति-

**गद्यपद्यमयी साङ्का सोच्छ्वासा कविगुम्फिता।**

**उक्तिप्रत्युक्तिविष्कम्भशून्या चम्पूरुदाहृता॥**

काव्यशास्त्रिणां लक्षणानुशीलने साङ्कत्व-सोच्छ्वासत्व-उक्तिप्रत्युक्तिविष्कम्भशून्यत्वादीनि लक्षणानि अतिव्याप्त्यादिदोषयुतानि दृश्यन्ते। अतो निष्कर्षे गद्यपद्यमयी मिश्रशैली एव चम्पूलक्षणसाधिकाऽवगम्यते। चम्प्वां रसालङ्कारादयस्तु अपेक्षन्त एव। अत उच्यते-

**गद्यपद्यमयं श्रव्यं, सम्बन्धं बहुवर्णितम्।**

**सालङ्कृतैः रसैः सिक्तं चम्पूकाव्यमुदाहृतम्॥**

प्रचलिताभ्यः काव्यशैलीभ्यः पार्थक्येन सचेतसां चेत आह्लादयितुं कविभिरस्याश्चम्पूरूपिण्या मिश्रशैल्याः प्रवर्तनं विहितमासीत्। गद्येन पद्येन च पृथक् प्राप्तव्यः काव्यरसास्वादश्चम्पूकाव्ये एकत्रैव लभ्यते। चम्पूकारस्य हरिचन्द्रस्य मते बाल्यतारुण्ययोर्मध्ये वर्तमाना कन्येव गद्यपद्यमयी चम्पूर्मनोहारिणी भवति। जाटिल्यादिदोषेभ्यो गद्ये यदा रसप्रवाहावच्छेदो भवितुमर्हति, तदा पद्यसन्निवेशेन रसावर्जनं विधातुं शक्यते। पुना रसधाराया निरवच्छेदपूर्वकं कथावस्तुनः प्रबन्धनाय पद्यमध्ये गद्यसन्निवेशो नितरां फलदायी भवतीति चम्पूकारः शरभोजी चम्पूमहिमानं गायति। अपरश्चम्पूकारो वेङ्कटाध्वरी अपि शरभोजिन एव मतमनुसरन् चम्पूमहत्त्वमेवं प्रकाशयति-

**पद्यं यद्यपि विद्यते बहुसतां हृद्यं विगद्यं न तत्,**

**गद्यं न प्रतिपद्यते न विजहत्पद्यं बुधास्वाद्यताम्।**

**आदत्ते हि तयोः प्रयोग उभयोरामोदभूमोदयम्,**

**सङ्गः कस्य हि न स्वदेत मनसे माध्वीकमृद्वीकयोः॥**

गद्यपद्यमिश्रितानां काव्यानां रचना तु वैदिककाले एव आरब्धा आसीत्। कृष्णयजुर्वेदस्य तैत्तिरीयसंहिता, मैत्रायणीसंहिता, कठसंहिता च चम्पूशैल्याः उत्तमानि उदाहरणानि सन्ति। एवमन्यासु वेदसंहितासु, ब्राह्मणग्रन्थेषु, उपनिषत्सु, पुराणादिषु क्वचित् चम्पूशैली प्राप्यते। उपनिषत्सु प्रश्नोपनिषत्, मुण्डकोपनिषत्, कठोपनिषच्च मिश्रशैल्या एव उपस्थापिताः सन्ति।

ईशवीयप्रथमशताब्द्याः 'अवदानशतकम्' मिश्रशैल्या रचितं दृश्यते। हरिषेणकृतः 'समुद्रगुप्तप्रशस्तिः' इत्याख्यो ग्रन्थो लौकिकसंस्कृतसाहित्ये मिश्रशैल्याः प्रथमग्रन्थत्वेन परिगण्यते। तस्मिन् काले मिश्रशैल्या शिलालेख-प्रशस्तिपत्रादिलेखनपरम्पराऽऽसीदिति च तेषामनुशीलनेन ज्ञायते। तेषु वत्सभट्टि-रविशान्ति-चन्द्रगिरिप्रभृतीनामनेकेषां कवीनां चम्पूशैल्या

रचनाः प्रशस्तिपत्रमाध्यमेन संरक्षिताः प्राप्यन्ते । दशमेऽब्दे त्रिविक्रमभट्टेन रचिता 'नलचम्पूः' एव चम्पूकाव्यस्य काव्यत्वाधायिका प्रथमा महत्त्वपूर्णा रचना मन्यते त्रिविक्रमभट्टस्य रचनायाः अनन्तरमेव चम्पूकाव्यस्य प्रसिद्धिः काव्यक्षेत्रेऽभवत् । तदनु रचितानि चम्पूकाव्यानि अद्यापि उपलभ्यन्ते । यतो हि त्रिविक्रमभट्टस्य नलचम्प्वा अनन्तरं चम्पूकाव्यरचनाया वेगः अवर्धत । अतः त्रिविक्रमभट्ट एव चम्पूकाव्यस्य प्रवर्तक इति पश्चवर्तिनः काव्यशास्त्रिणो निश्चप्रचं कथयन्ति । ततश्च सोमप्रभसूरेः 'यशस्तिलकचम्पूः', 'हरिचन्द्रस्य 'जीवन्धरचम्पूः', भोजस्य 'रामायणचम्पूः' इत्यादीनि अनेकानि चम्पूकाव्यानि प्रसिद्धान्यभवन् । तदनु च वरदाम्बिकापरिणयचम्पूः, नीलकण्ठविजयचम्पूः, विश्वगुणादर्शचम्पूः, मुक्ताचरित्रचम्पूः, आनन्दवृन्दावनचम्पूः, गोपालचम्पूः, आनन्दकन्दचम्पूः, अवन्तिसुन्दरीकथाचम्पूः, पारिजातहरणचम्पूः, उषापरिणयचम्पूः, गजेन्द्रचम्पूः, भरतेश्वराभ्युदयचम्पूः, पुरुदेवचम्पूः, अमोघराघवचम्पूः, यतिराजविजयचम्पूः, विरूपाक्षवसन्तोत्सवचम्पूः, रुक्मिणीपरिणयचम्पूः, आचार्यविजयचम्पूः, वेङ्कटेशचम्पूः, धर्मविजयचम्पूः, शङ्करचेतोविलासचम्पूः, गङ्गावतरणचम्पूः, रामचन्द्रचम्पूः, आनन्दचम्पूः, सुदर्शनचम्पूः, द्रौपदीपरिणयचम्पूः, नवरत्नावलीचम्पूश्चेत्यादीनि अनुकानि चम्पूकाव्यानि प्रकाशितानि प्राप्यन्ते ।

## प्रश्नाः

**(क) प्रदत्तगद्यतः पञ्च बोधप्रश्नान् निर्माय तदुत्तराणि च स्वयं लिखत ।**

**(ख) चम्पूशब्दस्य व्युत्पत्तिगतमर्थं प्रदर्शयत ।**

**(ग) चम्पूकाव्यलक्षणविषये विदुषां मतविवेचनं कुरुत ।**

**(घ) चम्पूकाव्यस्य वैशिष्ट्यं विवेचयत ।**

**(ङ) चम्पूकाव्यस्य ऐतिह्यं निरूपयत ।**

## अनुप्रयुक्तव्याकरणम्

### कृदन्तप्रयोगः - तृच्-ण्वुल्-ल्युट्-क्तिन्नन्तः

**१. वाक्यानि पठित्वा अधो निर्दिष्टकार्यकलापान् कुरुत**

- कृष्णो जगतः **कर्ता** अस्ति ।
- संस्कृतव्याकरणस्य अनेके **कर्तारः** सन्ति ।
- **नेत्री** उच्चैर्जनान् सम्बोधयति ।
- **विधाता** जनानां भाग्यं कर्माश्रितं कृतवान् ।
- अहं विद्याया **अधिष्ठात्रीं** देवीं भूयो भूयो वन्दे ।

- **सिद्धिदात्र्यै** देव्यै नमो नमः ।
- तव मित्रं साहित्यस्य **पठितृ** वर्तते ।
- **गायको** मधुरेण स्वरेण गायति ।
- रामायणस्य **पाठका** आविश्वं प्रसृताः सन्ति ।
- **नायकेन नायिकया** सह विवाहः कृतः ।
- ईश्वरो भक्ताय स्वस्वरूपस्य **दर्शनम**दात् ।
- भवतः **कथनं** सर्वथा सत्यम् ।
- परेषां महोत्सवे अनाहूतः सन्नपि **गमनम**पमान**कारकं** भवितुं शक्नोति ।
- सम्प्रति स्वकीयायाः **संस्कृतेः संरक्षण**स्यावश्यकता वर्धमाना दृश्यते ।
- **पठने लेखने** च तव रुचिर्नास्ति वा ?
- कुमारसम्भवं महाकवेः कालिदासस्य **कृति**र्वर्तते ।
- **स्थिति**रियं शीघ्रं परिवर्तनीया ।
- सन्तानस्य **प्रगतिः** सर्वेभ्यो **हर्षदायिनी** भवति ।
- **बुद्धेः** कारणेन मानवः पशोः श्रेष्ठो विद्यते ।

(क) वाक्येषु रेखाङ्कितपदानां धातुं कृत्प्रत्ययञ्च निर्दिशत ।

(ख) रेखाङ्कितपदानां लिङ्गं वचनञ्च निर्दिशत ।

(ग) रेखाङ्कितपदानामर्थं लिखत ।

(घ) क्तिन्-प्रत्ययान्ताः शब्दाः कस्मिन् लिङ्गे प्रयुज्यन्ते ?

(ङ) ण्वुल्-तृचौ प्रत्ययौ धातोः कस्मिन्नर्थे भवतः ?

(च) ल्युट्-प्रत्ययः कस्मिन्नर्थे विधीयते ? ल्युडन्तानां प्रयोगश्च कस्मिन् लिङ्गे भवति ?

(छ) कर्ता, कारकः इत्यनयोः पदयोरर्थभेदोऽस्ति न वा ?

(ज) तृजन्तशब्दानां स्त्रीत्वे कः प्रत्ययो विधीयते ?

(झ) नेतृ-नायकशब्दयोः त्रिषु लिङ्गेषु रूपाणि लिखत ।

(ञ) उपरितनवाक्येषु तृजन्तपदानि ण्वुलन्तपदैर्ण्वुलन्तानि च तृजन्तपदैर्विष्ठाप्य सम्बद्धवाक्यानां पुनर्लेखनं कुरुत ।

## २. पदानि प्रयुज्य वाक्यानि रचयत

भावकः, भोक्ता, दोग्धा, मतिः, भक्षणम्, हर्त्री, कारिका, वदनम्, करणम्, आसनम्, ज्ञानेन, गतेः, शान्त्यै, रक्षकाय, जनयित्र्यै ।

३. **प्रदत्तास्ववस्थासु जायमानानि प्रातिपदिकानि निर्दिश्य तन्निष्पन्नस्य कस्यचित् पदस्य वाक्ये प्रयोगं कुरुत**

भू + ल्युट्, सेव् + तृच्, लिख् + ण्वुल्, वि + रच् + ल्युट्, भुज् + तृच्, अधि + इ(ङ्) + णिच् + ण्वुल्, बुध् + ल्युट्, वच् + क्तिन्, स्था + ल्युट्, पा + ण्वुल्, भिद् + तृच्, क्री + तृच्, वि + धा + ण्वुल्, छिद् + ण्वुल्, शुष् + ल्युट्, ग्रह् + ल्युट्, नश् + ण्वुल्, सम् + स्था + णिच् + ण्वुल्, दृश् + तृच् ।

४. **अधस्तनवाक्यानि स्त्रीलिङ्गे परिवर्तयत**

(क) दाता दरिद्राणां साहाय्यं करोति ।

(ख) पाठका लेखकाय पृष्ठपोषणं यच्छन्ति ।

(ग) गीतामृतस्य भोक्तारो ज्ञानिनो भवन्ति ।

(घ) सृष्टेः कर्ता कोऽस्ति ?

(ङ) द्वौ वाद्यवादकौ वाद्यानि वादयन्तौ स्तः ।

५. **अधस्तनपदानामर्थं विलिख्य प्रकृतिप्रत्ययौ च विच्छेदयत**

गन्ता, क्षेपणम्, वक्ता, योद्धा, स्पर्शनम्, विध्वंसकः, जनकः, बाधकः, प्रेरकः, प्रीतिः, श्रुतिः, सन्तुष्टिः, युक्तिः, उपलब्धिः, स्मृतिः, प्रवाचकः, जीवनम् ।

६. **वृध्-धातोः क्तिन्प्रत्यये ब्रू-धातोर्ल्युट्प्रत्यये च निष्पन्नप्रातिपदिकयोर्जायमानानि रूपाणि लिखत ।**

७. **पाठे प्रयुक्तानि तृच्-ण्वुल्-ल्युट्-क्तिन्प्रत्ययैर्निर्मितानि पदानि रेखाङ्कितानि कृत्वा तेषां स्वशब्दैर्वाक्ये प्रयोगं दर्शयत ।**

८. **शिक्षकस्य साहाय्येन अधस्तनपदानां सार्थं प्रकृतिप्रत्ययान्वेषणं विधत्त**

त्यागः, गोदः, ज्ञः, जलपः, वरदः, न्यायः, स्मारं स्मारम्, प्रियः, जनार्दनः, लवणः, प्रज्ञः, कुम्भकारः, यशस्करः, प्रियंवदः, उष्णभोजी, नेत्रम्, गृहम्, चरित्रम् ।

## समासप्रयोगः

१. **रेखाङ्कितविग्रहवाक्यानि समस्तपदैः प्रतिष्ठाप्य प्रदत्तानुच्छेदस्य पुनर्लेखनं कुरुत**

मम **गृहस्य समीपम्** एका **पाठस्य शाला** विद्यते । तत्र **ज्ञानाय उत्सुकाः त्रिगुणितं शतं** विद्यार्थिनः पठन्ति । एकस्यां कक्षायां **विंशतेरासन्नाः** पुरुषाः **पञ्च वा षड् वा** महिलाश्च सन्ति । विद्यालये **कृता विद्या यैस्ते** शिक्षकाः पाठयन्ति । विद्यार्थिनः प्रतिदिनं **विद्याया ईश्वरीं** सरस्वतीं **सम्यक्**

**प्राथ्र्य कक्षाया अरम्भं** कुर्वन्ति । ते **राष्ट्रस्य गानञ्च** गायन्ति । विद्यार्थिषु केचन **गायने कुशलाः** केचित्तु **वाद्यवादने निपुणाः** सन्ति । **पठने लेखने च** सर्वेषां नैपुण्यं वर्तत एव । इतो **विद्यालयस्य शिक्षां प्रकर्षेण पूरयित्वा उच्चायै शिक्षायै** छात्रा **महति विद्यालये** प्रविशन्ति । **प्रधान आचार्यः** लब्धप्रतिष्ठः कुशलः प्रशासकश्च वर्तते । **शिक्षिकाः शिक्षकाश्च** छात्राणां जिज्ञासायाः शान्तये कृतसङ्कल्पाः सन्ति ।

२. **अधस्तनसमस्तपदानां विग्रवाक्यानि विलिख्य पदानामर्थानुरूपं वाक्येषु प्रयोगं दर्शयत**

द्वित्राः, अधिकदशाः, आसन्नविंशाः, अधिकत्रिंशाः, उपदशाः, द्विदशाः, अदूरचत्वारिंशाः, उपबहवः, निस्त्रिंशानि, द्व्यङ्गुलम्, पञ्चषाः, द्विदन्, चतुर्दन् ।

३. **अधस्तनविग्रहेषु एकशेषसमासान्निष्पन्नपदानि प्रयुज्य वाक्यानि रचयत**

हंसी च हंसश्च, पुत्रश्च दुहिता च, माता च पिता च, शुक्लश्च शुक्ला च शुक्लञ्च तानि, श्वश्रूश्च श्वशुरश्च, स च रामश्च, स च अयं च ।

४. **प्रदत्तानां समस्तपदानां विग्रहं प्रदश्र्य प्रत्येकं समासनामानि च लिखत**

विहितपूर्वः, राजप्रासादः, कृतनिश्चयः, अनपेक्षितः, रमासत्यनारायणौ, त्रिफला, रक्ताम्बरः, सतृणम्, अनुमार्गम्, श्वेतकमलम्, कृष्णसर्पः, सवल्कलम्, राजदन्तः, युधिष्ठिरः, परस्मैपदम्, सुपुत्रः, वनगतः, त्यक्तजीविकः, संज्ञार्थम्, लोकातीतः, अतिशीतम्, साग्नि, करपादम्, गिरिहिमालयौ, प्राचार्यः, युवजानिः, केशाकेशि, निरवकरम् ।

५. **पाठं पठित्वा समस्तपदानि चिह्नीकृत्य तेषां विग्रहप्रदर्शनपुरःसरं स्वशब्दैर्वाक्ये प्रयोगकौशलं दर्शयत ।**

## तद्धितान्तप्रयोगः

१. **वाक्यानि पठित्वा रेखाङ्कितपदानां व्युत्पत्तिं प्रदर्शयत**

- सन्न्यासी **काषायं** वस्त्रं धारयति ।
- पाणिनिर्विश्वस्य श्रेष्ठो **वैयाकरणो** विद्यते ।
- **शिक्षकाः शिक्षिका**श्च ज्ञानदातारो भवन्ति ।
- राष्ट्रसेवका **जनता**याः सेवायां रताः सन्ति ।
- **पाशुपतं** क्षेत्रं पवित्रं तीर्थस्थलं विद्यते ।
- **भ्राष्टं** मर्कटान्नं मह्यं बहु रोचते ।
- सहायहीनानां **सहायता** कथं विधेयेति चिन्तयन्नस्मि ।
- तत्र **वास्त्रं** रथं पश्य ।

२. **पदानि प्रयुज्य वाक्यानि रचयत**

क्रमकः, यौवनम्, बन्धुता, शाराबः, ग्रामता, गार्भिणम्, काकम्, वासिष्ठम् ।

३. **अधस्तनपदस्थान् तद्धितप्रत्ययान् अभिज्ञाय पदानामर्थं विलिखत**

बार्हस्पतम्, बाकम्, गजता, पदकः, पौषम्, मीमांसकः, ऐन्द्रः ।

४. **अधस्तनप्रत्ययैर्निष्पन्नपदानां वाक्ये प्रयोगं विदधत**

देव + तल्, शिक्षा + वुन्, काक + अण्, भिक्षा + अण्, शिव + अण् ।

५. **पाठे प्रयुक्तानां तद्धितान्तपदानामर्थान्वेषणपुरःसरं वाक्येषु प्रयोगं दर्शयत ।**

६. **वुन्-प्रत्ययान्तानि चत्वारि पदान्यन्विष्य प्रत्येकं वाक्येषु योजयत ।**

७. **'बकानां समूहः' इत्यर्थे जायमानस्य प्रातिपदिकस्य सर्वाणि रूपाणि लिखत ।**

# व्याकरणखण्डः

# कृदन्तप्रकरणे

## कृत्यप्रक्रिया

**धातोः ३ । १ । ९१ ॥**

**आ तृतीयाध्यायसमाप्तेर्ये प्रत्ययास्ते धातोः परे स्युः । कृदतिङिति कृत्संज्ञा ॥**

अधिकारसूत्रमिदम् । इतः परं तृतीयाध्यायस्य समाप्तिपर्यन्तं यानि प्रत्ययविधायकानि सूत्राणि सन्ति तेषु 'धातोः' इति पदमुपतिष्ठते । धात्वधिकारे विहिताः प्रत्यया धातोः परे भवन्तीत्यर्थः । अयमधिकारविशेषः कृत्प्रत्ययानां निरूपणाय सन्ति ।

**'धातोः' इति सूत्राधिकारे पठिताः तिङ्भिन्नाः प्रत्ययाः 'कृदतिङ् ३ । १ । ९३ ॥' इति सूत्रेण कृत्संज्ञकाः भवन्ति ।**

**वाऽसरूपोऽस्त्रियाम् ३ । १ । ९४ ॥**

**अस्मिन्धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना ॥**

'धातोः' इत्यस्याधिकारे विहितोऽसरूपोऽपवादः प्रत्यय उत्सर्गस्य(सामान्यशास्त्रस्य) विकल्पेन बाधको भवति, 'स्त्रियां क्तिन्' इत्यस्याधिकारे(स्त्र्यधिकारे) उक्तं प्रत्ययं विना । स्त्र्यधिकारोक्तः सरूपोवादप्रत्ययस्तु उत्सर्गस्य नित्यमेव बाधको भवति । एवमेव धातोर्विहितः सरूपोऽपवादः प्रत्ययोऽपि उत्सर्गस्य नित्यमेव बाधक इत्याशयः ।

**कृत्याः ३ । १ । ९५ ॥**

**ण्वुल्तृचावित्यतः प्राक् कृत्यसंज्ञाः स्युः ।**

इतः परं 'ण्वुल्तृचौ ३ । १ । १३३ ॥' इति सूत्रात् प्राग् विहिताः प्रत्ययाः कृत्यसंज्ञका भवन्तीत्यर्थः । कृत्यसंज्ञकाः प्रत्ययाः सप्त सन्ति । ते यथा- तव्यत्, तव्य, अनीयर्, यत्, ण्यत्, क्यप्, केलिमर् ।

**कर्तरि कृत् ३ । ४ । ६७ ॥**

**कृत्प्रत्ययः कर्तरि स्यात् । इति प्राप्ते**

(कृत्संज्ञकः प्रत्ययः कर्त्रर्थे भवतीत्यर्थः)

**तयोरेव कृत्यक्तखलर्थाः ३ । ४ । ६७ ॥**

**एते भावकर्मणोरेव स्युः ।**

कृत्यप्रत्ययाः, क्तप्रत्ययः, खल्-प्रत्ययस्यार्थे विहिताः प्रत्ययाश्च अकर्मकेभ्यो धातुभ्यो भावे, सकर्मकेभ्यो धातुभ्यस्तु कर्मणि एव भवन्ति, न तु कर्तरि इत्यर्थः ।

**तव्यत्तव्यानीयरः ३ । १ । ९६ ॥**

**धातोरेते प्रत्ययाः स्युः । एधितव्यम्, एधनीयं त्वया । भावे औत्सर्गिकमेकवचनं क्लीबत्वं च । चेतव्यश्चयनीयो वा धर्मस्त्वया ।**

धातोः तव्यत्, तव्य, अनीयर् एते प्रत्ययाः कर्मणि भावे चार्थे भवन्ति । तव्यत्-प्रत्ययस्य तकार इत्संज्ञकः । तव्यत्तव्ययोः स्वरे एव विशेषः, वर्णानुपूर्व्यां तु अविशेष एव । अतस्तयोः पृथगुदाहरणानि न प्रदर्श्यन्ते । 'अनीयर्' इत्यस्य रेफ इत्संज्ञकः ।

'एधितुं योग्यं शक्यं वा' इति विग्रहे एध्-धातोः प्रकृतसूत्रेण अकर्मकत्वाद् भावे तव्यत्प्रत्ययेऽनुबन्धलोपे 'एध् + तव्य' इति जाते, इडागमे, 'एधितव्य', कृदन्तत्वात् प्रातिपदिकसंज्ञायां, भावे औत्सर्गिक एकवचने सौ नपुंसकत्वे च, 'एधितव्यम्' इति । भावे प्रत्ययविधानाद् अनुक्तकर्तरि तृतीया, एधितव्यं त्वया । एवमेव 'एधितुं योग्यं शक्यं वा' इत्येव विग्रहे एध्-धातोः अनीयर्प्रत्यये रेफस्य इत्, एधनीय, स्वादिकार्ये, एधनीयम् । एधनीयं त्वया । (त्वया, मया, अन्यैश्च एधितव्यम्, एधनीयम् ।) 'चेतुं योग्यः, शक्यो वा' इति विग्रहे चिधातोः सकर्मकत्वात् कर्मणि तव्यत्प्रत्यये, अनुदात्तत्वाद् इट्-निषेधे, गुणे 'चेतव्य' ततः सौ 'चेतव्यः' इति रूपम् । अनीयर्प्रत्यये तु गुणे, अयादेशे, स्वादिकार्ये 'चयनीयः' इति । अस्य विशेष्ये धर्मशब्दे पुंलिङ्गैकवचनत्वाद् अत्रापि पुंलिङ्गस्यैकवचनम्, चेतव्यश्चयनीयो वा धर्मस्त्वया । चेतव्यौ चयनीयौ वा धर्मौ त्वया, चेतव्याश्चयनीया वा धर्मास्त्वया, चेतव्यं धर्मम्, चेतव्येन धर्मेण, चेतव्यं पुष्पम्, चेतव्ये पुष्पे, चेतव्यानि पुष्पाणि, चेतव्या एवं भवितव्यम्, भवनीयम् । जेतव्यम्, जयनीयम् । कर्तव्यम्, करणीयम्, कर्तव्यः, करणीयः, कर्तव्या, करणीया इत्यादयः ।

वा. केलिमर उपसंख्यानम् । पचेलिमा माषाः । पक्तव्या इत्यर्थः । भिदेलिमा सरलाः । भेक्तव्या इत्यर्थः । कर्मणि प्रत्ययः ॥

भावे कर्मणि च धातोः केलिमर्-प्रत्ययो भवति । रेफककारौ इतौ ।

'पक्तुं योग्याः शक्या वा' इत्यर्थे पच्-धातोः कर्मणि केलिमर्-प्रत्यये 'पचेलिम' इति प्रातिपदिकम् । 'माषाः' इत्यस्य बहुवचनत्वाद् अत्रापि प्रथमाया बहुवचने जसि, 'पचेलिमा माषाः' इति । एवमेव 'भेत्तुं योग्याः' इत्यर्थे भिद्-धातोः केलिमर्-प्रत्यये- भिदेलिमाः सरलाः ।

**कृत्यल्युटो बहुलम् ३ । ३ । ११३ ॥**

**क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।**

**विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥**

**स्नान्त्यनेन स्नानीयं चूर्णम् । दीयतेऽस्मै दानीयो विप्रः ॥**

कृत्य-संज्ञकप्रत्ययाः, ल्युट्-प्रत्ययश्च याभ्यः प्रकृतिभ्यो येषु अर्थेषु विहिताः सन्ति ततोऽन्यत्रापि भवन्ति । सूत्रे बहुलग्रहणाद् भावकर्मणोः विहिताः कृत्य-प्रत्ययाः कारकान्तरेऽपि भवन्ति । यथा- स्नान्ति अनेन- स्ना अनीयर् (अनीय) (तव्यत्तव्यानीयरः) - स्नानीय - स्नानीयम् । स्नानीयं चूर्णमिति प्रयोगः । एवं दीयते अस्मै- दा अनीयर् - दानीयः । दानीयो विप्रः । बहुलग्रहणादेव करणाधिकरणयोः, भावे च विहितो ल्युट् अन्यत्रापि भवति । यथा- अपसेचनम् । अवस्रावणम् । राजभोजनाः शालयः । राजाच्छादनानि वासांसि । प्रस्कन्दनम् । प्रपतनम् । बहुलग्रहणाद् अन्येऽपि (कृत्य-ल्युड्भिन्ना अपि) कृत्-प्रत्यया यथाप्राप्तमभिधेयं व्यभिचरन्ति । यथा- पादाभ्यां ह्रियते- पादहारकः । गले चोप्यते- गलेचोपकः ।

**अचो यत् ३ । १ । ९७ ॥**

**अजन्ताद्धातोर्यत् स्यात् । चेयम् ॥**

अजन्ताद् धातोः भावे कर्मणि च यत्प्रत्ययो भवतीत्यर्थः । यतः तकार इत् । (असरूपत्वात् तव्यदादिप्रत्ययानां वैकल्पिको बाधकः ।) 'चेतुं योग्यम्' इत्यर्थे चिधातोः यत्प्रत्ययेऽनुबन्धलोपे, गुणे, चेय, तस्मान्नपुंसकलिङ्गे सौ 'चेयम्' इति सिद्ध्यति । (चेयं पुष्पम् ।) एवमेव जेतुं योग्यमित्यर्थे जिधातोर्यति 'जेयम्' । (जेयं मनः)

**ईद्यति ६ । ४ । ६५ ॥**

**यति परे आत ईत्स्यात् । देयम् । ग्लेयम् ॥**

**यत्-प्रत्यये परे आकारस्य स्थाने ईकारादेशो भवति ।**

दातुं योग्यमिति विग्रहे दा-धातोः 'अचो यत्' इति कर्मणि यत्-प्रत्ययेऽनुबन्धलोपे 'दा + य' इत्यवस्थायां यत्-प्रत्यये परे 'दा' इत्यस्याकारस्य प्रकृतसूत्रेण ईत्वे, 'दी + य', गुणे, स्वादिकार्ये 'देयम्' इति । देयं धनम् । एवमेव ग्लै-धातोः 'आदेच उपदेशे०' इति आत्वे, ग्लातुं योग्यमित्यर्थे ग्ला-धातोर्भावे यति पूर्ववद् 'ग्लेयम्' इति सिद्ध्यति । त्वया, मया, अन्यैश्च ग्लेयम् ।

**पोरदुपधात् ३ । १ । ९८ ॥**

**पवर्गान्तादुपधाद्यत्स्यात् । ण्यतोऽपवादः । शप्यम् । लभ्यम् ॥**

पवर्गान्ताद् अकारोपधाद् धातोर्भावे कर्मणि च यत्-प्रत्ययो भवति । सरूपत्वाद् विधिरयं ण्यतो नित्यमेव बाधकः ।

शप्तुं योग्यमित्यर्थे 'ऋहलोर्ण्यत्' इति प्राप्तं ण्यतं नित्यं बाधित्वा यति, सौ 'शप्यम्' इति रूपम् । एवमेव लब्धुं योग्यमिति विग्रहे लभ्-धातोः पूर्ववत् 'लभ्यम्' इति सिद्ध्यति ।

**एति-स्तु-शास्-वृ-दृ-जुषः क्यप् ६ । १ । १०९ ॥**

**एभ्यः क्यप् स्यात् । वृ इति वृञो ग्रहणं न वृङः । वृत्यः । वृङस्तु वार्या ऋत्विजः ॥**

इण् (इ), स्तु, शास्, वृञ् (वृ), दृ, जुष् इत्येतेभ्यो धातुभ्यः क्यप्-प्रत्ययो भवतीत्यर्थः । अत्र 'वृ' इति वृञ्-धातोर्ग्रहणम्, न तु वृङ्-धातोः । तेन 'वर्तुं योग्याः' इत्यर्थे 'वृङ् सम्भक्तौ' इति धातोरनेन क्यप्प्रत्ययाभावे 'ऋहलोर्ण्यत्' इत्यनेन ण्यति 'अचो ञ्णिति' इति वृद्धौ- वार्य, 'ऋत्विजः' इत्यस्य विशेषणत्वाद् बहुवचने 'वार्याः' इति रूपम् ।

'एतुं योग्यः' इत्यर्थे 'इण् गतौ' इत्यर्थकाद् इ-धातोः पूर्वसूत्रेण क्यपि कृतेऽनुबन्धलोपे 'इ य' इत्यवस्थायाम्-

**ह्रस्वस्य पिति कृति तुक् ६ । १ । ७१ ॥**

**इत्यः । स्तुत्यः । शिष्यः । आदृत्यः । जुष्यः । पुनः क्यबुक्तिः परस्यापि ण्यतो बाधनार्था । अवश्यस्तुत्यः ॥**

ह्रस्वान्तस्य धातोः पकारेत्संज्ञके कृत्-प्रत्यये परे 'तुक्' इत्यागमो भवति । उकारककारयोरित्संज्ञायां लोपे 'त्' इत्येवावशिष्यते, कित्वादन्त्यावयवः ।

अनेन सूत्रेण तुगागमेऽनुबन्धलोपे, स्वादिकार्ये- इत्यः । इत्यः = गन्तव्यः । एवमेव 'स्तोतुं योग्यः' इत्यर्थे स्तु-धातोः क्यपि, तुकि च पूर्ववत्- स्तुत्यः । 'शास्यतेऽसौ/शासितुं योग्यः' इति विग्रहे शास्-धातोः क्यपि 'शास् य' इति जाते-

**शास इदङ्हलोः ६ । ४ । ३४ ॥**

**शास उपधाया इत् स्यादङि हलादौ क्ङिति च ।**

अङि, हलादौ किति ङिति च प्रत्यये परे शास्-धातोरुपधाया आकारस्य स्थाने इकारादेशो भवति ।

अनेन आकारस्य इत्वे 'शिस् य' इति जाते 'शासिवसिघसीनां च' इति सकारस्य षत्वे, स्वादिकार्ये 'शिष्यः' इति । 'वरीतुं योग्यः' इत्यर्थे वृ-धातोः पूर्वसूत्रेण क्यपि 'ह्रस्वस्य पिति कृति तुक्' इति तुकि पूर्ववत्- वृत्यः । एवमेव 'आदर्तुं योग्यः' इत्यर्थे आङ्पूर्वकाद् दृधातोः- आदृत्यः । 'जोषितुं योग्यः' इत्यर्थे जुष्-धातोः क्यपि- जुष्यः ।

**मृजेर्विभाषा ३ । १ । ११३ ॥**

**मृजेः क्यब्वा । मृज्यः ॥**

मृज्-धातोर्विकल्पेन क्यप्-प्रत्ययो भवति । 'ऋहलोर्ण्यत्' इति ण्यति प्राप्तेऽनेन विकल्पेन क्यब्विधीयते ।

'मर्जितुं योग्यः' इत्यर्थे मृज्-धातोरनेन सूत्रेण क्यपि 'मृजेर्वृद्धिः' इत्यनेन प्राप्ताया वृद्धेः कित्त्वात् 'क्क्ङिति च' इति निषेधे- मृज्यः । पक्षान्तरे बाधकाभावे तु-

**ऋहलोर्ण्यत् ३ । १ । १२४ ॥**

**ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत् । कार्यम् । हार्यम् । धार्यम् ॥**

ऋवर्णान्ताद् हलन्तात् च धातोः भावे कर्मणि च ण्यत्प्रत्ययो भवतीत्यर्थः। ण्यतः तकारणकारौ इतौ। सरूपत्वात् यतो नित्यमेव बाधकः, तव्यदादिप्रत्ययानान्तु असरूपत्वात् वैकल्पिको बाधकोऽयं विधिः।

'कर्तुं योग्यमित्यर्थे' कृ-धातोः प्राप्तं यत्प्रत्ययं नित्यं बाधित्वाऽनेन कर्मणि ण्यत्-प्रत्ययेऽनुबन्धलोपे 'कृ + य' इत्यवस्थायां णित्वाद् 'अचो ञ्णिति' इति वृद्धौ 'कार्य' इत्यस्मात् सौ, विभक्तिकार्ये 'कार्यम्' इति रूपम्। एवमेव हर्तुं योग्यम् - हृ + ण्यत् = हार्यम्, धृ + ण्यत् = धार्यम्। मृज्-धातोः पूर्वसूत्रेण क्यबभावपक्षे तु अनेन ण्यति 'मृज् य' इत्यवस्थायाम्-

**चजोः कु घिण्ण्यतोः ७।३।९२॥**

**चजोः कुत्वं स्याद् घिति ण्यति च परे।**

घकारेत्संज्ञके प्रत्यये ण्यत्-प्रत्यये च परे सति चकारजकारयोः स्थाने कुत्वम् (कवर्गादेशः) भवति।

अनेन सूत्रेण जकारस्य कुत्वेन गकारे 'मृग् य' इति जाते-

**मृजेर्वृद्धिः ७।२।११४॥**

**मृजेरिको वृद्धिः सार्वधातुकार्धधातुकयोः।**

सार्वधातुके आर्धधातुके च प्रत्यये परे मृज्-धातोरिकः स्थाने वृद्धिर्भवति।

अनेन सूत्रेण ऋकारस्य वृद्धौ, रपरत्वे 'मार्ग् य' इति जाते स्वादिकार्ये- मार्ग्यः।

**भोज्यं भक्ष्ये ७।३।६९॥**

**भोग्यमन्यत्।**

भोक्ष्ये गम्ये (खाद्यपदार्थेऽर्थे) ण्यत्-प्रत्यये भुज्-धातोर्जकारस्य कुत्वाभावो निपातनाद् भवति।

'भोक्तुं योग्यम्' इत्यर्थे 'ऋहलोर्ण्यत्' इति ण्यति 'भुज् य' इत्यवस्थायाम् 'चजोः कु घिण्ण्यतोः' इति जकारस्य कुत्वे प्राप्ते अनेन सूत्रेण कुत्वाभावनिपातने, लघूपधगुणे, स्वादिकार्ये- भोज्यम्। भक्षणीयभिन्नेषु धनादिकेष्वर्थेषु तु सूत्रस्यास्याप्रवृत्तौ जकारस्य कुत्वे 'भोग्यम्' इति रूपं निष्पद्यते।

## अभ्यासः

### १. अधस्तनसूत्राणां शुद्धोच्चारणं विधाय तेषामर्थञ्च लिखत

(क) वासरूपोऽस्त्रियाम् (ख) कर्तरि कृत् (ग) कृत्याः

(घ) तयोरेव कृत्यक्तखलर्थाः (ङ) पोरदुपधात् (च) ईद्यति

### २. प्रश्नानामुत्तराणि देयानि

(क) हलन्ताद् धातोः केन सूत्रेण ण्यद् भवति ?

(ख) 'अचो यत्' इति सूत्रं किं करोति ?

(ग) कृत्यप्रत्ययाः के ?

(घ) कस्य कृत्संज्ञा भवति ?

(ङ) कृत्यप्रत्ययाः कस्मिन्नर्थे भवन्ति ?

(च) 'तव्यत्त०' इति सूत्रं पूरयत ।

(छ) 'लभ्यम्' इत्यत्र यद्विधायकं सूत्रं किम् ?

(ज) 'चजोः कु घिण्ण्यतोः' इति सूत्रं किं करोति ?

(झ) 'स्तुत्यः' इत्यत्र तुग्विधायकं सूत्रं किम् ?

(ञ) हर्तुं योग्यमित्यर्थे ण्यति प्रत्यये पुंसि किं रूपं निष्पद्यते ?

### ३. अधस्तनप्रयोगाणामर्थानुरूपं विग्रहं प्रदर्श्य प्रकृतिप्रत्ययौ च पृथक् कुरुत

ग्लेयम्, भवितव्यम्, शयनीयम्, दातव्यम्, हार्यम्, जेयम्, कार्यः, चेयः, चेतव्यः, भिदेलिमाः, कार्यम्, वक्तव्यम्, भव्यम्, क्रेयम्, श्रवणीयम्, एधनीयम्, शप्यम्, जुष्यः, आदृत्यः, भोग्यम् ।

### ४. प्रत्ययान् संयोज्य निष्पन्नरूपाणि लिखत

भू + अनीयर्, हृ + ण्यत्, लभ् + ण्यत्, कृ + तव्यत्, पा + अनीयर्, दा + यत्, चि + अनीयर्, श्रु + तव्य, पच् + ण्यत्, भिद् + केलिमर्, पठ् + तव्यत्, वच् + ण्यत्, जि + यत्, ग्लै + यत्, लिख् + अनीयर्, इण् + क्यप् ।

### ५. अधो लिखितानि पदानि प्रयुज्य वाक्यानि रचयत

श्रव्यम्, चेतव्यम्, गन्तव्यम्, करणीयः, हार्यम्, कर्तव्यः, भवनीयम्, शप्यम्, पठितव्याः, पठनीयम्, शयितव्यम्, पचेलिमाः, जेतव्यम्, दातव्यः, पातव्यम्, हरणीयः, मार्ग्यः ।

### ६. कर्तुं योग्यमित्यर्थे कृ-धातोर्ण्यति प्रत्यये जायमानस्य प्रातिपदिकस्य त्रिषु लिङ्गेषु सर्वासु विभक्तिषु रूपाणि लिखत ।

**७.** **पठितव्य-शब्दस्य स्त्रियां पुंसि च रूपाणि लिखत ।**

**८.** **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

चेयम्, कार्यम्, भवितव्यम्, पचेलिमाः, लभ्यम्, ग्लेयम्, एधनीयम्, कर्तव्यम्, चयनीयः, भोज्यम्, वृत्यः ।

**९.** **समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) ऋवर्णान्ताद्धातोः ...................... भवति । (यत्, ण्यत्)

(ख) 'कृदतिङ्' इति ................. कृत्संज्ञा भवति । (तिङ्प्रत्ययानां, तिङ्भिन्नप्रत्ययानां)

(ग) कृत्यप्रत्ययः ................. भवति । (कर्तरि कर्मणि च, कर्मणि भावे च, कर्तरि भावे च)

(घ) ................. स्वकार्यं सम्यक् कर्तव्यम् । (अस्माभिः, वयम्)

(ङ) अयं पाठः ................... । (पठनीयः, पठनीयम्)

**१०.** **कृत्यप्रत्ययान्तानि पदानि प्रयुज्य एकमनुच्छेदं विलिख्य कक्षायां श्रावयत ।**

**११.** **समुचितं विशेष्यपदं योजयित्वा वाक्यानि रचयत**

| | | | |
|---|---|---|---|
| कर्तव्यानि | ................... | चेतव्यम् | ................... |
| चेतव्यौ | ................... | चेतव्येन | ................... |
| चेतव्या | ................... | चेतव्यः | ................... |
| जेयम् | ................... | पठनीयाः | ................... |

# कृदन्तप्रकरणे

## पूर्वकृदन्तः

**ण्वुल्तृचौ ३ । १ । १३३ ॥**

**धातोरेतौ स्तः । कर्तरि कृदिति कर्त्रर्थे ।**

धातोः ण्वुल्-तृचौ प्रत्ययौ भवतः । एतौ प्रत्ययौ "कर्तरि कृत्" इति सूत्रेण कर्तरि अर्थे भवतः । ण्वुल्प्रत्ययस्य णकारलकारौ इतौ स्तः । तृच्प्रत्ययस्य च चकार इत् ।

**युवोरनाकौ ७ । १ । १ ॥**

**यु वु एतयोरनाकौ स्तः । कारकः । कर्ता ॥**

'यु' इत्यस्य स्थाने 'अन' इति, 'वु' इत्यस्य स्थाने 'अक' इत्यादेशौ भवतः ।

'करोति' इत्यर्थे कृधातोः "ण्वुल्तृचौ" इति सूत्रेण कर्त्रर्थे ण्वुल्प्रत्ययेऽनुबन्धलोपे 'कृ + वु' इति जाते प्रकृतसूत्रेण 'वु' इत्यस्य स्थाने अकादेशे 'कृ अक' इत्यवस्थायां स्थानिवद्भावेन णित्वाद् "अचो ञ्णिति" इति ऋकारस्य वृद्धौ, रपरत्वे 'कारक' इति जाते कृदन्तत्वात् "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां सौ प्रत्ययेऽनुबन्धलोपे, सकारस्य रुत्वे, विसर्गे च 'कारकः' इति सिद्ध्यति । 'करोति' इत्यर्थे कृधातोरनेनैव सूत्रेण कर्त्रर्थे तृच्प्रत्ययेऽनुबन्धलोपे 'कृ + तृ' इत्यवस्थायामार्धधातुकत्वात् "सार्वधातुकार्धधातुकयोः" इति गुणे, रपरत्वे 'कर्तृ' इति जाते, प्रातिपदिकसंज्ञायां सौ, विभक्तिकार्ये 'कर्ता' इति सिद्ध्यति । एवमेव भूधातोर्ण्वुलि- भावकः, तृचि- भविता । जि- जायकः, जेता । श्रु- श्रावकः, श्रोता । आकारान्तधातुषु "आतो युक् चिण्कृतोः" इति 'युक्' इत्यागमो बोध्यः । पा- पायकः, पाता । दा- दायकः, दाता । इत्यादि ।

**नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ३ । १ । १३४ ॥**

**नन्द्यादेर्ल्यु, ग्रह्यादेर्णिनि, पचादेरच् स्यात् । नन्दयतीति नन्दनः । जनमर्दयतीति जनार्दनः । लवणः । ग्राही । स्थायी । मन्त्री । पचादिराकृतिगणः ।**

'ल्यु' इत्यस्य लकारस्येत्वाद् 'यु' इति शिष्यते, 'णिनि' इत्यस्य इकारणकारयोरित्वाद् 'इन्' इति शिष्यते, 'अच्' इत्यस्य चकारस्येत्वाद् 'अ' इति अवशिष्यते। एते प्रत्ययाः 'कर्तरि कृदि'ति कर्त्रर्थे भवन्ति।

'नन्दयति' इत्यर्थे णिजन्ताद् नन्दिधातोः प्रकृतसूत्रेण कर्तरि ल्युप्रत्यये, लकारस्य "लशक्वतद्धिते" इतीत्संज्ञायां लोपे 'नन्दि यु' इति जाते "युवोरनाकौ" इति योरनादेशे 'नन्दि अन' इति जाते "णेरनिटि" इति णिलोपे 'नन्दन' इत्यस्य कृदन्तत्वात् प्रातिपदिकत्वे, स्वादिकार्ये 'नन्दनः' इति सिद्ध्यति। 'जनमर्दयति' इत्यर्थे 'जन + ङस्' इत्युपपदाद् अर्दिधातोः कर्तरि ल्युप्रत्यये, योरनादेशे, णिलोपे 'जन ङस् अर्दन' इत्यवस्थायां समासे, समासत्वात् प्रातिपदिकत्वेन सुपो लुकि 'जन अर्दन' इति जाते सवर्णदीर्घे, स्वादिकार्ये 'जनार्दनः' इति। एवमेव 'लुनाति' इत्यर्थे लूधातोर्ल्युप्रत्यये, योरनादेशे, नन्द्यादिगणपाठे णत्वनिपातनान्नकारस्य णत्वे, स्वादिकार्ये 'लवणः' इति।

'गृह्णाति' इत्यर्थे ग्रह्धातोः प्रकृतसूत्रेण णिनिप्रत्ययेऽनुबन्धलोपे 'ग्रह् इन्' इति जाते णित्वाद् "अत उपधायाः" इत्युपधावृद्धौ 'ग्राहिन्' इत्यस्मात् सौ 'ग्राही' इति। 'तिष्ठति' इत्यर्थे स्थाधातोर्णिनिप्रत्यये 'स्था इन्' इत्यवस्थायाम् "आतो युक् चिण्कृतोः" इति युगागमे 'स्थायिन्' इत्यस्मात् सौ 'स्थायी' इति। एवं 'मन्त्रयति' इत्यर्थे ण्यन्ताद् मन्त्रिधातोर्णिनिप्रत्यये, णिलोपे, पूर्ववत् 'मन्त्री' इति सिद्ध्यति।

'पचति' इत्यर्थे पच्-धातोः प्रकृतसूत्रेण अच्प्रत्ययेऽनुबन्धलोपे 'पच' इति जाते, स्वादिकार्ये 'पचः' इति।

**इगुपधज्ञाप्रीकिरः कः ३।१।१३५॥**

**एभ्यः कः स्यात्। बुधः। कृशः। ज्ञः। प्रियः। किरः॥**

इगुपधेभ्यः धातुभ्यः, ज्ञा-प्री-कृधातुभ्यश्च क-प्रत्ययो भवति। कप्रत्ययस्य ककार इत्।

'बुध्यते' इत्यर्थे बुध्-धातोः प्रकृतसूत्रेण कप्रत्ययेऽनुबन्धलोपे 'बुध् अ' इति जाते, कित्वाद् गुणनिषेधे, स्वादिकार्ये 'बुधः' इति सिद्ध्यति। एवमेव 'कृश्यति' इत्यर्थे कृश्-धातोः कप्रत्यये - कृशः। 'जानाति' इत्यर्थे ज्ञाधातोः कप्रत्यये 'ज्ञा अ' इत्यवस्थायाम् "आतो लोप इटि च" इति आलोपे 'ज्ञ' इत्यस्मात् सौ 'ज्ञः' इति। 'प्रीणाति' इत्यर्थे प्रीधातोः कप्रत्यये, गुणनिषेधे 'प्री अ' इत्यवस्थायाम् इयङादेशे, स्वादिकार्ये 'प्रियः' इति सिद्ध्यति। किरतीत्यर्थे कृधातोः कप्रत्यये 'कृ अ' इत्यवस्थायाम् "ॠत इद्धातोः" इति ॠकारस्य इत्वे, रपरत्वे 'किर' इति जाते, स्वादिकार्ये 'किरः' इति सिद्ध्यति।

**आतश्चोपसर्गे ३।१।१३६॥**

**प्रज्ञः। सुग्लः।**

उपसर्गपूर्वाद् आकारान्ताद्धातोः कप्रत्ययो भवति।

प्रकर्षेण जानातीत्यर्थे प्र-पूर्वकाद् ज्ञाधातोः प्रकृतसूत्रेण क-प्रत्ययेऽनुबन्धलोपे 'प्रज्ञा अ' इत्यवस्थायाम् "आतो लोप इटि च" इत्याकारलोपे 'प्रज्ञ' इत्यस्मात् सौ, विभक्तिकार्ये 'प्रज्ञः' इति रूपं सिद्धम्। एवं प्रकारेण 'सुष्ठु ग्लायति' इत्यर्थे सु-पूर्वकाद् ग्ला(ग्लै)धातोः क-प्रत्यये पूर्ववत् 'सुग्लः' इति।

**पाघ्राध्माधेट्दृशः शः ३ । १ । १३७ ॥**

**एभ्यः शः स्यात् । पिबः । जिघ्रः । धमः । धयः । पश्यः ।**

पा-घ्रा-ध्मा-धेट्-दृश्धातुभ्यः परे कर्तरि शप्रत्ययो भवति ।

पिबतीत्यर्थे पा पाने इत्यस्माद्धातोरनेन सूत्रेण श-प्रत्ययेऽनुबन्धलोपे तस्य शित्वेन सार्वधातुकत्वात् 'पाघ्राध्मास्था...' इत्यादिना सूत्रेण पिबादेशे 'कर्तरि शप्' इति शपि 'पिब अ अ' इति जाते 'अतो गुणे' इति पररूपे, पुनः पररूपे, स्वादिकार्ये 'पिबः' इति रूपम् । एवमेव घ्राधातोः जिघ्रादेशे, जिघ्रतीति जिघ्रः । ध्माधातोः धमादेशे, धमतीति धमः । धे(ट्)धातोः धयतीति धयः । दृश्धातोः पश्यादेशे, पश्यतीति पश्यः ।

**गेहे कः ३ । १ । १४४ ॥**

**गेहे कर्तरि ग्रहेः कः स्यात् । गृहम् ॥**

'गृह्णाति धान्यादिकम्' इति विग्रहे ग्रह्-धातोः प्रकृतसूत्रेण कप्रत्यये तस्य कित्वाद् "ग्रहिज्या०" इति संप्रसारणे 'गृह' इति जाते, स्वादिकार्ये 'गृहम्' इति रूपं सिद्ध्यति ।

**तत्रोपपदं सप्तमीस्थम् ३ । १ । ९२ ॥**

**सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं यत् कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यात् ।**

प्रत्ययविधायकसूत्रे सप्तम्यन्तेन निर्दिष्टस्य कर्मादिवाचकपदस्य उपपदसंज्ञा भवति ।

**कर्मण्यण् ३ । २ । १ ॥**

**कर्मण्युपपदे धातोरण् प्रत्ययः स्यात् । कुम्भं करोतीति कुम्भकारः ॥**

निर्वर्त्यम्, विकार्यम्, प्राप्यं चेति त्रिविधं कर्म, सर्वत्र कर्मणि उपपदे सति धातोः कर्त्रर्थे अण्-प्रत्ययो भवति । "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः" इति सुबुत्पत्तेः प्रागेव समासो भवति ।

'कुम्भं करोती'ति विग्रहे कर्मबोधकात् 'कुम्भ + ङस्' इति सुबन्तोपपदात् कृ-धातोः प्रकृतसूत्रेण अण्-प्रत्ययेऽनुबन्धलोपे 'कुम्भ ङस् कृ अ' इति जाते, णित्वात् 'कृ' इत्यस्य ऋकारस्य "अचो ञ्णिति" इति वृद्धौ, रपरत्वे 'कुम्भ ङस् कार' इत्यवस्थायां "गतिकारक०" इति परिभाषया "उपपदमतिङ्" इति सुबुत्पत्तेः प्रागेव समासे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि 'कुम्भकार' इति जाते स्वादिकार्ये 'कुम्भकारः' इति सिद्ध्यति ।

**आतोऽनुपसर्गे कः ३ । २ । ३ ॥**

**आदन्ताद्धातोरनुपसर्गात्कर्मण्युपपदे कः स्यात् । अणोऽपवादः । "आतो लोप इटि च" । गोदः । धनदः । कम्बलदः । अनुपसर्गे किम् ? गोसन्दायः ।**

उपसर्गहीनेभ्य आकारान्तेभ्यो धातुभ्यः कर्मणि उपपदे क-प्रत्ययो भवति । "कर्मण्यण्" इत्यनेन प्राप्तमणं बाधित्वाऽनेन सूत्रेण क-प्रत्ययो विधीयते ।

गां ददातीत्यर्थे कर्मबोधकाद् 'गो ङस्' इत्युपपदाद् दाधातोः प्राप्तमणं प्रबाध्य प्रकृतसूत्रेण क-प्रत्यये, 'गो ङस् दा अ' इति जाते 'आतो लोप इटि च' इति आकारलोपे, वर्णयोगे 'गो ङस् द' इत्यवस्थायाम् उपपदसमासे, सुब्लुकि, स्वादिकार्ये 'गोदः' इति सिद्ध्यति। एवमेव धनं ददातीति धनदः। कम्बलं ददातीति कम्बलद इत्यादयः।

उपसर्गे तु - गां सन्ददातीति विग्रहे 'गो ङस्' इत्युपपदात् समुपसर्गपूर्वकाद् दाधातोः "कर्मण्यण्" इति अणि, "आतो युक् चिण्कृतोः" इति युगागमे, समासादिकार्ये 'गोसन्दायः' इति।

**वा. मूलविभुजादिभ्यः कः। मूलानि विभुजतीति मूलविभुजो रथः। आकृतिगणोऽयम्। महीध्रः। कुध्रः॥**

मूलविभुजादिगणपठितशब्दसिद्धये क-प्रत्ययो भवति।

मूलानि विभुजतीति विग्रहे 'मूल आम्' इति कर्मबोधकोपपदाद् विपूर्वकाद् भुज्-धातोः प्राप्तमणं बाधित्वा अनेन वार्तिकेन क-प्रत्यये, कित्वाद् लघूपधगुणनिषेधे, समासे, स्वादिकार्ये- मूलविभुजः। एवमेव महीं धरतीति- महीध्रः। कुम् = पृथ्वीं धरतीति- कुध्रः।

**सुपिस्थः ३। ३। ४।॥**

**कः स्यात्। समस्थः। विषमस्थः। सुपीति योगविभागादन्यस्मादपि। द्वाभ्यां पिबतीति द्विपः।**

'सुपि' इति योगो विभज्यते। योगविभागात् सूत्रस्यास्य द्वौ अर्थौ क्रियेते। सुपि उपपदे आकारान्तेभ्यो धातुभ्यः क-प्रत्ययो भवति। द्वाभ्याम् (मुखेन, शुण्डादण्डेन च) पिबतीति विग्रहे 'द्वि भ्याम्' इत्युपपदात् पा-धातोरनेन सूत्रेण क-प्रत्यये, आकारलोपे, समासे, स्वादिकार्ये- द्विपः। ततः - स्थः, सुपि उपपदे स्था-धातोः कप्रत्ययो भवति। समे तिष्ठतीति विग्रहे 'सम ङि' इत्युपपदात् स्था-धातोः क-प्रत्यये, आकारलोपे, समासे, स्वादिकार्ये- समस्थः। एवं विषमे तिष्ठतीति विग्रहे- विषमस्थः। स्था-धातोराकारान्तत्वात् पूर्वेणैव प्रत्यये सिद्धे सूत्रारम्भसामर्थ्यात् स्था-धातोर्भावेऽपि प्रत्यय इत्यर्थः।

**हरतेरनुद्यमनेऽच् ३। २। ९॥**

**अंशहरः। अनुद्यमने किम्? भारहारः।**

उद्यमनम् = उद्ग्रहणम्, उत्थापनम्, उत्क्षेपणम्। अनुद्यमने विद्यमानात् कर्मणि उपपदे हृ(ञ्)-धातोः अच्-प्रत्ययो भवति। अंशं हरतीति विग्रहे 'अंश ङस्' इत्युपपदात् हृ-धातोः प्राप्तमणं बाधित्वा अनेन अच्-प्रत्ययेऽनुबन्धलोपे, आर्धधातुकसंज्ञायाम् ऋकारस्य गुणे, रपरत्वे, उपपदसमासे, स्वादिकार्ये- अंशहरः। अंशहर इत्यस्य अंशस्य स्वीकर्ता (भागस्य अदाता) इत्यर्थः। भारं हरतीति विग्रहे तु उद्यमनत्वाद् अनेन अप्राप्तौ 'कर्मण्यण्' इति अणि, णित्वाद् ऋकारस्य वृद्धौ, रपरत्वे पूर्ववत्- भारहारः।

**स्तम्बकर्णयो रमिजपोः ३। २। १३॥**

स्तम्ब-पूर्वकाद् रम्-धातोः, कर्णपूर्वकाद् जप्-धातोश्च अच्-प्रत्ययो भवति।

**वा. हस्तिसूचकयोरिति वक्तव्यम् । स्तम्बेरमः = हस्ती । कर्णेजपः = सूचकः ॥**

स्तम्ब-पूर्वकाद् रम्-धातोः, कर्णपूर्वकाद् जप्-धातोश्च हस्तिसूचकयोरर्थयोरेव अच्-प्रत्ययो भवति ।

'स्तम्बे = दर्भादितृणनिचये रमते = क्रीडति' इति विग्रहे 'स्तम्ब ङि' इत्युपपदाद् रम्-धातोरस्य वार्तिकस्य सहकारेण अनेन सूत्रेण हस्तिन्यर्थे द्योत्ये अच्-प्रत्यये, उपपदसमासे 'तत्पुरुषे कृति बहुलम्' इति सूत्रेण सप्तम्याः (ङिविभक्तेः) अलुकि, स्वादिकार्ये- स्तम्बेरमः । एवमेव कर्णे जपतीति विग्रहे- कर्णेजपः, सूचक इत्यर्थः ।

**अधिकरणे शेतेः ३ । २ । १५ ॥**

**खे शेते खशयः ।**

सुबन्तेऽधिकरणवाचिनि उपपदे शी(ङ्)-धातोरच्-प्रत्ययो भवति ।

'खे शेते' इति विग्रहे 'ख ङि' इत्यधिकरणवाच्युपपदात् शी-धातोः अच्-प्रत्यये, गुणेऽयादेशे, समासे, स्वादिकार्ये- खशयः ।

**चरेष्टः ३ । २ । १६ ॥**

**अधिकरणे उपपदे । कुरुचरः ॥**

अधिकरणे उपपदे चर्-धातोः ट-प्रत्ययो भवति । 'चुट्' इति टकारस्य इत् ।

'कुरुषु = कुरुनामकदेशे चरति = अटति' इति विग्रहे 'कुरु सुप्' इत्युपपदात् चर्-धातोरनेन सूत्रेण ट-प्रत्ययेऽनुबन्धलोपे, समासे, विभक्तिलोपे, स्वादिकार्ये- कुरुचरः । स्त्रियां टित्वात् 'टिड्ढाणञ्...' इति ङीपि- कुरुचरी ।

**एजेः खश् ३ । २ । २८ ॥**

**ण्यन्तादेजेः खश् स्यात् ॥**

ण्यन्ताद् एज्-धातोः खश्-प्रत्ययो भवति । खशः खकारशकारौ इतौ । शित्वात् शप् च ।

**अरुर्द्विषदजन्तस्य मुम् ६ । ३ । ६७ ॥**

**अरुषो द्विषतोऽजन्तस्य मुम् खिदन्ते न त्वव्ययस्य । शित्त्वाच्छबादि । जनमेजयतीति जनमेजयः ॥**

खिदन्ते उत्तरपदे सति अरुष्-शब्दस्य, द्विषत्-शब्दस्य, अजन्त-शब्दानां च 'मुम्' इत्यागमो भवति, अव्ययस्य तु मुमागमो न भवति । मुम उकारमकारौ अनुबन्धौ ।

'जनम् एजयति' इत्यर्थे 'जन ङस्' इत्युपपदाद् ण्यन्ताद् एजि-धातोः 'एजेः खश्' इति सूत्रेण खश्-प्रत्ययेऽनुबन्धलोपे, शित्वात् सार्वधातुकसंज्ञायां शपि 'जन ङस् एजि अ अ' इत्यवस्थायाम् इकारस्य गुणेऽयादेशे, पररूपे, समासादिकार्ये 'जन एजय' इति जाते अनेन सूत्रेण मुमागमेऽनुबन्धलोपे, स्वादिकार्ये- जनमेजयः ।

**नासिकास्तनयोर्ध्माधेटोः ३ । २ । २९ ॥**

**नासिका-स्तनयोः कर्मणोरुपपदयोः ध्मा-धेट्-धात्वोः खश्-प्रत्ययो भवति ।**

**वा. स्तने धेटो नासिकायां ध्मश्चेति वक्तव्यम् । स्तनं धयतीति स्तनन्धयः । धेटः टित्त्वात् स्तनन्धयी । नासिकन्धमः । नासिकन्धयः ॥**

स्तन-शब्दप्रकृतिके कर्मणि उपपदे धेट्-धातोः, नासिकाशब्दप्रकृतिके कर्मणि उपपदे तु ध्मा-धातोः धेट्-धातोश्च खश्-प्रत्ययो भवति ।

स्तनं धयतीति विग्रहे 'स्तन ङस्' इति कर्मबोधकोपपदाद् धे(ट्)-धातोराभ्यां सूत्रवार्तिकाभ्यां खश्-प्रत्ययेऽनुबन्धलोपे, शित्वात् सार्वधातुकत्वेन शपि 'स्तन ङस् धे अ अ' इति जाते अयादेशे, पररूपे, समासादिकार्ये 'स्तन धय' इति जाते 'अरुर्द्विषदजन्तस्य मुम्' इति मुमागमे, मस्यानुस्वारे, तस्य वैकल्पिकपरसवर्णे, स्वादिकार्ये- स्तनन्धयः । धेट्-धातोः टित्वात् स्त्रियां ङीपि- स्तनन्धयी । नासिकाशब्दे पूर्वपदे तु ध्मा-धेट्धात्वोः खश् । नासिकां धमतीति विग्रहे नासिकापूर्वकाद् ध्माधातोः खशि, शपि, ध्मा इत्यस्य धमादेशे 'नासिका ङस् धम अ अ' इति जाते समासे, विभक्तिलोपे, पररूपे, पुनः पररूपे 'नासिका धम' इति जाते 'खित्यनव्ययस्य' इत्यनेन आकारस्य ह्रस्वे 'नासिक धम' इत्यवस्थायां मुमागमे, मस्यानुस्वारपरसवर्णयोः, स्वादिकार्ये- नासिकन्धमः । एवमेव नासिकां धयतीति विग्रहे धे(ट्)-धातोः खशि तु- नासिकन्धयः ।

**प्रियवशे वदः खच् ३ । २ । ३८ ॥**

**प्रियंवदः । वशंवदः ॥**

प्रिये वशे च कर्मणि उपपदे वद्-धातोः खच्-प्रत्ययो भवति ।

प्रियं वदतीति विग्रहे 'प्रिय ङस्' इत्युपपदात् वद्-धातोरनेन सूत्रेण खच्-प्रत्ययेऽनुबन्धलोपे, समासादिकार्ये 'प्रिय वद' इत्यवस्थायां खित्वाद् मुमागमे, मस्यानुस्वारे, स्वादिकार्ये- प्रियंवदः । एवमेव 'वशं वदति' इति विग्रहे- वशंवदः ।

वा. विहायसो विह च, खच्च डिद्वा वाच्यः । विहङ्गमः । विहङ्गः ॥

विहायस्-शब्द आकाशवाची । विहायस्-शब्दे उपपदे गम्-धातोः खच्-प्रत्ययो भवति, विहायस्-शब्दस्य स्थाने 'विह' इत्यादेशश्च भवति, स खच्-प्रत्ययो विकल्पेन डित् च भवति । डित्वपक्षेऽभस्यापि टेर्लोपो बोध्यः ।

विहायसा गच्छतीति विग्रहे 'विहायस् टा' इत्युपपदाद् गम्-धातोरनेन वार्तिकेन खच्यनुबन्धलोपे, 'विहायस्' इत्यस्य विहादेशे, खचो वैकल्पिकडित्वे च 'विह टा गम् अ' इत्यवस्थायां डित्वादभस्यापि टिसंज्ञकस्य अम्भागस्य लोपे, समासादिकार्ये 'विह ग' इति जाते 'अरुर्द्विषदजन्तस्य मुम्' इति मुमागमे, मस्यानुस्वारे, तस्य वैकल्पिकपरसवर्णे, स्वादिकार्ये- विहङ्गः, डित्वाभावे 'विह टा गम् अ' इत्यवस्थायां

समासे, विभक्तिलोपे, मुमागमे, मस्यानुस्वारपरसवर्णयोः, स्वादिकार्ये- विहङ्गमः ।

**कुमारशीर्षयोर्णिनिः ३ । २ । ५१ ॥**

**कुमारघाती । शिरसः शीर्षभावो निपात्यते । शीर्षघाती ॥**

कुमार-शीर्षशब्दयोरुपपदयोर्हन्-धातोर्णिनि-प्रत्ययो भवति । 'णिनि' इत्यस्य णकारस्य अन्त्यस्य इकारस्य चेत्संज्ञायां लोपे 'इन्' इत्येवावशिष्यते ।

कुमारं हन्तीति विग्रहे 'कुमार ङस्' इत्युपपदाद् हन्-धातोरनेन सूत्रेण णिनि-प्रत्ययेऽनुबन्धलोपे 'कुमार ङस् हन् इन्' इति जाते णित्वाद् 'अत उपधायाः' इत्युपधावृद्धौ 'हो हन्तेर्ञ्णिन्नेषु' इति हकारस्य कुत्वेन घकारे 'हनस्तोऽचिण्णलोः' इत्यनेन नकारस्य तकारे 'कुमार ङस् घातिन्' इति जाते उपपदसमासे, सुपो लुकि 'कुमारघातिन्' इति जाते प्रातिपदिकसंज्ञायां सौ, विभक्तिकार्ये 'कुमारघाती' इति सिद्ध्यति । एवं शिरो हन्तीति विग्रहे पूर्ववत्प्रक्रियया 'शिरस् घातिन्' इत्यवस्थायां शिरस्-शब्दस्य स्थाने निपातनात् शीर्षादेशे- शीर्षघाती ।

**शक्तौ हस्तिकपाटयोः ३ । २ । ५४ ॥**

**हन्तेष्टक् । मनुष्यकर्तृकार्थमिदम् । हस्तिघ्नो ना । कपाटघ्नश्चोरः ॥**

शक्तौ गम्यमानायां हस्ति-कपाटयोः कर्मणोरुपपदयोर्हन्-धातोः टक्-प्रत्ययो भवति । टकारककारौ इतौ ।

हस्तिनं हन्तीति विग्रहे 'हस्तिन् ङस्' इति कर्मबोधकोपपदाद् हन्-धातोरनेन सूत्रेण टक्-प्रत्ययेऽनुबन्धलोपे 'हस्तिन् ङस् हन् अ' इति जाते कित्वाद् 'गमहन...' इत्युपधाया लोपे 'हो हन्तेर्ञ्णिन्नेषु' इति हस्य कुत्वे, उपपदसमासे, विभक्तिलोपे 'हस्तिन् घ्न' इति जाते प्रातिपदिकान्तस्य नकारस्य लोपे, 'ना' इत्यस्य विशेषणत्वात् पुंलिङ्गत्वे, स्वादिकार्ये 'हस्तिघ्नः' इति, हस्तिनं हन्तुं शक्त इत्यर्थः । स्त्रियां प्रयोगे तु टकः टित्वात् ङीपि- हस्तिघ्नी महिला इति । एवमेव कम् = शिरः पाटयति = प्रविशते इति कपाटम्, कपाटं हन्तीति- कपाटघ्नः । अत्र स्वबलेनैन हन्तुं या शक्तिः सा गृह्यते । शक्तौ अगम्यमानायां तु विषेण हस्तिनं हन्तीति- हस्तिघातः ।

**भजो ण्विः ३ । २ । ६२ ॥**

**सुप्युपसर्गे चोपपदे भजेर्ण्वि स्यात् । अंशभाक् । प्रभाक् ॥**

सुबन्ते उपसर्गे चोपपदे भज्-धातोर्ण्वि-प्रत्ययो भवति । ण्वि-प्रत्ययस्य सर्वापहारिलोपे किमपि नावशिष्यते ।

अंशं भजतीति विग्रहे 'अंश ङस् भज्' इत्यस्माद् अनेन सूत्रेण ण्वि-प्रत्यये प्रत्ययस्य सर्वापहारिलोपे, णित्वाद् 'अत उपधायाः' इति उपधावृद्धौ, उपपदसमासे, सुपो लुकि 'अंशभाज्' इति जाते, स्वादिकार्ये 'चोः कुः' इति जकारस्य कुत्वेने गकारे 'वाऽवसाने' इति गकारस्य वैकल्पिकचर्त्वेन ककारे- अंशभाक् । एवं प्रकर्षेण भजतीति- प्रभाक् ।

**अन्येभ्योऽपि दृश्यन्ते ३ । २ । ७५ ॥**

**मनिन् क्वनिप् वनिप् विच् एते प्रत्यया धातोः स्युः ॥**

अन्येभ्योऽपि आकारान्तभिन्नेभ्यो धातुभ्यो मनिन्, क्वनिप्, वनिप्, विच् इत्येते प्रत्यया भवन्ति। आकारान्तेभ्यो धातुभ्यः 'आतो मनिन्क्वनिब्वनिपश्च ३ । २ । ७४' इति सूत्रेण उक्तप्रत्यया विधीयन्ते। अतोऽत्र 'अन्येभ्यः' इति पदेन अनाकारान्तधातवो ग्राह्याः।

**नेड् वशि कृति ७ । २ । ८ ॥**

**वशादेः कृत इण्न । सुशर्मा । प्रातरित्वा ॥**

वश्-प्रत्याहारघटितवर्णादेः कृत्-प्रत्ययस्य इडागमो न भवति।

सुष्ठु शृणातीति विग्रहे सुपूर्वकात् शॄ हिंसायामिति धातोः पूर्वसूत्रेण मनिन्-प्रत्यये इकारनकारयोरनुबन्धलोपे 'सुशॄ मन्' इति जाते आर्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्वलादेः' इत्यनेन प्राप्तस्य इडागमस्य अनेन सूत्रेण निषेधे 'सार्वधातुकार्धधातुकयोः' इति ॠकारस्य गुणे, रपरत्वे 'सुशर्मन्' इति जाते, स्वादिकार्ये- सुशर्मा। 'प्रातः एति' इत्यर्थे प्रातर्-शब्दपूर्वकाद् इ(ण्)-धातोः पूर्वसूत्रेण क्वनिप्-प्रत्ययेऽनुबन्धलोपे 'प्रातर् इ वन्' इति जाते 'ह्रस्वस्य पिति कृति तुक्' इति तुगागमेऽनुबन्धलोपे, कित्वादन्तावयवत्वे, वर्णयोगे 'प्रातरित्वन्' इत्यस्य प्रातिपदिकत्वे, स्वादिकार्ये- प्रातरित्वा।

**विड्वनोरनुनासिकस्यात् ६ । ४ । ४१ ॥**

**अनुनासिकस्य आत् स्यात्। विजायत इति विजावा। ओणृ अपनयने। अवावा। रोट्। रेट्। सुगण् ॥**

विट्-प्रत्यये, वन्-प्रत्यये च परे सति अनुनासिकान्तस्य अङ्गस्य आकारान्तादेशो भवति।

'विजायते' इत्यर्थे विपूर्वकाद् जन्-धातोः 'अन्येभ्योऽपि दृश्यन्ते' इति वनिप्-प्रत्ययेऽनुबन्धलोपे 'विजन् वन्' इति जाते अनेन सूत्रेण आकारान्तादेशे 'विज आ वन्' इत्यवस्थायां सवर्णदीर्घे 'विजावन्' इत्यस्मात् प्रातिपदिकात् सौ- विजावा। अपनयार्थकस्य ओणृ-धातोः ॠकार इत्। ओणति = अपनयति - ओण् वनिप् (अन्येभ्योऽपि दृश्यते) - ओण् वन् - ओ आ वन् (विड्वनोरनुनासिकस्यात्) - अव् आ वन् (एचोऽयवायावः) - अवावन् - अवावा। रुष् रिष् हिंसायाम् इत्येताभ्यां धातुभ्याम् 'रोषति/रेषति' इत्यर्थयोः उक्तसूत्रेण विच्-प्रत्यये इकारचकारयोरित्संज्ञायां लोपे, अवशिष्टस्य वकारस्यापि 'वेरपृक्तस्य' इति लोपात् प्रत्ययस्य सर्वापहारिलोपे 'रुष्/रिष्' इत्यवस्थायां लघूपधगुणे, षकारस्य पदान्तजश्त्वेन डकारे, तस्यावसाने विद्यमानत्वाद् वैकल्पिकेन चर्त्वेन टकारे- रोट्/रेट्। एवं सुष्ठु गणयतीति विग्रहे सुपूर्वकाद् गण्-धातोर्विचि सर्वापहारिलोपे- सुगण्।

**क्विप् च ३ । २ । ७६ ॥**

**अयमपि दृश्यते। उखास्रत्। पर्णध्वत्। वाहभ्रट् ॥**

सोपपदेभ्यो निरुपपधेभ्यश्च सर्वधातुभ्यो वैदिकभाषायां लौकिकभाषायां च क्विप्-प्रत्ययो भवति । क्विप्-प्रत्ययस्यापि सर्वापहारिलोपो बोध्यः (वेरपृक्तस्य) ।

'उखायाः स्रंसते' इति विग्रहे 'उखा ङस् स्रंस्' इत्यस्माद् अनेन सूत्रेण क्विपि सर्वापहारिलोपे, उपपदसमासे 'उखास्रंस्' इत्यस्मात् सौ, हल्ङ्यादिलोपे, पदत्वे 'अनिदितां हल उपधायाः क्ङिति' इति नलोपे 'वसुस्रंसुध्वंस्वनडुहां दः' इति सकारस्य दत्वे, दस्य वैकल्पिके चर्त्वे- उखास्रत्। एवं पर्णाद् ध्वंसते- पर्णध्वत् । वाहाद् भ्रश्यतीत्यर्थे पूर्ववत् 'वाहभ्रश्' इत्यवस्थायाम् 'व्रश्चभ्रस्ज...' इति शकारस्य षत्वे, षस्य पदान्तजश्त्वेन डकारे, डस्य वैकल्पिकचर्त्वेन टकारे- वाहभ्रट् ।

**सुप्यजातौ णिनिस्ताच्छील्ये ३ । २ । ७८ ॥**

**अजात्यर्थे सुपि धातोर्णिनिस्ताच्छील्ये द्योत्ये । उष्णभोजी । शीतभोजी ॥**

ताच्छील्येऽर्थे गम्यमाने जात्यर्थभिन्ने सुबन्तोपपदे धातोर्णिनि-प्रत्ययो भवति ।

'उष्णं भुङ्क्ते तच्छीलः' इत्यर्थे 'उष्ण + ङस्' इत्युपपदाद् भुज्-धातोः प्रकृतसूत्रेण णिनिप्रत्ययेऽनुबन्धलोपे 'उष्ण ङस् भुज् इन्' इति जाते, लघूपधगुणे, समासादिकार्ये 'उष्णभोजिन्' इत्यस्मात् सौ 'उष्णभोजी' इति सिद्ध्यति । एवं शीतं भुङ्क्ते तच्छील इत्यर्थे- शीतभोजी ।

**मनः ३ । २ । ८२ ॥**

**सुपि मन्यतेर्णिनिः स्यात् । दर्शनीयमानी ॥**

सुबन्तोपपदे सति मन्-धातोर्णिनि-प्रत्ययो भवति ।

'दर्शनीयं मन्यते' इत्यर्थे 'दर्शनीय + ङस्' इत्युपपदाद् मन्-धातोः प्रकृतसूत्रेण णिनि-प्रत्यये, णित्वादुपधावृद्धौ पूर्ववत्प्रक्रियया- दर्शनीयमानिन् - दर्शनीयमानी ।

**आत्ममाने खश्च ३ । २ । ७७ ॥**

**स्वकर्मके मनने वर्तमानान्मन्यतेः सुपि खश् चाण्णिनिः । पण्डितमात्मानं मन्यते पण्डितम्मन्यः । मण्डितमानी ॥**

आत्मनः = स्वस्य मानः = मननम् इति आत्ममानः, तस्मिन्- आत्ममाने, स्वकर्मके मनने इत्यर्थः । सुपि उपपदे सति उक्तेऽर्थे वर्तमानात् श्यन्-विकरणाद् (दिवादिगणस्थात्) मन्-धातोः खश्-प्रत्ययः, णिनि-प्रत्ययश्च भवतः । खशः खकार-शकारौ इतौ । शित्वेन सार्वधातुकत्वात् श्यन्-विकरणः, खित्वाद् मुमागमश्च विधीयेते ।

आत्मानं पण्डितं मन्यते - पण्डित ङस् मन् खश् (अ) - पण्डित मन् अ - पण्डित मन् य अ (दिवादिभ्यः श्यन्) - पण्डित मन् य (अतो गुणे) - पण्डितम् मन्य (अरुर्द्विष...) - पण्डितं मन्य - पण्डितम्मन्य - पण्डितम्मन्यः । णिनि तु पूर्ववत्- पण्डितमानिन् - पण्डितमानी ।

**करणे यजः ३ । २ । ८५ ॥**

**करणे उपपदे भूतार्थे यजेर्णिनिः कर्तरि । सोमेनेष्टवान् सोमयाजी । अग्निष्टोमयाजी ॥**

'सोमेन इष्टवान्' इत्यर्थे 'सोम + टा' इति करणबोधकसुबन्तोपपदाद् यज्-धातोरनेन सूत्रेण णिनि-प्रत्यये 'सोम टा यज् इन्' इति जाते णित्वादुपधावृद्धौ, समासादिकार्ये 'सोमयाजिन्' इति प्रातिपदिकात् सौ 'सोमयाजी' इति सिद्ध्यति । एवमेव 'अग्निष्टोमेन इष्टवान्' इत्यर्थे 'अग्निष्टोम + टा + यज्' इत्यस्मान् णिनिप्रत्यये पूर्ववत्- अग्निष्टोमयाजी ।

**ब्रह्मभ्रूणवृत्रेषु क्विप् ३ । २ । ८७ ॥**

**ब्रह्महा । भ्रूणहा । वृत्रहा । क्विप् चेत्येव सिद्धे ब्रह्मादिष्वेव क्विबेवेति द्विविधनियमार्थमिदम् । एवमग्रेऽपि ॥**

ब्रह्म-भ्रूण-वृत्रशब्दप्रकृतिकेषु कर्मसु उपपदेषु सत्सु भूतार्थवृत्तेर्हन्-धातोः क्विप्-प्रत्ययो भवतीति सूत्रार्थः ।

ब्रह्मन् हतवान् - ब्रह्मन् ङस् हन् क्विप् - ब्रह्मन् हन् (प्रत्ययस्य सर्वापहारिलोपः, विभक्तिलोपः, उपपदसमासश्च) - ब्रह्महन् (न लोपः...) - ब्रह्महा, ब्रह्महणौ, ब्रह्महणः । एवं भ्रूणम् = गर्भं हतवान्- भ्रूणहा । वृत्रम् = असुरविशेषं हतवान्- वृत्रहा = इन्द्रः ।

'क्विप् च' इति सूत्रेण सर्वधातुभ्यः क्विप्-प्रत्यये सिद्धे अनेन सूत्रेण ब्रह्मादिषु हन्तेः (हन्-धातोः) क्विप्-वचनं नियमार्थम् । भाष्यकारमतेन द्विविधश्चाऽत्र नियम इष्यते- १. ब्रह्मादिषूपपदेष्वेव हन्तेः क्विप्-प्रत्ययो विधेयः, न तु अन्यस्मिन् उपपदे इति प्रथमो नियमः । तेन 'पुरुषं हतवान्' इत्यर्थे पुरुषशब्दोपपदाद् हन्-धातोः क्विप्-प्रत्ययो न भवति । २. ब्रह्मादिषूपपदेषु भूतार्थवृत्तेर्हन्-धातोः क्विप्-प्रत्यय एव भवति, न तु अन्यप्रत्ययः स्यादिति द्वितीयो नियमः । काशिकाकारमतेन तु चतुर्विधश्चात्र नियमः । तन्मते ब्रह्मादिषु हन्-धातोरेव क्विप्-प्रत्ययो भवति, न तु अन्यस्माद्धातोः स्यादिति तृतीयो नियमः । तेन 'ब्रह्म अधीतवान्' इत्यर्थे अधिपूर्वकाद् इ(ङ)-धातोर्न क्विप् । ब्रह्मादिषु हन्तेर्भूतकाले एव क्विप्, न अन्यस्मिन् काले इति चतुर्थो नियमः । तेन 'ब्राह्मणं हन्ति हनिष्यति वा' इत्यत्र न क्विप् ।

**दृशेः क्वनिप् ३ । २ । ९४ ॥**

**कर्मणि भूते । पारं दृष्टवान् पारदृश्वा ॥**

कर्मणि उपपदे सति दृश्-धातोः क्वनिप्-प्रत्ययो भवति । 'अन्येभ्योऽपि दृश्यन्ते' इत्यनेनैव क्वनिपि सिद्धे सूत्रेऽस्मिन् पुनर्वचनं प्रत्ययान्तरनिवृत्त्यर्थम् ।

पारं दृष्टवान् - पार ङस् दृश् क्वनिप् - पार दृश् वन् - पारदृश्वन् - पारदृश्वा ।

**सप्तम्यां जनेर्डः ३ । २ । ९७ ॥**

सप्तम्यन्ते उपपदे भूतार्थाद् जन्-धातोः ड-प्रत्ययो भवति । डित्वात् टेर्लोपो बोध्यः ।

**तत्पुरुषे कृति बहुलम् ६ । ३ । १४ ॥**

**ङेरलुक् । सरसिजम् । सरोजम् ॥**

कृदन्ते उपपदे तत्पुरुषसमासे बहुलं सप्तम्या अलुक् भवति ।

सरसि जातमिति विग्रहे 'सरस् ङि जन्' इत्यस्मात् पूर्वसूत्रेण ड-प्रत्ययेऽनुबन्धलोपे, 'सरस् ङि जन् अ' इति जाते डित्वविधानसामर्थ्यादभस्यापि टिसंज्ञकस्य अन्भागस्य लोपे, वर्णयोगे 'सरस् ङि ज' इति जाते उपपदसमासे, सुपो लुकि प्राप्ते, अनेन सूत्रेण सप्तम्या अलुकि, स्वादिकार्ये- सरसिजम् । बाहुलकात् पक्षे ङेर्लुकि 'सरस् ज' इत्यवस्थायां सकारस्य 'ससजुषो रुः' इति रुत्वे 'हशि च' इति रेफस्य उत्वे, गुणे, स्वादिकार्ये- सरोजम् ।

**क्तक्तवतू निष्ठा १ । १ । २६ ॥**

**एतौ निष्ठासंज्ञौ स्तः ॥**

क्त-क्तवतुप्रत्ययौ निष्ठासंज्ञकौ भवतः ।

**निष्ठा ३ । २ । १०२ ॥**

**भूतार्थवृत्तेर्धातोर्निष्ठा स्यात् । तत्र तयोरेवेति भावकर्मणोः क्तः । कर्तरि कृदिति कर्तरि क्तवतुः । उकावितौ । स्नातं मया । स्तुतस्त्वया विष्णुः । विश्वं कृतवान् विष्णुः ॥**

भूतेऽर्थे वर्तमानाद्धातोर्निष्ठासंज्ञकौ क्त-क्तवतुप्रत्ययौ भवतः । तत्र "तयोरेवकृत्यक्त-खलर्थाः" इति क्त-प्रत्ययः अकर्मकेभ्यो धातुभ्यः सामान्यतया भावे भवति, सकर्मकेभ्यस्तु कर्मणि भवति । क्त-प्रत्ययस्य ककार इत् । क्तवतु-प्रत्ययस्तु सर्वेभ्यो धातुभ्यः "कर्तरि कृत्" इति कर्तरि भवति । क्तवतु-प्रत्ययस्य उकारककारौ इतौ 'तवत्' इत्यवशिष्यते ।

स्नातं मया - 'अस्नायि' इति विग्रहे भूतेऽर्थे वर्तमानादकर्मकात् स्ना-धातोः प्रकृतसूत्रेण भावे क्त-प्रत्ययेऽनुबन्धलोपे 'स्ना त' इति जाते अनिट्त्वात् प्राप्तस्य इडागमस्य निषेधे 'स्नात' इति प्रातिपदिकात् सौ 'स्नातम्' इति सिद्ध्यति । भावे प्रत्ययविधानान् नपुंसकत्वम् । भावस्य अद्रव्यत्वरूपत्वेन द्वितीयादीनामप्रतीयमानत्वाद् औत्सर्गिकमेकवचनमेव । भावे प्रत्यये कर्तुरनुक्तत्वात् कर्तरि तृतीया । यथा- स्नातं त्वया मया अन्यैश्च ।

स्नातवान् - 'अस्नासीत्' इति विग्रहे स्नाधातोः प्रकृतसूत्रेण कर्तरि क्तवतु-प्रत्ययेऽनुबन्धलोपे, इण्निषेधे 'स्नातवत्' इति जाते प्रातिपदिकसंज्ञायां सौ "अत्वसन्तस्य चाधातोः" इत्युपधाया दीर्घे, उगिदचामिति नुमि, 'स्नातवान्त् स्' इत्यवस्थायाम् अपृक्तसंज्ञकस्य सकारस्य "हल्ङ्याभ्यो०" इति लोपे, संयोगान्तस्य तकारस्य "संयोगान्तस्य लोपः" इति लोपे 'स्नातवान्' इति सिद्ध्यति । स स्नातवान्, तौ स्नातवन्तौ, ते स्नातवन्तः । सा स्नातवती, ते स्नातवत्यौ, ताः स्नातवत्यः । तत् स्नातवत्, ते स्नातवती, तानि स्नातवन्ति ।

स्तुतस्त्वया विष्णुः - 'अस्तावि' इति विग्रहे भूतेऽर्थे वर्तमानात् सकर्मकात् स्तु-धातोः कर्मणि क्त-प्रत्ययेऽनुबन्धलोपे 'स्तु त' इति जाते, कित्वाद् गुणनिषेधे 'स्तुत' इति प्रातिपदिकात् सौ 'स्तुतः' इति। अस्य कर्मणि 'विष्णुः' इत्यत्र पुंलिङ्गस्य प्रथमैकवचनत्वाद् अत्रापि पुंलिङ्गस्य प्रथमैकवचनमेव। तस्य अनुक्तकर्तरि युष्मच्छब्दे च तृतीया- स्तुतस्त्वया विष्णुः। यदि कर्म 'देवी' इति भवेच्चेत् 'स्तुता देवी' इति। कर्मणि प्रत्ययं विधाय निष्पन्नधातुरूपाणां कर्मणा सहैव सामानाधिकरण्यं भवति। स्तुतौ विष्णू। स्तुताः विष्णवः। स्तुतेन विष्णुना। स्तुते देव्यौ। स्तुताः देव्यः। स्तुतां देवीम्। इत्यादि

विश्वं कृतवान् विष्णुः - 'अकार्षीत्' इति विग्रहे भूतेऽर्थे वर्तमानात् कृधातोः कर्तरि क्तवतु-प्रत्ययेऽनुबन्धलोपे 'कृ तवत्' इति जाते कित्वाद् गुणनिषेधे, स्वादिकार्ये 'कृतवान्' इति। 'विश्वं कृतवान् विष्णुः' अत्र कर्तरि प्रत्ययविधानाद् उक्ते कर्तरि प्रथमा, अनुक्ते कर्मणि च द्वितीया। कृतवान् हरिः, कृतवन्तौ हरिहरौ, कृतवन्तो हरिहरपितामहाः। कृतवती देवी। कृतवत्यै देव्यै। इत्यादि।

**अदो जग्धिर्ल्यप्ति किति २। ४। ३६॥**

**ल्यपि तादौ किति च। इकार उच्चारणार्थः। जग्धम्॥**

ल्यप्-प्रत्यये, तकारादौ किति प्रत्यये परे च अद्-धातोः स्थाने 'जग्ध्' इत्यादेशो भवति।

भक्षणार्थकाद् अद्-धातोः 'निष्ठा' इति क्त-प्रत्यये, अनेन सूत्रेण अदः जग्धादेशे 'जग्ध् त' इति जाते 'झषस्तथोर्धोऽधः' इति तकारस्य धत्वे 'जग्ध् ध' इति जाते 'झरो झरि सवर्णे' इति पूर्वधकारस्य वैकल्पिके लोपे- जग्ध - जग्धम्।

**निष्ठायामण्यदर्थे ६। ४। ६०॥**

**ण्यदर्थो भावकर्मणी, ततोऽन्यत्र निष्ठायां क्षियो दीर्घः स्यात्।**

भाव-कर्मभिन्नेऽर्थे विहिते निष्ठाप्रत्यये परे सति क्षि-धातोः इकारस्य दीर्घो भवति।

**क्षियो दीर्घात् ८। २। ४६॥**

**दीर्घात् क्षियो निष्ठातस्य नः। क्षीणवान्। भावकर्मणोस्तु- क्षितः कामो मया॥**

दीर्घान्तात् क्षि-धातोः परस्य निष्ठासंज्ञकप्रत्ययावयवीभूतस्य तकारस्य स्थाने नकारादेशो भवति।

'अक्षैषीत्' इत्यर्थे क्षि-धातोः 'निष्ठा' इति कर्तरि क्तवतु-प्रत्यये 'क्षि तवत्' इति जाते पूर्वसूत्रेण इकारस्य दीर्घे, अनेन सूत्रेण तकारस्य नत्वे 'क्षीनवत्' इति जाते 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति नस्य णत्वे, स्वादिकार्ये- क्षीणवान्। भावकर्मणोः क्तप्रत्यये तु पूर्वसूत्रेण दीर्घाभावेऽनेनापि नत्वाभावत्वात् पूर्ववत् 'क्षितः' इति रूपं ज्ञेयम्।

**रदाभ्यां निष्ठातो नः पूर्वस्य च दः ८। २। ४२॥**

**रदाभ्यां परस्य निष्ठातस्य नः स्यात्, निष्ठापेक्षया पूर्वस्य धातोर्दस्य च॥ शॄ हिंसायाम्। "ॠत इत्"। रपरः। णत्वम्। शीर्णः। भिन्नः। छिन्नः॥**

रेफ-दकाराभ्यामुत्तरस्य निष्ठासंज्ञकप्रत्ययावयवीभूतस्य तकारस्य स्थाने नकारादेशो भवति, पूर्वस्य दकारस्य स्थानेऽपि नकारादेशो भवति ।

शॄ-धातुर्हिंसायामर्थे वर्तते । (परस्मैपदी, अनिट्, सकर्मकः)

'अशारि' इति विग्रहे शॄ-धातोः "निष्ठा" इति कर्मणि क्त-प्रत्यये 'शॄ त' इति जाते "ॠत इद्धातोः" इतीत्वे रपरत्वे 'शिर् त' इति जाते 'हलि च' इति उपधादीर्घे 'शीर् त' इति जाते प्रकृतसूत्रेण तकारस्य नत्वे, नस्य णत्वे, स्वादिकार्ये 'शीर्णः' इति । क्तवतु-प्रत्यये- शीर्णवान् । एवम् 'अभेदि' इति विग्रहे भिद्-धातोः कर्मणि क्त-प्रत्यये, प्रकृतसूत्रेण प्रत्ययस्य तकारस्य धातोर्दकारस्य चोभयोर्नत्वे 'भिन्न' इति प्रातिपदिकात् सौ 'भिन्नः' इति । क्ततवतु-प्रत्यये- भिन्नवान् । एवमेव 'अच्छेदि' इति विग्रहे छिद्-धातोः छिन्नः, छिन्नवान् इति ।

**संयोगादेरातो धातोर्यण्वतः ८ । २ । ४३ ॥**

**निष्ठातस्य नः स्यात् । द्राणः । ग्लानः ॥**

संयोगादेर्यण्वत आकारान्ताद्धातोः परस्य निष्ठासम्बन्धिनस्तकारस्य स्थाने नकारादेशो भवति ।

'अद्रायि' इति विग्रहे द्रा-धातोः क्तप्रत्यये, प्रकृतसूत्रेण तकारस्य नत्वे, णत्वे, स्वादिकार्ये- द्राणः । एवं ग्ला(ग्लै)धातोः क्त-प्रत्यये, नत्वादिकार्ये- ग्लानः ।

**ल्वादिभ्यः ८ । २ । ४४ ॥**

**एकविंशतेर्लूञादिभ्यः प्राग्वत् । लूनः ॥ ज्या धातुः ॥ ग्रहिज्येति संप्रसारणम् ॥**

लूञादिभ्य एकविंशतेर्धातुभ्यः परस्य निष्ठासंज्ञकप्रत्ययस्य तकारस्य स्थाने नकारादेशो भवति ।

'अलावि' इत्यर्थे लू(ञ्)-धातोः कर्मणि क्त-प्रत्यये, प्रकृतसूत्रेण तस्य नत्वे, स्वादिकार्ये 'लूनः' इति । 'अज्यायि' इत्यर्थे ज्या-धातोः क्त-प्रत्यये, कित्वात् 'ग्रहिज्या...' इत्यादिना सूत्रेण संप्रसारणे, पूर्वरूपे 'जि त' इति जाते, प्रकृतसूत्रेण तकारस्य नत्वे 'जि न' इत्यवस्थायाम्-

**हलः ६ । ४ । २ ॥**

अङ्गावयवाद्धलः परं यत्संप्रसारणं तदन्तस्य दीर्घः । जीनः ।

अनेन सूत्रेण इकारस्य दीर्घे, स्वादिकार्ये 'जीनः' इति सिद्ध्यति ।

**ओदितश्च ८ । २ । ४५ ॥**

**भुजो, भुग्नः । टुओश्वि, उच्छूनः ॥**

ओदितो धातोः परस्य निष्ठासंज्ञकप्रत्ययस्य तकारस्य नकारादेशो भवति ।

'अभोजि' इत्यर्थे ओकारेतो भुज्-धातोः कर्मणि क्त-प्रत्यये, प्रकृतसूत्रेण तकारस्य नत्वे "चोः कुः" इति

जकारस्य कुत्वेन गकारे, स्वादिकार्ये 'भुग्नः' इति । एवमेव उदुपसर्गपूर्वकाद् ओदितः श्विधातोः क्त-प्रत्यये "श्वीदितो निष्ठायाम्" इति इडागमस्य निषेधे, वचिस्वपीति संप्रसारणे पूर्वरूपे 'उद् शु त' इति जाते "हलः" इति दीर्घे, प्रकृतसूत्रेण तकारस्य नत्वे 'उद् शू न' इति जाते दकारस्य श्चुत्वेन जकारे, जकारस्य 'खरि चे'ति चर्त्वेन चकारे, शकारस्य छत्वे 'उच्छून' इत्यस्मात् प्रातिपदिकात् सौ 'उच्छूनः' इति सिद्ध्यति ।

**शुषः कः ८ । २ । ५१ ॥**

**निष्ठातस्य कः । शुष्कः ॥**

शुष्-धातोः परस्य निष्ठाऽवयवस्य तकारस्य स्थाने ककारादेशो भवति ।

'अशोषि' इत्यर्थे शुष्-धातोः क्त-प्रत्यये, प्रकृतसूत्रेण तकारस्य ककारे, स्वादिकार्ये 'शुष्कः' इति ।

**पचो वः ८ । २ । ५२ ॥**

**पक्वः । क्षै क्षये ॥**

पच्-धातोः परस्य निष्ठाऽवयवस्य तकारस्य स्थाने वकारादेशो भवति ।

'अपाचि' इत्यर्थे पच्-धातोः क्त-प्रत्यये 'चोः कु'रिति चकारस्य कुत्वे, प्रकृतसूत्रेण तस्य वकारे, स्वादिकार्ये 'पक्वः' इति । क्षयेऽर्थे वर्तमानस्य क्षै-धातोरशित्प्रत्ययस्य विवक्षायाम् "आदेश उपदेशेऽशिति" इति आत्वे 'क्षा' इत्यस्माद्धातोः क्त-प्रत्यये 'क्षा त' इति जाते-

**क्षायो मः ८ । २ । ५३ ॥**

**क्षामः ॥**

क्षै-धातोः परस्य निष्ठासम्बन्धिनस्तकारस्य स्थाने मकारादेशो भवति ।

प्रकृतसूत्रेण तकारस्य मत्वे, स्वादिकार्ये 'क्षामः' इति सिद्ध्यति ।

**अनुपसर्गात्फुल्लक्षीवकृशोल्लाघाः ८ । २ । ५५ ॥**

एते निपात्यन्ते । ञिफला- फुल्लः । निष्ठातस्य लत्वं निपात्यते । क्तवत्वेकदेशस्यापीदं निपातनमिष्यते । फुल्लवान् ॥

फुल्ल, क्षीब, कृश, उल्लाघ इत्येते शब्दाः क्त-प्रत्ययान्तत्वेन निपात्यन्ते, यदि एते उपसर्गात् परा न भवन्ति चेदेव । 'फुल्लः' इति 'ञिफला (फल्) विशरणे' इत्यस्माद्धातोरुत्तरस्य निष्ठातकारस्य लकारादेशो निपात्यते, 'ति च ७ । ४ । ८९ ॥' इति उत्वम् 'आदितश्च ७ । २ । १६ ॥' इति इडभावश्च सिद्ध एव । क्तवतु-प्रत्ययान्तस्यापि इदं लत्वनिपातने- फुल्लवान् ।

**वा. आदिकर्मणि निष्ठा वक्तव्या ।**

दीर्घकालव्यासक्तायाः कटाद्युत्पादनक्रियाया आरम्भकालविशिष्टः अंशः आदिकर्म, तत्र विद्यमानाद् धातोर्निष्ठासंज्ञकप्रत्ययौ भवतः। यत्र दीर्घकालव्यापिनी क्रिया तत्राद्येषु क्रियाक्षणेषु भूतेष्वपि सर्वस्याः क्रियाया भूतत्वाऽभावाद् भूते विहिता निष्ठा न प्राप्नोति।

**आदिकर्मणि क्तः कर्तरि च ३।४।७१॥**

**आदिकर्मणि यः क्तः स कर्तरि स्यात् चाद्भावकर्मणोः॥**

आदिभूतः क्रियाक्षण आदिकर्म, तस्मिन् आदिकर्मणि। आदिकर्मणि भूतत्वेन विवक्षिते यः क्त-प्रत्ययो विहितः स कर्तरि भवति, सूत्रे चकारग्रहणाद् यथाप्राप्तं भावे कर्मणि च क्त-प्रत्ययो भवति।

**विभाषा भावादिकर्मणोः ७।२।१७॥**

**आदितो निष्ठाया इड् वा। प्रस्वेदितश्चैत्रः। प्रस्वेदितं तेन॥**

आकार इत् यस्य = आदित्, तस्मात्- आदितः। भावे, आदिकर्मणि च आदितो निष्ठाया इड् वा भवति।

प्र-पूर्वकाद् भ्वादिगणस्थाद् ञिस्विदा (स्विद्) इति आदितो धातोः क्त-प्रत्यये- प्रस्विद् त, आदिकर्मणि गम्यमाने अनेन सूत्रेण विकल्पेन इटि, सेट्त्वात् कित्वनिषेधेन लघूपधगुणे- प्रस्वेदित - प्रस्वेदितः चैत्रः = चैत्रकर्तृका आरभ्यमाणप्रस्वेदनक्रिया इत्यर्थः। अनेन इडभावपक्षे कित्वनिषेधाभावाद् न गुणे 'छिन्नः' इतिवत्- प्रस्विन्नः। भावे तु- प्रस्वेदितं तेन/प्रस्विन्नं तेन इति।

**उदुपधाद्भावादिकर्मणोरन्यतरस्याम् १।२।२१॥**

**उदुपधात्परा भावादिकर्मणोः सेण्निष्ठा वा किन्न। द्युतितम्। द्योतितम्। मुदितम्। मोदितं साधुना। प्रद्योतितः। प्रद्युदितः। प्रमुदितः। प्रमोदितः साधुः॥**

उकार उपधायां यस्येति उदुपधः। उदुपधाद् धातोः परो भावे आदिकर्मणि च वर्तमानः सेट् निष्ठाप्रत्ययः विकल्पेन न कित् भवति।

'अद्योति' इत्यर्थे द्युत्-धातोः क्तप्रत्यये, इडागमे, अनेन सूत्रेण कित्वनिषेधपक्षे लघूपधगुणे, स्वादिकार्ये- द्योतितम्, कित्वपक्षे तु लघूपधगुणनिषेधे- द्युतितम् इति रूपद्वयम्। एवमेव अमोदीत्यर्थे मुद् + क्त = मोदितम्/मुदितम्।

**निष्ठायां सेटि ६।४।५२॥**

**णेर्लोपः। भावितः। भावितवान्॥**

निष्ठासंज्ञके सेट्प्रत्यये परे 'णि' इत्यस्य लोपो भवति।

ण्यन्ताद् भाविधातोः क्त-प्रत्यये, इडागमे 'भावि इत' इत्यवस्थायां प्रकृतसूत्रेण णेर्लोपे 'भावित' इति जाते, स्वादिकार्ये 'भावितः' इति। क्तवतु-प्रत्यये पूर्ववत्- भावितवान्।

**दधातेर्हिः ७ । ४ । ४२ ॥**

**तादौ किति । हितम् ॥**

तकारादौ कित्प्रत्यये परे धा-धातोः स्थाने 'हि' इत्यादेशो भवति ।

'अधायि' इत्यर्थे धा-धातोः क्त-प्रत्यये 'धा त' इति जाते प्रकृतसूत्रेण 'धा' इत्यस्य स्थाने ह्यादेशे 'हित' इत्यस्मात् प्रातिपदिकात् सौ, नपुंसकत्वादमि 'हितम्' इति सिद्धयति । क्तवतु-प्रत्यये- हितवान् ।

**दो दद्घोः ७ । ४ । ४६ ॥**

**घुसंज्ञस्य दा इत्यस्य दथ् तादौ किति । चर्त्वम् । दत्तः ॥**

तकारादौ कित्-प्रत्यये परतः घुसंज्ञकस्य दा-धातोः स्थाने 'दथ्' इत्यादेशो भवति ।

'अदायि' इत्यर्थे दा-धातोः क्त-प्रत्यये, इण्निषेधे, अनेन सूत्रेण 'दा' इत्यस्य स्थाने 'दथ्' इत्यादेशे 'दथ् त' इति जाते 'खरि च' इति चर्त्वे, स्वादिकार्ये- दत्तः । क्तवतुप्रत्यये- दत्तवान् ।

**गत्यर्थाकर्मक-श्लिष-शीङ्-स्थाऽऽस-वस-जन-रुह-जीर्यतिभ्यश्च ३ । ४ । ७२ ॥**

**एभ्यः कर्तरि क्तः स्याद् भावकर्मणोश्च । गङ्गां प्राप्तः । ग्लानः । लक्ष्मीमाश्लिष्टो हरिः । शेषमधिशयितः ॥**

गत्यर्थक-धातुभ्यः, अकर्मक-धातुभ्यः, श्लिष्, शी(ङ्), स्था, आस्, वस्, जन्, रुह्, जॄ इत्येतेभ्यो धातुभ्यश्च कर्तरि अर्थे क्त-प्रत्ययो भवति, सूत्रे चकारग्रहणाद् यथाप्राप्तं भावकर्मणोश्च क्त-प्रत्ययो भवति ।

गत्यर्थकात्- 'गङ्गां प्रापत्' इत्यर्थे प्र-पूर्वकाद् आप्-धातोरनेन सूत्रेण कर्तरि क्त-प्रत्यये पूर्ववत्- प्राप्तः । 'देवदत्तो गङ्गां प्राप्तः' इति प्रयोगः । यथाप्राप्तं कर्मणि क्त-प्रत्यये तु 'देवदत्तेन गङ्गा प्राप्ता' इति । एवं ग्रामं गतः/ग्रामो गतः इत्यादि । अकर्मकात्- कर्तरि- अग्लासीत् - ग्लै क्त - ग्लै त - ग्ला त - ग्लान - ग्लानः । स ग्लानः । कर्मणि- अग्लायि - ग्लानम् । तेन ग्लानम् । श्लिष्-धातोः- 'हरिः लक्ष्मीम् आश्लिष्टः' इत्यत्र आ(ङ्)-पूर्वकात् श्लिष्-धातोरनेन सूत्रेण कर्तरि क्त-प्रत्यये, तकारस्य ष्टुत्वे- आश्लिष्टः । कर्मणि प्रत्यये- हरिणा लक्ष्मीः आश्लिष्टा । एवम् अधि-पूर्वकात् शी(ङ्)-धातोः कर्तरि क्त-प्रत्यये- अधिशयितः । कर्तरि प्रत्ययविधानाद् अनुक्तकर्मणि द्वितीया- हरिः शेषम् अधिशयितः । कर्मणि प्रत्यये तु- हरिणा शेषोऽधिशयितः । शीङ्-धातोरकर्मकत्वेऽपि अध्युपसर्गवशात् सकर्मकत्वं बोध्यम् । स्था-धातोः-

**द्यति-स्यति-मा-स्थामित्ति किति ७ । ४ । ४० ॥**

**एषामित्स्यात्तादौ किति । वैकुण्ठमधिष्ठितः । शिवमुपासितः । हरिदिनमुपोषितः । राममनुजातः । गरुडमारूढः । विश्वमनुजीर्णः । पक्षे प्राप्ता गङ्गा तेनेत्यादि ॥**

तकारादौ किति प्रत्यये परे सति दो, सो, मा, स्था इत्येतेषां धातूनाम् इकारान्तादेशो भवति ।

कर्तरि- अध्यस्थात् - अधिस्था क्त (गत्यर्थाकर्मक...) - अधिस्था त - अधिस्थि त (द्यतिस्यति...) - अधिष्थित (आदेशप्रत्यययोः) - अधिष्ठित (ष्टुना ष्टुः) - अधिष्ठितः। वैकुण्ठमधिष्ठितः। कर्मणि प्रत्यये- वैकुण्ठोऽधिष्ठितः। एवमेव शिवमुपासितः/शिव उपासितः (उप आस् क्त)। हरिदिनमुपोषितः/हरिदिन उपोषितः (उप वस् क्त)। राममनुजातः/रामोऽनुजातः (अनु जन् क्त)। गरुडमारूढः/गुरुड आरूढः (आ रुह् क्त)। विश्वमनुजीर्णः/विश्वोऽनुजीर्णः (अनु जॄ क्त)। श्लिषादयः सोपसर्गा अकर्मका भवन्ति, तदर्थमेषामपादानमिति बोध्यम्।

**क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः ३। ४। ७६॥**

**एभ्योऽधिकरणे क्तः, चाद्यथाप्राप्तम्।**

**मुकुन्दस्यासितमिदमिदं यातं रमापतेः।**
**भुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः॥**

**पक्षे आसेरकर्मकत्वात्कर्तरि भावे च। आसितो मुकुन्दः। आसितं तेन। गत्यर्थेभ्यः कर्तरि कर्मणि च- रमापतिरिदं यातः। तेनेदं यातः। भजेः कर्मणि- अनन्तेनेदं भुक्तम्॥**

ध्रौव्यम् = स्थैर्यम्। प्रत्यवसानार्थाः = अभ्यवहारार्थाः (भक्षणार्थाः)। ध्रौव्यार्थेभ्यः, गत्यर्थेभ्यः, प्रत्यवसानार्थेभ्यश्च यः क्तो विहितः सोऽधिकरणे भवति, चकारपाठाद् यथाप्राप्तं च भवति। ध्रौव्यार्थेभ्यः कर्तृभावादिकरणेषु, गत्यर्थेभ्यः कर्तृकर्मभावाधिकरणेषु, प्रत्यवसानार्थेभ्यः कर्मभावाधिकरणेषु भवतीति बोध्यम्।

**मतिबुद्धिपूजार्थेभ्यश्च ३। २। १८८॥**

**राज्ञां मतः। इष्टः। बुद्धः। विदितः। अर्चितः॥**

मतिः = इच्छा। बुद्धिः = ज्ञानम्। पूजा = सत्कारः। एतदर्थेभ्यो धातुभ्यो वर्तमानेऽर्थे क्त-प्रत्ययो भवति।

इच्छार्थकाद् मन्-धातोः 'मन्यते' इत्यर्थे प्रकृतसूत्रेण क्त-प्रत्यये 'मन् त' इत्यवस्थायां प्राप्तस्य इडागमस्य अनिट्त्वान्निषेधे 'अनुदात्तोपदेश...' इति नलोपे, स्वादिकार्ये 'मतः' इति। इच्छार्थकादेव इष्-धातोरनेन वर्तमानेऽर्थे क्त-प्रत्यये 'तीषसहलुभरुषरिषः' इति वेट्कत्वाद् 'यस्य विभाषा' इति इण्निषेधे 'इष् त' इत्यवस्थायां तकारस्य ष्टुत्वे- इष्ट - इष्टः। बुद्धचर्थकयोः बुध्-विद्धात्वोरनेन सूत्रेण वर्तमानेऽर्थे क्त-प्रत्यये- बुद्धः/विदितः। पूजार्थकाद् अर्च्-धातोर्वर्तमाने क्त-प्रत्यये- अर्चितः।

**छन्दसि लिट् ३। २। १०५॥**

**लिटः कानज्वा ३। २। १०६॥**

**क्वसुश्च ३। २। १०७॥**

**भूतसामान्ये छन्दसि लिट्। तस्य कानच्-क्वसू वा स्तः। 'तङानावात्मनेपदम्'। चक्राणः। 'म्वोश्च'। जगन्वान्। कवयस्तु बाहुलकाल्लोकेऽपि प्रयुञ्जते। 'तं तस्थिवांसं नगरोपकण्ठे'। 'श्रेयांसि सर्वाण्यधिजग्मुषस्ते' इत्यादि॥**

वैदिकभाषायां सामान्यभूतकाले लिट्-लकारो भवति, तस्य लिटः स्थाने कानच्-प्रत्ययः, क्वसू-प्रत्ययश्च विकल्पेन भवत इति सूत्रत्रयस्यार्थः। कानचः ककारचकारौ इतौ, आन इत्येवावशिष्यते, तस्य च 'तङानावात्मनेपदम्' इत्यात्मनेपदसंज्ञा विधीयते। 'क्वसु' इत्यस्य ककारस्य उकारस्य चाऽनुबन्धलोपो भवति।

कृ लिट् (ल्) (छन्दसि लिट्) - कृ कानच् (आन) (लिटः कानज्वा) - कृ कृ आन (लिटि धातोरनभ्यासस्य) - चकृ आन (अभ्यासकार्याणि) - चक् र् आन (इको यणचि) - चक्राण (अट्कु...) - चक्राणः।

गम् लिट् (ल्) - गम् क्वसू - गम् वस् - गम् गम् वस् - जगम् वस् - जगन् वस् (म्वोश्च, मस्य नत्वम्) - जगन्वस् - जगन्वान्। अत्र उगित्वाद् 'उगिदचा'मित्यादिना नुम् बोध्यः।

**लटः शतृशानचावप्रथमासमानाधिकरणे ३। २। १२४॥**

**अप्रथमान्तेन समानाधिकरणे लट एतौ वा स्तः। शबादि। पचन्तं चैत्रं पश्य॥**

अप्रथमान्तेन समानाधिकरणे धातोर्विहितस्य लटः स्थाने शतृ-शानचौ प्रत्ययौ विभाषया भवतः। 'शतृ' इति परस्मैपदम्, ऋकारशकारौ इतौ। 'शानच्' इति आत्मनेपदम्, चकारशकारौ इतौ। परस्मैपदिधातुभ्यः शतृप्रत्ययो भवति, आत्मनेपदिधातुभ्यः शानच्प्रत्ययः। उभयपदिधातुभ्यस्तु उभौ प्रत्ययौ भवतः। सार्वधातुकत्वात् शबादिप्रत्यया भवन्ति।

पचन्तं चैत्रं पश्य - पच्-धातोर्लटि, लस्य स्थानेऽकर्तृगे फले प्रकृतसूत्रेण परस्मैपदसंज्ञके शतृ-प्रत्ययेऽनुबन्धलोपे 'पच् अत्' इति जाते, शपि, पररूपे 'पचत्' इति जाते प्रातिपदिकसंज्ञायां द्वितीयैकवचने अमि, उगिदचामिति नुमागमे 'पचन्तम्' इति सिद्ध्यति।

**आने मुक् ७। २। ८४॥**

**अदन्ताङ्गस्य मुगागमः स्यादाने परे। पचमानं चैत्रं पश्य। लडित्यनुवर्तमाने पुनर्लड्ग्रहणात्प्रथमासामानाधिकरण्येऽपि क्वचित्। सन् द्विजः॥**

पचमानं चैत्रं पश्य - पच्-धातोर्लटि, लस्य स्थाने कर्तृगे फले "लटः शतृशानचावप्रथमा०" इत्यादिना सूत्रेण आत्मनेपदसंज्ञके शानच्-प्रत्ययेऽनुबन्धलोपे 'पच् आन' इति जाते, शपि 'पच आन' इत्यवस्थायां प्रकृतसूत्रेण मुगागमेऽनुबन्धलोपे 'पचमान' इत्यस्मात् प्रातिपदिकादमि, पूर्वरूपे 'पचमानम्' इति।

"लटः शतृशानचावप्रथमा०" इति सूत्रे लडित्यनुवर्तमाने पुनर्लड्ग्रहणात् प्रथमासामानाधिकरण्येऽपि क्वचित् शतृ-शानचौ प्रत्ययौ भवत इति वृत्तिकारस्याशयः। यथा- 'सन् द्विजः', अत्र अस्-धातोः प्रथमान्तेन द्विजशब्देन सामानाधिकरण्येऽपि शतरि, शपि 'अस् अ अत्' इति जाते "श्नसोरल्लोपः" इति अकारलोपे, पररूपे 'सत्' इति प्रातिपदिकात् सौ, नुमादिकार्ये 'सन्' इति। क्वचिदित्युक्तेऽपि सम्प्रति प्रथमान्तानां शतृशानचप्रत्ययान्तानां पदानां प्रयोगः पूर्णरूपेण प्रचलन् वर्तते।

**ईदासः ७। २। ८३॥**

**आनस्य। 'आदेः परस्य'। आसीनः॥**

आस्-धातोः परस्य 'आन' इत्यस्य आदौ विद्यमानस्य आकारस्य स्थाने ईकारादेशो भवति ।

आस् लट् (ल्) - आस् शानच् (लटः शतृ...) - आस् आन - आस् ईन (इदासः) - आसीन - आसीनः ।

**विदेः शतुर्वसुः ७ । १ । ३६ ॥**

**वेत्तेः परस्य शतुर्वसुरादेशो वा । विदन् । विद्वान् ॥**

विद्-धातोः परस्य शतृप्रत्ययस्य स्थाने विकल्पेन 'वसु' इत्यादेशो भवति । वसोरुकार इत् ।

विद्-धातोर्लटि, लस्य स्थाने शतरि, प्रकृतसूत्रेण शतुर्वस्वादेशेऽनुबन्धलोपे 'विद्वस्' इत्यस्मात् प्रातिपदिकत्वात् सौ, विभक्तिकार्ये 'विद्वान्' इति । वस्वभावे तु 'विदन्' इति सिद्ध्यति ।

**तौ सत् ३ । २ । १२७ ॥**

**तौ शतृशानचौ सत्संज्ञौ स्तः ॥**

**लृटः सद्वा ३ । ३ । १४ ॥**

**करिष्यन्तं करिष्यमाणं वा पश्य ॥**

लृट्-लकारस्य स्थाने सत्-संज्ञौ शतृ-शानचौ प्रत्ययौ विकल्पेन भवतः ।

परस्मैपदे- कृ लृट् (ल्) - कृ शतृ (लृटः सद्वा) - कृ अत् - कृ स्य अत् (स्यतासी लृलुटोः) - कृ इस्य अत् (ऋद्धनोः स्ये) - कर् इस्य अत् (सार्वधातुकार्धधातुकयोः) - करिस्यत् (अतो गुणे) - करिष्यत् - करिष्यन्तम् (द्वितीयैकवचनम्) । आत्मनेपदे शानचि- करिष्य आन - करिष्य मान (आने मुक्) - करिष्यमान - करिष्यमाण (अट्कु...) - करिष्यमाणम् ।

**ताच्छील्यवयोवचनाशक्तिषु चानश् ३ । २ । १२९ ॥**

**अग्नौ जुह्वानः । कवचं बिभ्राणः । शत्रु निघ्नानः ॥**

ताच्छील्यम् = तत्स्वभावता । वयः = यौवनादिशरीरावस्थाः । शक्तिः = सामर्थ्यम् । ताच्छील्यादिष्वर्थेषु द्योत्येषु धातोः चानश्-प्रत्ययो भवति । चानशः चकार-शकारौ इतौ, 'आन' इत्यवशिष्यते । शित्वात् शबादिविकरणो बोध्यः ।

'जुहोति तच्छीलः' इति विग्रहे हु-धातोः चानश्-प्रत्ययेऽनुबन्धलोपे 'हु आन' इति जाते शित्वात् सार्वधातुकसंज्ञायां शपि, हु-धातोर्जुहोत्यादिगणस्थत्वाद् 'जुहोत्यादिभ्यः श्लुः' इति शपः श्लौ 'श्लौ' इति धातोर्द्वित्वे, अभ्यासादिकार्ये 'जुहु आन' इति जाते यणि, स्वादिकार्ये- जुह्वानः, हवनशील इत्यर्थः । 'बिभर्ति तच्छीलः' इति विग्रहे भृ-धातोः (डुभृञ् धारणपोषणयोरित्यस्मात्) चानशि, शपि, श्लौ, द्वित्वे, उरदिति ऋकारस्य अत्वे रपरत्वे, हलादिशेषे, भकारस्य जश्त्वेन बकारे 'भृञामित्' इत्यकारस्य इत्वे 'बि भृ आन' इति जाते, ऋकारस्य यणि, नकारस्य णत्वे, स्वादिकार्ये- बिभ्राणः, यौवनबलात् कवचं बिभ्राण इत्यर्थः । एवं नि-पूर्वकाद् हन्-धातोः चानशि, शपि, अदादित्वेन शपो लुकि- निहन् आन,

अपित्सार्वधातुकत्वाद् ङित्वे सिद्धे 'गमहन...' इत्युपधालोपे 'हो हन्ते'रिति हस्य कुत्वेन घकारे, स्वादिकार्ये- निघ्नानः, शक्त इत्यर्थः ।

**आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु ३ । २ । १३४ ॥**

**क्विपमभिव्याप्य वक्ष्यमाणास्तच्छीलादिषु कर्तृषु बोध्याः ॥**

**तृन् ३ । २ । १३५ ॥**

**कर्ता कटान् ॥**

तच्छील-तद्धर्म-तत्साधुकारिषु कर्तृषु सर्वधातुभ्यः तृन्-प्रत्ययो भवति । तृनो नकार इत् ।

'करोति तच्छीलः', 'साधु करोति' वेति विग्रहे कृ-धातोः प्रकृतसूत्रेण तृन्-प्रत्यये- कृ तृ - कर् तृ - कर्तृ - कर्ता ।

**सनाशंसभिक्ष उः ३ । २ । १६८ ॥**

**चिकीर्षुः । आशंसुः । भिक्षुः ॥**

तच्छीलाद्यर्थे गम्यमाने सन्नन्ताद्धातोः, आङ्-पूर्वकात् शंस्धातोः, भिक्ष्धातोश्च उप्रत्ययो भवति ।

'चिकीर्षति तच्छीलः' इत्यर्थे सन्नन्ताच्चिकीर्षधातोः प्रकृतसूत्रेण उप्रत्यये 'चिकीर्ष उ' इत्यवस्थायाम् "अतो लोपः" इति अकारलोपे, स्वादिकार्ये 'चिकीर्षुः' इति । तथा च 'आशंसति तच्छीलः' इत्यर्थे आङुपसर्गपूर्वकात् शंस्धातोः पूर्ववद् उप्रत्यये, स्वादिकार्ये 'आशंसुः' इति । एवमेव 'भिक्षते तच्छीलः' इत्यर्थे भिक्ष्धातोः पूर्ववत् 'भिक्षुः' इति सिद्ध्यति ।

**स्थेशभासपिसकसो वरच् ३ । २ । १७५ ॥**

**स्थावरः । भास्वरः । इत्यादि ॥**

ष्ठा (स्था) गतिनिवृत्तौ, ईश (ईश्) ऐश्वर्ये, भासृ (भास्) दीप्तौ, पिसृ पेसृ (पिस्, पेस्) गतौ, कस (कस्) गतौ, एतेभ्यो धातुभ्यः तच्छीलादिषु कर्तृषु द्योत्येषु वरच्-प्रत्ययो भवति । चकार इत् ।

तिष्ठति तच्छीलः - स्था वरच् (वर) - स्थावर - स्थावरः । एवम् ईष्टे- ईश्वरः । भासते- भास्वरः । पेसति- पेस्वरः । कसति- कस्वरः ।

**दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ३ । २ । १८२ ॥**

**दावादेः ष्ट्रन् करणेऽर्थे । दान्त्यनेन दात्रम् । नेत्रम् ॥**

दाप् (दा) लवने, णीञ् (नी) प्रापणे, शसु (शस्) हिंसायाम्, यु मिश्रणे, युजिर् (युज्) योगे, ष्टुञ् (स्तु) स्तुतौ, तुद (तुद्) व्यथने, षिञ् (सि) बन्धने, षिचिर् (सिच्) क्षरणे, मिह (मिह्) सेचने, पत्लृ (पत्) गतौ, दंश (दंश्) दशने, णह (नह्) बन्धने, एतेभ्यो धातुभ्यः करणे कारके ष्ट्रन्-प्रत्ययो भवति । 'ष्ट्रन्' इत्यस्य षकार-नकारयोरित्संज्ञायां लोपे, ष्टुत्वनिमित्तकस्य षकारस्याऽपाये तन्नैमित्तिकस्य ष्टुत्वस्याप्यपाये 'त्र' इत्येवावशिष्यते ।

दान्ति अनेन - दा ष्ट्रन् - दा त्र - दात्रम् । एवं नयति अनेन - नी ष्ट्रन् (त्र) - ने त्र (सार्वधातुकार्धधातुकयोः) - नेत्रम् ।

**तितुत्रतथसिसुसरकसेषु च ७ । २ । ९ ॥**

**एषां दशानां कृत्प्रत्ययानामिण्न । शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्रम् । सेत्रम् । सेक्त्रम् । मेढ्रम् । पत्त्रम् । दंष्ट्रा । नद्ध्री ।**

ति (क्तिन्, क्तिच्), तु (तुन्), त्र (ष्ट्रन्), त (तन्), थ (क्थन्), सि (क्सि), सु, सर (सरन्), क (कन्), स, इत्येतेषां दशानां कृत्-प्रत्ययानाम् इडागमो न भवति । शसति अनेन - शस् ष्ट्रन् (त्र) (दाम्नीशस...) - शस् त्र, इत्यवस्थायां प्राप्तस्य इडागमस्य अनेन सूत्रेण निषेधे- शस्त्रम् । एवं युनक्ति अनेन - युज् ष्ट्रन् - युज् त्र - योज् त्र - योग् त्र - योक् त्र - योक्त्रम् । स्तौति अनेन - स्तु ष्ट्रन् - स्तु त्र - स्तो त्र - स्तोत्रम् । तुदति अनेन - तुद् ष्ट्रन् - तुद् त्र - तोद् त्र - तोत् त्र (खरि च) - तो त्र (झरो झरि सवर्णे) - तोत्रम्, पक्षे- तोत्त्रम् । सिनोति/सिनाति अनेन - सि ष्ट्रन् - सि त्र - से त्र - सेत्रम् । सिञ्चति अनेन - सिच् ष्ट्रन् - सिच् त्र - सेच् त्र - सेक् त्र - सेक्त्रम् । मेहति अनेन - मिह् ष्ट्रन् - मिह् त्र - मेह् त्र - मेढ् त्र (हो ढः) - मेढ् ध्र (झषस्तथोर्धोऽधः) - मेढ् ढ्र (ष्टुना ष्टुः) - मे ढ्र (ढो ढे लोपः) - मेढ्रम् । पतति अनेन - पत् ष्ट्रन् - पत् त्र - प त्र (झरो झरि सवर्णे) - पत्रम्, पक्षे- पत्त्रम् । दशति अनया - दंश् ष्ट्रन् - दंश् त्र - दंष् त्र (व्रश्चभ्रस्ज...) - दंष् ट्र (ष्टुना ष्टुः) - दंष्ट्र - दंष्ट्र टाप् (अजाद्यतष्टाप्) - दंष्ट्र आ - दंष्ट्रा, अत्र 'षिद्गौरादिभ्यश्च' इति ङीष् न, षितां ङीषोऽनित्यत्वात् । 'मातरि षिच्चे'ति ङीषः सिद्धेः मातामही-शब्दस्य गौरादिषु पाठः षितां ङीषोऽनित्यत्वं ज्ञापयति । नह्यति अनया - नह् ष्ट्रन् - नह् त्र - नध् त्र (नहो धः) - नध् ध्र (झषस्तथोर्धोऽधः) - नद् ध्र (झलां जश् झशि) - नद्ध्र - नद्ध्र ङीष् (षिद्गौरादिभ्यश्च) - नद्ध्र ई - नद्ध्र् ई (यस्येति च) - नद्ध्री ।

**पुवः संज्ञायाम् ३ । २ । १८५ ॥**

**पवित्रम्** ॥

पूङ्-धातोः, पूञ्-धातोश्च करणे कारके इत्र-प्रत्ययो भवति, समुदायेन संज्ञा गम्यते चेदेव ।

पूयतेऽनेन आज्यम् - पू इत्र - पो इत्र (सार्वधातुकार्धधातुकयोः) - प् अव् इत्र (एचोऽयवायावः) - पवित्र - पवित्रम् ।

## अभ्यासः

### १. सूत्राणि शुद्धमुच्चारयत

(क) क्तक्तवतू निष्ठा (ख) आतोऽनुपसर्गे कः (ग) युवोरनाकौ

(घ) इगुपधज्ञाप्रीकिरः कः (ङ) सुप्यजातौ णिनिस्ताच्छील्ये (च) आने मुक्

### २. अधस्तनप्रश्नानामुत्तराणि लिखत

(क) निष्ठासंज्ञकौ प्रत्ययौ कौ ?

(ख) "हलः" इति सूत्रं किं करोति ?

(ग) "कर्मण्यण्" इति सूत्रस्य त्रीणि उदाहरणानि लिखत ।

(घ) लटः स्थाने शतृशानजादेशविधायकं सूत्रं तदर्थञ्च लिखत ।

(ङ) कीदृशाद्धातोर्विहितस्य लटः स्थाने शतृ-शानचौ आदेशौ भवतः ?

(च) अजात्यर्थे सुपि कस्मिन्नर्थे धातोर्णिनिप्रत्ययो भवति ?

(छ) सुबन्तोपपदे मन्-धातोर्णिनिविधायकं सूत्रं किम् ?

(ज) "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" इति सूत्रस्यार्थं सोदाहरणं प्रकाशयत ।

(झ) 'यु' इति प्रत्ययस्य केन क आदेशो विधीयते ?

(ञ) "रदाभ्यां०" इति सूत्रं पूरयत ।

(ट) 'छिद् + क्तवतु' इत्यत्र किं रूपं निष्पद्यते ?

(ठ) 'पचमानः' इत्यत्र प्रकृतिप्रत्ययौ कौ ?

(ड) 'गृहम्' इत्यत्र कृत्-प्रत्ययः कः ?

(ढ) 'प्रियंवदः' इत्यस्य अर्थानुरूपं विग्रहं प्रदर्शयत ।

(ण) छन्दसि लिटः स्थाने कौ प्रत्ययौ वा भवतः ?

(त) सत्-संज्ञकौ प्रत्ययौ कौ ?

(थ) 'आसीनः' इत्यत्र आनस्याऽऽकारस्य ईत्वविधायकं सूत्रं किम् ?

(द) 'नयत्यनेन' इत्यर्थे ष्ट्रनि किं रूपं निष्पद्यते ?

(ध) केभ्यो धातुभ्यो वर्तमाने क्त-प्रत्ययो भवति ?

(न) 'अकारि' इत्यर्थे निष्ठाप्रत्ययेन निष्पन्नस्य प्रातिपदिकस्य स्त्रियां रूपाणि कानि ?

### ३. अधो लिखितानि पदानि प्रयुज्य वाक्यानि रचयत

कृतः, पठितवान्, कुर्वन्ती, गतवन्तः, सेविताः, दर्शकः, पठन्, वर्धमानाः, भावकः, हर्ता, पश्यन्, युक्तवान्, योद्धा, धनदः, सुखदायी, गच्छन्तम्, कर्तारः, भीतवान्, विदुषः, किरः, हसन्ती ।

## ४. प्रकृतिप्रत्ययौ पृथक् कुरुत

गन्ता, सन्, वर्धमानः, कुर्वाणः, दत्तः, गायकः, नाशकः, बोधकः ज्ञातवान्, दृष्टः, भिन्नः, भर्ता, रक्षकः, नन्दनः, स्थायी, कम्बलदः, योद्धा, उक्तवान्, युद्धः, लब्धः, श्रोता, मन्त्री, हतः, हर्ता, हितवान्, जेता, दाता, अध्यापकः, तृप्तः, गच्छन्, घातकः, सेवकः, कुर्वन्, बुद्धः, यजमानः, लभमानः, याजकः, ग्राहकः, कारकः, भावकः, शासकः, रोचकः, चरः, लवणः, भवन्, जायमानः, वर्तमानः, पवित्रम्, जीर्णः, क्षीणवान्, क्षमः, इष्टः, मेढ्रम् ।

## ५. प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत

खाद् + क्तवतु, प्र + ईर् + ण्वुल्, कम्प् + शानच्, कृ + क्त, भिद् + क्तवतु, भू + तृच्, श्रु + तृच्, गो + दा + क, शीत + भुज् + णिनि, जन् + शानच्, सु + ग्लै + क, गै + ण्वुल्, शस्त्र + कृ + अण्, भू + क्त, दा + क्तवतु, अद् + शतृ, चर् + शतृ, पाल् + ण्वुल्, गम् + क्त, ग्रह् + णिनि, एध् + शानच्, बुध् + क, शुष् + क्त, ज्या + क्त, पच् + क्तवतु, ब्रू + तृच्, युज् + ष्ट्रन्, हु + चानश्, अधिस्था + क्त ।

## ६. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत

कारकः, जनार्दनः, लवणः, प्रियः, गृहम्, गोदः, उष्णभोजी, दर्शनीयमानी, स्नातम्, स्तुतः, पठितवान्, शीर्णः, ग्लानः, जीनः, भुग्नः, शुष्कः, पक्वः, क्षामः, भावितवान्, हितम्, पचन्तम्, पचमानः, विद्वान्, भिक्षुः, मतः, पण्डितम्मन्यः, वशंवदः, अवावा, जनमेजयः, वृत्रहा, कुरुचरः ।

## ७. समुचितं विकल्पं विचित्य वाक्यानां पुनर्लेखनं विधत्त

(क) अनुनासिकस्य वोः अन/अक इत्यादेशो भवति ।

(ख) ण्वुल्तृचौ प्रत्ययौ कर्तरि/कर्मणि अर्थे भवतः ।

(ग) क्तवतुप्रत्ययः कर्तरि/कर्मणि अर्थे भवति ।

(घ) भूतेऽर्थे/भविष्यत्यर्थे वर्तमानाद्धातोर्निष्ठा भवति ।

(ङ) आत्मनेपदिनः/परस्मैपदिनो धातोः शानच्-प्रत्ययो भवति ।

## ८. 'अक्षैषीत्' इत्यर्थे क्षि-धातोः क्तवतु-प्रत्यये निष्पन्नस्य प्रातिपदिकस्य पुंसि स्त्रियां च रूपाणि लिखत ।

## ९. अधस्तनकथनानां समीचीनत्वाऽसमीचीनत्वं समुचितचिह्नाभ्यां निर्धारयत

(क) क्त-क्तवतुप्रत्ययान्तप्रातिपदिकानां रूपाणि त्रिषु लिङ्गेषु जायन्ते ।

(ख) आत्मनेपदिधातुभ्यः शतृप्रत्ययो भवति ।

(ग) उभयपदिधातुभ्यः शतृशानचौ भवतः ।

(घ) छन्दसि भूतसामान्ये लिट्-लकारो भवति ।

(ङ) नन्द्यादेर्धातोः अच्-प्रत्ययो भवति ।

(च) सोपसर्गादादन्ताद्धातोः क-प्रत्ययो भवति ।

(छ) विद्-धातोः परस्य शतुर्वस्वादेशो वा भवति ।

(ज) शतृ-प्रत्ययस्य आत्मनेपदसंज्ञा विधीयते ।

(झ) गत्यर्थकधातुभ्यः कर्तर्यर्थेऽपि क्त-प्रत्ययो जायते ।

(ञ) खिदन्ते उत्तरपदे हलन्तशब्दानां मुमागमो भवति ।

**१०. पठित-शब्दस्य पठितवत्-शब्दस्य च त्रिषु लिङ्गेषु सर्वासु विभक्तिषु रूपाणि लिखत ।**

**११. पच्-धातोः शतृ-प्रत्यये शानच्-प्रत्यये च निष्पन्नप्रातिपदिकयोः त्रिषु लिङ्गेषु सर्वासु विभक्तिषु रूपाणि लिखत ।**

**१२. क्त-प्रत्ययान्तानि पदानि प्रयुज्य एकमनुच्छेदं विलिख्य शिक्षकं दर्शयत ।**

**१३. समुचितविशेष्यपदानि संयोज्य पदानां वाक्ये प्रयोगं दर्शयत**

| | | | |
|---|---|---|---|
| पठितानि | ..................... | गच्छन्ती | ..................... |
| श्रूता | ..................... | लिखितवत् | ..................... |
| शयानः | ..................... | पाठ्यतः | ..................... |
| जितान् | ..................... | प्रदत्तानाम् | ..................... |

# कृदन्तप्रकरणे

## अथोत्तरकृदन्तप्रकरणम्

**उणादयो बहुलम् ३ । ३ । १ ॥**

**संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।**

**कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु ॥**

**उणादयः प्रत्यया वर्तमानेऽर्थे संज्ञायां विषये बहुलं भवन्ति । सूत्रे बहुलग्रहणाद् यतो विहिताः ततोऽन्यत्रापि भवन्ति, केचिदविहिता एव प्रयोगत उन्नीयन्ते ।**

संज्ञास्विति भाष्यस्थश्लोकः । संज्ञासु = यदृच्छाशब्देषु, वायु-दारु-गवादिशब्देषु डित्थडवित्थादिषु च, धातुरूपाणि = सम्भवन्तस्ते ते धातव ऊहनीयाः = कल्पनीयाः । ततः = धातुभ्यश्च परे यथासम्भवं प्रत्ययाः = उण्, ञुण्, डो इत्यादयः कल्पनीयाः । तेषु च कार्यात् = कार्यानुरूपम्, गुण-वृद्धि-टिलोप-सम्प्रसारणादिकार्यानुसारमिति यावत्, अनूबन्धम् = अनुबन्धम्, णकार-ककार-डकारादिकम्, विद्यात् = जानीयात्, कल्पयेदिति यावत् । उणादिषु एतत् = पूर्वोक्तं शास्त्रम्, शासितव्यमित्यर्थः ।

**तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ३ । ३ ।१० ॥**

**क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः । मान्तत्वादव्यत्वम् । कृष्णं द्रष्टुं याति । कृष्णं दर्शको याति ।**

तुमुन्-प्रत्ययस्य 'उन्' इत्यनुबन्धत्वात् 'तुम्' इति शिष्यते । मान्तत्वात् "कृन्मेजन्तः" इत्यव्ययत्वम् ।

कृष्णं द्रष्टुं याति - अत्र गमनक्रिया दर्शनक्रियाया निमित्ताऽस्ति । 'याति' इति क्रियानिमित्तक्रियोपपदमस्ति । भविष्यत्यर्थे वर्तमानाद् दृश्-धातोः प्रकृतसूत्रेण तुमुन्-प्रत्ययेऽनुबन्धलोपे 'दृश् तुम्' इति जाते "सृजिदृशो०" इत्यमि 'दृ अश् तुम्' इति जाते, यणि, 'व्रश्चभ्रश्जे'ति शकारस्य षत्वे, तकारस्य ष्टुत्वे 'द्रष्टुम्' इति जाते, मान्तकृत्वात् "कृन्मेजन्तः" इत्यव्ययसंज्ञायां सौ, सुब्लुकि 'द्रष्टुम्' इति, तस्य कर्मवाचकात् कृष्णशब्दात् "कर्तृकर्मणोः कृति" इति षष्ठ्यां प्राप्तायाम् अव्ययस्य कर्मत्वाद् "न लोकाव्ययनिष्ठाखलर्थतृनाम् २ । ३ । ६९ ॥" इति निषेधे, ततः "कर्मणि द्वितीया" इति द्वितीयाविभक्तौ 'कृष्णं द्रष्टुं याति' इति ।

कृष्णं दर्शको याति - भविष्यदर्थकाद् दृश्-धातोः प्रकृतसूत्रेणैव ण्वुल्-प्रत्ययेऽनुबन्धलोपे, वोरकादेशे, गुणे, स्वादिकार्ये 'दर्शकः' इति। अस्य कर्मवाचकात् कृष्ण-शब्दात् पूर्ववत् प्राप्ताया षष्ठ्या "अकेनोर्भविष्यदाधमर्ण्ययोः २। ३। ७० ॥" इति निषेधे, ततः द्वितीयाविभक्तौ 'कृष्णं दर्शको याति' इति सिद्ध्यति। एवमेव- सभायामुपस्थितो भवितुं याति, सभायामुपस्थितो भावको याति। जलं पातुं याति, जलं पायको याति। शत्रुं जेतुं याति, शत्रुं जायको याति। कथां श्रोतुं याति, कथां श्रावको याति। इत्यादि।

**कालसमयवेलासु तुमुन् ३। ३। १६७ ॥**

**कालार्थेषूपपदेषु तुमुन्। कालः समयो वेला वा भोक्तुम् ॥**

कालार्थेषु शब्देषूपपदेषु धातोस्तुमुन्-प्रत्ययो भवति।

कालो भोक्तुम् - कालार्थोपपदाद् भुज्-धातोः प्रकृतसूत्रेण तुमुन्प्रत्ययेऽनुबन्धलोपे 'भुज् तुम्' इति जाते, उकारस्य गुणे, जकारस्य कुत्वे, चर्त्वे 'भोक्तुम्' इति जाते, तस्याव्ययत्वाद्विहितस्य सुपो लुकि 'भोक्तुम्' इति सिद्ध्यति। एवमेव- समयो भोक्तुम्, वेला भोक्तुम् इत्यपि। अत्र काल, समय, वेला, एतेभ्यः शब्देभ्यः प्रातिपदिकार्थमात्रे प्रथमा ज्ञेया।

**भावे ३। ३। १८ ॥**

**सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ्। पाकः ॥**

भावः = धात्वर्थः। स च द्विविधः- साध्यावस्थापन्नः, सिद्धावस्थापन्नश्च (धातूनां द्वौ अर्थौ भवतः- साध्यः, सिद्धश्चः)। तत्र तिङ्वाच्यो लिङ्गसङ्ख्याद्यन्वयाऽयोग्यः साध्यावस्थापन्नः (तिङन्तक्रियाया धात्वर्थः साध्यो भवति)। कृद्वाच्यस्तु 'कृदभिहितो भावो द्रव्यवत् प्रकाशते' इति लिङ्गसङ्ख्याद्यन्वययोग्यः सिद्धावस्थापन्नः (कृदन्तक्रियाया धात्वर्थः सिद्धावस्थापन्नो भवति)। अतः भावेऽर्थे निष्पन्नशब्देभ्यः सर्वाणि लिङ्गवचनानि भवन्ति। घञ्प्रत्ययान्ताः शब्दाः पुंलिङ्गे प्रयुज्यन्ते। (लिङ्गानुशासनसूत्रम्- "घञबन्तः") घञ्-प्रत्ययस्य घकारञकारौ इतौ।

पचनमित्यर्थे पच्-धातोः प्रकृतसूत्रेण घञ्-प्रत्ययेऽनुबन्धलोपे 'पच् अ' इति जाते, ञित्वाद् उपधावृद्धौ, "चजोः कु घिण्ण्यतोः" इति चकारस्य कुत्वे 'पाक' इति जाते, घञन्तत्वात् पुंलिङ्गे सौ, रुत्वे विसर्गे च 'पाकः' इति सिद्ध्यति। एवमेव - भावः। पायः। एधः। हारः। इत्यादि।

**अकर्तरि च कारके संज्ञायाम् ३। ३। १९ ॥**

**कर्तृभिन्ने कारके घञ् स्यात् ॥**

कर्तृभिन्ने कारके संज्ञायां विषये धातोर्घञ्प्रत्ययो भवति।

'आहरन्ति रसमस्मादि'ति विग्रहे आङुपसर्गपूर्वकाद् हृधातोः प्रकृतसूत्रेण घञ्-प्रत्यये 'आहृ अ' इति जाते, वृद्धौ रपरत्वे, स्वादिकार्ये 'आहारः' इति। सूत्रे चकारग्रहणादसंज्ञायामपि घञ्प्रत्ययो भवति। यथा- दायः, लाभः।

**घञि च भावकरणयोः ६ । ४ । २७ ॥**

**रञ्जेर्नलोपः स्यात् । रागः । अनयोः किम् ? रज्यत्यस्मिन्निति रङ्गः ।**

भावेऽर्थे करणेऽर्थे च विहिते घञि परे रञ्ज्-धातोर्नलोपो भवति ।

'रञ्जनम्, रज्यतेऽनेन वा' इति विग्रहे भावेऽर्थे "भावे" इति सूत्रेण घञि, करणेऽर्थे तु "अकर्तरि च कारके संज्ञायाम्" इति घञि 'रञ्ज् अ' इत्यवस्थायां प्रकृतसूत्रेण 'रञ्ज्' इत्यस्य नकारस्य लोपे 'रज् अ' इति जाते उपधावृद्धौ, कुत्वे, स्वादिकार्ये 'रागः' इति । भावकर्मभिन्नेऽर्थे घञि तु अनेन सूत्रेण रञ्जेर्नलोपो न भवति । यथा- 'रज्यत्यस्मिन्नि'ति विग्रहे रञ्ज्-धातोः अधिकरणेऽर्थे घञि, जकारस्य कुत्वे, नकारस्यानुस्वारे परसवर्णे स्वादिकार्ये 'रङ्गः' इति । अत्र भावकर्मणोर्विहितस्य घञ्-प्रत्ययस्य परत्वाभावाद् नकारलोपस्याप्यभावः ।

**निवासचितिशरीरोपसमाधानेष्वादेश्च कः ३ । ३ । ४१ ॥**

**एषु चिनोतेर्घञ् आदेश्च ककारः । उपसमाधानं राशीकरणम् । निकायः । कायः । गोमयनिकायः ॥**

निवास-चिति-शरीर-उपसमाधानेषु अर्थेषु चिधातोघञ्प्रत्ययो भवति, धातोरादेश्च (चकारस्य स्थाने) ककारो भवतीत्यर्थः ।

निवासेऽर्थे - निकायः । 'निचीयते धान्यादिकमस्मिन्' इति विग्रहे न्युपसर्गपूर्वकाच्चिधातोः प्रकृतसूत्रेण अधिकरणेऽर्थे घञि, चकारस्य ककारे च कृते 'निकि अ' इति जाते, वृद्धौ, आयादेशे, स्वादिकार्ये 'निकायः' इति ।

चित्यर्थे - आकायम् । 'आचीयन्तेऽस्मिनिष्टकाः' इति विग्रहे चित्यर्थे बोधिते सति आङ्पूर्वकाच्चिधातोरधिकरणेऽर्थे घञि, पूर्ववद् 'आकायम्' इति सिद्ध्यति ।

शरीरेऽर्थे - कायः । 'चीयते अस्थ्यादिकमस्मिन्' इति विग्रहे शरीरेऽर्थे बोधिते सति चिधातोः प्रकृतसूत्रेण घञ्प्रत्यये कत्वे च कृते, पूर्ववत् 'कायः' इति सिद्ध्यति ।

उपसमाधानेऽर्थे - गोमयनिकायः । राशीकरणेऽर्थे बोधिते सति निपूर्वकाच्चिधातोर्घञि कत्वे च, पूर्ववत् 'निकायः' इति, 'गोमयस्य निकायः' इत्यस्य षष्ठीतत्पुरुषसमासे 'गोमयनिकायः' इति सिद्ध्यति ।

**एरच् ३ । ३ । ५६ ॥**

**इवर्णान्तादच् । चयः । जयः ॥**

इवर्णान्ताद्धातोर्भावेऽर्थे, कर्तृभिन्ने कारकेऽर्थे च अच्प्रत्ययो भवति ।

'चयनम्' इत्यर्थे चि-धातोः "भावे" इति प्राप्तं घञं बाधित्वा प्रकृतसूत्रेण अच्प्रत्ययेऽनुबन्धलोपे 'चि अ' इत्यवस्थायां गुणेऽयादेशे, विभक्तिकार्ये 'चयः' इति । एवमेव जयनमित्यर्थे जि-धातोः - जयः ।

**ॠदोरप् ३ । ३ । ५७ ॥**

**ॠदन्तादुवर्णान्ताच्चाप् । करः । गरः । यवः । लवः । स्तवः । पवः ॥**

ऋकारान्ताद्, उकारान्ताच्च धातोर्भावेऽर्थे, कर्तृभिन्ने कारकेऽर्थे च अप्-प्रत्ययो भवति। अपः पकार इत्।

'किरति अनेन' इत्यर्थे कॄ-धातोः प्रकृतसूत्रेण अप्यनुबन्धलोपे 'कॄ अ' इति जाते, गुणे रपरत्वे, विभक्तिकार्ये 'करः' इति सिद्ध्यति। एवमेव 'गीर्यते (शिवेन)' इत्यर्थे गॄ-धातोः पूर्ववत्- गरः। 'यूयते अम्भसा' इत्यर्थे यु-धातोः- यवः। लवनमित्यर्थे लू-धातोः- लवः। 'स्तवनम्, स्तूयते अनेन वा' इत्यर्थे स्तु-धातोः- स्तवः। पवनमित्यर्थे पू-धातोः- पवः।

**ड्वितः क्त्रिः ३।३।८८॥**

**अयं भाव एव स्वभावात्।**

'डु' इत् यस्य स ड्वित्, तस्माद् ड्वितो धातोर्भावेऽर्थे क्त्रि-प्रत्ययो भवति। ककार इत्।

**क्त्रेर्मम् नित्यम् ४।४।२०॥**

**क्त्रिप्रत्ययान्तान्मम्निर्वृत्तेऽर्थे। पाकेन निर्वृत्तं पक्त्रिमम्। डुवप्- उप्त्रिमम्॥**

क्त्रि-प्रत्ययान्तात् प्रातिपदिकात् 'तेन निर्वृत्तम्' इत्यर्थे नित्यं मप्-प्रत्ययो भवति। पकार इत्।

पचनक्रियया भावः पाकः, तेन = पाकेन निर्वृत्तम् - डुपचस् (पच्) क्त्रि (ड्वितः क्त्रिः) - पच् त्रि - पक् त्रि (चोः कुः) - पक्त्रि - पक्त्रि मप् (क्त्रेर्मम् नित्यम्) - पक्त्रि म - पक्त्रिमम्। एवं वपनक्रियया निर्वृत्तम् - डुवप् (वप्) क्त्रि - वप् त्रि - उप् त्रि (वचिस्वपि...) - उप्त्रि - उप्त्रि मप् (म) - उप्त्रिमम्। एवं डुकृञ्- कृत्रिमम्। डुलभष्- लप्त्रिमम्। डुधाञ्- हित्रिमम्, 'दधातेर्हिः' इति हित्वम्। इत्यादि।

**ट्वितोऽथुच् ३।३।८९॥**

**अयमपि भावे। टुवेपृ कम्पने। वेपथुः॥**

'टु' इत् यस्य स ट्वित्, तस्मात् ट्वितो धातोर्भावाद्यर्थे अथुच्-प्रत्ययो भवति। चकार इत्।

वेपनम् - टुवेपृ (वेप्) अथुच् - वेप् अथु - वेपथु - वेपथुः।

**यजयाचयतविच्छप्रच्छरक्षो नङ् ३।३।९०॥**

**यज्ञः। याच्ञा। यत्नः। विश्नः। प्रश्नः। रक्ष्णः॥**

यज्, याच्, यत्, विच्छ्, प्रच्छ्, रक्ष्, एतेभ्यो धातुभ्यो भावाद्यर्थे नङ्-प्रत्ययो भवति। ङकार इत्।

यजनम्/यजति देवान् अनेन - यज् नङ् - यज् न - यज् ञ (स्तोः श्चुना श्चुः) - यज्ञ - यज्ञः। याचनम् - याच् नङ् - याच् न - याच् ञ (स्तोः...) - याच्ञ - याच्ञ टाप् (अजाद्यतष्टाप्) - याच्ञ आ - याच्ञा। यतनम् - यत् नङ् - यत् न - यत्नः। विच्छनम् - विच्छ् नङ् - विच्छ् न - विश् न (च्छ्वोः शूडनुनासिके च) - विश्नः = प्रतापः। प्रच्छ् नङ् - प्रच्छ् न - प्रश् न (च्छ्वोः शूडनुनासिके च) - प्रश्नः, अत्र नङो ङित्वेऽपि 'ग्रहिज्या...' इति सम्प्रसारणं न, 'प्रश्ने चासन्नकाले' इति सूत्रज्ञापकात्। रक्षणम् - रक्ष् नङ् - रक्ष् न - रक्ष् ण (रषाभ्यां नो णः समानपदे) - रक्ष्णः।

**स्वपो नन् ३ । ३ । ९१ ॥**

**स्वप्नः ।**

स्वप्-धातोर्भावाद्यर्थे नन्-प्रत्ययो भवति ।

स्वपनम् - स्वप् नन् - स्वप् न - स्वप्न - स्वप्नः ।

**उपसर्गे घोः किः ३ । ३ । ९२ ॥**

**प्रधिः । उपधिः ॥**

उपसर्गपूर्वकाद् घु-संज्ञकाद् धातोर्भावेऽर्थे, कर्तृभिन्ने कारकेऽर्थे च कि-प्रत्ययो भवति । ककार इत् ।

प्रधीयते अनेन - प्रधा कि - प्रधा इ - प्रध् इ (आतो लोप इटि च) - प्रधि - प्रधिः । सर्वेऽपि कि-प्रत्ययान्ताः पुंलिङ्गा बोध्याः । एवम्- उपधानम् - उपधा कि - उपधा इ - उपध् इ - उपधिः । एवमेव व्याधिः, आधिः, समाधिः, विधिः, सन्धिः, निधिः, उपाधिः, इत्यादयोऽपि कि-प्रत्ययान्ताः पुंलिङ्गा ज्ञेयाः ।

**स्त्रियां क्तिन् ३ । ३ । ९४ ॥**

**स्त्रीलिङ्गे भावे क्तिन् । घञोऽपवादः । कृतिः । स्तुतिः ।**

क्तिन्-प्रत्ययस्य ककारनकारौ इतौ । विधिरयं घञ्-प्रत्ययस्यापवादो वर्तते ।

करणमित्यर्थे कृधातोः प्राप्तं घञं बाधित्वा प्रकृतसूत्रेण स्त्रीलिङ्गे भावेऽर्थे क्तिन्-प्रत्ययेऽनुबन्धलोपे 'कृ ति' इति जाते कित्वाद् गुणनिषेधे, विभक्तिकार्ये 'कृतिः' इति सिद्ध्यति । एवमेव- स्तवनमित्यर्थे स्तु-धातोः पूर्ववत्- स्तुतिः ।

**वा. (ॠल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः) तेन नत्वम् । कीर्णिः । लूनिः । धूनिः । पूनिः ।**

ॠकारान्ताद्धातोर्ल्वादिभ्यो धातुभ्यश्च परः क्तिन्-प्रत्ययो निष्ठावद् भवति । निष्ठावद्भावात् 'रदाभ्याम्...' इति तकारस्य नत्वं भवति ।

करणमित्यर्थे कॄ-धातोः "स्त्रियां क्तिन्" इति क्तिन्-प्रत्ययेऽनुबन्धलोपे 'कॄ ति' इत्यवस्थायाम् "ॠत इद्धातोः" इतीत्वे रपरत्वे, "हलि चे"त्युपधादीर्घे 'कीर् ति' इति जाते, अनेन वार्तिकेन क्तिनो निष्ठावद्भावे "रदाभ्यां निष्ठातो..." इति सूत्रेण तकारस्य नत्वे, नकारस्य णत्वे, विभक्तिकार्ये 'कीर्णः' इति ।

एवं लवनमित्यर्थे लू- लूनिः, पवनमित्यर्थे पू- पूनिः, धवनमित्यर्थे धू- धूनिश्च सिद्ध्यन्ति ।

**वा. सम्पदादिभ्यः क्विप् । सम्पत् । विपत् । आपत् ॥**

सम्पदादिगणपठितेभ्यो शब्देभ्यः क्विप्-प्रत्ययो भवति । क्विपः सर्वापहारिलोपः ।

सम्पद्यते अनया - सम्पद्/संपद् क्विप् - सम्पद्/संपद् - सम्पत्-द्/संपत्-द् । एवं विपद्यते अनया- विपत्-द् । आपद्यते अनया- आपत्-द् ।

**वा. क्तिन्नपीष्यते । संपत्तिः । विपत्तिः । आपत्तिः ॥**

संपदादिगणपठितेभ्यो शब्देभ्यः क्तिन्-प्रत्ययोऽपि भवति ।

संपद्-शब्दाद् अनेन क्तिन्-प्रत्यये, दकारस्य चर्त्वे, स्वादिकार्ये- संपत्ति । एवमेव विपत्ति, आपत्तिश्च ।

**कृञः ३ । ३ । १०० ॥**

**क्यप् । कृत्या ॥**

कृ(ञ्)-धातोर्भावेऽर्थे क्यप्-प्रत्ययो भवति, स्त्रियाम् ।

करणम् - कृ क्यप् - कृ य - कृत् य (ह्रस्वस्य पिति कृति तुक्) - कृत्य - कृत्य टाप् - कृत्य आ - कृत्या ।

**श च ३ । ३ । १०० ॥**

**कृञः शः । चात् क्तिन् । प्रक्रिया । कृतिः ॥**

कृ(ञ्)-धातोर्भावेऽर्थे श-प्रत्ययो भवति, चकारपाठान् क्तिन्-प्रत्ययश्च भवति, स्त्रियाम् ।

प्रकर्षाय करणम् - प्रकृ श - प्रकृ अ - प्रकृ यक् (य) अ (सार्वधातुके यक्) - प्रकृ य (अतो गुणे) - प्र क्रि य (रिङ्शयग्लिङ्क्षु) - प्रक्रिय - प्रक्रिय टाप् - प्रक्रिय आ - प्रक्रिया । क्तिन्पक्षे- कृ क्तिन् (ति) - कृति - कृतिः ।

**इच्छा ३ । ३ । १०१ ॥**

**इषेर्निपातोऽयम् ।**

इष्-धातोर्भावेऽर्थे श-प्रत्ययः, यक्-प्रत्ययाभावश्च निपात्यते ।

एषणम् - इष् श - इष् अ - इछ् अ (इषुगमियमां छः) - इच्छ् अ (छे च) - इच्छ - इच्छ टाप् - इच्छ आ - इच्छा ।

**अ प्रत्ययात् ३ । ३ । १०२ ॥**

**प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारः प्रत्ययः स्यात् । चिकीर्षा । पुत्रकाम्या ॥**

विधिरयं क्तिन्-प्रत्ययस्य अपवादो वर्तते ।

'कर्तुमिच्छा' इति विग्रहे सन्नन्तात् चिकीर्ष-धातोः प्राप्तं क्तिनं बाधित्वा प्रकृतसूत्रेण अ-प्रत्यये 'चिकीर्ष अ' इत्यवस्थायाम् "अतो लोपः" इत्यकारलोपे, स्त्रीत्वविवक्षायां टापि 'चिकीर्षा' इत्यस्मात् प्रातिपदिकात् सौ, हल्ङ्यादिलोपे 'चिकीर्षा' इति । एवमेव पुत्रकाम्यनमिति विग्रहे पुत्रकाम्यधातोः पूर्ववत्- पुत्रकाम्या । पुत्रीया । पिपासा । बुभूषा । सुश्रूषा । जिगमिषा । जिज्ञासा । जिघत्सा । बोभूया इत्यपि ।

**गुरोश्च हलः ३ । ३ । १०३ ॥**

**गुरुमतो हलन्तात्स्त्रियामकारः प्रत्ययः स्यात् । ईहा ॥**

क्तिन्-प्रत्ययं बाधित्वाऽनेन अ-प्रत्ययो विधीयते, अतो गुरुमतो हलन्ताद्धातोः क्तिन्-प्रत्ययो न भवति ।

ईहनमिति विग्रहे ईह्-धातोः प्राप्तं क्तिनं बाधित्वा प्रकृतसूत्रेण अ-प्रत्यये, टापि, स्वादिकार्ये 'ईहा' इति । एवमेव ऊहा, श्लाघा, अर्चा, अर्घा, नन्दा, गर्हा इत्यादीनि रूपाण्यपि सिद्ध्यन्ति ।

**षिद्भिदादिभ्योऽङ् ३ । ३ । १०४ ॥**

**जॄष् 'ऋदृशोऽङि गुणः' । जरा । त्रपूष् त्रपा । भिदा । विदारणे एवायम् । भित्तिरन्या । छिदा । मृजा ॥**

षकारेत्संज्ञकेभ्यो धातुभ्यः, भिदादिगणपठितेभ्यो धातुभ्यश्च स्त्रीलिङ्गे भावेऽर्थे अङ्-प्रत्ययो भवति । ङकार इत् ।

जीर्यते अनया - जॄ अङ् - जॄ अ, ङित्वलक्षणं गुणनिषेधं बाधित्वा 'ऋदृशोऽङि गुणः' इति गुणे रपरत्वे- जर् अ - जर - जर टाप् - जर आ - जरा । त्रप्यते इति - त्रपूष् (त्रप्) अङ् - त्रप् अ - त्रप - त्रप टाप् - त्रपा । भेदनम् - भिद् अङ् - भिद् अ - भिद - भिद टाप् - भिदा, विदारणेऽर्थे विद्यमानाद् भिद्-धातोरेव अनेन सूत्रेण अङ्-प्रत्ययो बोध्यः, अन्यत्र तु क्तिन्-प्रत्यये 'भित्तिः' इति । एवं छेदनम् - छिदिर् (छिद्) अङ्- छिदा । मृज्यते इति - मृजूष् (मृज्) अङ्- मृजा ।

**ग.सू. क्रपेः सम्प्रसारणं च । कृपा ॥**

क्रप्-धातोः स्त्रियां भावेऽर्थे अङ्-प्रत्ययः, सम्प्रसारणश्च भवति ।

क्रपणम् - क्रपू (क्रप्) अङ् - कृप् अ (क्रपेः सम्प्रसारणं च) - कृप - कृप टाप् - कृपा ।

**ण्यासश्रन्थो युच् ३ । ३ । १०७ ॥**

**अस्यापवादः । कारणा ॥**

ण्यन्तेभ्यो धातुभ्यः, आस्-धातोः, श्रन्थ्-धातोश्च स्त्रियां भावाद्यर्थे युच्-प्रत्ययो भवति । अनेन सूत्रेण 'अ प्रत्ययात्', 'गुरोश्च हलः' इत्येताभ्यां विहितः अ-प्रत्ययो बाध्यते । चकार इत् ।

'कारणम्' इत्यर्थे ण्यन्तात् कारि-धातोर्युचि- कारि यु - कारि अन (युवोरनाकौ) - कार् अन (णेरनिटि) - कारण (अट्कुप्वाङ्...) - कारण टाप् (आ) - कारणा ।

**रोगाख्यायां ण्वुल् बहुलम् ३ । ३ । १०८ ॥**

**प्रच्छर्दिका । प्रवाहिका । विचर्चिका । क्वचिन्न । शिरोर्तिः ॥**

रोगाख्यायां गम्यमानायां धातोर्ण्वुल्-प्रत्ययो बहुलं भवति । क्तिन्नादिप्रत्ययानामपवादः । आख्याग्रहणेन रोगस्य चेत् प्रत्ययान्तेन संज्ञा भवति ।

प्र + छर्द् ण्वुल् (वु) - प्रच्छर्द् वु (छे च) - प्रच्छर्द् अक (युवोरनाकौ) - प्रच्छर्दक टाप् (आ) - प्रच्छर्दका (अकः सवर्णे दीर्घः) - प्रच्छर्दिका (प्रत्ययस्थात्कात् पूर्वस्यात इदाप्यसुपः) - प्रच्छर्दिका = वमनरोगः। एवं प्र-वह् ण्वुल्- प्रवाहिका (णित्वादुपधावृद्धिश्च) = ग्रहणी। वि-चर्च् ण्वुल्- विचर्चिका = पामा।

**वा. इक्श्तिपौ धातुनिर्देशे। पचिः। पचतिः॥**

**धातुस्वरूपे निर्देष्टव्ये इक्-श्तिपौ प्रत्ययौ भवतः।**

'पच् धातुः' इत्यर्थे- पच् इक् (इ) - पच् इ - पचिः। श्तिप्-पक्षे शित्वात् सार्वधातुकत्वेन शबादिः- पच् श्तिप् (ति) - पच् शप् (अ) ति - पचति - पचतिः।

**वा. वर्णात्कारः। निर्देश इत्येव। अकारः। ककारः॥**

वर्णस्वरूपनिर्देशे कर्तव्ये वर्णानुकरणाद् 'अ, इ, उ' इत्यादिप्रातिपदिकात् कार-प्रत्ययो भवति।

अ इति वर्णस्य निर्देशः - अ कार - अकार - अकारः। एवं क कार - ककारः।

**नपुंसके भावे क्तः ३। ३। ११४॥**

नपुंसकलिङ्गे भावे एवार्थे कालसामान्ये धातोः क्त-प्रत्ययो भवति।

**ल्युट् च ३। ३। ११५॥**

**हसितम्। हसनम्॥**

नपुंसकलिङ्गे भावेऽर्थे धातोर्ल्युट्-प्रत्ययोऽपि भवति।

'हासः' इत्यर्थे हस्-धातोः "नपुंसके भावे क्तः" इति क्त-प्रत्ययेऽनुबन्धलोपे, इडागमे 'हसित' इत्यस्मात् सौ, नपुंसकत्वात् सोरमि, पूर्वरूपे 'हसितम्' इति सिद्ध्यति। अनेन सूत्रेण ल्युट्-प्रत्यये तु योरनादेशे 'हसन' इत्यवस्थायां पूर्ववद् 'हसनम्' इति। एवमेव भू- भूतम्, भवनम्। श्रु- श्रुतम्, श्रवणम्। जि- जितम्, जयनम्। पा- पीतम्, पानम्। शी(ङ्)- शयितम्, शयानम्। हु- हुतम्, हवनम्। हृ- हृतम्, हरणम्। गम्- गतम्, गमनम्। स्ना- स्नातम्, स्नानम्। इत्यादि।

**अवे तृस्त्रोर्घञ् ३। ३। १२०॥**

**अवतारः कूपादेः। अवस्तारो जवनिका॥**

अव-उपसर्गपूर्वकाद् तृधातोः स्तृधातोश्च करणेऽधिकरणे चार्थे घञ्-प्रत्ययो भवति।

'अवतरन्ति अनेन' इति विग्रहे अवपूर्वकात् तृधातोः प्रकृतसूत्रेण घञि, वृद्धौ रपरत्वे, सौ 'अवतारः' इति सिद्ध्यति। एवमेव 'अवस्तीर्यते अनेन' इति विग्रहे अवस्तृधातोर्घञि पूर्ववद्- अवस्तारः।

**हलश्च ३। ३। १२१॥**

**हलन्ताद् घञ्। घापवादः। रमन्ते योगिनोऽस्मिन्निति रामः। अपमृज्यतेऽनेन व्याध्यादिकमित्यपामार्गः॥**

हलन्ताद्धातोः पुंलिङ्गे संज्ञायां विषये करणेऽधिकरणे चार्थे घञ्-प्रत्ययो भवति । विधिरयम् "पुंसि संज्ञायां घः प्रायेण १ । ३ । ११८ ॥" इत्यस्यापवादः ।

'रमन्ते योगिनोऽस्मिन्' इति विग्रहे अधिकरणेऽर्थे रम्धातोः प्राप्तं घ-प्रत्ययं बाधित्वा प्रकृतसूत्रेण घञ्-प्रत्यये 'रम् अ' इति जाते, उपधावृद्धौ, सौ 'रामः' इति सिद्ध्यति । एवम्, अपमृज्यते अनेन - अप-मृज् घञ् - अपमृज् अ - अपामृज् अ (उपसर्गस्य घञ्यमनुष्ये बहुलम्) - अपामार्ज् अ (मृजेर्वृद्धिः) - अपामार्ग् अ (चजोः कु घिण्ण्यतोः) - अपामार्ग - अपामार्गः ।

**ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ३ । ३ । १२६ ॥**

**एषु दुःखसुखार्थेषूपपदेषु खल् । तयोरेवेति भावे कर्मणि च । कृच्छ्रे- दुष्करः कटो भवता । अकृच्छ्रे- ईषत्करः । सुकरः ॥**

कृच्छ्रम् = दुःखम्, तच्च दुस्-शब्दस्य विशेषणम् । अकृच्छ्रम् = सुखम्, तच्च ईषत्-शब्दस्य, सु-शब्दस्य च विशेषणम् ।

दुःखार्थद्योतके दुस्-शब्दे उपपदे, सुखार्थद्योतकयोः ईषत्-सु-शब्दयोरुपपदयोश्च धातोर्भावकर्मणोरर्थयोः खल्-प्रत्ययो भवति । खकार-लकारौ इतौ ।

दुःखेन क्रियते - दुस् कृ खल् - दुस् कृ अ - दुस् कर् अ (सार्वधातु...) - दुस् कर - दुस् + कर (कुगतिप्रादयः, समासः) - दुर् + कर (ससजुषो रुः) - दुः + कर (खरवसानयोर्विसर्जनीयः) - दुष् + कर (इदुदुपधस्य चाप्रत्ययः) - दुष्करः । कर्मणि प्रत्ययविधानाद् अनुक्तकर्तरि भवत्-शब्दे तृतीया, उक्तकर्मणि कट-शब्दे च प्रथमा- 'दुष्करः कटो भवता' इति प्रयोगः । सुखेन क्रियते - ईषत्/सु कृ खल् - ईषत्/सु कृ अ - ईषत्करः/सुकरः ।

**आतो युच् ३ । ३ । १२८ ॥**

**खलोऽपवादः । ईषत्पानः सोमो भवता । दुष्पानः । सुपानः ॥**

ईषत्-दुस्-सु-शब्देषु पूर्ववद् दुःख-सुखार्थेषु उपपदेषु आकारान्ताद् धातोः युच्-प्रत्ययो भवति । पूर्वसूत्रेण प्राप्तः खल्-प्रत्ययोऽनेन बाध्यते । चकार इत् ।

सुखेन पीयते - ईषत् पा युच् (यु) - ईषत् पा अन - ईषत् पान (अकः सवर्णे दीर्घः) - ईषत्पान - ईषत्पानः । एवं सु-शब्दोपपदे- सुपानः । दुःखेन पीयते- दुस् पा युच् (यु) - दुस् पा अन - दुस् पान - दुर् पान - दुः पान - दुष्पान - दुष्पानः ।

**अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा ३ । ४ । १८ ॥**

प्रतिषेधार्थयोरलंखल्वोरूपपदयोः क्त्वा स्यात् । प्राचां ग्रहणं पूजार्थम् । अमैवाव्ययेनेति नियमान्नोपपदसमासः । "दो दद् घोः" । अलं दत्त्वा । घुमास्थेतीत्त्वम् । पीत्वा खलु । अलंखल्वोः किम् ? मा कार्षीत् । प्रतिषेधयोः किम् ? अलङ्कारः ॥

'क्त्वा' इत्यस्य ककार इत् । अत्र "अमैवाव्ययने" इति नियमसूत्रेण निषेधादुपपदसमासो न भवति । क्त्वः ककार इत् । क्त्वा-प्रत्ययान्ताः शब्दा अव्ययसंज्ञका भवन्ति । (क्त्वातोसुन्कसुनः १ । १ । ४०)

'न देयम्' इति विग्रहे 'अलम्' इति प्रतिषेधार्थशब्दोपपदाद् दा-धातोः प्रकृतसूत्रेण क्त्वा-प्रत्ययेऽनुबन्धलोपे 'दा त्वा' इति जाते प्राप्तस्य इडागमस्य निषेधे, "दो दध् घोः" इति सूत्रेण 'दा' इत्यस्य दध्-आदेशे, धकारस्य चर्त्वे 'अलम् दत्त्वा' इति जाते उपपदसमासनिषेधे, मस्यानुस्वारे, क्त्वा-प्रत्ययान्तत्वादव्ययसंज्ञायां सौ, सोर्लुकि 'दत्त्वा' इति सिद्ध्यति । एवं 'न पेयम्' इति विग्रहे 'खलु' इति निषेधार्थकोपपदात् पा-धातोः क्त्वा-प्रत्यये, "घुमास्थागापाजहातिसां हलि" इति सूत्रेण आकारस्य ईत्वे पूर्ववत् 'पीत्वा खलु' इति । 'मा कार्षीत्' इत्यत्र तु अलंखल्वोरभावात् क्त्वा-प्रत्ययाभावे "माङि लुङ्" इति लुङि- मा कार्षीत् इति । तथा च भूषणार्थे वर्तमानाद् 'अलम्' इति शब्दोपपदात् कृधातोस्तु प्रतिषेधार्थत्वाभावात् क्त्वा-प्रत्ययाभावे घञि 'अलङ्कारः' इति ।

**समानकर्तृकयोः पूर्वकाले ३ । ४ । २१ ॥**

**समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात् । 'अव्ययकृतो भावे' । भुक्त्वा व्रजति । द्वित्वमतन्त्रम् । भुक्त्वा पीत्वा व्रजति ॥**

'भोजनानन्तरं गमनं करोति' इति विग्रहे भुज्-धातोः प्रकृतसूत्रेण क्त्वा-प्रत्यये 'भुज् त्वा' इति जाते "चोः कुः" इति सूत्रेण कुत्वे, चर्त्वे, अव्ययत्वे, स्वादिकार्ये 'भुक्त्वा' इति सिद्ध्यति । तथा च - 'भोजनस्य पानस्य च अनन्तरं गच्छति' इति विग्रहे अपेक्षया पूर्वकाले विद्यमानाभ्यां 'भुज्', 'पा' एताभ्यामुभाभ्यामेव धातुभ्यां प्रकृतसूत्रेण क्त्वा-प्रत्यये पूर्ववद् 'भुक्त्वा', 'पीत्वा' इति सिद्ध्यतः । एवं भूत्वा, गत्वा, एधित्वा, हत्वा, स्नात्वा ।

**न क्त्वा सेट् १ । २ । १८ ॥**

**सेट् क्त्वा किन्न स्यात् । शयित्वा । सेट् किम् ? कृत्वा ॥**

इडागमेन सहितः क्त्वा-प्रत्ययः ककारेत्संज्ञकः सन्नपि कित् न भवति ।

'शयनं कृत्वा, शयनस्य अनन्तरं वा' इति विग्रहे उत्तरकालिकक्रियाया विवक्षायां शी(ङ्)-धातोः "समानकर्तृकयोः पूर्वकाले" इति क्त्वा-प्रत्यये, सेट्त्वादिडागमे 'शी इत्वा' इति जाते "यदागमस्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते" इति न्यायेन इडागमेन सहितस्य क्त्वः कित्वाद् गुणनिषेधे प्राप्ते प्रकृतसूत्रेण कित्वनिषेधाद् गुणनिषेधस्याप्यभावे गुणेऽयादेशे, स्वादिकार्ये 'शयित्वा' इति । शयित्वा पठतीति प्रयोगः । अनिट्त्सु तु कित्वाद् गुणनिषेधो भवत्येव । यथा- कृत्वा ।

**रलो व्युपधाद्धलादेः संश्च १ । २ । २६ ॥**

**इवर्णोवर्णोपधाद्धलादेरलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः । द्युतित्वा, द्योतित्वा । लिखित्वा, लेखित्वा । व्युपधात् किम् ? वर्तित्वा । रलः किम् ? सेवित्वा । हलादेः किम् ? एषित्वा । सेट् किम् ? भुक्त्वा ॥**

यस्य धातोः उपधायाम् इवर्णः, उवर्णो वा अस्ति, आदौ च हल्-वर्णो विद्यते, अन्ते च रल्-प्रत्याहारस्थवर्णो वर्तते, तादृशाद् धातोः परतः स्थितौ इडागमसहितौ सन्-क्त्वा-प्रत्ययौ विकल्पेन कितौ भवतः ।

द्युत् क्त्वा (समानकर्तृकयोः पूर्वकाले) - द्युत् त्वा - द्युत् इत्वा (आर्धधातुकस्येड्वलादेः), 'न क्त्वा सेट्' इति कित्वनिषेधे, अनेन सूत्रेण वैकल्पिके कित्वे, कित्वपक्षे लघूपधगुणनिषेधे- द्युतित्वा, कित्वाभावे लघूपधगुणे- द्योतित्वा । एवं लिख्-धातोः क्त्वा-प्रत्यये- लिखित्वा/लेखित्वा ।

**उदितो वा ७ । २ । ५६ ॥**

**उदितः परस्य क्त्वा इड्वा । शमित्वा, शान्त्वा । देवित्वा, 'छ्वोः शूडनुनासिके चे'ति ऊठ्, द्यूत्वा । 'दधातेर्हिः' । हित्वा ॥**

ह्रस्व उकार इत् यस्य स उदित्, तस्मात् उदितो धातोः परस्य क्त्वा-प्रत्ययस्य इडागमो वा भवति ।

शम् क्त्वा (समान...) - शम् त्वा - शम् इत्वा (इदितो वा) - शमित्वा - शमित्वा । इडभावे- शम् त्वा - शाम् त्वा (अनुनासिकस्य क्विझलोः क्ङिति) - शां त्वा (नश्चापदान्तस्य झलि) - शान्त्वा (अनुस्वारस्य ययि परसवर्णः) - शान्त्वा । एवं दिव्-धातोः क्त्वा-प्रत्यये, अनेन इट्पक्षे 'न क्त्वा सेट्' इति कित्वनिषेधाल्लघूपधगुणे- देवित्वा, इडभावे तु 'दिव् त्वा' इत्यवस्थायाम् 'च्छ्वोः शूडनुनासिके च' इति वकारस्य ऊठादेशेऽनुबन्धलोपे 'दि ऊ त्वा' इति जाते, यणि, अव्ययत्वे, स्वादिकार्ये- द्यूत्वा । धा क्त्वा - धा त्वा - हि त्वा (दधातेर्हिः) - हित्वा ।

**समासेऽनञ्पूर्वे क्त्वो ल्यप् ७ । १ । ३७ ॥**

**अव्ययपूर्वपदेऽनञ्समासे क्त्वो ल्यबादेशः स्यात् । तुक् । प्रकृत्य । अनञ् किम् ? अकृत्वा । अव्ययपूर्वपदात् किम् ? परमकृत्वा ॥**

नञ्-समासभिन्ने अव्ययपूर्वपदे सति क्त्वा-प्रत्ययस्य स्थाने 'ल्यप्' इत्यादेशो भवति । ल्यपो लकार-पकारौ इतौ । "ह्रस्वस्य पिति कृति तुक् ६ । १ । ७१" इति पिति कृति परे ह्रस्वस्य तुगागमो भवति । तुक उकार-ककारौ इतौ ।

प्र-पूर्वकात् कृधातोः क्त्वा-प्रत्यये "कुगतिप्रादयः" इति समासे, अव्ययपूर्वपदत्वात् प्रकृतसूत्रेण 'क्त्वा' इत्यस्य स्थाने ल्यबादेशेऽनुबन्धलोपे 'प्रकृ य' इत्यवस्थायां पित्वाद् "ह्रस्वस्य पिति कृति तुक्" इति सूत्रेण 'कृ' इत्यस्य ऋकारस्य तुगागमेऽनुबन्धलोपे 'प्रकृत्य' इत्यस्मात् सौ, स्थानिवत्त्वादव्ययसंज्ञायां सुपो लुकि 'प्रकृत्य' इति सिद्ध्यति । एवं विजि क्त्वा (त्वा) - विजि ल्यप् (य) - विजित् य - विजित्य । ह्रस्वस्यैव तुगागमः- संभूय । आदाय । विलिख्य ।

'न कृत्वा- अकृत्वा' इत्यत्र तु नञ्-समासत्वात् क्त्वा-प्रत्ययस्य ल्यबादेशो न भवति । 'परमकृत्वा' इत्यत्र तु अव्ययपूर्वपदत्वाभावाद् ल्यबभावो बोध्यः । ल्यपि परे "न ल्यपि ६ । ४ । ६९ ॥" इति वक्ष्यमाणसूत्रेण 'घु-मा-स्थे'ति प्राप्तम् ईत्वं निषिद्ध्यते । यथा- निपाय । निर्माय ।

**वा ल्यपि ६ । ३ । ३१ ॥**

**अनुदात्तोपदेशानां वनति-तनोत्यादीनामनुनासिकलोपो वा स्याल्ल्यपि । व्यवस्थितविभाषेयम् । तेन मान्तानिटां वा नान्तनिटां वनादीनां च नित्यम् । आगत्य, आगम्य । प्रणत्य, प्रणम्य । प्रहत्य । प्रमत्य । प्रवत्य । वितत्य ॥**

वनति इत्यनेन भ्वादिगणस्य सम्भक्त्यर्थकस्य वन्-धातोर्ग्रहणम् । तनोत्यादिपदेन तनादिगणस्य तन्, क्षण्, क्षिण्, ऋण्, तृण्, घृण्, वन्, मन् इत्येते धातवो गृह्यन्ते । लोपोऽयं व्यवस्थितः, व्यवस्थितविभाषायाः कारणेन मकारान्तानाम् अनिट्-धातूनाम् अनुनासिकस्य विकल्पेन लोपो भवति, नकारान्तानाम् अनिट्-धातूनां तु नित्यमेम अनुनासिकलोपो भवति ।

आ(ङ्) गम् + क्त्वा (त्वा) (समानकर्तृकयोः पूर्वकाले) - आगम् ल्यप् (य) (समासेऽनञ्पूर्वे क्त्वो ल्यप्) - आग य (वा ल्यपि) - आगत् य (ह्रस्वस्य पिति कृति तुक्) - आगत्य । अत्र मान्तानिट्त्वाद् अनेन सूत्रेण विभाषया अनुनासिकमकारलोपः, अन्ये पक्षे- आगम् य - आगम्य । एवमेव प्रनम्- प्रणत्य/प्रणम्य । प्रहन् + क्त्वा (त्वा) - प्रहन् ल्यप् (य) - प्रह य - प्रहत् य - प्रहत्य, अत्र नान्तानिट्त्वाद् अनेन सूत्रेण नित्यमनुनासिकलोपो बोध्यः । एवं प्रमन्- प्रमत्य । प्रवन्- प्रवत्य । वितन्- वितत्य ।

**आभीक्ष्ण्ये णमुल् च ३ । ४ । २२ ॥**

**आभीक्ष्ण्ये द्योत्ये पूर्वविषये णमुल् स्यात् क्त्वा च ॥**

आभीक्ष्ण्यम् = पौनःपुन्यम् । अभीक्ष्ण्यविशिष्टेऽर्थे (पौनःपुन्ये) गम्यमाने समानकर्तृकयोर्धात्वर्थयोर्मध्ये पूर्वकाले विद्यमानाद्धातोर्णमुल्-प्रत्ययो भवति, सूत्रे चकारपाठात् क्त्वा-प्रत्ययश्च भवति । द्विर्वचनसहितौ क्त्वा-णमुलौ आभीक्ष्ण्यं द्योतयतः, न केवलौ । णमुल उकार-णकार-लकारा इतः, 'अम्' इत्येव शिष्यते ।

**नित्यवीप्सयोः ८ । १ । ४ ॥**

**आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्वित्वं स्यात् । आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञकेषु कृदन्तेषु च । स्मारं स्मारं नमति शिवम् । स्मृत्वा स्मृत्वा । पायम्पायम् । भोजम्भोजम् । श्रावं श्रावम् ॥**

सूत्रे नित्यशब्देन नित्यत्वं विवक्षितम्, तच्च आभीक्ष्ण्यम् । आभीक्ष्ण्यं च क्रियानिष्ठधर्मः । आभीक्ष्ण्यं तिङन्तेषु, अव्ययसंज्ञककृदन्तेषु च भवति । यथा- स्मारं स्मारं नमति शिवम् । व्याप्तेरिच्छा वीप्सा, सा च प्रयोक्तुर्धर्मः । यथा- वृक्षं वृक्षं प्रति, ग्रामो ग्रामो रमणीयः ।

स्मारं स्मारं नमति शिवम् अत्र आभीक्ष्णेऽर्थे द्योत्ये समानकर्तृकयोर्धात्वर्थयोर्मध्ये पूर्वकाले विद्यमानात् स्मृ-धातोः "आभीक्ष्ण्ये णमुल् च" इति सूत्रेण णमुल्-प्रत्यये उकारणकारलकाराणामित्संज्ञायां लोपे 'स्मृ अम्' इति जाते णित्वाद् ऋकारस्य वृद्धौ रपरत्वे 'स्मारम्' इति जाते, मान्तकृत्वादव्ययसंज्ञायां सौ, सुब्लुकि, प्रकृतसूत्रेण 'स्मारम्' इति पदस्य द्वित्वे 'स्मारं स्मारं नमति शिवम्' इति । अन्ये पक्षे "आभीक्ष्ण्ये णमुल् च" इत्यनेनैव सूत्रेण क्त्वा-प्रत्यये पूर्ववत्प्रक्रियया 'स्मृत्वा स्मृत्वा नमति शिवम्' इत्यपि सिद्ध्यति । एवमेव - पायम्पायं भुङ्क्ते, पीत्वा पीत्वा भुङ्क्ते । भोजम्भोजं हसति, भुक्त्वा भुक्त्वा हसति । श्रावं श्रावं मुञ्चति, श्रुत्वा श्रुत्वा मुञ्चति । इत्यादि ।

## अभ्यासः

### १. सूत्राणि तेषामर्थं च लिखत

(क) तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्

(ख) भावे

(ग) एरच्

(घ) स्त्रियां क्तिन्

(ङ) हलश्च

(च) न क्त्वा सेट्

### २. प्रश्नानामुत्तराणि देयानि

(क) 'उपसमाधानम्' इति पदस्य कोऽर्थः ?

(ख) मान्तकृदन्तानां केन सूत्रेण अव्ययसंज्ञा क्रियते ?

(ग) कालार्थेषूपपदेषु धातोः को प्रत्ययो भवति ?

(घ) सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोः केन सूत्रेण कः प्रत्ययो भवति ?

(ङ) "अकर्तरि च कारके संज्ञायाम्" इति सूत्रेण कस्मिन्नर्थे कः प्रत्ययो विधीयते ?

(च) 'रङ्गः' इति प्रयोगे रञ्जेर्नलोपो कथं न भवति ?

(छ) प्रत्ययान्ताद्धातोः स्त्रियां भावे कः प्रत्ययो भवति ?

(ज) गुरुमतो हलन्ताद्धातोः कस्मिन् लिङ्गे अकारप्रत्ययो भवति ?

(झ) नपुंसकलिङ्गे भावेऽर्थे धातोः कौ प्रत्ययौ भवतः ?

(ञ) 'अवतारः' इति पदस्यार्थं विलिख्य तत्र घञ्विधायकं सूत्रं लिखत ।

(ट) 'रमन्ते योगिनोऽस्मिन्' इति विग्रहे किं रूपं निष्पद्यते ?

(ठ) 'अलङ्करोतीति अलङ्कारः' इत्यस्मिन् प्रयोगे 'अलम्' इत्युपपदात् तृधातोः कथं क्त्वाप्रत्ययो न भवति ?

(ड) कीदृशः क्त्वाप्रत्ययो कित् न भवति ?

(ढ) कस्मिन्नवस्थायां क्त्वो ल्यबादेशो भवति ?

(ण) पिति कृति परे ह्रस्वस्य तुगागमविधायकं सूत्रं लिखत ।

(त) 'आभीक्ष्ण्यम्' इति पदस्य कोऽर्थः ? तच्च कुत्र कुत्र भवति ?

(थ) 'निवासचितिO' इति सूत्रं पूरयत ।

### ३. अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत

गत्वा, भवितुम्, पाठकः, कृतिः, भावः, रागः, रङ्गः, कायः, यवः, विपत्ति, पुत्रकाम्या, ऊहा, दत्तम्, श्रवणम्, अवस्तारः, अलं गत्वा, पीत्वा खलु, जग्ध्वा, आकर्ण्य, स्मारं स्मारम् ।

## ४. प्रकृतिप्रत्ययौ पृथक् कुरुत

श्रावकः, गन्तुम्, हरणम्, गतिः, प्रदाय, लिखित्वा, प्रयुज्य, पिपासा, पातुम्, अवतारः, नन्दा, आपत्ति, लूनिः, स्तवः, जयः, निकायः, हारः, लाभः, अत्तुम् ।

## ५. प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत

हन् + तुमुन्, जि + ण्वुल्, धा + क्त्वा, नश् + घञ्, भू + क्तिन्, दा + क्त्वा, वि + जि + ल्यप्, चि + अच्, भज् + क्तिन्, पठ् + घञ्, मन् + क्तिन्, नश् + क्त, अद् + क्त, मन् + क्त्वा, वि + स्मृ + ल्यप् ।

## ६. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत

द्रष्टुम्, दर्शकः, कालो भोक्तुम्, पाकः, रागः, गोमयनिकायः, चयः, करः, कृतिः, संपत्ति, चिकीर्षा, ईहा, हसितम्, पठनम्, रामः, अलं दत्त्वा, भुक्त्वा, शयित्वा, प्रकृत्य, स्मारं स्मारम् ।

## ७. समुचितपदं चित्वा रिक्तस्थानं पूरयत

(क) घञ्प्रत्ययान्ता अप्प्रत्ययान्ताश्च शब्दा ...................... प्रयुज्यन्ते ।

(पुंलिङ्गे, स्त्रीलिङ्गे, नपुंसकलिङ्गे)

(ख) क्रियानिमित्तकक्रियोपपदे ...................... अर्थे धातोः तुमुन्ण्वुलौ भवतः ।

(भूते, वर्तमाने, भविष्यति)

(ग) आभीक्ष्ण्येऽर्थे द्योत्ये समानकर्तृकयोर्धात्वर्थयोर्मध्ये पूर्वकाले विद्यमानाद्धातोः ...................... प्रत्ययौ भवतः ।

(क्त्वाणमुलौ, क्तिन्णमुलौ, क्त्वातुमुनौ)

(घ) ...................... अर्थे द्योत्ये पदस्य द्वित्वं भवति ।

(आभीक्ष्ण्ये, वीप्सायाम्, आभीक्ष्ण्ये वीप्सायां च)

(ङ) क्त्वाप्रत्ययान्तानां शब्दानामव्ययसंज्ञा ...................... सूत्रेण भवति ?

(कृन्मेजन्तः, क्त्वातोसुन्कसुनौ)

(च) रज्यत्यस्मिन्निति विग्रहे रञ्ज्-धातो ...................... रूपं सिद्ध्यति ।

(रागः, रङ्गः)

## ८. "समानकर्तृकयोः पूर्वकाले" इति सूत्रस्यार्थं सोदाहरणं प्रकाशयत ।

## ९. समीचीनत्वासमीचीनत्वं समुचितचिह्नाभ्यां दर्शयत

(क) अव्ययपूर्वपदे नञ्समासे क्त्वो ल्यबादेशो भवति ।

(ख) आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञकेषु कृदन्तेषु च भवति ।

(ग) समानकर्तृकयोर्धात्वर्थयोर्मध्ये उत्तरकाले विद्यमानाद्धातोः क्त्वाप्रत्ययो भवति ।

(घ) गुरुमतो हलन्ताद्धातोः क्तिन्प्रत्ययो भवति ।

(ङ) संपदादिगणपठितेभ्यो धातुभ्यः क्तिन्नपीष्यते ।

(च) इवर्णान्ताद्धातोः भावे कर्तृभिन्ने कारके चार्थे घञ्प्रत्ययो भवति ।

(छ) क्त्वाप्रत्ययान्ताः शब्दा अव्ययसंज्ञका भवन्ति ।

**१०. हसन-शब्दस्य सर्वासु विभक्तिषु सर्वेषु वचनेषु च रूपाणि लिखत ।**

**११. कृति-शब्दस्य सर्वासु विभक्तिषु सर्वेषु वचनेषु च रूपाणि लिखत ।**

**१२. राम-शब्दस्य सर्वासु विभक्तिषु सर्वेषु वचनेषु च रूपाणि लिखत ।**

**१३. तुमुन्प्रत्ययान्तानि ण्वुल्प्रत्ययान्तानि च पदानि प्रयुज्य एकमनुच्छेदं विलिख्य कक्षायां श्रावयत ।**

**१४. क्त्वाप्रत्ययान्तानि ल्यप्प्रत्ययान्तानि च पदानि प्रयुज्य आत्मन एकदिवसस्य कार्यकलापान् लिखित्वा शिक्षकं दर्शयत ।**

## मिश्रिताभ्यासः

**१. धातुभिः सह प्रत्ययान् योजयित्वा तालिकां पूरयत**

| धातुः | क्त | क्तवतु | क्त्वा | तुमुन् | शतृ | तव्य | अनीयर् | |
|---|---|---|---|---|---|---|---|---|
| यथा | कृ | कृत | कृतवत् | कृत्वा | कर्तुम् | कुर्वत् | कर्तव्य | करणीय |
| गम् | ...... | .......... | ........ | ........ | ........ | .......... | ............ | |
| स्था | ...... | .......... | ........ | ........ | ........ | .......... | ............ | |
| श्रु | ...... | .......... | ........ | ........ | ........ | .......... | ............ | |
| पठ् | ...... | .......... | ........ | ........ | ........ | .......... | ............ | |
| भू | ...... | .......... | ........ | ........ | ........ | .......... | ............ | |
| पत् | ...... | .......... | ........ | ........ | ........ | .......... | ............ | |
| पा | ...... | .......... | ........ | ........ | ........ | .......... | ............ | |
| दा | ...... | .......... | ........ | ........ | ........ | .......... | ............ | |
| पच् | ...... | .......... | ........ | ........ | ........ | .......... | ............ | |

**२. कृत-कृतवत्-कुर्वत्-कर्तव्य-करणीयशब्दानां त्रिषु लिङ्गेषु रूपाणि लिखत ।**

# अथ समासप्रकरणम्

## समासपरिचयः

**समासः पञ्चधा । तत्र समसनं समासः । स च विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः ॥१॥ प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः ॥२॥ प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषस्तृतीयः ॥ तत्पुरुषभेदः कर्मधारयः । कर्मधारयभेदो द्विगुः ॥३॥ प्रायेणान्यपदार्थप्रधानो बहुव्रीहिश्चतुर्थः ॥४॥ प्रायेणोभयपदार्थप्रधानो द्वन्द्वः पञ्चमः ॥५॥**

समसनं समासः । भिन्नार्थकयोर्द्वयोः पदयोर्बहूनां वा पदानामेकपदीभवनमेव समासः । समासः पञ्चविधो वर्तते । यथा-

१. केवलसमासः- विशेषसंज्ञारहितः केवलसमासः प्रथमः समासो वर्तते । यथा - पूर्वं भूतः, भूतपूर्वः । वागर्थौ इव, वागर्थाविव ।

२. अव्ययीभावसमासः- अस्मिन् समासे अव्ययपदानां सुबन्तेन सह विभक्त्यादिष्वर्थेषु समासो भवति । अव्ययीभावसमासे प्रायेण पूर्वपदस्य अर्थस्य प्राधान्यं भवति । यथा- हरौ इति, अधिहरि । अत्र सप्तमीविभक्तेरर्थद्योतकस्य पूर्वस्थस्य 'अधि' इति पदार्थस्य प्रधानता वर्तते । कुत्रचित्तु उत्तरपदार्थप्रधानोऽपि अव्ययीभावसमासो दृश्यते । यथा- शाकस्य लेशः, शाकप्रति । कुत्रचित्तु उभयपदार्थप्रधानोऽपि द्रष्टुं शक्यते । यथा- उन्मत्ता गङ्गा यस्मिन् तत्, उन्मत्तगङ्गम् । एवं लोहितगङ्गम् । अत एव प्रायेण इत्युक्तम् ।

३. तत्पुरुषसमासः- तत्पुरुषसमासे प्रायेण उत्तरपदार्थस्य प्राधान्यं भवति । यथा- राज्ञः पुरुषः, राजपुरुषः । अत्र उत्तरस्थस्य 'पुरुष' इति पदस्य अर्थस्य प्रधान्यं वर्तते । प्रायेणेति कथनात् कुत्रचित् पूर्वपदार्थस्य कुत्रचित्तु अन्यपदार्थस्य प्राधान्यमपि द्रष्टुं शक्यते । यथा- 'पिप्पल्या अर्धम्, अर्धपिप्पली' इत्यत्र पूर्वस्थस्य अर्धशब्दस्य प्राधान्यं वर्तते । एवमेव 'पञ्चानां तन्त्राणां समाहारः, पञ्चतन्त्रम्' अत्र अन्यपदार्थसमाहारस्य प्राधान्यमस्ति । तत्पुरुष समासः पुनर्द्विविधः - व्यधिकरणः, समानाधिकरणश्च । यत्र विरुद्धविभक्तिकयोः पदयोः समासः स व्यधिकरणतत्पुरुषः ।

स च द्वितीयादिभेदेन अनेकविधः। समानविभक्तिकपदयोः पदानां वा विशेष्यविशेषणभावसम्बन्धे समासः समानाधिकरणतत्पुरुषः, स च 'कर्मधारयः' इति नाम्ना प्रसिद्धः। यथा- नीलञ्च तदुत्पलम्, नीलोत्पलम्। सङ्ख्यापूर्वकसमाहारतत्पुरुषस्तु द्विगुसमास उच्यते। यथा - पञ्चानां पात्राणां समाहारः, पञ्चपात्रम्।

४. बहुव्रीहिसमासः - यत्र अन्यपदार्थस्य प्राधान्यं भवति स बहुव्रीहिसमासः। अत्र अस्य-यस्याद्यन्यपदार्थस्य प्राधान्यं भवति। यथा- पीतम् अम्बरं यस्य सः, पीताम्बरः। अत्र न च पूर्वपदार्थस्य न वोत्तरपदस्यार्थस्य प्राधान्यमपितु अन्यपदार्थस्य प्राधान्यं वर्तते। पीताम्बरः = विष्णुः। प्रायेणेति कथनात् कुत्रचिदुभयपदार्थप्रधानोऽपि भवतीति बोध्यम्। यथा- द्वौ वा त्रयो वा, द्वित्राः। बहुव्रीहिसमासश्च द्विपदानेकपदादिभेदेन अनेकविधः।

५. द्वन्द्वसमासः- यत्र उभयपदार्थस्य प्राधान्यं भवति स द्वन्द्वसमासः। यथा- हरिश्च हरश्च, हरिहरौ। द्वन्द्वसमासश्च द्विविधः- इतरेतरयोगः, समाहारश्च। 'ईशश्च कृष्णश्च, ईशकृष्णौ' इतीतरेतरयोगद्वन्द्वः। समाहारद्वन्द्वस्तु 'मुखं च नासिका च, मुखनासिकम्' इति।

## केवलसमासप्रकरणम्

**समर्थः पदविधिः २।१।१॥**

**पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः॥**

परिभाषासूत्रमिदम्। विधीयते इति विधिः, पदानां विधिः पदविधिः, स पुनः समासादिः। समर्थः = शक्तः। विग्रहवाक्यार्थभिधाने यः शक्तः स समर्थो वेदितव्यः, अथ वा समर्थपदाश्रयत्वात् समर्थः। व्याकरणशास्त्रे पदसम्बन्धी यो विधिः स संसृष्टार्थकपदाश्रितो बोध्य इति सूत्रार्थः। यत्र एकार्थीभावरूपः सामर्थ्यो भवति तत्रैव समासादयः पदसम्बन्धिनो विधयो भवन्तीत्यर्थः।

सामर्थ्यं द्विविधम्- व्यपेक्षारूपम्, एकार्थीभावरूपं च। तत्र- विशिष्टा अपेक्षा, व्यपेक्षा इति व्युत्पत्तिः, समर्थपदश्चात्र 'सम्बद्धार्थः' इति व्युत्पत्त्या निष्पद्यते। आकाङ्क्षादिवशात् पदानां परस्परसम्बन्धो व्यपेक्षा, तद्रूपं सामर्थ्यं वाक्ये एव भवति। यथा- राज्ञः पुरुषः। एकार्थीभावलक्षणसामर्थ्यं तु प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन पृथग्गृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादकतारूपम्। अत्र च सङ्गतार्थः = संसृष्टार्थः समर्थ इति व्युत्पत्तिर्ज्ञेया। सङ्गतिः संसर्गश्च एकीभाव एव। इदञ्च सामर्थ्यम् (एकार्थीभावरूपम्) समासादिवृत्तौ एव भवति। यथा- राजपुरुषः।

**प्राक्कडारात्समासः २।१।३॥**

**कडाराः कर्मधारय इत्यतः प्राक् समास इत्यधिक्रियते॥**

**सह सुपा २।१।४॥**

**सुप् सुपा सह वा समस्यते॥ समासत्वात्प्रातिपदिकत्वेन सुपो लुक्। परार्थाभिधानं वृत्तिः। कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः। वृत्त्यर्थावबोधकं वाक्यं विग्रहः। स च**

**लौकिकोऽलौकिकश्चेति द्विधा। तत्र पूर्वं भूत इति लौकिकः। 'पूर्व अम् भूत सु' इत्यलौकिकः। भूतपूर्वः। भूतपूर्वे चरडिति निर्देशाद् भूतेत्यस्य पूर्वनिपातः।**

व्याकरणशास्त्रे कृदन्त-तद्धितान्त-समासैकशेष-सनाद्यन्तधातुरूपाणामर्थस्य बोधकं वाक्यं विग्रह इत्युच्यते। स च द्विधा- लौकिकः, अलौकिकश्च। लोके प्रयोगार्हः साधुर्लौकिकविग्रहः। यथा- पूर्वं भूतः इति। लोके प्रयोगानर्हः प्रक्रियानिर्वाहाय एव प्रदर्शितोऽसाधुरलौकिकविग्रहः। यथा- पूर्व + अम् + भूत + सु इति। समासानन्तरम् "कृत्तद्धितसमासाश्च" इति प्रातिपदिकसंज्ञा भवति, ततः "सुपो धातुप्रातिपदिकयोः" इति सुपो लुग्भवति। "भूतपूर्वे चरट्" इति सूत्रनिर्देशात् (तत्र भूत-शब्दस्य पूर्वप्रयोगात्) भूत-शब्दस्य पूर्वप्रयोगो भवति। एकदेशविकृतमनन्यवदिति न्यायात् समस्तशब्दस्य प्रातिपदिकसंज्ञायां सिद्धायां तस्मात् स्वादयः प्रत्यया उत्पद्यन्ते। 'पूर्वं भूतः' इति लौकिकविग्रहे 'पूर्व + अम् + भूत + सु' इत्यलौकिकविग्रहे, अनेन सूत्रेण समासे, भूतशब्दस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'भूतपूर्व' इति जाते, प्रातिपदिकसंज्ञायां पुंलिङ्गे सौ, विभक्तिकार्ये 'भूतपूर्वः' इति सिद्ध्यति। विशेष्यनिघ्नलिङ्गत्वात् पूर्वं भूता इति विग्रहे- भूतपूर्वा, पूर्वं भूतम् इति विग्रहे- भूतपूर्वम् इति। एवं पूर्वं श्रुतः, श्रुतपूर्वः स्वरः, पूर्वं श्रुता, श्रुतपूर्वा कथा, पूर्वं श्रुतम्, श्रुतपूर्वं शास्त्रम् इत्यादि।

**वा. इवेन वा समासो विभक्त्यलोपश्च। वागर्थौ इव वागर्थाविव॥**

सुबन्तः समर्थः 'इव' इति शब्देन सह विकल्पेन समस्यते, विभक्तेरलोपश्च भवति।

'वाक् च अर्थश्च' इति विग्रहे द्वन्द्वसमासेन 'वागर्थौ' इति सिद्ध्यति। 'वागर्थौ इव' इति लौककविग्रहे 'वागर्थ + औ + इव' इत्यलौकिकविग्रहे प्रकृतवार्तिकेन समासे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि प्राप्ते, प्रकृतवार्तिकेनैव तस्य निषेधे, तेन सुपोऽलुकि, वृद्धौ 'वागर्थौ इव' इत्यवस्थायाम् औकारस्य स्थाने आवादेशे 'वागर्थाविव' इति जाते एकदेशविकृतन्यायेन प्रातिपदिकसंज्ञायां सौ, अव्ययत्वाद् विभक्तेर्लुकि 'वागर्थाविव' इति सिद्ध्यति।

## प्रयोगसिद्धिप्रकारः

### भूतपूर्वः

'पूर्वं भूतः' इति लौकिकविग्रहे 'पूर्व + अम् + भूत + सु' इत्यलौकिकविग्रहे "सह सुपा" इति सूत्रेण समासे, समासत्वात् "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इति सूत्रेण सुपो लुकि 'पूर्व भूत' इति जाते "भूतपूर्वे चरट्" इति निर्देशाद् भूतशब्दस्य पूर्वनिपाते 'भूतपूर्व' इति जाते, एकदेशविकृतमनन्यदिति न्यायात् तस्य एकदेशविकृतन्यायेन प्रातिपदिकत्वेन सौ, सकारस्य रुत्वे विसर्गे 'भूतपूर्वः' इति रूपं सिद्ध्यति।

## अभ्यासः

१. **"समर्थः पदविधिः", "सह सुपा" इत्यनयोः सूत्रयोरर्थं लिखत ।**

२. **प्रश्नानामुत्तराणि देयानि**

(क) किं नाम समासत्वम् ?

(ख) समासः कतिविधः ? सोदाहरणं तस्य भेदान् लिखत ।

(ग) केवलसमासः कः ?

(घ) उभयपदार्थप्रधानः समासः कः ?

(ङ) कर्मधारयसमासस्य एकमुदाहरणं लिखत ।

(च) 'राजपुरुषः' इत्यत्र कः समासः ?

(छ) कस्मिन् समासेऽन्यपदार्थस्य प्राधान्यं भवति ?

(ज) कीदृशस्य तत्पुरुषसमासस्य नाम द्विगुः ?

(झ) 'अधिहरि' इत्यत्र कस्य पदार्थस्य प्राधान्यं वर्तते ?

(ञ) कस्य केन सह समासो भवति ? सुबन्तस्य समर्थेन सुबन्तेन सह समासो भवति ।

(ट) विग्रहस्य कति भेदाः सन्ति ? के च ते ? विग्रहस्य द्वौ भेदौ स्तः ।

(ठ) समासे जाते प्रातिपदिकसंज्ञाविधायकं सूत्रं लिखत ।

(ड) समासे जाते केन सूत्रेण सुपो लुग्भवति ?

(ढ) "इवेन वा०" इति वार्तिकं पूरयित्वा सोदाहरणं तस्यार्थं लिखत ।

(ण) 'भूतपूर्व' इत्यत्र भूतशब्दस्य पूर्वप्रयोगे कारणं किम् ?

३. **विशेष्यपदेन सह विशेषणपदस्य मेलनं विधाय वाक्यानि रचयत**

| | |
|---|---|
| भूतपूर्वाः | स्वरः |
| श्रुतपूर्वः | कथा |
| कृतपूर्वम् | प्रधानमन्त्रिणः |
| दृष्टपूर्वम् | कार्यम् |
| गतपूर्वम् | चलचित्रम् |
| कथितपूर्वा | वनम् |

४. **भूतपूर्वः, श्रुतपूर्वः, वागर्थाविव, इति त्रीणि पदानि प्रयुज्य प्रत्येकं त्रीणि वाक्यानि रचयत ।**

५. **श्रुतपूर्वः, दृष्टपूर्वम्, ज्ञातपूर्वा, इति समस्तपदानां विग्रहं प्रदर्शयत ।**

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

श्रुतपूर्वः, भूतपूर्वः, वागर्थाविव, कथितपूर्वः, दृष्टपूर्वः ।

७. **लौकिकालौकिकविग्रहयोः सोदाहरणं परिचयं देयम् ।**

८. **वृत्तिः का ? वृत्तयः कति सन्ति ? काश्च ताः ?**

९. **केवलसमासयुक्तानि पदानि प्रयुज्य एकमनुच्छेदं लिखित्वा शिक्षकं दर्शयत ।**

१०. **समुचितं विशेष्यपदं योजयित्वा वाक्येषु प्रयोगकौशलं दर्शयत**

दृष्टपूर्वा ................

गतपूर्वम् ................

भूतपूर्वः ................

कथितपूर्वा ................

श्रुतपूर्वः ................

ज्ञातपूर्वम् ................

# अथाव्ययीभावसमासः

**अव्ययीभावः २ । १ । ५ ॥**

**अधिकारोऽयं प्राक् तत्पुरुषात् ॥**

इति सूत्रादूर्ध्वं 'तत्पुरुषः २ । १ । २२ ॥' इति सूत्रात् प्राग् यानि समासविधायकानि सूत्राणि तेषु 'अव्ययीभावः' इति संज्ञापदमुपतिष्ठत इत्याशयः ।

**अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्य-सम्पत्तिसाकल्यान्तवचनेषु २ । १ । ६ ॥**

**विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते सोऽव्ययीभावः । प्रायेणाविग्रहो नित्यसमासः । प्रायेणास्वपदविग्रहो वा । विभक्तौ हरि ङि अधि इति स्थिते ।**

विभक्त्यर्थे, समीपार्थे, समृद्ध्यर्थे, व्यृद्ध्यर्थे, अर्थाभावार्थे, अत्ययार्थे, असंप्रत्यर्थे, शब्दप्रादुर्भावार्थे, पश्चादर्थे, यथार्थे, आनुपूर्व्यार्थे, यौगपद्यार्थे, सादृश्यार्थे, संपत्त्यर्थे, साकल्यार्थे, समाप्त्यर्थे च वर्तमानस्य अव्ययस्य सुबन्तसमर्थेन सह नित्यं समासो भवति, स समासोऽव्ययीभावसंज्ञकश्च भवति ।

प्रायेण समस्तसमासविधिर्वैकल्पिको भवति, तेन समस्तपदानि तद्विग्रहवाक्यानि च वाक्येषु प्रयोगार्हाणि भवन्ति । परमत्र सूत्रेण नित्यं समासो विहितो विद्यते । नित्यसमासः प्रायेण विग्रहवाक्यरहितः, अश्वपदविग्रहो वा भवति । न स्वपदैर्विग्रहो यत्रेति अस्वपदविग्रहः, समस्तपदे स्थितानि सर्वाणि पदानि विग्रहवाक्ये न दृश्यन्ते चेत् सोऽश्वपदविग्रहो कथ्यते ।

विभक्त्यर्थे वर्तमानस्य 'अधि' इत्यव्ययस्य हरि-शब्देन सह समासे 'हरि ङि अधि' इति स्थिते-

**प्रथमानिर्दिष्टं समास उपसर्जनम् २ । २ । ४३ ॥**

**समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात् ॥**

समासविधायकसूत्रे प्रथमान्तपदेन निर्दिष्टं सुबन्तमुपसर्जनसंज्ञं भवति ।

**उपसर्जनं पूर्वम् २ । २ । ३० ॥**

**समासे उपसर्जनं प्राक्प्रयोज्यम् । इत्यधेः प्राक् प्रयोगः । सुपो लुक् । एकदेशविकृतस्यानन्यत्वात्प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिः । अव्ययीभावश्चेत्यव्ययत्वात्सुपो लुक् । अधिहरि ॥**

समासे उपसर्जनसंज्ञक-शब्दस्य पूर्वप्रयोगो भवति । अनेन सूत्रेण उपसर्जनसंज्ञकस्य अधि-शब्दस्य पूर्वप्रयोगः । समासत्वाद् 'हरि ङि अधि' इत्यस्य 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञा, ततः 'सुपो धातुप्रातिपदिकयोः' इति सुपो लुक् । 'एकदेशविकृतमनन्यवत्' इति नियमेन प्रातिपदिकत्वात् सुबुत्पत्तिः । 'अव्ययीभावश्च' इति अव्ययत्वाद् 'अव्ययादाप्सुपः' इति सुपो लुक् ।

'हरौ' इति लौकिकविग्रहे 'हरि + ङि + अधि' इत्यलौकिकविग्रहे 'अव्ययं विभक्ति०' इत्यदिना सूत्रेण सप्तमीविभक्त्यर्थे वर्तमानस्य 'अधि' इत्यव्ययस्य सप्तम्यन्त-हरिशब्देन सह समासे, समासविधायके 'अव्ययं विभक्ति०' इति सूत्रे 'अव्ययम्' इति प्रथमान्तपदेन 'अधि' इत्यस्य निर्दिष्टत्वात् 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यनेन 'अधि' इत्यस्योपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इत्यनेन उपसर्जनसंज्ञकस्य 'अधि' शब्दस्य पूर्वप्रयोगे 'अधि हरि ङि' इति जाते समासत्वात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायाम् 'सुपो धातुप्रातिपदिकयोः' इति सुपो लुकि 'अधिहरि' इत्यस्य 'एकदेशविकृतमनन्यवत्' इति परिभाषया प्रातिपदिकत्वे ततः सौ 'अव्ययीभावश्च' इत्यव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' इति सोर्लुकि 'अधिहरि' इति सिद्ध्यति । अव्ययत्वात् सर्वासु विभक्तिषु, सर्वेषु वचनेषु च 'अधिहरि' इत्येव रूपम् ।

**अव्ययीभावश्च २ । ४ । १८ ॥**

**अयं नपुंसकं स्यात् ॥**

अव्ययीभावसमासेन निष्पन्नः शब्दो नपुंसकलिङ्गे प्रयुज्यते ।

**नाव्ययीभावादतोऽम्त्वपञ्चम्याः २ । ४ । ८३ ॥**

**अदन्तादव्ययीभावात्सुपो न लुक्, तस्य पञ्चमीं विना अमादेशश्च स्यात् ॥ गाः पातीति गोपास्तस्मिन्नित्यधिगोपम् ॥**

अकारान्ताद् अव्ययीभावसमासात् परस्य सुपो लुग् न भवति, पञ्चमीविभक्तिभिन्नस्य तस्य सुपः स्थाने अमादेशश्च भवति । गाः पातीत्यर्थे गोपाशब्दः, तस्य ङि-विभक्तौ गोपि । 'गोपि' इति लौकिकविग्रहे, 'गोपा ङि अधि' इत्यत्र 'अव्ययं विभक्ति०' इत्यादिना विभक्त्यर्थे वर्तमानस्य 'अधि' इत्यव्ययस्य 'गोपा ङि' इत्यनेन सह समासे, उपसर्जनत्वाद् अधि-शब्दस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'अधिगोपा' इत्यस्य 'अव्ययीभावश्च' इति नपुंसकत्वाद् 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे 'अधिगोप', तस्मात् सौ, अव्ययत्वाद् 'अव्ययादाप्सुपः' इति सोर्लुकि प्राप्ते तं प्रबाध्य अनेन सूत्रेण सोरमि 'अमि पूर्वः' इति पूर्वरूपे 'अधिगोपम्' इति ।

**तृतीयासप्तम्योर्बहुलम् २ । ४ । ८४ ॥**

**अदन्तादव्ययीभावात्तृतीयासम्तम्योर्बहुलमम्भावः स्यात् । अधिगोपम्, अधिगोपेन, अधिगोपे वा । कृष्णस्य समीपम् उपकृष्णम् । मद्राणां समृद्धिः सुमद्रम् । यवनानां व्यृद्धिर्दुर्यवनम् । मक्षिकाणामभावो निर्मक्षिकम् । हिमस्यात्ययोऽतिहिमम् । निद्रा संप्रति न युज्यत इत्यतिनिद्रम् । हरिशब्दस्य प्रकाश इतिहरि । विष्णोः पश्चादनुविष्णु । योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः । रूपस्य योग्यमनुरूपम् । अर्थमर्थं प्रति प्रत्यर्थम् । शक्तिमनतिक्रम्य यथाशक्ति ।**

ह्रस्व-अकारान्ताद् अव्ययीभावसमासात् परतः तृतीयाविभक्तेः सप्तमीविभक्तेश्च स्थाने विकल्पेन अमादेशो भवति ।

पूर्वनिष्पन्नाद् अधिगोप-शब्दात् तृतीयाया एकवचने टा-प्रत्यये, लुकं बाधित्वा 'नाव्ययीभावात्०' इति नित्यमेव अमादेशे प्राप्ते तं प्रबाध्य 'तृतीयासप्तम्योर्बहुलम्' इति वैकल्पिके अमि, पूर्वरूपे 'अधिगोपम्' इति । अमभावपक्षे तु 'टा' इत्यस्येनादेशे, गुणे 'अधिगोपेन' इति । एवमेव सम्तम्यामपि अधिगोपम्/अधिगोपे इत्यादि । अधिगोप-शब्दस्य रूपाणि-

| | | | |
|---|---|---|---|
| तृतीयाविभक्तौ- | अधिगोपम्/अधिगोपेन | अधिगोपम्/अधिगोपाभ्याम् | अधिगोपम्/अधिगोपैः |
| पञ्चमीविभक्तौ- | अधिगोपात्-द् | अधिगोपाभ्याम् | अधिगोपेभ्यः |
| सम्तमीविभक्तौ- | अधिगोपम्/अधिगोपे | अधिगोपम्/अधिगोपयोः | अधिगोपम्/अधिगोपेषु |

अन्येषु विभक्तिषु तु 'अधिगोपम्' इत्येव ।

**समीपार्थे-** उपकृष्णम् । 'कृष्णस्य समीपम्' इति विग्रहे (कृष्ण ङस् उप) पूर्ववद् उपकृष्णम् । उपकृष्णम्, उपकृष्णेन । उपकृष्णात् । उपकृष्णम्, उपकृष्णे । (अधिगोपम् इतिवत्) ।

**समृद्धयर्थे-** 'मद्राणां समृद्धिः' इति विग्रहे (मद्र आम् सु) - सुमद्रम् ।

**व्यृद्धयर्थे-** 'यवनानां व्यृद्धिः' इति विग्रहे (यवन आम् दुर्) - दुर्यवनम् ।

**अभावार्थे-** 'मक्षिकाणाम् अभावः' इति विग्रहे (मक्षिका आम् निर्) - निर्मक्षिकम् ।

**अत्ययार्थे-** 'हिमस्य अत्ययः' इति विग्रहे (हिम ङस् अति) - अतिहिमम् ।

**असंप्रत्यर्थे-** 'निद्रा संप्रति न युज्यते' इति विग्रहे (निद्रा सु अति) - अतिनिद्रम् ।

**शब्दप्रादुर्भावार्थे-** 'हरिशब्दस्य प्रकाशः' इति विग्रहे (हरि ङस् इति) - इतिहरि ।

**पश्चादर्थे-** 'विष्णो पश्चात्' इति विग्रहे (विष्णु ङस् अनु) - अनुविष्णु ।

यथाशब्दस्य चत्वारोऽर्था भवन्ति । ते यथा- योग्यता, वीप्सा, पदार्थानतिवृत्तिः, सादृश्यम् । अतो यथार्थे चत्वारि पृथगुदाहरणानि दीयन्ते-

**योग्यतार्थे**- 'रूपस्य योग्यम्' इति विग्रहे (रूप ङस् अनु) - अनुरूपम् ।

**वीप्सार्थे**- 'अर्थम् अर्थम् प्रति' इति विग्रहे (अर्थ अम् प्रति) - प्रत्यर्थम् ।

**पदार्थानतिवृत्त्यर्थे**- 'शक्तिम् अनतिक्रम्य' इति विग्रहे (शक्ति अम् यथा) - यथाशक्ति ।

**सादृश्यार्थे**- 'हरेः सादृश्यम्' इति विग्रहे 'हरि टा सह' इत्यत्र सादृश्यार्थे वर्तमानस्य 'सह' इत्यव्ययस्य 'हरि टा' इत्यनेन सह समासे, उपसर्जनत्वात् सहशब्दस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकत्वेन सुपो लुकि 'सहहरि' इति जाते-

**अव्ययीभावे चाकाले ६ । ३ । ८१ ॥**

**सहस्य सः स्यादव्ययीभावे न तु काले । हरेः सादृश्यं सहरि । ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम् । चक्रेण युगपत् सचक्रम् । सदृशः सख्या ससखि । क्षत्राणां संपत्तिः सक्षत्रम् । तृणमप्यपरित्यज्य सतृणमत्ति । अग्निग्रन्थपर्यन्तमधीते साग्नि ॥**

'सह' शब्दस्य स्थाने अव्ययीभावसमासे 'स' आदेशो भवति, कालार्थे तु न भवतीति सूत्रार्थः ।

'सहहरि' इत्यस्य अव्ययीभावत्वात् प्रकृतसूत्रेण 'सह' इत्यस्य स्थाने 'स' आदेशे, स्वादिकार्ये 'सहरि' इति रूपम् ।

**आनुपूर्व्यार्थे**- 'ज्येष्ठस्य आनुपूर्व्येण' इति विग्रहे (ज्येष्ठ ङस् अनु) - अनुज्येष्ठम् ।

**यौगपद्यार्थे**- 'चक्रेण युगपत्' इति विग्रहे (चक्र टा सह) - सचक्रम् ।

**सादृश्यार्थे**- 'सदृशः सख्या' इति विग्रहे (सखि टा सह) - ससखि ।

**संपत्त्यर्थे**- 'क्षत्राणां संपत्तिः' इति विग्रहे (क्षत्र भिस् सह) - सक्षत्रम् ।

**साकल्यार्थे**- 'तृणमप्यपरित्यज्य' इति विग्रहे (तृण टा सह) - सतृणम् ।

**समाप्त्यर्थे**- 'अग्निग्रन्थपर्यन्तम् अधीते' इति विग्रहे (अग्नि टा सह) - साग्नि ।

**विभाषा २ । १ । ११**

**अधिकारोऽयम् ।**

**अपपरिबहिरञ्चवः पञ्चम्या २ । १ । १२ ॥**

**अपविष्णु संसारः, अपविष्णोः । परिविष्णु, परिविष्णोः । बहिर्वनम्, बहिर्वनात् । प्राग्वनम्, प्राग्वनात् ॥**

अप, परि, बहिस् इत्येतेऽव्ययशब्दाः, अञ्च्-धातोर्निर्मिताः शब्दाः (प्राच्, प्रत्यच्, उदच् इत्यादयः) च पञ्चम्यन्तेन सुबन्तेन सह विकल्पेन समस्यन्ते, अव्ययीभावश्च समासो भवति । अपादीनां प्रथमानिर्दिष्टत्वादुपसर्जनत्वं पूर्वनिपातश्च बोध्यः ।

विष्णोः अप, विष्णु ङसि अप, इति विग्रहे अनेन सूत्रेण वैकल्पिके समासे, अप-शब्दस्य पूर्वप्रयोगे, विभक्तिलोपे, अव्ययसंज्ञायां स्वादिकार्ये- अपविष्णु । अप इत्यव्ययं वर्जनेऽर्थे वर्तते । अपविष्णु संसारः = विष्णुं वर्जयित्वा संसरणमित्यर्थः ।

**पारेमध्ये षष्ठ्या वा २ । १ । १८ ॥**

**पारमध्यशब्दौ षष्ठ्यन्तेन सह वा समस्येते, एदन्तत्वं चानयोर्निपात्यते । पारेगङ्गम्, गङ्गापारम् । मध्येगङ्गम्, गङ्गामध्यम् । महाविकल्पेन वाक्यमपि ।**

**तद्धिताः ४ । १ । ७६ ॥**

**आपञ्चमसमाप्तेरधिकारोऽयम् ।**

**अव्ययीभावे शरत्प्रभृतिभ्यः ५ । ४ । १०७ ॥**

**शरदादिभ्यष्टच् स्यात्समासान्तोऽव्ययीभावे । शरदः समीपमुपशरदम् । प्रतिविशाखम् । शरत् । विपाश् । अनस् । मनस । उपानह् । दिव् । हिमवत् । अनडुह् । दिश् । दृश् । विश् । चेतस् । चतुर् । त्यद् । तद् । यद् । कियत् । ग.सू. 'जराया जरस् च' । उपजरसम् ॥**

**अनश्च ५ । ४ । १०८ ॥**

**अन्नन्तादव्ययीभावाट्टच् ।**

**नस्तद्धिते ६ । ४ । १४४ ॥**

**नान्तस्य भस्य टेर्लोपस्तद्धिते । उपराजम् । अध्यात्मम् ॥**

## प्रयोगसिद्धिप्रकारः

### अधिहरि

'हरौ' इति लौकिकविग्रहे, 'हरि + ङि + अधि' इत्यलौकिकविग्रहे 'अव्ययं विभक्ति०' इत्यादिना सूत्रेण सप्तमीविभक्त्यर्थे वर्तमानस्य 'अधि' इत्यव्ययस्य सप्तम्यन्तहरिशब्देन सह समासे, समासविधायके 'अव्ययं विभक्ति०' इति सूत्रे 'अव्ययम्' इति प्रथमान्तपदेन 'अधि' इत्यस्य निर्दिष्टत्वात् 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्यनेन 'अधि' इत्यस्योपसर्जनसंज्ञायाम् 'उपसर्जनं पूर्वम्' इत्यनेन उपसर्जनसंज्ञकस्य 'अधि' शब्दस्य पूर्वप्रयोगे 'अधि हरि ङि' इति जाते, समासत्वात् 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञायां, 'सुपो धातुप्रातिपदिकयोः' इति सुपो लुकि, 'अधिहरि' इति जाते 'एकदेशविकृतमनन्यवत्' इति नियमेन प्रातिपदिकत्वात् सौ 'अव्ययीभावश्च' इत्यव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' इति सोर्लुकि 'अधिहरि' इति रूपं सिद्धम् ।

## अधिगोपम्

'गोपि' इति लौकिकविग्रहे, 'गोपा ङि अधि' इत्यलौकिकविग्रहे 'अव्ययं विभक्ति०' इत्यादिना विभक्त्यर्थे वर्तमानस्य 'अधि' इत्यव्ययस्य 'गोपा ङि' इत्यनेन सह समासे, उपसर्जनत्वाद् अधिशब्दस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि, 'अधिगोपा' इति जाते 'अव्ययीभावश्च' इति नपुंसकत्वाद् 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे, 'अधिगोप' इति जाते ततः सौ, अव्ययत्वाद् 'अव्ययादाप्सुपः' इति सोर्लुकि प्राप्ते तं प्रबाध्य 'नाव्ययीभावात्०' इति सोरमि, पूर्वरूपे 'अधिगोपम्' इति रूपं सिद्धम् ।

## निर्मक्षिकम्

'मक्षिकाणाम् अभावः' इति लौकिकविग्रहे 'मक्षिका आम् निर्' इत्यलौकिकविग्रहे 'अव्ययं विभक्ति०' इत्यादिना अभावार्थे वर्तमानस्य 'निर्' इत्यव्ययस्य 'गोपा ङि' इत्यनेन सह समासे, उपसर्जनत्वाद् 'निर्'शब्दस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि, 'निर्मक्षिका' इति जाते 'अव्ययीभावश्च' इति नपुंसकत्वाद् 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे, 'निर्मक्षिक' इति जाते ततः सौ, अव्ययत्वाद् 'अव्ययादाप्सुपः' इति सोर्लुकि प्राप्ते तं प्रबाध्य 'नाव्ययीभावात्०' इति सोरमि, पूर्वरूपे 'निर्मक्षिकम्' इति रूपं सिद्धम् ।

### अभ्यासः

### १. अधस्तनसूत्राणामर्थं लिखत

(क) अव्ययीभावश्च

(ख) उपसर्जनं पूर्वम्

(ग) अव्ययीभावे चाकाले

(घ) तृतीयासप्तम्योर्बहुलम्

(ङ) प्रथमानिर्दिष्टं समास उपसर्जनम्

### २. प्रश्नानामुत्तराणि देयानि

(क) कस्य उपसर्जनसंज्ञा भवति ?

(ख) समासे किं प्राक्प्रयोज्यम् ?

(ग) 'दुर्यवनम्' इत्यत्र कस्मिनन्नर्थे वर्तमानास्याव्ययस्य समासः ?

(घ) अव्ययीभासमासे सहस्य सो विधायकं सूत्रं किम् ।

(ङ) 'उपकृष्णम्' इत्यत्र 'अम्'-विधायकं सूत्रं लिखत ।

(च) 'अव्ययं विभक्ति०' इति सूत्रं पूरयत ।

(छ) 'नाव्ययीभावात्०' इति सूत्रं पूरयत ।

(ज) अव्ययीभावसमासे अव्ययं केन सह समस्यते ?

## ३. अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत

निर्मक्षिकम्, उपकृष्णम्, अतिहिमम्, अतिनिद्रम्, सचक्रम्, अनुरूपम्, यथाशक्ति, ससखि, सतृणम्, प्रत्यर्थम्, सहरि, अनुज्येष्ठम्, प्रत्यक्षम्, परोक्षम्, अधिहरि ।

## ४. अधस्तनसमस्तपदानां विग्रहं प्रदर्शयत

प्रतिगृहम्, प्रत्येकम्, सुमद्रम्, अनुगङ्गम्, निर्हिमम्, अतिनिद्रम्, सचक्रम्, अनुरूपम्, परोक्षम्, निर्मक्षिकम्, प्रत्यक्षम्, सक्षत्रम्, सुमद्रम्, उपकृष्णम्, उपमणिकम्, अधिगोपम्, सवल्कलम्, अनुविष्णु, प्रत्यर्थम् ।

## ५. अधस्तनविग्रहेषु समस्तपदानि लिखत

यवनानां व्यृद्धिः, ज्येष्ठस्य आनुपूर्वेण, हरेः पश्चात्, रूपस्य योग्यम्, मद्राणां समृद्धिः, कृष्णस्य समीपम्, हरेः सादृश्यम्, हिमस्य अत्ययः, निद्रा संप्रति न युज्यते, हरिशब्दस्य प्रकाशः, सदृशः सख्या, प्रश्नं प्रश्नं प्रति, चक्रेण युगपत् ।

## ६. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत

अधिहरि, अधिगोपेन, उपकृष्णम्, सुमद्रम्, दुर्यवनम्, अतिहिमम्, प्रत्यर्थम्, सहरि, निर्मक्षिकम्, ससखि, सतृणम् ।

## ७. विग्रहेन सह समस्तपदानि मेलयत

| 'क' | 'ख' |
|---|---|
| ससखि | निद्रा संप्रति न युज्यते |
| अतिनिद्रम् | कृष्णस्य समीपम् |
| साग्नि | सदृशः सख्या् |
| उपकृष्णम् | ज्येष्ठस्य आनुपूर्वेण |
| अनुज्येष्ठम् | हिमस्य अत्ययः |
| दुर्यवनम् | हरेः सादृश्यम् |
| सहरि | यवनानां व्यृद्धिः |
| अतिहिमम् | अग्निग्रन्थपर्यन्तम् अधीते |

## ८. अव्ययीभावसमासेन निष्पन्नानि पदानि प्रयुज्य एकमनुच्छेदं विलिख्य शिक्षकं दर्शयत ।

# अथ तत्पुरुषसमासः

**तत्पुरुषः २ । १ । २२ ॥**

**अधिकारोऽयं प्राग्बहुव्रीहेः ॥**

इत ऊर्ध्वं "शेषो बहुव्रीहिः २ । २ । २३" इति सूत्रात् प्राक् यानि समासविधायकानि सूत्राणि सन्ति तेषु 'तत्पुरुषः' इति प्रथमान्तसंज्ञापदमुपतिष्ठते ।

**द्विगुश्च २ । १ । २३ ॥**

**द्विगुरपि तत्पुरुषसंज्ञकः स्यात् ॥**

**द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः २ । १ । २४ ॥**

**द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते स च तत्पुरुषः । कृष्णं श्रितः कृष्णश्रित इत्यादि ॥**

द्वितीयान्तानां सुबन्तानां श्रित, अतीत, पतित, गत, अत्यस्त, प्राप्त, आपन्न, इत्येतैः शब्दप्रकृतिकैः समर्थैः सुबन्तैः सह समासो भवति, स च तत्पुरुषसंज्ञको भवतीत्यर्थः ।

'कृष्णं श्रितः' इति लौकिकविग्रहे 'कृष्ण + अम् + श्रित + सु' इत्यलौकिकविग्रहे 'कृष्ण + अम्' इति द्वितीयान्तसमर्थस्य 'श्रित + सु' इति सुबन्तसमर्थेन सह प्रकृतसूत्रेण समासे "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति सूत्रेण 'कृष्ण + अम्' इत्यस्योपसर्जनसंज्ञायाम् "उपसर्जनं पूर्वम्" इत्युपसर्जनस्य पूर्वप्रयोगे, समासत्वात् "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इति सुपो लुकि 'कृष्णश्रित' इति जाते, प्रातिपदिकत्वात् सौ, सकारस्य रुत्वे विसर्गे 'कृष्णश्रितः' इति सिद्ध्यति । कृष्णश्रितौ, कृष्णश्रिताः, इति रामवद्रूपाणि भवन्ति । एवमेव - लोकम् अतीतः - लोकातीतः । नरकं पतितः - नरकपतितः । ग्रामं गतः - ग्रामगतः । तरङ्गान् अत्यस्तः - तरङ्गात्यस्तः । सुखं प्राप्तः - सुखप्राप्तः । दुःखम् आपन्नः - दुःखापन्नः ।

**तृतीया तत्कृतार्थेन गुणवचनेन २ । १ । ३० ॥**

**तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनार्थेन च सह वा प्राग्वत् । शङ्कुलया खण्डः शङ्कुलाखण्डः । धान्येनार्थो धान्यार्थः । तत्कृतेति किम् ? अक्ष्णा काणः ॥**

तृतीयान्तं सुबन्तं तृतीयान्तार्थकृतेन गुणवाचकशब्दप्रकृतिकेन सुबन्तेन सह वा समस्यते, स च तत्पुरुषसंज्ञको भवतीत्यर्थः ।

'शङ्कुलया खण्डः' इति लौकिकविग्रहे 'शङ्कुला + टा + खण्ड + सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण समासे, 'शङ्कुला + टा' इत्यस्योपसर्जनसंज्ञायां, तस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकत्वेन सुब्लुकि 'शङ्कुलाखण्ड' इति जाते, तस्मात् प्रातिपदिकात् सौ, विभक्तिकार्ये 'शङ्कुलाखण्डः' इति सिद्ध्यति । एवमेव धान्येन अर्थः - धान्यार्थः । 'अक्ष्णा काणः' इत्यत्र तु काणार्थम् अक्ष्णः करणत्वाभावाद् अर्थात् अक्ष्णा अर्थेन अकृतकाणत्वात् समासो न भवति, 'अक्ष्णा काणः' इत्येव, अक्षिकाणस्तु नैव भवतीति बोध्यम् ।

**पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः २ । १ । ३१ ॥**

**तृतीयान्तमेतैः प्राग्वत् । मासपूर्वः । मातृसदृशः । पितृसमः । ऊनार्थे माषोनं कार्षापणम् । माषविकलम् । वाक्कलहः । आचारनिपुणः । गुडमिश्रः । आचारश्लक्ष्णः ॥**

**कर्तृकरणे कृता बहुलम् २ । १ । ३२ ॥**

**कर्तरि करणे च तृतीया कृदन्तेन बहुलं प्राग्वत् । हरिणा त्रातो हरित्रातः । नखैर्भिन्नो नखभिन्नः ।**

कर्तरि करणे च कारके वर्तमानं तृतीयान्तं सुबन्तं कृदन्तेन सुबन्तेन सह बहुलं समस्यते, स च तत्पुरुषसंज्ञको भवतीत्यर्थः ।

'हरिणा त्रातः' इति लौकिकविग्रहे 'हरि + टा + त्रात + सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण समासे, उपसर्जनसंज्ञकस्य 'हरि + टा' इत्यस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकत्वेन सुब्लुकि 'हरित्रात' इति जाते, स्वादिकार्ये 'हरित्रातः' इति सिद्ध्यति । एवमेव नखैर्भिन्नः (नख + भिस् + भिन्न + सु) - नखभिन्नः ।

**प. कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् । नखनिर्भिन्नः ।**

'नखैर्निर्भिन्नः' इति लौकिकविग्रहे 'नख + भिस् + निर्भिन्न + सु' इत्यलौकिकविग्रहे प्रकृतपरिभाषया 'निर्' इति पूर्वस्य कृदन्तस्य 'निर्भिन्न' इत्यस्यापि कृदन्ते ग्रहणात् "कर्तृकरणे कृता बहुलम्" इति समासे पूर्ववत्प्रक्रियायां 'नखनिर्भिन्नः' इति सिद्ध्यति ।

**चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः २ । १ । ३६ ॥**

**चतुर्थ्यन्तार्थाय यत् तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं वा प्राग्वत् । यूपाय दारु यूपदारु ।**

चतुर्थ्यन्तं सुबन्तं चतुर्थ्यन्तस्यार्थाय यद् निमित्तं तद्वाचकसुबन्तेन, अर्थ-बलि-हित-सुख-रक्षितशब्दप्रकृतिकैः सुबन्तैश्च सह वा समस्यते, स च तत्पुरुषसंज्ञको भवतीत्यर्थः ।

'यूपाय दारु' इति लौकिकविग्रहे 'यूप + ङे + दारु + सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण समासे, उपसर्जनसंज्ञकस्य 'यूप + ङे' इत्यस्य पूर्वप्रयोगे, विभक्तेर्लुकि 'यूपदारु' इति जाते, तस्मात् प्रातिपदिकत्वेन

सौ, नपुंसकत्वात् "स्वमोर्नपुंसकात्" इति सोर्लुकि 'यूपदारु' इति सिद्धयति । एवमेव - भूतेभ्यो बलिः - भूतबलिः । गोभ्यः सुखम् - गोसुखम् । गोभ्यो हितम् - गोहितम् । गोभ्यो रक्षितम् - गोरक्षितम् ।

**वा. अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम् । द्विजार्थः सूपः । द्विजार्था यवागूः । द्विजार्थं पयः ।**

अर्थ-शब्देन सह नित्यं समासो भवति, तस्य विशेष्यवद् लिङ्गं च भवतीत्यर्थः ।

'द्विजाय अयम्' इति लौकिकविग्रहे 'द्विज + ङे + अर्थ + सु' इत्यलौकिकविग्रहे प्रकृतवार्तिकसहकारेण "चतुर्थी तदर्थार्थ०" इति नित्यसमासे, उपसर्जनस्य पूर्वप्रयोगे, विभक्तेर्लुकि 'द्विज अर्थ' इति जाते, सवर्णदीर्घे, अनेन वार्तिकेन विशेष्यनिघ्नलिङ्गत्वे च कृते, अस्य विशेष्यस्य 'सूपः' इत्यस्य पुंलिङ्गत्वादस्मादपि पुंलिङ्गे सौ 'द्विजार्थः सूपः' इति सिद्धयति । एवमेव - द्विजाय इयम् - द्विजार्था । द्विजार्था यवागूः । द्विजाय इदम् - द्विजार्थम् । द्विजार्थं पयः ।

**पञ्चमी भयेन २ । १ । ३७ ॥**

**चोराद्भयं चोरभयम् ॥**

पञ्चम्यन्तं सुबन्तं शौण्डादिगणपठितैः शब्दप्रकृतिकैः सुबन्तैः सह वा समस्यते, स च तत्पुरुषसंज्ञो भवतीत्यर्थः ।

'चोराद् भयम्' इति लौकिकविग्रहे 'चोर + ङसि + भय + सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण समासे, पूर्ववत् प्रक्रियायां 'चोरभयम्' इति सिद्धयति । एवमेव चोराद् भीतिः - चोरभीतिः ।

**षष्ठी २ । २ । ८ ॥**

**सुबन्तेन प्राग्वत् । राजपुरुषः ॥**

षष्ठ्यन्तं सुबन्तं सुबन्तेन सह वा समस्यते, स च तत्पुरुषसंज्ञो भवतीत्यर्थः ।

'राज्ञः पुरुषः' इति लौकिकविग्रहे 'राजन् + ङस् + पुरुष + सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण समासे, विभक्तेर्लुकि 'राजन् पुरुष' इत्यवस्थायां प्रातिपदिकान्तस्य नकारस्य लोपे, स्वादिकार्ये 'राजपुरुषः' इति । एवमेव - तस्य पुरुषः - तत्पुरुषः । पितुः नाम - पितृनाम । मातुः सेवकः - मातृसेवकः ।

**न निर्धारणे २ । २ । १० ॥**

**षष्ठी न समस्यते । नृणां द्विजः श्रेष्ठः ॥**

**तृजकाभ्यां कर्तरि २ । ३ । १५ ॥**

कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः । अपां स्रष्टा । वज्रस्य भर्ता । ओदनस्य पाचकः ॥

**प्राप्तापन्ने च द्वितीयया २ । २ । ४ ॥**

**पक्षे द्वितीयाश्रितेति समासः । प्राप्तो जीवनम्- प्राप्तजीवनः । जीवनप्राप्तः । आपन्नजीवनः ।**

**जीवनापन्नः । इह सूत्रे द्वितीयया अ इति छित्वा अकारोऽपि विधीयते । तेन जीविकां प्राप्ता स्त्री-प्राप्तजीविका । आपन्नजीविका ॥**

**सप्तमी शौण्डैः २ । १ । ४० ॥**

**सप्तम्यन्तं शौण्डादिभिः प्राग्वत् । अक्षेषु शौण्डः अक्षशौण्ड इत्यादि । द्वितीयातृतीयेत्यादियोगविभागादन्यत्रापि तृतीयादिविभक्तीनां प्रयोगवशात्समासो ज्ञेयः ॥**

सप्तम्यन्तं सुबन्तं शौण्डादिगणपठितैः शब्दप्रकृतिकैः सुबन्तैः सह वा समस्यते, स च तत्पुरुषसंज्ञो भवतीत्यर्थः ।

'अक्षेषु शौण्डः' इति लौकिकविग्रहे 'अक्ष + सुप् + शौण्ढ + सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण समासे, उपसर्जनस्य पूर्वनिपाते, सुब्लुकि, स्वादिकार्ये 'अक्षशौण्ढः' इति सिद्ध्यति । एवमेव - शौण्डेषु धूर्तः - शौण्डधूर्तः । व्यवहारेषु कुशलः - व्यवहारकुशल । शिल्पेषु निपुणः - शिल्पनिपुणः । वाक्षु पटुः - वाक्पटुः ।

**तद्धितार्थोत्तरपदसमाहारे च २ । ३ । ५१ ॥**

**तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्सङ्ख्ये प्राग्वत् । पूर्वस्यां शालायां भवाः पूर्वशाला इति समासे जाते । सर्वनाम्नो वृत्तिमात्रे पूर्वं पुंवत्-**

**दिक्पूर्वपदादसंज्ञायां ञः ४ । २ । १०७ ॥**

**अस्माद्भवाद्यर्थे ञः स्यात् संज्ञायाम् ।**

**तद्धितेष्वचामादेः ७ । २ । ११७ ॥**

**ञिति णिति च तद्धिते अचामादेरचो वृद्धिः स्यात् । 'यस्येति च' । पौर्वशालः । पूर्वा शाला प्रिया यस्येति त्रिपदे बहुव्रीहौ कृते प्रियाशब्दे उत्तरपदे पूर्वयोस्तत्पुरुषः । तेन शालाशब्दे आकार उदात्तः । पूर्वशालाप्रियः । दिक्षु समाहारो नास्त्यनभिधानात् । संख्यायान्तद्धितार्थे- षण्णां मातृणामपत्यं षाण्मातुरः । 'मातुरुत्संख्यासंभद्रपूर्वायाः' इति वक्ष्यमाणोऽण् (प्रकृतेरुकारादेश आदिवृद्धिश्च) ॥**

**संख्यापूर्वो द्विगुः २ । १ । ५२ ॥**

**तद्धितार्थेत्यत्रोक्तस्त्रिविधः संख्यापूर्वो द्विगुसंज्ञः स्यात् ॥**

**द्विगुरेकवचनम् २ । ४ । १ ॥**

**द्विग्वर्थः समाहार एकवत्स्यात् ।**

**स नपुंसकम् २ । ४ । १७ ॥**

**समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् । पञ्चानां गवां समाहारः पञ्चगवम् ॥**

**विशेषणं विशेष्येण बहुलम् २ । १ । ५७ ॥**

**भेदकं भेद्येन समानाधिकरणेन बहुलं प्राग्वत् । नीलमुत्पलं नीलोत्पलम् । बहुलग्रहणात्क्वचिन्नित्यम्-कृष्णसर्पः । क्वचिन्न- रामो जामदग्न्यः ॥**

भेदकं(विशेषणं) सुबन्तं भेद्येन(विशेष्येन) समानाधिकरणेन सह बहुलं समस्यते, स च तत्पुरुषसंज्ञो भवतीत्यर्थः। (समानाधिकरणत्वात् कर्मधारयसंज्ञकश्च भवति।)

'नीलं च तद् उत्पलम्' इति लौकिकविग्रहे 'नील + सु + उत्पल + सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण 'नील + सु' इति भेदकस्य सुबन्तस्य 'उत्पल + सु' इति भेद्येन समानाधिकरणेन सुबन्तेन सह समासे, विशेषणमिति प्रथमान्तपदेन निर्दिष्टस्य 'नील + सु' इत्यस्योपसर्जनसंज्ञायां पूर्वप्रयोगे, विभक्तेर्लुकि 'नील उत्पल' इति जाते, गुणे, स्वादिकार्ये 'नीलोत्पलम्' इति सिद्ध्यति। सूत्रे बहुलग्रहणात् क्वचिन्नित्यमेव समासो भवति। यथा - कृष्णश्चासौ सर्पः, कृष्णसर्पः। क्वचित्तु समासो नैव भवति। यथा - रामो जामदग्न्यः।

**आन्महतः समानाधिकरणजातीययोः ६। ३। ४६॥**

**महावैयाकरणः।**

**तत्पुरुषः समानाधिकरणः कर्मधारयः १। २। ४२॥**

**समानविभक्त्यन्तपदकः समानाभिधेयस्तत्पुरुषसमासः कर्मधारयसंज्ञो भवति।**

**पुंवत्कर्मधारयजातीयदेशीयेषु ६। ३। ४२॥**

**कर्मधारये जातीयदेशीययोश्च परतो भाषितपुंस्कात्परं ऊङभावो यस्मिन्तथाभूतं पूर्वं पुंवत्। पूरण्यां प्रियादिष्वप्राप्तः पुंवद्भावो विधीयते। महानवमी। कृष्णचतुर्दशी। महाप्रिया। पूज्यमानैः किम्? उत्कृष्टो गौः। पङ्कादुद्धृत इत्यर्थः॥**

**उपमानानि सामान्यवचनैः २। १। ५५॥**

**घन इव श्यामो घनश्यामः।**

उपमानवाचीनि सुबन्तानि सामान्यधर्मविशिष्टैरूपमेयवाचिभिः सुबन्तैः सह वा समस्यन्ते, स च तत्पुरुषसंज्ञो भवतीत्यर्थः। सामान्यधर्मत्वञ्च उपमानोपमेयोभयवृत्तित्वम्।

'घन इव श्यामः' इति लौकिकविग्रहे 'घन + सु + श्याम + सु' इत्यलौकिविग्रहे प्रकृतसूत्रेण 'घन + सु' इति उपमानवाचकसुबन्तस्य 'श्याम + सु' इति सामान्यधर्मबोधकसुबन्तेन सह समासे, समानाधिकरणत्वात् तस्य कर्मधारयसंज्ञायां, उपमानानीति प्रथमान्तपदेन निर्दिष्टस्य सुबन्तोपमानस्य पूर्वप्रयोगे, विभक्तेर्लुकि 'घनश्याम' इति जाते, स्वादिकार्ये 'घनश्यामः' इति सिद्ध्यति। एवमेव दुग्धमिव शुक्लम् - दुग्धशुक्लम्। विद्युदिव चलम् - विद्युच्चलम्। नवनीतमिव कोमलम् - नवनीतकोमलम्।

**उपमितं व्याघ्रादिभिः सामान्याप्रयोगे २। १। ५६॥**

**पुरुषो व्याघ्र इव पुरुषव्याघ्रः। सामान्याप्रयोगे किम्? पुरुषो व्याघ्र इव शूरः।**

**वा. शाकपार्थिवादीनां सिद्धये उत्तरपदलोपश्च। शाकप्रियः पार्थिवः शाकपार्थिवः। देवब्राह्मणः॥**

**नञ् २ । २ । ६ ॥**

**नञ् सुपा सह समस्यते ॥**

'नञ्' इत्यव्ययस्य सुबन्तसमर्थेन सह समासो भवतीत्यर्थः ।

**नलोपो नञः ६ । ३ । ७३ ॥**

**नञो नस्य लोप उत्तरपदे । न ब्राह्मणः अब्राह्मणः ॥**

उत्तरपदे परे नञो नकारस्य लोपो भवतीत्यर्थः ।

'न ब्राह्मणः' इति लौकिकविग्रहे 'न + ब्राह्मण + सु' इत्यलौकिकविग्रहे "नञ्" इति सूत्रेण समासे, उपसर्जनसंज्ञकस्य पूर्वप्रयोगे, 'न' इत्यस्य नकारस्य प्रकृतसूत्रेण लोपे, विभक्तेर्लुकि 'अब्राह्मण' इति जाते, स्वादिकार्ये 'अब्राह्मणः' इति सिद्ध्यति । एवमेव न धर्मः - अधर्मः । न समर्थः - असमर्थः । न प्राप्तः - अप्राप्तः । न लुक् - अलुक् । न क्षमः - अक्षमः ।

**तस्मान्नुडचि ६ । ३ । ७४ ॥**

**लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात् । अनश्वः । नैकधेत्यादौ तु नशब्देन सह "सह सुपा" इति समासः ॥**

'न अश्वः' इति लौकिकविग्रहे 'न + अश्व + सु' इत्यलौकिकविग्रहे "नञ्" इति समासे, न-शब्दस्योपसर्जनत्वात् पूर्वप्रयोगे "नलोपो नञः" इति नकारलोपे, सुब्लुकि 'अ अश्व' इत्यवस्थायां प्रकृतसूत्रेण अजादेरुत्तरपदस्य अश्वशब्दस्य नुडागमेऽनुबन्धलोपे, टित्वादाद्यवयवत्वे 'अनश्व' इति जाते, तस्मात् प्रातिपदिकात् सौ 'अनश्वः' इति सिद्ध्यति । एवमेव न अद्यतनः - अनद्यतनः । न अवकाशः - अनवकाशः । न एकः - अनेकः । न आदिः - अनादिः । न अन्तः - अनन्तः ।

**कुगतिप्रादयः २ । २ । १८ ॥**

**एते समर्थेन नित्यं समस्यन्ते । कुत्सितः पुरुषः कुपुरुषः ॥**

कुशब्दः, गतिसंज्ञकाः शब्दाः, प्रादयश्च सुबन्तेन सह नित्यं समस्यन्ते, स च तत्पुरुषसंज्ञो भवतीत्यर्थः । कुशब्दश्चात्र अव्ययं न तु पृथिवीवाचको गत्यातिसाहचर्यात् ।

'कुत्सितः पुरुषः' इति लौकिकविग्रहे ' कु + पुरुष + सु' इत्यलौकिकविग्रहे प्रकृतसूत्रेण नित्यमेव समासे, प्रथमानिर्दिष्टस्य कुशब्दस्य पूर्वनिपाते, सुब्लुकि 'कुपुरुष' इति जाते, तस्मात् सौ 'कुपुरुषः' इति । एवमेव कुत्सितः पुत्रः - कुपुत्रः । शोभनः पुरुषः - सुपुरुषः ।

**वा. प्रादयो गताद्यर्थे प्रथमया । प्रगत आचार्यः प्राचार्यः ।**

**वा. अत्यादयः क्रान्ताद्यर्थे द्वितीयया । अतिक्रान्तो मालामिति विग्रहे-**

**एकविभक्ति चापूर्वनिपाते १ । २ । ४४ ॥**

**विग्रहे यन्नियतविभक्तिकं तदुपसर्जनं न तु तस्य पूर्वनिपातः ।**

**गोस्त्रियोरुपसर्जनस्य १ । २ । ४८ ॥**

**उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः । अतिमालः ।**

**वा. निरादयः क्रान्ताद्यर्थे पञ्चम्या । निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः ॥**

**तत्रोपपदं सम्तमीस्थम् ३ । १ । ९२ ॥**

**सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं यत्कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यात् ॥**

**उपपदमतिङ् २ । २ । १९ ॥**

**उपपदं सुबन्तं समर्थेन नित्यं समस्यते । अतिङन्तश्चायं समासः ।**

उपपदं सुबन्तं तिङन्तभिन्नेन समर्थेन सह नित्यं समस्यते, स च तत्पुरुषसंज्ञको भवतीत्यर्थः ।

**परि. गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः । कुम्भं करोतीति कुम्भकारः । अतिङ् किम् ? मा भवान् भूत् । माङि लुङिति सप्तमीनिर्देशान्माङुपपदम् ।**

गति-कारक-उपपदानां कृदन्तसमर्थेन सह सुबुत्पत्तेः प्रागेव समासो भवतीत्यर्थः ।

'कुम्भं करोती'ति लौकिकविग्रहे कर्मवाचकात् कुम्भशब्दात् कृत्प्रत्यययोगे विवक्षिते सति "कतृकर्मणोः कृति" इति षष्ठीविभक्तौ 'कुम्भ + ङस् + कृ' इत्यवस्थायां 'कुम्भ + ङस्' इत्यस्य "तत्रोपपदं सप्तमीस्थम्" इत्युपपदसंज्ञायां "कर्मण्यण्" इति सूत्रेण अण्-प्रत्ययेऽनुबन्धलोपे 'कुम्भ ङस् कृ अ' इति जाते, णित्वात् 'कृ' इत्यस्य ऋकारस्य "अचो ञ्णिति" इति वृद्धौ रपरत्वे 'कुम्भ ङस् कार' इत्यवस्थायां "गतिकारक०" इति परिभाषया "उपपदमतिङ्" इति सुबुत्पत्तेः प्रागेव समासे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि 'कुम्भकार' इति जाते, स्वादिकार्ये 'कुम्भकारः' इति सिद्ध्यति । 'मा + भूत्' इत्यत्र तु 'माङ्' इत्युपपदस्य 'भूत्' इति तिङन्तेन सह समासो न भवति, समासविधायके सूत्रे 'अतिङ्' इति निर्देशात् । अत एव समासाभावात् 'मा भवात् भूत्' इति प्रयोगः ।

**अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः ५ । ४ । ८७ ॥**

**एभ्यो रात्रेरच् स्यात् । चात्संख्याव्ययादेः । अग्रहणं द्वन्द्वार्थम् ॥**

**रात्राह्नाहाः पुंसि २ । ४ । २९ ॥**

**एते पुंस्येव । अहश्च रात्रिश्चाहोरात्रः । सर्वरात्रः । पूर्वरात्रः । संख्यातरात्रः ॥**

**वा. संख्यापूर्वं रात्रं क्लीबम् । द्विरात्रम् । अतिरात्रः ॥**

**राजाहःसखिभ्यष्टच् ५ । ४ । ९१ ॥**

**एतदन्तात्तत्पुरुषाट्टच् । परमराजः । कृष्णसखः ॥**

**द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ६ । ३ । ४७ ॥**

**आत्स्यात् । द्वादश । अष्टादश । अबहुव्रीह्यशीत्योः किम् ? द्वित्राः । द्व्यशीतिः ॥**

अशीति-शब्दभिन्ने सङ्ख्यावाचकशब्दे उत्तरपदे सति द्वि-शब्दस्य, अष्टन्-शब्दस्य च अन्त्यवर्णस्य स्थाने आकारादेशो भवति, परन्तु बहुव्रीहिसमासे आदेशोऽयं न भवति । 'प्राक्शताद्वक्तव्यम्' इति वार्तिकेन शत-शब्दात् पूर्वमेव विधिरयं प्रवर्तते, तेन द्विशतम्, द्विसहस्रम् इत्यादौ न ।

**त्रेस्त्रयः ६ । ३ । ४८ ॥**

**त्रि-शब्दस्य त्रयसादेशः स्यात् पूर्वविषये । त्रयोदशः । त्रयोविंशतिः ॥**

**विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् ६ । ३ । ४९ ॥**

**द्व्यष्टनस्त्रेश्च प्रागुक्तं वा चत्वारिंशदादौ परे । द्विचत्वारिंशत्, द्वाचत्वारिंशत् । अष्टचत्वारिंशत्, अष्टाचत्वारिंशत् । त्रिचत्वारिंशत्, त्रयश्चत्वारिंशत् । एवं पञ्चाशत्-षष्टि-सप्तति-नवतिषु ।**

**परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः २ । ४ । २६ ॥**

**कुक्कुटमयूर्याविमे । मयूरीकुक्कुटाविमौ । अर्धपिप्पली ॥**

**वा. आकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः । पञ्चमुली ॥**

**वा. पात्राद्यन्तस्य न । पञ्चपात्रम् । त्रिभुवनम् । चतुर्युगम् ॥**

**सभाराजाऽमनुष्यपूर्वा २ । ४ । २३ ॥**

**राजपर्यायपूर्वोऽमनुष्यपूर्वश्च सभान्तस्तत्पुरुषो नपुंसकं स्यात् । इनसभम् । ईश्वरसभम् । अमनुष्यशब्दो रुढ्या रक्षःपिशाचादीनाह । रक्षःसभम् । पिशाचसभम् ॥**

## नरकपतितः

'नरकं पतितः' इति लौकिकविग्रहे 'नरक + अम् + पतित + सु' इत्यलौकिकविग्रहे 'नरक + अम्' इति द्वितीयान्तसमर्थस्य 'पतित + सु' इति सुबन्तसमर्थेन सह "द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" इति सूत्रेण समासे "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति सूत्रेण प्रथमान्तेन निर्दिष्टस्य 'नरक + अम्' इत्यस्योपसर्जनसंज्ञायाम् "उपसर्जनं पूर्वम्" इत्युपसर्जनस्य पूर्वप्रयोगे, समासत्वात् "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां "सुपो धातुप्रातिपदिकयोः" इति सुपो लुकि 'नरकपतित' इति जाते, प्रातिपदिकत्वात् तस्मात् सौ, सकारस्य रुत्वे विसर्गे 'नरकपतितः' इति रूपं सिद्ध्यति ।

## नीलोत्पलम्

'नीलं च तद् उत्पलम्' इति लौकिकविग्रहे 'नील + सु + उत्पल + सु' इत्यलौकिकविग्रहे "विशेषणं विशेष्येण बहुलम्" इति सूत्रेण 'नील + सु' इति भेदकस्य सुबन्तस्य 'उत्पल + सु' इति भेद्येन समानाधिकरणेन सुबन्तेन सह समासे, विशेषणमिति प्रथमान्तपदेन निर्दिष्टस्य 'नील + सु' इत्यस्योपसर्जनसंज्ञायां तस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि 'नील उत्पल' इति जाते "आद् गुणः" इति गुणे, स्वादिकार्ये 'नीलोत्पलम्' इति सिद्ध्यति ।

## अनश्वः

'न अश्वः' इति लौकिकविग्रहे 'न + अश्व + सु' इत्यलौकिकविग्रहे "नञ्" इति सूत्रेण समासे, न-शब्दस्योपसर्जनत्वात् पूर्वप्रयोगे "नलोपो नञः" इति नकारलोपे, समासत्वात् प्रातिपदिकत्वेन सुब्लुकि 'अ अश्व' इत्यवस्थायां "तस्मान्नुडचि" इति सूत्रेण अजादेरुत्तरपदस्य अश्वशब्दस्य नुडागमेऽनुबन्धलोपे, टित्वादाद्यवयवत्वे 'अनश्व' इति जाते, तस्मात् प्रातिपदिकात् सौ, विभक्तिकार्ये 'अनश्वः' इति सिद्ध्यति ।

## अभ्यासः

### १. निम्नसूत्राणामर्थं सोदाहरणं लिखत

(क) तत्पुरुषः

(ख) तृतीया तत्कृतार्थेन गुणवचनेन

(ग) कर्तृकरणे कृता बहुलम्

(घ) पञ्चमी भयेन

(ङ) उपमानानि सामान्य वचनैः

(च) कुगतिप्रादयः

### २. प्रश्नानामुत्तराणि देयानि

(क) तत्पुरुषसमासस्य सोदाहरणं परिचयं दत्त ।

(ख) 'सुखप्राप्तः' इत्यत्र कस्य पदार्थस्य प्राधान्यं वर्तते ?

(ग) 'विद्यादानम्' इति समस्तपदस्य विग्रहवाक्यं लिखत ।

(घ) 'दुःखम् आपन्नः' इति विग्रहे केन सूत्रेण समासो भवति ?

(ङ) 'अक्ष्णा काणः' इत्यत्र कथं समासो न भवति ?

(च) "कृद्ग्रहणे०" इति परिभाषां पूरयित्वा सोदाहरणं तस्या अर्थं लिखत ।

(छ) 'युपाय दारु' इति विग्रहे समासविधायकं सूत्रं लिखित्वा तस्यार्थं लिखत ।

(ज) "अर्थेन नित्यसमासो०" इति वार्तिकं पूर्णं विलिख्य तस्य त्रीणि उदाहरणानि च लिखत ।

(झ) "षष्ठी" इति सूत्रेण किं क्रियते ?

(ञ) "सप्तमी शौण्डैः" इति सूत्रस्य अर्थं लिखत ।

(ट) "तस्मान्नुडचि" इति सूत्रेण किं कार्यं क्रियते ?

(ठ) नञः सुपा सह समासविधायकं सूत्रं लिखत ।

(ड) कर्मधारयसंज्ञाविधायकं सूत्रं लिखत ।

(ढ) कर्मधारय इति कीदृशः समास उच्यते ?

(ण) 'शास्त्रप्रवीणः' इति समस्तपदस्य विग्रहं कृत्वा तत्र समासविधायकं सूत्रं लिखत ।

(त) उपपदसंज्ञाविधायकं सूत्रं लिखत ।

(थ) "गतिकारकोपपदानां०" इति पूरयत ।

### ३. अधस्तनसमस्तपदानि प्रयुज्य वाक्यानि रचयत

कान्तारातीतः, कष्टश्रितः, ज्ञानतृप्तः, धान्यार्थः, नखभिन्नः, द्विजार्थं, भूतबलिः, चोरभयम्, मात्रनुमतिः, विद्यादानम्, शास्त्रनिपुणः, व्यवहारकुशलः, घनश्यामः, नीलोत्पलम्, अब्राह्मणः, अनद्यतनः, कुम्भकारः, कुपुरुषः, नवनीतकोमलम्, असत्यम्, राजप्रासादः, पितृकृतम् ।

**४. अधस्तनानां समस्तपदानां लौकिकालौकिकविग्रहवाक्याणि प्रदर्श्य प्रत्येकं समासविधायकानि सूत्राणि च लिखत**

ग्रामगतः, तरङ्गात्यस्तः, घटकारः, ब्राह्मणकम्बलः, गोहितम्, चोरभीतिः, अक्षशौण्डः, द्विजार्थम्, हरित्रातः, धान्यार्थः, रक्तोत्पलम्, घनश्यामः, राजगृहम्, कुपुरुषः ।

**५. अधस्तनविग्रहेषु निष्पन्नानि समस्तपदानि लिखत**

अङ्कुशेन उद्धृतः, पाणिनिना कृतम्, पित्रा दत्तम्, ज्ञानस्य दानम्, कालम् अतीतः, नीलं च तदुत्पलम्, न अधीतः, कुत्षितं कार्यम्, शोभनः पुरुषः, विद्युदिव चलम्, गुग्धमिव श्वेतम्, न मानवः, अक्षेषु धूर्तः, चोराद् भयम्, पुत्राय अयम्, गोभ्यो रक्षितम् ।

**६. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

कृष्णश्रितः, शङ्कुलाखण्डः, यूपदारु, चोरभयम्, राजपुरुषः, अक्षशौण्डः, घनश्यामः, कमलनयनम्, कुपुरुषः, अब्राह्मणः, कुम्भकारः, रक्तोत्पलम् ।

## अनुप्रयोगः

**१. अधो लिखितानि वाक्यानि पठत**

(क) दुःखापन्नेषु जनेषु अस्माभिः सर्वैः दया कर्तव्या ।

(ख) वयं पाणिनिकृतं व्याकरणं पठामः ।

(ग) पितृकृतं धनं पुत्रार्थं भवति ।

(घ) जना भूतबलिमुपहरन्ति ।

(ङ) माता देवपूजनार्थं पुष्पं चिनोति ।

(च) सम्प्रति सर्वत्र चोरभयं वर्धमानं वर्तते ।

(छ) राजपुरुषो राज्ञ आज्ञां पालयति ।

(ज) हे सरस्वति ! मह्यं विद्यादानं करोतु ।

(झ) व्यवहारकुशलो जनः सुखेन जीवनं यापयति ।

(ञ) पुष्करिण्यां नीलोत्पलानि विकसितानि सन्ति ।

(ट) घनश्यामो श्रीकृष्णोऽर्जुनं गीतामृतं पाययाञ्चकार ।

(ठ) कुपुत्रः सदैव दुःखदायको भवति ।

**२. तत्पुरुषसमासेन निष्पन्नानि पदानि प्रयुज्य एकमनुच्छेदं विलिख्य शिक्षकं दर्शयत ।**

# अथ बहुव्रीहिसमासः

**शेषो बहुव्रीहिः २ । २ । २३ ॥**

**अधिकारोऽयं प्राग्द्वन्द्वात् ॥**

इत ऊर्ध्वं "चार्थे द्वन्द्वः २ । २ । २९" इति सूत्रात् प्राग् यानि समासविधायकानि सूत्राणि सन्ति तेषु 'बहुव्रीहिः' इति पदमुपतिष्ठत इत्यर्थः ।

**अनेकमन्यपदार्थे २ । २ । २४ ॥**

**अनेकं प्रथमान्तमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते स बहुव्रीहिः ॥**

**सप्तमीविशेषणे बहुव्रीहौ २ । २ । ३५ ॥**

**सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं स्यात् । अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः ॥ प्राप्तमुदकं यं स प्राप्तोदको ग्रामः । ऊढरथोऽनड्वान् । उपहृतपशू रुद्रः । उद्धृतौदना स्थाली । पीताम्बरो हरिः । वीरपुरुषको ग्रामः ।**

बहुव्रीहिसमासे सप्तम्यन्तस्य सुबन्तस्य विशेषणस्य सुबन्तस्य च पूर्वप्रयोगो भवतीत्यर्थः । (बहुव्रीहौ सप्तम्यन्तं विशेषणं च प्राक्प्रयुज्येते)

प्राप्तोदको ग्रामः - 'प्राप्तम् उदकं यम्' इति लौकिकविग्रहे 'प्राप्त + सु + उदक + सु' इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण समासे, प्रकृतसूत्रेण 'प्राप्त + सु' इति विशेषणस्य पूर्वनिपाते, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'प्राप्त उदक' इति जाते "आद् गुणः" इति गुणे, ग्रामस्य विशेषणत्वात् तस्मात् पुंलिङ्गे सौ, विभक्तिकार्ये 'प्राप्तोदकः' इति सिद्ध्यति । एवमेव - ऊढो रथो येन सः - ऊढरथः । ऊढरथोऽनड्वान् इति प्रयोगः । उपहृतः पशुर्यस्मै सः - उपहृतपशुः (रुद्रः) । उपहृतपशू रुद्रः, अत्र 'उपहृतपशुः + रुद्रः' इत्यवस्थायां विसर्गस्य सत्वे, रुत्वे, पूर्वरेफस्य लोपे, ढ्रलोपे पूर्वस्येति उकारस्य दीर्घः । उद्धृतम् ओदनम् यस्याः सा - उद्धृतौदना स्थाली, अत्र स्थाल्या विशेषणत्वाद् 'उद्धृतौदना' इत्यस्माट्टाप्प्रत्ययः । पीतम् अम्बरं यस्य सः - पीताम्बरो हरिः । वीराः पुरुषा यस्मिन् स - वीरपुरुषको ग्रामः ।

**हलदन्तात्सप्तम्याः संज्ञायाम् ६ । ३ । ९ ॥**

**हलन्तादकारान्ताच्च सप्तम्या अलुक् । कण्ठेकालः ।**

हलन्ताद् अकारान्ताच्च शब्दात् परस्या सप्तमीविभक्तेर्लुग् न भवतीत्यर्थः ।

'कण्ठे कालो यस्य सः' इति लौकिकविग्रहे 'कण्ठ + ङि + काल + सु' इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति समासे "सप्तमीविशेषणे बहुव्रीहौ" इति सूत्रेण सप्तम्यन्तस्य 'कण्ठ + ङि' इत्यस्य पूर्वप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि प्राप्ते, प्रकृतसूत्रेण सप्तमीविभक्तेरलुकि, प्रथमायाः सोस्तु लुकि 'कण्ठ इ काल' इत्यवस्थायां गुणे, स्वादिकार्ये 'कण्ठेकालः' इति सिद्ध्यति । कण्ठेकालः शिवः ।

**वा. प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः । प्रपतितपर्णः प्रपर्णः ।**

**स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ६ । ३ । ३४ ॥**

**उक्तपुंस्कात्पर ऊङभावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात् समानाधिकरणे स्त्रीलिङ्गउत्तरपदे न तु पूरण्यां प्रियादौ च परतः । गोस्त्रियोरिति ह्रस्वः । चित्रगुः । रूपवद्भार्यः । अनूङ् किम् ? वामोरूभार्यः ।**

**नद्यृतश्च ५ । ४ । १५३ ॥**

**नद्युत्तरपदादृदन्तोत्तरपदाच्च बहुव्रीहेः कप् । पुंवद्भावः ॥**

**तेन सहेति तुल्ययोगे २ । २ । २८ ॥**

**तुल्ययोगे वर्तमानं सहेत्येतत् तृतीयान्तेन प्राग्वत् ॥**

**वोपसर्जनस्य ६ । ३ । ८२ ॥**

**बहुव्रीहेरवयवस्य सहस्य सः स्याद्वा । पुत्रेण सह- सपुत्रः सहपुत्रो वागतः ॥**

**बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् ५ । ४ । १२३ ॥**

**स्वाङ्गवाचिनः सक्थ्यक्ष्यन्ताद् बहुव्रीहेः षच् । दीर्घसक्थः । जलजाक्षी । स्वाङ्गात्किम् ? दीर्घसक्थि = शकटम् । स्थूलाक्षा = वेणुयष्टिः । अक्ष्णोऽदर्शनादिति वक्ष्यमाणोऽच् ।**

**पादस्य लोपोऽहस्त्यादिभ्यः ५ । ४ । १३८ ॥**

**हस्त्यादिवर्जितादुपमानात्परस्य पादस्य लोपः । व्याघ्रस्येव पादौ यस्य व्याघ्रपात् । अहस्त्यादिभ्यः किम् ? हस्तिन इव पादौ यस्य हस्तिपादः । कुसूलपादः ।**

**सङ्ख्यासु पूर्वस्य ५ । ४ । १४० ॥**

**पादशब्दस्य लोपः । द्विपात् । सुपात् ॥**

**सुहृद्दुर्हृदौ मित्रामित्रयोः ५ । ४ । १५० ॥**

**सुहृन्मित्रम् । दुर्हृदमित्रः ॥**

**धर्मादनिच् केवलात् ५ । ४ । १२४ ॥**

**केवलपूर्वपदाद्यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच् । कल्याणधर्मा । केवलात् किम् ? परमः स्वो धर्मो यस्येति त्रिपदे बहुव्रीहौ मा भूत् । परमस्वधर्मः ॥**

**ऊधसोऽनङ् ५ । ४ । १३१ ॥**

**कुण्डोध्नी ॥**

**जायाया निङ् ५ । ४ । १३४ ॥**

**जायान्तस्य बहुव्रीहेर्निङादेशः ॥**

**लोपो व्योर्वलि ६ । १ । ६६ ॥**

**युवतिर्जाया यस्य युवजानिः ॥**

**वयसि दन्तस्य दतृ ५ । ४ । १४१ ॥**

**सङ्ख्यासुपूर्वस्येत्येव । द्विदन् । चतुर्दन् ॥**

**उरः प्रभृतिभ्यः कप् ५ । ४ । १५१ ॥**

**व्यूढोरस्कः । प्रियसर्पिष्कः ॥**

**शेषाद्विभाषा ५ । ४ । १५४ ॥**

**अनुक्तसमासान्ताद् बहुव्रीहेः कप् वा । महायशाः । महायशस्कः । अनुक्तेत्यादि किम् ? व्याघ्रपात् ।**

**ईयसश्च ५ । ४ । १५६ ॥**

**ईयसन्तोत्तरपदान्न कप् । बहवः श्रेयांसोऽस्य- बहुश्रेयान् । गोस्त्रियोरिति ह्रस्वे प्राप्ते ॥**

**वा. ईयसो बहुव्रीहेर्न । बहुश्रेयसी । बहुव्रीहे किम् ? अतिश्रेयसीः ॥**

**निष्ठा २ । २ । ३६ ॥**

**निष्ठान्तं बहुव्रीहौ पूर्वं स्यात् । युक्तयोगः ॥**

बहुव्रीहिसमासे निष्ठाप्रत्ययान्तं सुबन्तं प्राक्प्रयुज्यत इत्यर्थः । (क्तक्तवतू निष्ठा)

'युक्तो योगो येन' इति लौकिकविग्रहे 'युक्त + सु + योग + सु' इत्यलौकिकविग्रहे "अनेकमन्यपदार्थे" इति सूत्रेण समासे प्रकृत सूत्रेण क्तप्रत्ययान्तसमर्थस्य 'युक्त + सु' इत्यस्य पूर्वनिपाते, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'युक्तयोग' इति जाते, तस्मात् प्रातिपदिकात् सौ 'युक्तयोगः' इति सिद्धम् ।

## अभ्यासः

### १. निम्नसूत्राणामर्थं सोदाहरणं लिखत

(क) शेषो बहुव्रीहिः

(ख) अनेकमन्यपदार्थे

(ग) निष्ठा

(घ) हलदन्तात् सप्तम्याः संज्ञायाम्

(ङ) सप्तमीविशेषणे बहुव्रीहौ

### २. प्रश्नानामुत्तराणि देयानि

(क) बहुव्रीहिसमासस्य परिचयं दत्त ।

(ख) बहुव्रीहिसमासे कस्य पदार्थस्य प्राधान्यं भवति ?

(ग) बहुव्रीहिसमासे कस्य पूर्वप्रयोगो भवति ?

(घ) बहुव्रीहौ निष्ठाप्रत्ययान्तस्य सुबन्तस्य केन सूत्रेण पूर्वप्रयोगो भवति ?

(ङ) कुत्रपर्यन्तं बहुव्रीहेरधिकारो वर्तते ?

(च) कस्मात् परस्याः सप्तमीविभक्तेरलुक् ?

(छ) 'बहुपुत्रो मनुष्यः' इत्यत्र समस्तपदस्य विग्रहं प्रदर्श्य तत्र कस्या विभक्तेरर्थे समासो जातोऽस्तीति लिखत ।

(ज) चतुर्थ्या विभक्तेरर्थे जातस्य बहुव्रीहिसमासस्य त्रीणि उदाहरणानि लिखत ।

(झ) 'कृता विद्या येन स, कृतविद्यः' इत्यत्र कस्य पदार्थस्य प्राधान्यं वर्तते ?

(ञ) 'वीरपुरुषः' इति पदस्य त्रीणि विशेष्यपदानि लिखत ।

### ३. अधस्तनसमस्तपदानि प्रयुज्य वाक्यानि रचयत

गृहीतपादः, दत्तभोजनम्, युक्तयोगः, ऊढरथः, पीताम्बरः, कृतकटः, कृतनिश्चयः, कण्ठेकालः ।

### ४. अधस्तनानां समस्तपदानां लौकिकालौकिकविग्रहवाक्याणि प्रदर्शयत

गृहीतकरः, प्राप्तोदकः, कृतकृत्यः, वीरपुरुषः, लम्बोदरः, श्वेताम्बरः, कृतसङ्कल्पः ।

५. **अधस्तनविग्रहेषु निष्पन्नानि समस्तपदानि लिखत**

नीलम् अम्बरं यस्य सः, दत्ता दक्षिणा यस्मै सः, उद्धृतम् ओदनं यस्याः, उपहृतः पशुर्यस्मै ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत**

प्राप्तोदकः, कृतकटः, उपहृतपशुः, वीरपुरुषः, गृहीतपादः, कृतनिष्चयः, नीलाम्बरः ।

७. **"व्यधिकरणपदो बहुव्रीहिः" इत्यस्याशयं सोदाहरणं प्रकाशयत ।**

## अनुप्रयोगः

१. **अधो लिखितानि वाक्यानि पठत**

(क) पीताम्बरो विष्णुर्जगत्पालको वर्तते ।

(ख) कण्ठेकालः शिवो जगद्रक्षणाय कण्ठे विषं धृतवान् ।

(ग) नेपाले अद्यापि बहवोऽप्राप्तोदका ग्रामा विद्यन्ते ।

(घ) वीरपुरुषे ग्रामे नार्यो बालकाश्च सुरक्षिता भवन्ति ।

(ङ) दत्तदक्षिणा ब्राह्मणाः स्वगृहं यान्ति ।

(च) गृहीतविद्यो गुरुर्माननीयो भवति ।

२. **बहुव्रीहिसमासेन निष्पन्नानि पदानि प्रयुज्य एकमनुच्छेदं विलिख्य शिक्षकं दर्शयत ।**

३. **बहुव्रीहिसमासस्य पञ्चदश उदाहरणानि सङ्कलय्य वाक्येषु योजयत ।**

# अथ द्वन्द्वसमासः

**चार्थे द्वन्द्वः २ । २ । २९ ॥**

**अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । तत्र 'ईश्वरं गुरुं च भजस्व' इति परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः । 'भिक्षामट गां चानय' इत्यन्यतरस्यानुषङ्गिकत्वेनान्वयोऽन्वाचयः । अनयोरसामर्थ्यात्समासो न । 'धवखदिरौ छिन्धि' इति मिलितानामन्वय इतरेतरयोगः । 'संज्ञापरिभाषम्' इति समूहः समाहारः ॥**

'च' इत्यस्य चत्वारोऽर्था भवन्ति - समुच्चयः, अन्वाचयः, इतरेतरयोगः, समाहारश्च । तेषामुदाहरणमुपरि एव प्रदत्तमस्ति । तेषु समुच्चयान्वाचयोरर्थयोः एकार्थीभावरूपसामर्थ्यस्याभावात् समासो न भवति । इतरेतरयोगसमाहारयोरर्थयोस्तु एकार्थीभावरूपसामर्थ्यात् समासः । अत एव द्वन्द्वसमासो द्विविधः - इतरेतरयोगः, समाहारश्च । (समाहारे चार्थे द्वन्द्वसमासे जाते समस्तपदं सदैव एकवचनान्तं भवति, नपुंसकत्वञ्च भवति । इतरेतरयोगे चार्थे द्वन्द्वसमासे जाते समस्तपदं सदैव पुंसि प्रयुज्यते, द्विवचनान्तं बहुवचनान्तं च भवति ।)

**राजदन्तादिषु परम् २ । २ । ३१ ॥**

**एषु पूर्वप्रयोगार्हं परं स्यात् । दन्तानां राजा राजदन्तः ।**

राजदन्तादिगणपठितेषु शब्देषु पूर्वप्रयोगार्हं (उपसर्जनं) परं प्रयुज्यत इत्यर्थः ।

'दन्तानां राजा' इति लौकिकविग्रहे 'दन्त + आम् + राजन् + सु' इत्यलौकिकविग्रहे "षष्ठी" इति सूत्रेण तत्पुरुषसमासे, प्रथमानिर्दिष्टत्वाद् 'दन्त + आम्' इत्यस्य पूर्वप्रयोगे प्राप्ते तं बाधित्वा प्रकृतसूत्रेण तस्य परप्रयोगे, समासत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि 'राजन् दन्त' इति जाते, प्रातिपदिकान्तस्य नकारस्य लोपे, स्वादिकार्ये 'राजदन्तः' इति सिद्ध्यति ।

**वा. धर्मादिष्वनियमः । अर्थधर्मौ । धर्मार्थावित्यादि ॥**

धर्मादिशब्देषु पूर्वप्रयोगस्य नियमो नास्ति, स्वेच्छया प्रयोक्तुं शक्यत इत्यर्थः ।

'धर्मश्च अर्थश्च' इति लौकिकविग्रहे 'धर्म + सु + अर्थ + सु' इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इति सूत्रेण इतरेतरयोगद्वन्द्वसमासे, प्रातिपदिकत्वाद् विभक्तेर्लुकि, "अजाद्यदन्तम्" इति सूत्रेण अजादेः अर्थशब्दस्यैव

पूर्वप्रयोगे प्राप्ते तं बाधित्वा प्रकृतवार्तिकेन धर्मशब्दस्य पूर्वप्रयोगे, सवर्णदीर्घे 'धर्मार्थ' इति जाते, द्विवचनत्वात् तस्माद् औप्रत्यये 'धर्मार्थौ' इति सिद्ध्यति । अर्थशब्दस्य पूर्वप्रयोगे तु 'अर्थधर्मौ' इति ।

**वा. जायाशब्दस्य दम्भावो जम्भावश्च वा निपात्यते । आकृतिगणोऽयम् ॥**

**द्वन्द्वे घि २ । २ । ३२ ॥**

**द्वन्द्वे घिसंज्ञं पूर्वं स्यात् । हरिश्च हरश्च हरिहरौ ॥**

द्वन्द्वसमासे घिसंज्ञकस्य शब्दस्य पूर्वप्रयोगो भवतीत्यर्थः । ("शेषो घ्यसखि" इति अनदीसंज्ञकानां सखिशब्दभिन्नानां ह्रस्व-इकारान्तानां ह्रस्व-उकारान्तानां च शब्दानां घिसंज्ञा भवति ।)

"हरिश्च हरश्च" इति लौकिकविग्रहे 'हरि + सु + हर + सु" इत्यलौकिकविग्रहे "चार्थे द्वन्द्वः" इति समासे, समासत्वात् प्रातिपदिकत्वेन सुब्लुकि, प्रकृतसूत्रेण घिसंज्ञकस्य हरिशब्दस्य पूर्वप्रयोगे 'हरिहर' इति जाते, तस्मात् औ 'हरिहरौ' इति सिद्ध्यति । एवमेव - कपिश्च काकश्च कपिकाकौ । भानुश्च चन्द्रश्च भानुचन्द्रौ । शिवश्च विष्णुश्च विष्णुशिवौ ।

**अजाद्यदन्तम् २ । २ । ३३ ॥**

**द्वन्द्वे पूर्वं स्यात् । ईशकृष्णौ ॥**

द्वन्द्वसमासे यत्पदम् अजादिकम् अदन्तं च वर्तते तादृशं सुबन्तं प्राक् प्रयुज्यत इत्यर्थः ।

'ईशश्च कृष्णश्च' इति लौकिकविग्रहे 'ईश + सु + कृष्ण + सु' इत्यलौकिकविग्रहे पूर्ववत् समासादिकार्ये, प्रकृतसूत्रेण अजादेरदन्तस्य ईशशब्दस्य पूर्वनिपाते 'ईशकृष्ण' इत्यस्माद् औप्रत्यये 'ईशकृष्णौ' इति ।

**अल्पाच्तरम् २ । २ । ३४ ॥**

**शिवकेशवौ ॥**

द्वन्द्वसमासे द्वयोः पदयोर्मध्ये अल्पाचं सुबन्तं प्राक् प्रयुज्यत इत्यर्थः ।

'शिवश्च केशवश्च' इति विग्रहे 'शिव + सु + केशव + सु' इत्यस्य पूर्ववत् समासादिकार्ये, प्रकृतसूत्रेण अल्पाचः 'शिव' इत्यस्य पूर्वप्रयोगे 'शिवकृष्णौ' इति सिद्ध्यति । एवमेव - वटश्च पिप्पलश्च वटपिप्पलौ ।

**वा. लघ्वक्षरं पूर्वम् । कुशकाशम् ॥**

**द्वन्द्वश्च प्राणि-तूर्य-सेनाङ्गानाम् २ । ४ । २ ॥**

**एषां द्वन्द्व एकवत् । पाणिपादम् । मार्दङ्गिकवैणविकम् । रथिकाश्वारोहम् ।**

**येषां च विरोधः शाश्वतिकः २ । ४ । ९ ॥**

**प्राग्वत् । अहिनकुलम् । गोव्याघ्रम् । काकोलूकमित्यादौ परत्वाद्विभाषा वृक्षेति प्राप्तं चकारेण बाध्यते ।**

**आनङ् ऋतो द्वन्द्वे ६ । ३ । २५ ॥**

**विद्यायोनिसम्बन्धवाचिनां ऋदन्तानां द्वन्द्वे आनङ् स्यादुत्तरपदे । होतापोतारौ । मातापितरौ । पुत्रे इत्यनुवृत्तेः- पितापुत्रौ ॥**

**देवताद्वन्द्वे च ६ । ३ । २६ ॥**

**इहोत्तरपदे पूर्वपदस्यानङ् । मित्रावरुणौ ॥**

**इद् वृद्धौ ६ । ३ । २८ ॥**

**वृद्धिमत्युत्तरपदे अग्नेरिदादेशो देवताद्वन्द्वे । अग्नामरुतौ देवते अस्य आग्निमारुतं कर्म । अग्नीवरुणौ देवते अस्य आग्निवारुणम्, देवताद्वन्द्वे चेत्युभयपदवृद्धिः ॥**

**द्वन्द्वाच्चुदषहान्तात्समाहारे ५ । ४ । १०६ ॥**

**चवर्गान्ताद्दषहान्ताच्च द्वन्द्वाट्टच् समाहारे । वाक्त्वचम् । त्वक्स्रजम् । शमीदृषदम् । वाक्त्विषम् । छत्रोपानहम् । समाहारे किम् ? प्रावृट्शरदौ ।**

॥ इति द्वन्द्वसमासः ॥

## अथैकशेषः

**सरूपाणामेकशेष एकविभक्तौ ।**

**वा. विरूपाणामपि समानार्थानाम् । वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ । कुटिलदण्डौ ।**

**पुमान्स्त्रिया १ । २ । ६७ ॥**

**स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत् । हंसी च हंसश्च हंसौ ।**

**नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् १ । २ । ६९ ॥**

**अक्लीबेन सहोक्तौ क्लीबं शिष्यते तच्च वा एकवत् स्यात्तल्लक्षण एव विशेषश्चेत् । शुक्लः पटः, शुक्ला शाटी, शुक्लं वस्त्रम्, तदिदं शुक्लम् । तानीमानि शुक्लानि ॥**

**पिता मात्रा १ । २ । ७० ॥**

**मात्रा सहोक्तौ पिता वा शिष्यते । माता च पिता च पितरौ, मातापितरौ वा ॥**

मातृशब्देन सह पितृशब्दस्य सहोक्तौ पितृशब्दो विकल्पेन शिष्यते, मातृशब्दस्तु लुप्यत इत्यर्थः ।

'माता च पिता च' इति लौकिके विग्रहे 'मातृ + सु + पितृ + सु' इत्यलौकिके विग्रहे "चार्थे द्वन्द्वः" इति समासे, समासत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि, प्रकृतसूत्रेण विकल्पेन 'पितृ' इत्यस्य एकशेषे 'पितृ' इति जाते "यः शिष्यते स लुप्यमानार्थाभिधायी" इति परिभाषया पितृशब्देनैव मातृशब्दस्यापि अर्थज्ञापनाद् द्विचनत्वे, औप्रत्यये 'पितरौ' इति सिद्धचति । मातृशब्दस्य लोपाभापक्षे तु "अभ्यर्हितं च"

इति वार्तिकेन मातृशब्दस्य पूर्वप्रयोगे, "आनङ् ऋतो द्वन्द्वे" इति सूत्रेण मातृशब्दस्य ऋकारस्य स्थाने आनङादेशेऽनुबन्धलोपे 'मातापितृ' इति जाते, तस्मात् प्रातिपदिकाद् औ, 'मातापितरौ' इति सिद्ध्यति ।

**श्वशुरः श्वश्र्वा १ । २ । ७१ ॥**

**सहोक्तौ वा शिष्यते । श्वशुरौ । श्वश्रूश्वशुरौ ॥**

**त्यदादीनि सर्वैर्नित्यम् १ । २ । ७२ ॥**

**सर्वैः सहोक्तौ त्यदादीनि शिष्यन्ते । स च देवदत्तश्च तौ ॥**

## अथ समासान्ताः

**ऋक्पूरब्धूःपथामानक्षे ५ । ४ । ७४ ॥**

**ऋगाद्यन्तस्य समासस्य अप्रत्ययोऽन्तावयवः, अक्षे या धूस्तदन्तस्य न । अर्धर्चः ॥**

**द्व्यन्तरुपसर्गेभ्योऽप ईत् ६ । ३ । ९७ ॥**

**द्वीपम् । अन्तरीपम् । प्रतीपम् । समीपम् ॥**

**अक्ष्णोऽदर्शनात् ५ । ४ । ७६ ॥**

**अचक्षुःपर्यायादक्ष्णोऽच् स्यात् । गवामक्षीव गवाक्षः ॥**

**ब्रह्महस्तिभ्यां वर्चसः ५ । ४ । ७८ ॥**

**अच् । ब्रह्मवर्चसम् । हस्तिवर्चसम् ॥**

## अथालुक्समासः

**अलुगुत्तरपदे ६ । ३ । १ ॥**

**इत्यधिकृत्य ।**

**वैयाकरणाख्यायां चतुर्थ्याः ६ । ३ । ७ ॥**

**वा. आत्मन इत्येव । आत्मनेपदम् । आत्मनेभाषा ॥**

**परस्य च ६ । ३ । ८ ॥**

**परस्मैपदम् । परस्मैभाषा । हलदन्तादिति ङेरलुक्, त्वचिसारः ॥**

**गवियुधिभ्यां स्थिरः ८ । ३ । ६५ ॥**

**आभ्यां स्थिरस्य सस्य षः । गविष्ठिरः गवीतिवचनादेवालुक् । युधिष्ठिरः । अरण्येतिलकाः । संज्ञायामिति सप्तमीसमासः ॥**

**तत्पुरुषे कृति बहुलम् ६ । ३ । १४ ॥**

**स्तम्बेरमः । कर्णेजपः ॥**

**मातृपितृभ्यां स्वसा ८ । ३ । ८४ ॥**

**स्वसुः सस्य षः समासे । मातृष्वसा । पितृष्वसा । असमासे तु- मातुः स्वसा । पितुः स्वसा ॥**

॥ इत्यलुक्समासः ॥

## अथ समासाश्रयविधयः

**घ-रूप-कल्प-चेलड्-ब्रुव-गोत्र-मत-हतेषु ङ्योऽनेकाचो ह्रस्वः ३ । ३ । ४३ ॥**

**भाषितपुंस्काद्यो ङी तदन्तस्यानेकाचो ह्रस्वः स्यात्, घरूपकल्पप्रत्यये चेलडादिषु चोत्तरपदेषु । ब्रह्मणितरा । ब्राह्मणितमा । ब्राह्मणिरूपा । ब्राह्मणिकल्पा । ब्राह्मणिचेली । ब्राह्मणिब्रुवा । ब्राह्मणिगोत्रेत्यादि । ब्रुवः पचाद्यचि वच्यादेशगुणयोरभावो निपात्यते । ङ्यः किम् ? दत्ततरा । भाषितपुंस्कात् किम् ? आमलकीतरा । कुवलीतरा ॥**

**नद्याः शेषस्यान्यतरस्याम् ६ । ३ । ४४ ॥**

**अङ्यन्तनद्याः ङ्यन्तैकाचश्च घादिषु ह्रस्वो वा । ब्रह्मबन्धुतरा । ब्रह्मबन्धूतरा । स्त्रितरा । स्त्रीतरा ॥**

### अभ्यासः

### १. निम्नसूत्राणामर्थं सोदाहरणं लिखत

(क) चार्थे द्वन्द्वः

(ख) राजदन्तादिषु परम्

(ग) द्वन्द्वे घिः

(घ) अजाद्यदन्तम्

(ङ) अल्पाच्तरम्

(च) पिता मात्रा

### २. प्रश्नानामुत्तराणि देयानि

(क) द्वन्द्वसमासस्य परिचयं दत्त ।

(ख) द्वन्द्वसमासे कस्य पदार्थस्य प्राधान्यं भवति ? सोदाहरणं लिखत ।

(ग) द्वन्द्वसमासः कतिविधः ? सोदाहरणं लिखत ।

(घ) 'भिक्षामट गां चाऽऽनय' इत्येतादृशे चार्थे द्वन्द्वसमासो भवति न वा ? सकारणं लिखत ।

(ङ) कः समाहारः ? सोदाहरणं लिखत ।

(च) 'पितरं गुरुं च भजस्व' इत्यत्र चार्थः कः ?

(छ) राजदन्तादिगणपठितेषु शब्देषु पूर्वप्रयोगस्य को नियमो वर्तते ?

(ज) 'मातापितरौ' इति प्रयोगे केन कारणेन मातृशब्दस्य पूर्वप्रयोगः ?

(झ) धर्मादिशब्देषु पूर्वप्रयोगस्य को नियमः ?

(ञ) 'पितरौ' इति पदस्य कोऽर्थः ?

## ३. अधस्तनसमस्तपदानि प्रयुज्य प्रत्येकं त्रीणि वाक्यानि रचयत

धवखदिरौ, शिवकेशवौ, अर्थधर्मौ, अग्निमारुतौ, पाणिपादम्, आहारनिद्राभयम्, मुखनासिकम् ।

## ४. अधस्तनानां समस्तपदानां लौकिकालौकिकविग्रहवाक्यानि प्रदर्श्य समाहारद्वन्द्वयुक्तानि पदानि पृथक्कुरुत

अहिनकुलम्, रामलक्ष्मणौ, दंशमशकम्, अजाविकम्, इन्द्रवायू, हरिव्याघ्रौ, स्थानप्रयत्नौ, लक्षणोदाहरणे, मांसशोणितम् ।

## ५. अधस्तनविग्रहेषु निष्पन्नानि समस्तपदानि विलिख्य तेषां द्वन्द्वप्रकारञ्च लिखत

शिशिरश्च वसन्तश्च, पाणी च पादौ च, संज्ञा च परिभाषा च, अश्वश्च वृषश्च, माता च पिता च, विरञ्चिश्च नारायणश्च शङ्करश्च, कपिश्च काकश्च ।

## ६. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत

राजदन्तः, विष्णुशिवौ, धर्मार्थौ, वटपिप्पलौ, इन्द्राग्नी, पितरौ, मातापितरौ ।

## ७. कोष्ठकात् समुचितं पदं चित्वा रिक्तस्थानं पूरयत

(क) चार्थाः .................. भवन्ति । (त्रयः, चत्वारः, पञ्च)

(ख) .................. चार्थे द्वन्द्वसमासो भवति । (अन्वाचये, समाहारे)

(ग) द्वन्द्वसमासः ............... भवति । (पूर्वपदार्थप्रधानः, उत्तरपदार्थप्रधानः, उभयपदार्थप्रधानः)

(घ) द्वन्द्वसमासे .................. पूर्वप्रयोगो भवति । (घिसंज्ञकस्य, प्रथमानिर्दिष्टस्य)

(ङ) .................. द्वन्द्वसमासो भवति । (द्वयोः पदयोरेव, द्वयोर्बहूनां वा पदानाम्)

## ८. सोदाहरणं चार्थान् वर्णयत ।

## ९. समीचीनासमीचीनवाक्यानि समुचितचिह्नाभ्यां संकेतयत

(क) समुच्चये चार्थे द्वन्द्वसमासो भवति ।

(ख) द्वन्द्वसमासेऽजादि अदन्तं सुबन्तं प्राक् प्रयुज्यते ।

(ग) राजदन्तादिषु प्रथमानिर्दिष्टस्य पदस्य पूर्वप्रयोगो भवति ।

(घ) इतरेतरयोगे समुच्चये च चार्थे द्वन्द्वसमासो भवति ।

(ङ) 'रामश्च कृष्णश्च रामकृष्णौ' इत्यत्र समाहारद्वन्द्वः ।

## अनुप्रयोगः

१. **अधो लिखितानि वाक्यानि पठत**

(क) हरिहरौ जगतो रक्षकौ स्तः ।

(ख) चराचरस्य जगतः पालनकर्तारौ ईशकृष्णौ वयं नमामः ।

(ग) हरिव्याघ्रौ परस्परं शत्रू भवतः ।

(घ) अहं सिंहव्याघ्रगण्डकेभ्यो बिभेमि ।

(ङ) जगतः पितरौ पार्वतीपरमेश्वरौ अहं वन्दे ।

(च) उष्ट्रखरं भारवहनाय उपयोगि भवति ।

(छ) चौरस्य पाणिपादं राजपुरुषेण बद्धमस्ति ।

(ज) मातापितरौ सदैव हितकर्तारौ भवतः ।

२. **युष्माकं संकृतभाषापाठ्यपुस्तकाद् द्वन्द्वसमासस्य दश उदाहरणानि सङ्कलय्य वाक्येषु योजयत ।**

३. **द्वन्द्वसमासयुक्तानि पदानि प्रयुज्य एकां लघुकथां विलिख्य कक्षायां श्रावयत ।**

## मिश्रिताभ्यासः

१. **अधोलिखितानां समस्तपदानां विग्रहं प्रदर्श्य प्रत्येकं समासनामानि समासविधायकानि सूत्राणि च लिखत ।**

| समस्तपदम् | लौकिकविग्रहः | अलौकिकविग्रहः | समासनाम | समासविधायकसूत्रम् |
|---|---|---|---|---|
| श्रुतपूर्वः | .................. | ....................... | ............... | ........................... |
| राजप्रासादः | .................. | ....................... | ............... | ........................... |
| कृतनिष्चयः | .................. | ....................... | ............... | ........................... |
| अनपेक्षितः | .................. | ....................... | ............... | ........................... |
| पार्वतीपरमेश्वरौ | .................. | ....................... | ............... | ........................... |
| युक्तयोगः | .................. | ....................... | ............... | ........................... |
| नीलाम्बरः | .................. | ....................... | ............... | ........................... |
| सतृणम् | .................. | ....................... | ............... | ........................... |
| प्रत्येकम् | .................. | ....................... | ............... | ........................... |
| वागर्थाविव | .................. | ....................... | ............... | ........................... |
| नीलोत्पलम् | .................. | ....................... | ............... | ........................... |
| कृष्णसर्पः | .................. | ....................... | ............... | ........................... |
| सवल्कम् | .................. | ....................... | ............... | ........................... |
| कण्ठेकालः | .................. | ....................... | ............... | ........................... |
| कुपुरुषः | .................. | ....................... | ............... | ........................... |
| वनगतः | .................. | ....................... | ............... | ........................... |

इति समासप्रकरणम्

# तद्धितप्रकरणे

## अथापत्याधिकारप्रकरणम्

**(अण्, इञ्, ढक्)**

**समर्थानां प्रथमाद्वा ४ । १ । ८२ ॥**

**इदं पदत्रयमधिक्रियते प्राग्दिश इति यावत् ।**

इत ऊर्ध्वं "प्राग्दिशो विभक्तिः ५ । ३ । १" इति यावत् 'समर्थानाम्', 'प्रथमात्', 'वा' इति पदत्रयम् अधिक्रियते । निर्दिष्टसूत्रेषु उक्तानि त्रीणि पदानि उपतिष्ठन्त इत्यर्थः ।

**प्राग्दीव्यतोऽण् ४ । १ । ८३ ॥**

**तेन दीव्यतीत्यतः प्रागणधिक्रियते ।**

**अश्वपत्यादिभ्यश्च ४ । १ । ८४ ॥**

**दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ४ । १ । ८५ ॥**

**प्राग्दीव्यतीयेष्वर्थेषु । अणोऽपवादः । दितेरपत्यादि दैत्यः । अदितेरादित्यस्य वा (अपत्यम्) आदित्यः । 'यणो मयो द्वे वाच्ये' । मय इति पञ्चमी यण इति षष्ठीति पक्षे यस्य द्वित्वम् ॥**

ण्य-प्रत्ययस्य णकार इत्, णित्वात् 'तद्धितेष्वचामादेः ७ । २ । ११७ ॥' इति आदिवृद्धिर्ज्ञेया ।

**हलो यमां यमि लोपः ८ । ४ । ३४ ॥**

**वा स्यात् । इत्यसति लोपे द्वित्वे च सति त्रियं रूपम् । असति लोपे द्वित्वलोपयोर्वा द्वियम् । द्वित्वाभावे च लोपे च सति एकयम् । प्रजापत्यः ॥**

**वा. देवाद्यञञौ । दैव्यम् । दैवम् ॥**

**वा. बहिषष्टिलोपो यञ् च । बाह्यः ॥**

**वा. ईकक् च ।**

**किति च ७ । २ । ११८ ॥**

**किति तद्धितेऽचामादेरचो वृद्धिः स्यात् । बाहीकः ॥**

**वा. गोरजादिप्रसङ्गे यत् । गोरपत्यादि गव्यम् ॥**

**उत्सादिभ्योऽञ् ४ । १ । ८६ ॥**

**औत्सः । (इत्यपत्यादिविकारान्तार्थाः प्रत्ययाः) ।**

**स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् ४ । १ । ८७ ॥**

**धान्यानां भवन इत्यतः प्रागर्थेष्वाभ्यामेतौ स्तः । स्त्रैणः । पौंस्नः ॥**

**तस्यापत्यम् ४ । १ । ९२ ॥**

**षष्ठ्यन्तात्कृतसन्धेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः ॥**

अत्र "प्राग्दीव्यतोऽण् ४ । १ । ८३" इति सूत्रस्याधिकारः । समर्थात् प्रथमनिर्दिष्टात् षष्ठ्यन्तात् प्रातिपदिकाद् अपत्येऽर्थे तद्धितोऽण् प्रत्ययो वा भवति । अणो णकार इत् । तस्यापत्यमित्यर्थनिर्देश उत्तरसूत्रेषु चोपतिष्ठते ।

**ओर्गुणः ६ । ४ । १४६ ॥**

**उवर्णान्तस्य भस्य गुणस्तद्धिते । उपगोरपत्यमौपगवः ।**

'उपगोरपत्यं पुमान्' इति विग्रहे षष्ठ्यन्तात् प्रातिपदिकाद् उपगु-शब्दात् "तस्यापत्यम्" इति सूत्रेण अपत्येऽर्थे अण्प्रत्ययेऽनुबन्धलोपे 'उपगु + ङस् + अ' इति जाते, तद्धितान्तत्वात् "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां सुपो लुकि 'उपगु अ' इत्यवस्थायां णित्वात् "तद्धितेष्वचामादेः" इति सूत्रेण आदेरच उकारस्य वृद्धौ 'औपगु अ' इति जाते "अचो ञ्णिति" इति प्राप्तां वृद्धिं बाधित्वा प्रकृतसूत्रेण उकारस्य गुणेऽवादेशे 'औपगव' इति जाते, तस्मात् प्रातिपदिकात् सौ, सकारस्य रुत्वे विसर्गे 'औपगवः' इति सिद्ध्यति ।

**अपत्यं पौत्रप्रभृतिगोत्रम् ४ । १ । १६२ ॥**

**अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात् ।**

**एको गोत्रे ४ । १ । ९३ ॥**

**षष्ठ्यन्तात्कृतसन्धेः समर्थादपत्येऽर्थे वक्ष्यमाणाश्च प्रत्यया वा स्युः ।**

**गर्गादिभ्यो यञ् ४ । १ । १०५ ॥**

**गोत्रापत्ये । गर्गस्य गोत्रापत्यं गार्ग्यः । वात्स्यः ॥**

**यञञोश्च २ । ४ । ६४ ॥**

**गोत्रे यद्यञन्तमञन्तं च तदवयवयोरेतयोर्लुक् तत्कृते बहुत्वे न तु स्त्रियाम् । गर्गाः । वत्साः ॥**

**जीवति तु वंश्ये युवा ४ । १ । १६५ ॥**

**वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव स्यान्न तु गोत्रसंज्ञम् ।**

**गोत्राद्यून्यस्त्रियाम् ४ । १ । ९४ ॥**

**यून्यपत्ये विवक्षिते गोत्रप्रत्ययान्तादेव प्रत्ययः स्यात्स्त्रियां तु न युवसंज्ञा ।**

**यञिञोश्च ४ । १ । १०१ ॥**

**गोत्रे यौ यञिञौ तदन्तात्फक् ।**

**आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ७ । १ । २ ॥**

**प्रत्ययादेः फस्य आयन्, ढस्य एय्, खस्य ईन्, छस्य ईय्, घस्य इय्, एते स्युः । गर्गस्य युवापत्यं गार्ग्यायणः । दाक्षायणः ॥**

**अत इञ् ४ । १ । ९५ ॥**

**अपत्येऽर्थे । दाक्षिः ॥**

अकारान्तात् प्रातिपदिकाद् अपत्येऽर्थे तद्धित इञ्प्रत्ययो वा भवतीत्यर्थः । इञो ञकार इत् ।

'दक्षस्यापत्यं पुमान्' इति विग्रहे षष्ठ्यन्ताद् दक्षशब्दात् प्रकृतसूत्रेण इञ्प्रत्ययेऽनुबन्धलोपे 'दक्ष + ङस् + इ' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि 'दक्ष इ' इत्यवस्थायां ञित्वात् "तद्धितेष्वचामादेः" इति सूत्रेण आदिवृद्धौ, भत्वाद् "यस्येति च" इत्यकारलोपे 'दाक्षि' इति जाते, तस्मात् प्रातिपदिकात् सौ, विभक्तिकार्ये 'दाक्षिः' इति सिद्ध्यति । एवमेव गर्गस्यापत्यं पुमान् गार्गिः । दशरथस्यापत्यं दाशरथिः । द्रोणस्यापत्यं द्रौणिः ।

**बाह्वादिभ्यश्च ४ । १ । ९६ ॥**

**बाहविः । औडुलोमिः ॥**

बाह्वादिगणपठितेभ्यः शब्देभ्योऽपि अपत्येऽर्थे इञ्प्रत्ययो वा भवतीति सूत्रार्थः । आकृतिगणोऽयम् ।

'बाहोरपत्यं पुमान्' इति विग्रहे 'बाहु + ङस्' इत्यस्मात् सुबन्तसमर्थात् प्रकृतसूत्रेण इञ्प्रत्यये, प्रातिपदिकत्वात् सुब्लुकि 'बाहु इ' इति जाते, आदिवृद्धौ, भत्वाद् "ओर्गुणः" इत्युकारस्य गुणे, अवादेशे 'बाहवि' इति जाते, तस्मात् सौ, विभक्तिकार्ये 'बाहविः' इति । तथा च 'उडुलोम्नोऽपत्यं पुमान्' इति विग्रहे 'उडुलोमन् + ङस्' इत्यस्मात् इञि, सुब्लुकि 'उडुलोमन् इ' इत्यवस्थायाम् आदिवृद्धौ, भत्वाद् "नस्तद्धिते" इति टिलोपे 'औडुलोमि' इति जाते, तस्मात् सौ 'औडुलोमिः' इति । तस्य बहुत्वविवक्षायां 'उडुलोम्नोऽपत्यानि पुमांसः' इति विग्रहे तु इञं बाधित्वा "लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः" इति वार्तिकेन अ-प्रत्यये 'औडुलोमाः' इति रूपं भवति ।

**शिवादिभ्योऽण् ४ । १ । ११२ ॥**

**अपत्ये । शैवः । गाङ्गः ॥**

शिवादिगणपठितेभ्यः शब्देभ्योऽपत्येऽर्थ अण्प्रत्ययो वा भवतीत्यर्थः ।

'शिवस्यापत्यं पुमान्' इति विग्रहे षष्ठ्यन्तात् समर्थात् शिवशब्दात् प्रकृतसूत्रेण अण्यनुबन्धलोपे 'शिव + ङस् + अ' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'शिव + अ' इत्यवस्थायां णित्वादादिवृद्धौ, भत्वादलोपे 'शैव' इति जाते, तस्मात् प्रातिपदिकात् सौ, विभक्तिकार्ये 'शैवः' इति । शैवः कुमारो गणेशश्च । एवमेव 'गङ्गाया अपत्यं पुमान्' इति विग्रहे पूर्ववद् गाङ्गः । गाङ्गो भीष्मः ।

**ऋष्यन्धकवृष्णिकुरुभ्यश्च ४ । १ । ११४ ॥**

**ऋषिभ्यः- वासिष्ठः । वैश्वामित्रः । अन्धकेभ्यः- श्वाफल्कः । वृष्णिभ्यः-वासुदेवः । कुरुभ्यः- नाकुलः । साहदेवः ॥**

ऋषिवाचकशब्देभ्योऽन्धकवंश- वृष्णिवंश-कुरुवंशवाचकेभ्यः शब्देभ्यश्च अपत्येऽर्थ अण्-प्रत्ययो वा भवति ।

**ऋषिभ्यः** 'वसिष्ठस्यापत्यं पुमान्' इति विग्रहे 'वसिष्ठ + ङस्' इत्यस्मात् सुबन्तसमर्थात् प्रकृतसूत्रेण अणि, विभक्तेर्लुकि 'वसिष्ठ अ' इति जाते, आदिवृद्धौ, भत्वादलोपे 'वासिष्ठ' इत्यस्मात् प्रातिपदिकात् सौ 'वासिष्ठः' इति । एवमेव विश्वामित्रस्यापत्यं पुमान् - वैश्वामित्रः ।

**अन्धकेभ्यः** 'श्वफल्कस्यापत्यं पुमान्' इति विग्रहे अन्धकवंशवाचकात् 'श्वफल्क + ङस्' इति सुबन्तसमर्थादणि, पूर्ववत् प्रक्रियायां 'श्वाफल्कः' इति सिद्ध्यति ।

**वृष्णिभ्यः** 'वसुदेवस्यापत्यं पुमान्' इति विग्रहे वृष्णिवंशवाचकात् षष्ठ्यन्ताद् वसुदेवशब्दादणि, पूर्ववत् प्रक्रियायां 'वासुदेवः' इति सिद्ध्यति । वासुदेवो कृष्णः ।

**कुरुभ्यः** 'नकुलस्यापत्यं पुमान्' इति विग्रहे कुरुवंशवाचकात् षष्ठ्यन्तान् नकुलशब्दादणि, पूर्ववत् 'नाकुलः' इति । एवमेव 'सहदेवस्यापत्यं पुमान्' इति विग्रहे 'साहदेवः' इत्यपि सिद्ध्यति ।

**मातुरुत्संख्यासंभद्रपूर्वायाः ४ । १ । ११५ ॥**

संख्यादिपूर्वस्य मातृशब्दस्योदादेशः स्यादण् प्रत्ययश्च ।

**द्वैमातुरः । षाण्मातुरः । सांमातुरः । भाद्रमातुरः ॥**

संख्यावाचकशब्दपूर्वस्य सम्-शब्दपूर्वस्य भद्र-शब्दपूर्वस्य च मातृ-शब्दस्य अन्त्यस्यालः स्थाने ह्रस्व उकारादेशो भवति, तादृशान् मातृ-शब्दादण्प्रत्ययोऽपि भवतीत्यर्थः ।

'द्वयोर्मात्रोरपत्यं पुमान्' इति विग्रहे 'द्वि + ओस् + मातृ + ओस्' इत्यवस्थायां "तद्धितार्थोत्तरपदसमाहारे च" इति सूत्रेण तद्धितार्थे विषये समासे, समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'द्विमातृ' इति जाते, प्रकृतसूत्रेण संख्यावाचकाद् द्विशब्दपूर्वकान् मातृशब्दादणि, 'मातृ' इत्यस्य ऋकारस्य च उत्वे रपरत्वे 'द्विमातुर् अ' इत्यवस्थायाम् आदिवृद्धौ, स्वादिकार्ये 'द्वैमातुरः' इति सिद्ध्यति । द्वैमातुरो गणेशः । एवमेव

'षण्णां मातृणामपत्यं पुमान्' इति विग्रहे - षाण्मातुरः। षाण्मातुरः कुमारः। संमातुरपत्यं पुमान् - सांमातुरः। भद्रमातुरपत्यं पुमान् - भाद्रमातुरः।

**स्त्रीभ्यो ढक् ४।१।१२०॥**

**स्त्रीप्रत्ययान्तेभ्यो ढक्। वैनतेयः॥**

स्त्रीप्रत्ययान्तेभ्यः शब्देभ्योऽपत्येऽर्थे तद्धितो ढक्प्रत्ययो वा भवतीत्यर्थः। ढकः ककार इत्।

विनताया अपत्यमिति विग्रहे टाप्प्रत्ययान्तत्वाद् 'विनता + ङस्' इत्यस्मात् सुबन्तसमर्थात् प्रकृतसूत्रेण ढक्प्रत्ययेऽनुबन्धलोपे 'विनता ढ' इत्यवस्थायाम् 'आयनेयी...' इति ढकारस्य स्थाने एयादेशे 'विनता एय' इति जाते एयः स्थानिवद्भावेन कित्वे सिद्धे 'किति च' इत्यादिवृद्धौ 'वैनता एय' इति जाते, भत्वाद् आकारलोपे, स्वादिकार्ये 'वैनतेयः' इति सिद्ध्यति। एवमेव - गङ्गाया अपत्यं गाङ्गेयः। राधाया अपत्यं राधेयः। कुन्त्या अपत्यं कौन्तेयः।

**कन्यायाः कनीन च ४।१।११६॥**

**चादण्। कानीनो व्यासः कर्णश्च॥**

अपत्येऽर्थे 'कन्या' इति शब्दस्य स्थाने 'कनीन' इत्यादेशो भवति, चकारग्रहणादण्प्रत्ययोऽपि भवतीत्यर्थः।

कन्याया अपत्यमिति विग्रहे 'कन्या + ङस्' इत्यस्मात् प्रकृतसूत्रेण अणि, अणा सहैव 'कन्या' इत्यस्य 'कनीन' इत्यादेशे च कृते 'कनीन अ' इति जाते, णित्वादादिवृद्धौ, भत्वादलोपे, स्वादिकार्ये 'कानीनः' इति सिद्ध्यति। व्यासकर्णौ कानीनौ बभुवतु।

**राजश्वशुराद्यत् ४।१।१३७॥**

**वा. राज्ञो जातावेव।**

**ये चाभावकर्मणोः ६।४।१६८॥**

**यादौ तद्धिते अन् प्रकृत्या स्यान्न तु भावकर्मणोः। राजन्यः। श्वशुर्यः। जातावेवेति किम्-**

**अन् ६।४।१६७॥**

**प्रकृत्याणि परे। राजनः॥**

**क्षत्राद् घः ४।१।१३८॥**

**क्षत्रियः। जाताविवेत्येव। क्षात्रिरन्यः॥**

**रेवत्यादिभ्यष्ठक् ४।१।१४६॥**

**ठस्येकः ७।३।५०॥**

**अङ्गात्परस्य ठस्येकादेशः। रैवतिकः॥**

**पितृष्वसुश्छण् ४ । १ । १३२ ॥**

**अणोऽपवादः । पैतृष्वस्रीयः ॥**

**ढकि लोपः ४ । १ । १३३ ॥**

**पितृष्वसुरन्त्यस्य लोपः स्यात् ढकि । अत एव ज्ञापकात् ढगपि । पैतृष्वसेयः ॥**

**मातृष्वसुश्च ४ । १ । १३४ ॥**

**पितृष्वसुर्यदुक्तं तदस्यापि स्यात् । मातृष्वस्रीयः । मातृष्वसेयः ॥**

**कुलात् खः ४ । १ । १३९ ॥**

**कुलीनः । तदन्तादपि, उत्तरसूत्रे अपूर्वपदादिति लिङ्गात् । आढ्यकुलीनः ॥**

**वृद्धिर्यस्याचामादिस्तद्वृद्धम् १ । १ । ७३ ॥**

**यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात् ॥**

**जनपदशब्दात् क्षत्रियादञ् ४ । १ । १६८ ॥**

**जनपद-क्षत्रिययोर्वाचकादञ् अपत्ये । पाञ्चालः । 'क्षत्रियसमानशब्दजनपदात् तस्य राजन्यपत्यवत्' । पाञ्चालानां राजा- पाञ्चालः ॥**

**क्षत्रियवाचकशब्देन समानशब्दो यो जनपदवाचकः शब्दस्तमात् षष्ठ्यन्ताद् राजन्यर्थेऽपत्यवत्प्रत्यया भवन्तीत्यर्थः ।**

**द्व्यञ्मगधकलिङ्गसूरमसादण् ४ । १ । १७० ॥**

**द्व्यच् । आङ्गः । वाङ्गः । मागधः ॥**

सौह्मः । मागधः । कालिङ्गः । सौरमसः ।

पूर्वसूत्रेण प्राप्तस्य अञोऽपवादोऽयम् । द्वौ अचौ स्तो यस्मिन्निति द्व्यच् । द्व्यच्-क्षत्रियवाचिशब्दा यदि जनपदस्य नामरूपेणपि प्रयुज्यन्ते तर्हि तेभ्यः 'तस्यापत्यम्' इत्यर्थे अण्-प्रत्ययो भवति, एवं मगध, कलिङ्ग, सूरमस इत्येतेभ्यः क्षत्रियवाचिशब्देभ्यश्च उक्तेऽर्थे अण्-प्रत्ययो भवति ।

अङ्ग, वङ्गइत्येतौ द्व्यचौ देशक्षत्रियवाचिनौ शब्दौ स्तः । अङ्गस्यापत्यमिति विग्रहे 'अङ्गङस्' इति सुबन्तात् पूर्वसूत्रेण प्राप्तमञं बाधित्वा अनेन सूत्रेण अणि, विभक्तिलोपे, आदिवृद्धौ, भत्वेऽलोपे, स्वादिकार्ये- आङ्गः । तस्य राजनि अपि एवमेव भवति, यथा- अङ्गस्य राजा- आङ्गः । एवं वाङ्गस्यापत्यम्, वाङ्गस्य राजा वा- वाङ्गः । मगधस्यापत्यम्/मगधस्य राजा- मागधः । कलिङ्गस्यापत्यम्/कलिङ्गस्य राजा- कालिङ्गः । सूरमसस्यापत्यम्/सूरमसस्य राजा- सौरमस इति ।

## दाशरथिः

'दशरथस्यापत्यं पुमान्' इति विग्रहे षष्ठ्यन्ताद् दशरथशब्दात् "अत इञ्" इति सूत्रेण इञ्प्रत्ययेऽनुबन्धलोपे 'दशरथ + ङस् + इ' इति जाते, तद्धितान्तत्वात् "कृत्तद्धितसमासाश्च" इति सूत्रेण प्रातिपदिकसंज्ञायां सुब्लुकि 'दशरथ इ' इत्यवस्थायां ञित्वात् "तद्धितेष्वचामादेः" इति सूत्रेण आदिवृद्धौ, 'दाशरथ इ' इति जाते, भत्वाद् "यस्येति च" इत्यकारलोपे 'दाशरथि' इति जाते, तस्मात् प्रातिपदिकात् सौ, विभक्तिकार्ये 'दाशरथिः' इति रूपं सिद्ध्यति । (दाशरथी रामः)

## शैवः

'शिवस्यापत्यं पुमान्' इति विग्रहे षष्ठ्यन्तात् समर्थात् शिवशब्दात् "शिवादिभ्योऽण्" इति सूत्रेण अण्यनुबन्धलोपे 'शिव + ङस् + अ' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'शिव + अ' इत्यवस्थायां णित्वात् "तद्धितेष्वचामादेः" इति सूत्रेण आदिवृद्धौ 'शैव अ' इति जाते, भत्वादलोपे 'शैव' इति जाते, तस्मात् प्रातिपदिकात् सौ, विभक्तिकार्ये 'शैवः' इति सिद्ध्यति ।

## वैनतेयः

विनताया अपत्यमिति विग्रहे स्त्रीप्रत्ययान्तत्वाद् 'विनता + ङस्' इत्यस्मात् सुबन्तसमर्थात् "स्त्रीभ्यो ढक्" इति सूत्रेण ढक्प्रत्ययेऽनुबन्धलोपे 'विनता + ङस् + ढ' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि 'विनता ढ' इत्यवस्थायाम् "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" इति सूत्रेण

ढस्य स्थाने एयादेशे 'विनता एय' इति जाते, एयः स्थानिवद्भावेन कित्वात् "किति च" इति सूत्रेण आदिवृद्धौ 'वैनता एय' इति जाते, भत्वाद् आकारलोपे, स्वादिकार्ये 'वैनतेयः' इति सिद्ध्यति ।

## अभ्यासः

### १. अधस्तनसूत्राणामर्थं लिखत

(क) समर्थानां प्रथमाद्वा
(ख) तद्धितेष्वचामादेः
(ग) अत इञ्
(घ) ओर्गुणः
(ङ) शिवादिभ्योऽण्
(च) स्त्रीभ्यो ढक्

### २. प्रश्नानामुत्तराणि देयानि

(क) तद्धितप्रत्ययाः केभ्यो भवन्ति ?

(ख) ञिति णिति च तद्धितेषु केन सूत्रेण कस्य वृद्धिर्भवति ?

(ग) स्त्रीप्रत्ययान्तेभ्यः प्रातिपदिकेभ्योऽपत्येऽर्थे केन सूत्रेण कः प्रत्ययो विधीयते ?

(घ) 'किति च' सूत्रं किं करोति ?

(ङ) बाह्वादिगणपठितेभ्यः शब्देभ्योऽपत्येऽर्थे केन सूत्रेण कः प्रत्ययो भवति ?

(च) 'वसुदेवस्यापत्यं पुमान्' इति विग्रहे किं रूपं सिद्धचति ?

(छ) ऋषिवाचकशब्देभ्योऽपत्येऽर्थे कः प्रत्ययो भवति ?

(ज) अपत्यं किमस्ति ?

(झ) 'षाण्मातुरः' इति पदस्यार्थं लिखत ।

(ञ) "आयनेय्०" इति सूत्रं पूरयत ।

(ट) तद्धितप्रत्ययान्तशब्दानां केन सूत्रेण प्रातिपदिकसंज्ञा भवति ?

### ३. अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत

गाङ्गेयः, सांमातुरः, राधेयः, साहदेवः, कानीनः, दाशरथिः, उडुलोमाः, वैष्णवः, शैवः ।

### ४. प्रकृतिभ्यः प्रत्ययान् विश्लेषयत

औपगवः, गाङ्गः, गार्गिः, श्वाफल्कः, नाकुलः, द्रौणिः, कानीनः, आश्वपतः, बाहविः, कौन्तेयः ।

### ५. प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत

गणपति + अण्, पशुपति + अण्, भगिनी + ढक्, दक्ष + इञ्, नकुल + अण्, रमा + ढक्, आर्या + ढक् ।

### ६. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां प्रदर्शयत

औपगवः, दाक्षिः, बाहविः, राधेयः, कनीनः, द्वैमातुरः, वासिष्ठः, वासुदेवः, नाकुलः ।

## ७. "तस्यापत्यम्" इति सूत्रस्यार्थं स्पष्टतया लिखत ।

## ८. समुचितपदं चित्वा रिक्तस्थानं पूरयत

(क) तद्धिते उवर्णान्तस्य भस्य .................. इति सूत्रेण गुणो भवति ।

(सार्वधातुकार्धधातुकयोः, ओर्गुणः, आद् गुणः)

(ख) तद्धितप्रत्ययाः .................. भवन्ति ।

(धातुभ्यः, प्रातिपदिकेभ्यः)

(ग) तद्धिते ञित्प्रत्यये परे .................. इति सूत्रेण आदिवृद्धिर्भवति ।

(तद्धितेष्वचामादेः, किति च, वृद्धिरेचि)

(घ) 'शिवाया अपत्यं पुमान्' इति विग्रहे .................. इति रूपं भवति ।

(शैवेयः, शैवः)

(ङ) अकारान्तात् प्रातिपदिकादपत्येऽर्थे .................. प्रत्ययो भवति ।

(ढक्, अण्, इञ्)

# अनुप्रयोगः

## १. अधो लिखितानि वाक्यानि पठत

(क) दाशरथी रामो जानक्या सह विवाहं चक्रे ।
(ख) वासुदेवः कृष्णः स्वमातुलं कंसं जघान ।
(ग) गाङ्गेयो भीष्म आजीवनं ब्रह्मचर्ये तस्थौ ।
(घ) कानीनो व्यासोऽष्टादशपुराणानि व्यरचयत् ।
(ङ) भगिनी भागिनेयं स्नापयति ।
(च) शैवो गणेशो विघ्ननाशं करोति ।
(छ) कार्तिकेयः कुमार एव षाण्मातुरो वर्तते ।
(ज) द्वैमातुरस्य गणेशस्योदरं लम्बं वर्तते ।
(झ) वैनतेयो गरुडो विष्णोर्वाहनं वर्तते ।
(ञ) युधिष्ठिरो ज्येष्ठः पाण्डवो बभूव ।
(ट) वासुदेवः कौन्तेयाय अर्जुनाय ज्ञानं ददौ ।

## २. निम्नाङ्कितानां पदानां विग्रहं प्रदर्शयत

यथा - शैवाः = शिवस्यापत्यं पुमांसः ।

भागिनेयः, पाण्डवाः, कौन्तेयः, भार्गवः, गार्गिः, सौपर्णेयः, शार्वेयः, शैवेयौ, कानीनौ ।

# अथ रक्ताद्यर्थकप्रकरणम्

**(अण्, तल्, वुन्)**

**तेन रक्तं रागात् ४ । २ । १ ॥**

**अण् स्यात् । रज्यतेऽनेनेति रागः । कषायेण रक्तं वस्त्रं काषायम् । माञ्जिष्ठम् । रागात् किम् ? देवदत्तेन रक्तं वस्त्रम् ॥**

तृतीयान्तसमर्थाद् रञ्जकद्रव्यवाचकात् प्रातिपदिकात् 'रक्तम्' इत्येतस्मिन्नर्थे तद्धितोऽण् प्रत्ययो वा भवतीत्यर्थः । रञ्ज्-धातोर्घञि, नकारलोपे 'रागः' इति निष्पद्यते ।

'कषायेण रक्तं वस्त्रम्' इति विग्रहे तृतीयान्तासमर्थात् कषाय-शब्दात् प्रकृतसूत्रेण अण्प्रत्ययेऽनुबन्धलोपे 'कषाय + टा + अ' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'कषाय अ' इत्यवस्थायां णित्वादादिवृद्धौ, भसंज्ञकस्य अकारस्य लोपे 'काषाय' इति जाते, तस्मात् प्रातिपदिकात् सौ, नपुंसकत्वात् सोरमि, पूर्वरूपे 'काषायम्' इति सिद्ध्यति । एवं मञ्जिष्ठेन रक्तं वस्त्रम्- माञ्जिष्ठम् ।

**लाक्षारोचनाट्ठक् ४ । २ । २ ॥**

**लाक्षिकः । रौचनिकः ॥**

**नक्षत्रेण युक्तः कालः ४ । २ । ३ ॥**

**अण् स्यात् ।**

तृतीयान्तात् समर्थान् नक्षत्रवाचकशब्दात् 'युक्तः कालः' इत्येतस्मिन्नर्थे अण्प्रत्ययो वा भवतीत्यर्थः ।

**वा. तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम् । पुष्येण युक्तं पौषमहः ॥**

"नक्षत्रेण युक्तः कालः" इति सूत्रेण विहितेऽणि परे तिष्य-पुष्य-शब्दयोर्यकारस्य लोपो भवतीत्यर्थः ।

'पुष्येण युक्तम् अहः' इत्यर्थे 'पुष्य + टा' इत्यस्मात् तृतीयान्तसमर्थाद् "नक्षत्रेण युक्तः कालः" इत्यणि, विभक्तेर्लुकि, आदिवृद्धौ 'पौष्य अ' इत्यवस्थायाम् अनेन वार्तिकेन यकारस्य लोपे 'पौष' इति जाते, तस्मात् प्रातिपदिकाद् अहन्-शब्दस्य विशेषणत्वान्नपुंसकलिङ्गे सौ, विभक्तिकार्ये 'पौषम्' इति । (पौषमहः । पौषो दिवसः ।)

**दृष्टं साम ४ । २ । ७ ॥**

**तेनेत्येव । वसिष्ठेन दृष्टं वासिष्ठं साम ॥**

तृतीयान्तात् समर्थाद् 'दृष्टं साम' इत्येतस्मिन्नर्थे अण्प्रत्ययो वा भवतीत्यर्थः ।

'वसिष्ठेन दृष्टं साम' इत्यर्थे 'वसिष्ठ + टा' इत्यस्मात् समर्थात् प्रकृतसूत्रेण अणि, सुब्लुकि 'वसिष्ठ अ' इति जाते, आदिवृद्धौ, भसंज्ञकाकारलोपे, 'वासिष्ठ' इत्यस्मात् साम-शब्दस्य विशेषणत्वान्नपुंसकलिङ्गे सौ, विभक्तिकार्ये 'वासिष्ठम्' इति सिद्ध्यति ।

**परिवृतो रथः ४ । २ । १६ ॥**

**अस्मिन्नर्थेऽण् प्रत्ययो भवति । वस्त्रेण परिवृतो वास्त्रो रथः ॥**

तृतीयान्तात् समर्थात् 'परिवृतो रथः' इत्यर्थे अण्प्रत्ययो वा भवतीत्यर्थः ।

'वस्त्रेण परिवृतो रथः' इत्यर्थे 'वस्त्र + टा' इति समर्थात् प्रकृतसूत्रेणाणि, विभक्तेर्लुकि, आदिवृद्धौ, भत्वादलोपे 'वास्त्र' इति जाते, रथस्य विशेषणत्वात् तस्मात् पुंलिङ्गे सौ, विभक्तिकार्ये 'वास्त्रः' इति ।

**तत्रोद्धतममत्रेभ्यः ४ । २ । १६ ॥**

**शरावे उद्धृतः शाराव ओदनः ॥**

सप्तम्यन्तात् समर्थात् पात्रवाचकात् शब्दाद् 'उद्धृतम्' इत्यर्थेऽण् प्रत्ययो वा भवतीत्यर्थः ।

'शरावे उद्धृतः' इत्यर्थे 'शराव + ङि' इति समर्थात् प्रकृतसूत्रेण अणि, सुब्लुकि 'शराव अ' इति जाते, आदिवृद्धौ, भत्वादलोपे, ओदनस्य विशेषणत्वात् 'शाराव' इत्यस्मात् पुंलिङ्गे सौ 'शारावः' इति ।

**संस्कृतं भक्षाः ४ । २ । १६ ॥**

**सप्तम्यन्तादण् स्यात्संस्कृतेऽर्थे यत्संकृतं भक्षाश्चेत्ते स्युः । भ्राष्ट्रेषु संस्कृता भ्राष्ट्रा यवाः ॥**

'भ्राष्ट्रेषु संस्कृताः' इत्यर्थे 'भ्राष्ट्र + सुप्' इत्यस्मात् समर्थात् प्रकृतसूत्रेण अणि, विभक्तेर्लुकि, आदिवृद्धौ, भत्वादलोपे 'भ्राष्ट्र' इति जाते, 'यवाः' इत्यस्य विशेषणत्वात् पुंलिङ्गे प्रथमाया बहुवचने जसि, विभक्तिकार्ये 'भ्राष्ट्राः' इति सिद्ध्यति ।

**सास्मिन् पौर्णमासीति ४ । २ । २१ ॥**

**इतिशब्दात् संज्ञायामिति लभ्यते । पौषी पौर्णमासी अस्मिन्पौषो मासः ॥**

**साऽस्य देवता ४ । २ । २४ ॥**

**इन्द्रो देवताऽस्येति ऐन्द्रं हविः । पाशुपतम् । बार्हस्पत्यम् ॥**

प्रथमान्तात् समर्थाद् देवतावाचकात् शब्दाद् 'अस्य देवता' इत्यर्थेऽण्-प्रत्ययो वा भवतीति सूत्रार्थः ।

'इन्द्रो देवता अस्य' इत्यर्थे 'इन्द्र + सु' इत्यस्मात् समर्थात् प्रकृतसूत्रेण अणि, विभक्तेर्लुकि 'इन्द्र अ'

इति जाते, आदिवृद्धौ, भसंज्ञकस्य अकारस्य लोपे 'ऐन्द्र' इति जाते, 'हविः' इत्यस्य विशेषणत्वात् तस्मान्नपुंसकलिङ्गे सौ, विभक्तिकार्ये 'ऐन्द्रम्' इति। तथा च - 'पशुपतिर्देवता अस्य' इति विग्रहे 'पशुपति + सु' इत्यस्मात् प्राप्तमणं बाधित्वा दित्यदित्येति ण्यप्रत्यये प्राप्ते तमपि बाधित्वा अश्वपत्यादिगणपाठे पठितत्वाद् "अश्वपत्यादिभ्यश्च ४। १। ८४" इत्यणि, पूर्ववत् प्रक्रियया 'पाशुपतम्' इति सिद्ध्यति। 'बृहस्पतिर्देवता अस्य' इति विग्रहे तु 'बृहस्पति + सु' इत्यस्मात् प्राप्तमणं बाधित्वा "दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ४।१।८५" इति सूत्रेण ण्यप्रत्यये णकारस्य इत्संज्ञायां लोपे 'बृहस्पति य' इति जाते, आदिवृद्धौ, भसंज्ञस्य इकारस्य लोपे, स्वादिकार्ये 'बार्हस्पत्यम्' इति।

**वाय्वृतुपित्रुषसो यत् ४। २। ३१॥**

**वायव्यम्। ऋतव्यम्॥**

**रीङ् ऋतः ७। ४। २७॥**

**अकृद्यकारेऽसार्वधातुकयकारे च्वौ च परे ऋदन्ताङ्गस्य रीङादेशः। 'यस्येति च'। पित्र्यम्। उषस्यम्॥**

**पितृव्यमातुलमातामहपितामहाः ४। २। ३६॥**

**एते निपात्यन्ते। पितुर्भ्राता- पितृव्यः। मातुर्भ्राता- मातुलः। मातुः पिता- मातामहः। पितुः पिता- पितामहः॥**

**तस्य समूहः ४। २। ३७॥**

**काकानां समूहः काकम्॥**

षष्ठ्यन्तात् समर्थात् 'समूहः' इत्यर्थेऽण् प्रत्ययो वा भवतीति सूत्रार्थः।

'काकानां समूहः' इत्यर्थे 'काक + आम्' इत्यस्मात् समर्थात् प्रकृतसूत्रेण अणि, विभक्तेर्लुकि, आदिवृद्धौ 'काक अ' इति जाते, भसंज्ञकस्याकारस्य लोपे, स्वादिकार्ये 'काकम्' इति।

**भिक्षादिभ्योऽण् ४। २। ३८॥**

**भिक्षाणां समूहो भैक्षम्। गर्भिणीनां समूहो गार्भिणम्।**

षष्ठ्यन्तसमर्थाद् भिक्षादिगणपठितात् शब्दात् समूहेऽर्थेऽण्प्रत्ययो वा भवति।

'भिक्षाणां समूहः' इत्यर्थे 'भिक्षा + आम्' इत्यस्मात् प्रकृतसूत्रेण अणि, पूर्ववत् प्रक्रियायां 'भैक्षम्' इति सिद्ध्यति।

'गर्भिणीनां समूहः' इत्यर्थे 'गर्भिणी + आम्' इत्यस्मात् प्रकृतसूत्रेण अणि, विभक्तेर्लुकि 'गर्भिणी अ' इत्यवस्थायाम् -

**वा. भस्याढे तद्धिते। इति पुंवद्भावे कृते-**

ढ-प्रत्ययभिन्ने तद्धितसंज्ञके प्रत्यये परे भस्याङ्गस्य पुंवद्भावो भवतीत्यर्थः।

इति वार्तिकेन पुंवद्भावे कृते 'गर्भिन् अ' इति जाते "नस्तद्धिते" इति सूत्रेण टिलोपे प्राप्ते तं प्रबाध्य -

**इनण्यनपत्ये ६ । ४ । १६४ ॥**

**अनपत्यार्थेऽणि परे इन् प्रकृत्या स्यात् । तेन नस्तद्धित इति टिलोपो न ।**

अनेन सूत्रेण 'गर्भिन्' इत्यस्य इन्-भागस्य प्रकृतिभावे, आदिवृद्धौ, नकारस्य णत्वे, स्वादिकार्ये 'गार्भिणम्' इति सिद्ध्यति ।

**अन् ६ । ४ । १६७ ॥**

**अन् प्रकृत्या स्यादणि परे । युवतीनां समूहो यौवनम् ।**

'युवतीनां समूहः' इति विग्रहे 'युवति + आम्' इत्यस्माद् "भिक्षादिभ्योऽण्" इत्यणि, विभक्तेर्लुकि, पूर्ववत् पुंवद्भावे, आदिवृद्धौ 'यौवन् अ' इत्यवस्थायां प्राप्तं टिलोपं बाधित्वा प्रकृतसूत्रेण 'अन्' इत्यस्य प्रकृतिभावे, स्वादिकार्ये 'यौवनम्' इति सिद्ध्यति ।

**ग्रामजनबन्धुभ्यस्तल् ४ । २ । ४३ ॥**

**तलन्तं स्त्रियाम् । ग्रामता । जनता । बन्धुता ।**

षष्ठ्यन्तसमर्थेभ्यो ग्राम-जन-बन्धु-शब्देभ्यः समूहेऽर्थे तल्प्रत्ययो वा भवतीत्यर्थः । तल्प्रत्ययान्ताः शब्दाः स्त्रीलिङ्गे प्रयुज्यन्ते । तलो लकार इत् ।

'ग्रामाणां समूहः' इत्यर्थे 'ग्राम + आम्' इत्यस्मात् प्रकृतसूत्रेण तल्प्रत्ययेऽनुबन्धलोपे, विभक्तेर्लुकि 'ग्रामत' इति जाते, तलन्तस्य स्त्रीत्वात् टापि, सवर्णदीर्घे 'ग्रामता' इति जाते, तस्मात् सौ, हल्ङ्यादिलोपे 'ग्रामता' इति रूपं सिद्ध्यति । एवमेव जनानां समूहो जनता । बन्धूनां समूहो बन्धुता ।

**वा. गजसहायाभ्यां चेति वक्तव्यम् । गजता । सहायता ॥**

षष्ठ्यन्तसमर्थाभ्यां गज-सहाय-शब्दाभ्यां च समूहेऽर्थे तल्प्रत्ययो वा भवतीत्यर्थः ।

'गजानां समूहः' इत्यर्थे 'गज + आम्' इत्यस्मात् प्रकृतवार्तिकेन तलि, पूर्ववत् प्रक्रियायां 'गजता' इति सिद्ध्यति । एवमेव 'सहायानां समूहः' इत्यर्थे - सहायता ।

**अचित्तहस्तिधेनोष्ठक् ४ । २ । ४७ ॥**

अचित्ताः = अप्राणिनः, प्राणिभिन्नवस्तूनीत्यर्थः । अचित्तवाचिभ्यः शब्देभ्यः, हस्तिन्, धेनु इत्येताभ्यां शब्दाभ्यां च 'तस्य समूहः' इत्येतस्मिन् विषये ठक्-प्रत्ययो भवति । विधिरयम् अणोऽञश्चापवादः ।

**इसुसुक्तान्तात्कः ७ । २ । ५१ ॥**

**इस् उस् उक् त एतदन्तात्परस्य ठस्य कः । साक्तुकम् । हास्तिकम् । धेनुकम् ॥**

इस्, उस् इत्येवमन्तेभ्यः, उक्-प्रत्याहारघटितवर्णान्तेभ्यः, तकारान्तेभ्यश्च अङ्गेभ्य उत्तरस्य प्रत्ययादौ विद्यमानस्य ठकारस्य स्थाने ककारादेशो भवति । इकादेशस्यापवादः ।

साक्तुकमिति अचित्तवाचिन उदाहरणम् । 'सक्तूनां समूहः' इति विग्रहे पूर्वसूत्रेण ठकि, उगन्तत्वादनेन सूत्रेण ठस्य कादेशे, आदिवृद्धौ- साक्तुकम् । हस्तिन्- हस्तिनां समूहः - हस्तिन् आम् ठक् (ठ) - हस्तिन् ठ - हस्तिन् इक (ठस्येकः) - हास्तिन् इकः (किति च) - हास्त् इक (नस्तद्धिते) - हास्तिक - हास्तिकम् । धेनु- धेनूनां समूहः - धेनु आम् ठक् (ठ) - धेनु ठ - धेनु क (इसुसुक्तान्तात्कः) - धेनुकम् ।

**तदधीते तद्वेद ४ । २ । ५९ ॥**

द्वितीयान्तात् समर्थात् प्रातिपदिकात् 'अधीते' इत्यर्थे 'वेद' इत्यर्थे च अण्प्रत्ययो वा भवतीति सूत्रार्थः ।

**न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ७ । ३ । ३ ॥**

**पदान्ताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः, किन्तु ताभ्यां पूर्वौ क्रमादैचावागमौ स्तः । व्याकरणमधीते वेद वा वैयाकरणः ॥**

पदान्ताभ्यां यकार-वकाराभ्यामुत्तरस्य अचामादेः अचः स्थाने ञिति णिति किति च तद्धितप्रत्यये परतः प्राप्ता वृद्धिर्न भवति, ताभ्यां तु यकार-वकाराभ्यां पूर्वम् ऐच्-प्रत्याहारघटितवर्णौ आगमौ भवतः । यथासङ्ख्यं यकारात् पूर्वावयव ऐकारः, वकारात् पूर्वावयवश्च औकारः ।

'व्याकरणमधीते वेद वा' इति विग्रहे 'व्याकरण + अम्' इत्यस्माद् द्वितीयान्तसमर्थात् "तदधीते तद्वेद" इत्यणि, विभक्तेर्लुकि 'व्याकरण अ' इत्यवस्थायां पर्जन्यवल्लक्षणप्रवृत्त्या प्राप्तायामादिवृद्धौ प्रकृतसूत्रेण तां निषिध्य यकारात्पूर्वम् ऐकारागमे 'वैयाकरण अ' इति जाते, भत्वादलोपे, स्वादिकार्ये 'वैयाकरणः' इति ।

**क्रमादिभ्यो वुन् ४ । २ । ६१ ॥**

**क्रमकः । पदकः । शिक्षकः । मीमांसकः ॥**

'क्रम' इत्यादिभ्यः द्वितीयान्तसमर्थेभ्यः प्रातिपदिकेभ्यः 'तदधीते', 'तद्वेद' इत्यनयोरर्थयोस्तद्धितो वुन्-प्रत्ययो वा भवतीति सूत्रार्थः । अणोऽपवादः । वुनो नकार इत् । युवोरिति वोरकादेशो भवति ।

'क्रममधीते वेद वा' इति विग्रहे 'क्रम + अम्' इति द्वितीयान्तसमर्थात् प्राप्तमणं बाधित्वा प्रकृतसूत्रेण वुन्प्रत्ययेऽनुबन्धलोपे, विभक्तेर्लुकि 'क्रम वु' इति जाते "युवोरनाकौ" इति वोरकादेशे, भसंज्ञकस्य अकारस्य लोपे 'क्रमक' इति जाते, तस्मात् प्रातिपदिकात् सौ, विभक्तिकार्ये 'क्रमकः' इति सिद्ध्यति । एवमेव - पदमधीते वेद वा पदकः । शिक्षामधीते वेद वा शिक्षकः । मीमांसामधीते वेद वा मीमांसकः इति ।

**क्रतूक्थादिसूत्रान्ताट्ठक् ४ । २ । ६० ॥**

**क्रतुविशेषवाचिनामेव ग्रहणम् । तेभ्यो मुख्यार्थेभ्यो वेदितरि, तत्प्रतिपादकग्रन्थपरेभ्यस्त्वध्येतरि । अग्निष्टोमिकः । वाजपेयिकः । उक्थं सामविशेषः, तल्लक्षणपरो ग्रन्थविशेषो लक्षणयोक्थम् ।**

**तदधीते वेद वा औक्थिकः ॥**

**वा. विद्यालक्षणकल्पान्ताच्चेति वक्तव्यम् । वायसविद्यिकः । गौलक्षणिकः । पाराशरकल्पिकः ॥**

## अभ्यासः

### १. प्रदत्तानि सूत्राणि पठत

(क) तेन रक्तम् रागात्

(ख) साऽस्य देवता

(ग) ग्रामजनबन्धुभ्यस्तल्

(घ) क्रमादिभ्यो वुन्

(ङ) तदधीते तद्वेद

(च) संस्कृतं भक्षाः

### २. प्रश्नानामुत्तराणि देयानि

(क) क्रमादिगणपठितान् पञ्चशब्दान् लिखत ।

(ख) 'गार्भिणम्' इति प्रयोगे "नस्तद्धिते" इति टिलोपो कथं न भवति ?

(ग) 'जनता' इति पदस्य कोऽर्थः ?

(घ) 'गजसहायानां चेति वक्तव्यम्' इति वार्तिकस्यार्थं सोदाहरणं लिखत ।

(ङ) षष्ठ्यन्तसमर्थात् समूहेऽर्थे केन सूत्रेण कः प्रत्ययो भवति ?

(च) 'तत्रोद्धृतममत्रेभ्यः' इति सूत्रं किं करोति ?

(छ) "तिष्यपुष्ययोः०" इति वार्तिकं पूरयित्वा सोदाहरणं तदर्थञ्च लिखत ।

(ज) "अन्" इति सूत्रस्यार्थं लिखत ।

(झ) "भस्याढे तद्धिते" इति वार्तिकेन किं क्रियते ?

(ञ) "न य्वाभ्यां०" इति सूत्रं पूरयत ।

### ३. अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत

पदकः, वैयाकरणः, सहायता, यौवनम्, बन्धुता, पाशुपतम्, वास्त्रः, शाराबः, भ्राष्ट्रा ।

### ४. प्रकृतिभ्यः प्रत्ययान् विश्लेषयत

क्रमकः, ग्रामता, यौवनम्, गार्भिणम्, काकम्, बार्हस्पतम्, वासिष्ठम्, पौषमहः, पदकः ।

### ५. प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत

जन + तल्, शिक्षा + वुन्, गज + तल्, बक + अण्, भिक्षा + अण्, इन्द्र + अण्, वस्त्र + अण् ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां प्रदर्शयत**

काषायम्, पौषमहः, वासिष्ठम्, वास्त्रः, शाराबः, भ्राष्ट्रः, पाशुपतम्, काकम्, गार्भिणम्, यौवनम्, ग्रामता, सहायता, मीमांसकः ।

७. **"भिक्षादिभ्योऽण्" इति सूत्रस्यार्थं सोदाहरणं लिखत ।**

## अनुप्रयोगः

१. **अधो लिखितानि वाक्यानि पठत**

(क) शिक्षकाः छात्रेभ्यो विद्यादानं कुर्वन्ति ।

(ख) सन्यासिनः काषायं वस्त्रं धारयन्ति ।

(ग) पाणिनिर्विश्वस्य सर्वश्रेष्ठो वैयाकरणोऽस्ति ।

(घ) राष्ट्रसेवकैः जनतायाः सेवा कर्तव्या ।

(ङ) पाशुपतक्षेत्रं समस्तानां हिन्दूधर्मावलम्बिनां पवित्रं तीर्थस्थलं वर्तते ।

(च) बालकः भ्राष्ट्रं मर्कटान्नं खादति ।

(छ) जनाः वास्त्रं रथं पश्यन्ति ।

(ज) सहायहीनैर्जनैः सहायता अपेक्ष्यते ।

२. **निम्नाङ्कितानां पदानां विग्रहं प्रदर्शयत**

यथा - बाकम् ⟶ बकानां समूहः ।

गजता, भ्राष्ट्राः, वैयाकरणः, शिक्षकः, काषायम्, शाराबः, यौवनम्, गार्भिणम् ।

३. **वुन्प्रत्ययान्तानि पञ्च पदानि अन्विष्य प्रत्येकं त्रीणि वाक्यानि रचयत ।**

# अथ चातुरर्थिकप्रकरणम्

**तदस्मिन्नस्तीति देशे तन्नाम्नि ४ । २ । ६७ ॥**

**उदुम्बराः सन्त्यस्मिन् देशे- औदुम्बरो देशः ।**

प्रथमान्तसमर्थात् 'तत् अस्मिन् अस्ति' इत्यर्थे अणादयः प्रत्यया भवन्ति, प्रत्यययान्तशब्देन तन्नामके देशे गम्ये ।

उदुम्बराः सन्ति अस्मिन् देशे - उदुम्बर जस् अण् (अ) - उदुम्बर अ - औदुम्बर अ - औदुम्बर् अ - औदुम्बर - औदुम्बरः ।

**तेन निर्वृत्तम् ४ । २ । ६८ ॥**

**कुशाम्बेन निर्वृत्ता- कौशाम्बी नगरी ।**

तृतीयान्तसमर्थात् 'निर्वृत्तम्' इत्यर्थे अणादयः प्रत्यया भवन्ति, प्रत्यययान्तशब्देन तन्नामके देशे गम्ये ।

कुशाम्बेन निर्वृत्ता नगरी - कुशाम्ब टा अण् (अ) - कुशाम्ब अ - कौशाम्ब अ - कौशाम्ब् अ - कौशाम्ब - कौशाम्ब ङीप् (ई) - कौशाम्ब् ई - कौशाम्बी - कौशाम्बी ।

**तस्य निवासः ४ । २ । ६९ ॥**

**शिवीनां निवासो देशः- शैवः ।**

षष्ठ्यन्तसमर्थात् 'तस्य निवासः' इत्यर्थे अणादयः प्रत्यया भवन्ति, प्रत्यययान्तशब्देन तन्नामके देशे गम्ये ।

शिवीनां निवासो देशः - शिवि आम् अण् - शिवि अ - शैवि अ - शैव् अ - शैव - शैवः ।

**अदूरभवश्च ४ । २ । ७० ॥**

**विदिशाया अदूरभवम्- वैदिशम् ।**

षष्ठ्यन्तसमर्थात् 'तस्य अदुरभवः (निकटः)' इत्यर्थे अणादयः प्रत्यया भवन्ति, प्रत्यययान्तशब्देन तन्नामके देशे गम्ये ।

विदिशाया अदूरभवं नगरम् - विदिशा ङस् अण् - विदिशा अ - वैदिशा अ - वैदिश् अ - वैदिश - वैदिशम् ।

उपरितनैश्चतुर्भिः सूत्रैरुक्ता अर्थाः चतुरार्थाः कथ्यन्ते । प्रकरणेऽस्मिन् विहिता विधीयमानाश्च सर्वेऽपि प्रत्ययाश्चातुरर्थिकाः सन्ति ।

**वुञ्-छण्-क-ठजिल-शेनि-र-ढञ्-ण्य-य-फक्-फिञिञ्-ञ्य-कक्-ठकोऽरीहण-कृशाश्वर्श्य-कुमुद-काश-तृण-प्रेक्षाश्म-सखि-संकाश-बल-पक्ष-कर्ण-सुतंगम-प्रगदिन्-वराह-कुमुदादिभ्यः ४ । १ । ८० ॥**

**सप्तदशभ्यः सप्तदश क्रमात्स्युश्चातुरर्थ्याम् । अरीहणादिभ्यो वुञ्- अरीहणेन निर्वृत्तमारीहणकम् । कृशश्वादिभ्यश्छण्- कार्शाश्वीयः । ऋश्यादिभ्यः कः- ऋष्यकम् । कुमुदादिभ्यष्ठच्- कुमुदिकम् । काशादिभ्य इलः- काशिलः । तृणादिभ्यः सः- तृणसम् । प्रेक्षादिभ्य इनिः- प्रेक्षी । अश्मादिभ्यो रः- अश्मरः । सख्यादिभ्यो ढञ्- साखेयम् । संकाशादिभ्यो ण्यः- सांकाश्यम् । बलादिभ्यो यः- बल्यम् । पक्षादिभ्यः फक्- पाक्षायणः । ग.सू. पथः पन्थ च । पान्थायनः । कर्णादिभ्यः फिञ्- कार्णायनिः । सुतंगमादिभ्य इञ्- सौतंगमिः । प्रगदिनादिभ्यो ञ्यः- प्रागद्यः । वराहादिभ्यः कक्- वाराहकः । कुमुदादिभ्यष्ठक्- कौमुदिकः ॥**

वुञ्, छण्, क, ठच्, इल, श, इनि, र, ढञ्, ण्य, य, फक्, फिञ्, इञ्, ञ्य, कक्, ठक् इत्येते सप्तदश प्रत्ययाः । अरीहण, कृशाश्व, ऋश्य, कुमुद, काश, तृण, प्रेक्षा, अश्म, सखि, संकाश, बल, पक्ष, कर्ण, सुतङ्गम, प्रगदिन्, वराह, कुमुद इत्येते प्रातिपदिकगणाश्च सप्तदश एव । आदि-शब्दो द्वन्द्वान्ते श्रूयमाणत्वात् प्रत्येकं प्रातिपदिकगणेन अभिसम्बध्यते । तत्र यथासङ्ख्यं अरीहणादिभ्यः सप्तदशभ्यः प्रातिपदिकगणेभ्यो वुञादयः शप्तदश प्रत्ययाः क्रमेण चातुरर्थिका भवन्ति । 'तदस्मिन्नस्ति देशे', 'तेन निर्वृत्तम्', 'तस्य निवासः', अदूरभवश्च' इति चतुःष्वर्थेषु प्रथमोच्चारिततत्तद्विभक्त्यन्तात् प्रातिपदिकाद् यथायोग्यं वुञादयः प्रत्यया भवन्तीति समस्तसूत्रार्थः । अणोऽपवादः ।

अहीरणेन निर्वृत्तम् - अहीरण टा वुञ् (वु) - अहीरण वु - अहीरण अक - आहीरण अक - आहीरण् अक - आहीरणक - आहीरणकम् । कृशाश्वेन निर्वृत्तः - कृशाश्व टा छण् (छ) - कृशाश्व छ - कृशाश्व ईय - कार्शाश्व ईय - कार्शाश्व् ईय - कार्शाश्वीय - कार्शाश्वीयः । इत्यादि ।

**नद्या मतुप् ४ । २ । ८५ ॥**

**चातुरर्थिकः । इक्षुमती ॥**

नद्यां वाच्यायां चातुरर्थिको मतुप्-प्रत्ययो भवति । मतुपि उकार-पकारौ इतौ । उगित्वात् स्त्रियाम् 'उगितश्च' इति ङीप् ।

इक्ष्ववः सन्ति अस्याम् - इक्षु जस् मतुप् (मत्) - इक्षुमत् - इक्षुमत् ङीप् - इक्षुमती - इक्षुमती ।

**कुमुदनडवेतसेभ्यो ड्मतुप् ४ । २ । ८७ ॥**

कुमुद, नड, वेतस इत्येतेभ्यः शब्देभ्यः चातुरर्थ्यां ड्मतुप्-प्रत्ययो भवति । ड्मतुपः डकार उकार-पकारौ च इतः, मत् इति शिष्यते । डित्वात् टेर्लोपो बोध्यः ।

**झयः ८ । २ । १० ॥**

**मतोर्मस्य वः । कुमुद्वान् । नड्वान् ॥**

कुमुदाः सन्त्यस्मिन्निति - कुमुद जस् ड्मतुप् (मत्) (कुमुदनड...) - कुमुद मत् - कुमुद् मत् (डित्वात् टिलोपः) - कुमुद् वत् (झयः) - कुमुद्वत् - कुमुद्वान् । एवं नडाः सन्त्यस्मिन्निति- नड्वान् ।

**मादुपधायाश्च मतोर्वोऽयवादिभ्यः ८ । २ । ९ ॥**

**मवर्णावर्णान्तान्मवर्णावर्णोपधायाश्च यवादिवर्जितात्परस्य मतोर्मस्य वः । वेतस्वान् ॥**

मकारान्तात्, मकारोपधात्, अवर्णान्तात्, अवर्णोपधात् च यवादिगणपठितभिन्नात् शब्दात् परस्य 'मत्' इत्यस्य मकारस्य स्थाने वकारादेशो भवति ।

वेतसाः सन्ति अत्रेति - वेतस जस् ड्मतुप् (मत्) (कुमुदनड...) - वेतस मत् - वेतस् मत् (डित्वात् टिलोपः) - वेतस् वत् (मादुपधायाश्च...) - वेतस्वत् - वेतस्वान् ।

॥ इति चातुरर्थिकाः ॥

## अथ शैषिकप्रकरणम्

**शेषे ४ । २ । ९२ ॥**

**अपत्यादिचतुरर्थ्यन्तादन्योऽर्थः शेषस्तत्राणादयः स्युः । चक्षुषा गृह्यते चाक्षुषं रूपम् । श्रावणः शब्दः । औपनिषदः पुरुषः । दृषदि पिष्टा दार्षदाः सक्तवः । ऊलुखले क्षुण्णः- औलुखलो यावकः । अश्वैरुह्यते- आश्वो रथः । चतुर्भिरुह्यते- चातुरं शकटम् । चतुर्दश्यां दृश्यते चातुर्दशं रक्षः । 'तस्य विकारः' इत्यतः प्राक् शेषाधिकारः ॥**

अपत्यादिभ्यः चतुर्थ्यन्तेभ्योऽर्थेभ्योऽन्योऽर्थः शेषः, तत्र अणादयो घादयश्च प्रत्यया भवन्तीत्यर्थः । तस्य विकारः ४ । ३ । १३४ ॥ इत्यतः प्रागेव शेषाधिकारः । एषोऽधिकारः स्वतन्त्रविधिश्च । शेषाधिकारे सूत्रैरप्रतिपादितेष्वप्यर्थेषु अनेन सूत्रेण अणादयः प्रत्यया विधीयन्ते ।

'चक्षुषा गृह्यते' इति विग्रहे 'चक्षुष् + टा' इति सुबन्तसमर्थात् 'शेषे' इति अण्-प्रत्ययेऽनुबन्धलोपे 'चक्षुष् टा अ' इत्यवस्थायां, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि, 'तद्धितेष्वचामादेः' इति आदिवृद्धौ, 'चाक्षुष' इति जाते, प्रातिपदिकत्वात् ततः नपुंसकलिङ्गे सौ, सोरमि, पूर्वरूपे 'चाक्षुषम्' इति रूपं सिद्धम् । (चाक्षुषं रूपम् ।) 'श्रवणेन गृह्यते' इति विग्रहे तृतीयान्तात् श्रवणशब्दाद् अणि, सुपो लुकि, आदिवृद्धौ, भत्वादकारलोपे, विभक्तिकार्ये, 'श्रावणः' इति (श्रावणः शब्दः) । 'चतुर्भिरुह्यते' इति विग्रहे

'चतुर् + भिस्' इत्यस्मादणि, आदिवृद्धौ, नपुंसके सौ 'चातुरम्' इति। (चातुरं शकटम्) 'चतुर्दश्यां दृश्यते' इति विग्रहे 'चतुर्दशी + ङि' इत्यस्मादणि, आदिवृद्धौ, भत्वाद् ईकारलोपे, 'रक्षः' इत्यस्य विशेषणत्वाद् नपुंसके सौ 'चातुर्दशं रक्षः' इति। प्रायेण एवमेव उपनिषदि दृष्टः, औपनिषदः पुरुषः, दृषदि पिष्टा, दार्षदाः सक्तवः। इत्यादि।

**राष्ट्रावारपाराद् घखौ** ४।२।९३॥

**आभ्यां क्रमाद् घखौ स्तः शेषे। राष्ट्रे जातादिः राष्ट्रियः। अवारपारीणः।**

**वा. अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम्। अवारीणः। पारीणः। पारावारीणः। इह प्रकृतिविशेषाद् घादयष्टचुटचुलन्ताः प्रत्यया उच्यन्ते तेषां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते**॥

राष्ट्र, अवारपार इत्येताभ्यां शब्दाभ्यां सुबन्तसमर्थाभ्यां शेषेऽर्थे क्रमाद् घ-खौ प्रत्ययौ वा भवतः। 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' इति घस्य इय्, खस्य ईन्।

'राष्ट्रे जातः, राष्ट्रे भवः' इति विग्रहे सप्तम्यन्तसमर्थाद् राष्ट्रशब्दात् 'शेषे' इति अणि प्राप्ते तं प्रबाध्य 'राष्ट्रावारपाराद् घखौ' इत्यनेन घप्रत्यये 'राष्ट्र ङि घ' इत्यवस्थायां तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि 'राष्ट्र घ' इति जाते, 'आयनेयी०' इत्यदिना 'घ' इत्यस्य स्थाने इयादेशे, भत्वाद् 'यस्येति च' इति अकारलोपे, 'राष्ट्रिय', तस्मात् प्रतिपदिकसंज्ञायां, पुंलिङ्गे सौ, रुत्वादिकार्ये 'राष्ट्रियः' इति रूपम्। (राष्ट्रियः पुरुषः, राष्ट्रिया संस्कृतिः, राष्ट्रियं धनम्)

'अवारपारे भवः' इति विग्रहे 'अवारपार + ङि' इत्यस्मात् खप्रत्यये, सुपो लुकि, खकारस्य ईनादेशे, अकारलोपे, णत्वे च कृते, 'अवारपारीण', तस्मात् सौ 'अवारपारीणः' इति। (गङ्गाया अवारपारीणो देशः)

**ग्रामाद्यखञौ** ४।२।९४॥

**ग्राम्यः। ग्रामीणः**॥

ग्राम-शब्दप्रकृतिकसुबन्तसमर्थात् शेषेऽर्थे य-खञौ तद्धितप्रत्ययौ वा भवतः।

'ग्रामे जातः' इति विग्रहे सप्तम्यन्ताद् ग्रामशब्दाद् अनेन सूत्रेण यप्रत्यये, प्रातिपदिकत्वात् सुपो लुकि, 'यस्येति चे'ति अकारलोपे 'ग्राम्य', ततः सौ 'ग्राम्यः' इति सिद्धम्। खञ्-प्रत्यये तु खकारस्य ईनादेशे, अकारलोपे, णत्वे, विभक्तिकार्ये 'ग्रामीणः' इति।

**नद्यादिभ्यो ढक्** ४।२।९७॥

**नादेयम्। माहेयम्। वाराणसेयम्**॥

नद्यादिगणपठितेभ्यो नदी, मही, वाराणसी, श्रावस्ती इत्यादिभ्यः शब्देभ्यः शैषिकेऽर्थे ढक्-प्रत्ययो भवति। नद्यां जातं भवं वा - नदी ङि ढक् - नदी ढ - नदी एय (आयनेयी...) - नादी एय (किति च) -

नाद् एय (यस्येति च) - नादेय - नादेयम् । एवं मह्यां जातं भवं वा - माहेयम् । वाराणस्यां जातं भवं वा - वाराणसेयम् ।

**दक्षिणापश्चात्पुरसस्त्यक्** ४ । २ । ९७ ॥

**दाक्षिणात्यः** । **पाश्चात्त्यः** । **पौरस्त्यः** ॥

दक्षिणा-पश्चात्-पुरस्-शब्देभ्यः शेषेऽर्थे त्यक्-प्रत्ययो भवति । त्यकः ककार इत् ।

'दक्षिणा भवः' इति विग्रहे 'दक्षिणा' इत्यव्ययशब्दात् अनेन त्यक्-प्रत्ययेऽनुबन्धलोपे, कित्वात् 'किति च' इति आदिवृद्धौ 'दाक्षिणात्य', ततः सौ 'दाक्षिणात्यः' इति सिद्धयति । एवमेव 'पश्चात् भवः' इति विग्रहे पश्चात्-शब्दात् त्यकि, पूर्ववत् कार्ये, 'पाश्चात्त्यः' । एवमेव 'पुरोः भवः' इति विग्रहे पुरस्-शब्दात् 'पौरस्त्यः' इत्यपि ।

**द्युप्रागपागुदक्प्रतीचो यत्** ४ । २ । १०१ ॥

**दिव्यम्** । **प्राच्यम्** । **अपाच्यम्** । **उदीच्यम्** । **प्रतीच्यम्** ॥

दिव्, प्राच्, अपाच्, उदीच्, प्रतीच् इत्येतेभ्यो भवार्थे शैषिको यत्-प्रत्ययो भवति ।

दिवि भवम्- दिव् ङि यत् (य) - दिव्यम् । प्राचि भवम्- प्राच्यम् । अपाचि भवम्- अपाच्यम् । उदीचि भवम्- उदीच्यम् । प्रतीचि भवम्- प्रतीच्यम् ।

**अव्ययात्त्यप्** ४ । २ । १०४ ॥

अव्ययशब्दात् भवादिषु शैषिकार्थेषु त्यप्-प्रत्ययो भवति ।

**वा. अमेह-क्व-तसि-त्रेभ्य एव** । **अमात्यः** । **इहत्यः** । **क्वत्यः** । **ततस्त्यः** । **तत्रत्यः** ॥

अमा, इह, क्व, तसि, त्र इत्येतेभ्य एव अव्ययेभ्यः शैषिकः त्यप्-प्रत्ययो भवति ।

अमा = सह समीपो वा भवति - अमा त्यप् (त्य) - अमात्य - अमात्यः । अमात्यः = मन्त्री । एवमेव- इह जातो भवो वा - इह त्यप् - इहत्यः । क्व भवः - क्व त्यप् - क्वत्यः । ततो जातो भवो वा - ततस् त्यप् - ततस्त्यः । तत्र जातो भवो वा - तत्र त्यप् - तत्रत्यः ।

**वृद्धाच्छः** ४ । २ । ११४ ॥

**शालीयः** । **मालीयः** ॥

वृद्धसंज्ञकात् सुबन्तसमर्थात् शेषेऽर्थे छ-प्रत्ययो भवति । छस्य 'आयनेयी०' इति ईयादेशः । वृद्धसंज्ञा च यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तस्य 'वृद्धिर्यस्याचामादिस्तद्वृद्धम् १ । १ । ७३ ॥' इत्यनेन उक्ता ।

शाला-शब्दस्य वृद्धसंज्ञायाम् 'शालायां जातः' इति विग्रहे 'शाला + ङि' इत्यस्मादनेन छ-प्रत्यये, सुपो लुकि, छकारस्य ईयादेशे, भत्वाद् आकारलोपे, विभक्तिकार्ये 'शालीयः' इति । एवमेव 'मालायां भवः' इति मालीयः ।

**त्यदादीनि च १ । १ । ७४ ॥**

**वृद्धसंज्ञानि स्युः । तदीयः ॥**

त्यदादिगणपठिताः शब्दा अपि वृद्धसंज्ञका भवन्ति । त्यदादिशब्दाः - त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवत्, किम् ।

तद्-शब्दस्य अनेन सूत्रेण वृद्धसंज्ञायाम् 'तस्य अयम्' इति विग्रहे पूर्वसूत्रेण छ-प्रत्यये, ईयादेशे, स्वादिकार्ये 'तदीयः' ।

**वा. वा नामधेयस्य वृद्धसंज्ञा वक्तव्या । देवदत्तीयः, दैवदत्तः ॥**

नामवाचकशब्दस्य विकल्पेन वृद्धसंज्ञा भवति ।

देवदत्त-शब्दस्य नामधेयत्वाद् अनेन वार्तिकेन विकल्पेन वृद्धसंज्ञायाम् 'देवदत्तस्याऽयम्' इत्यर्थे छ-प्रत्यये पूर्ववत् 'देवदत्तीयः' इति, वृद्धसंज्ञाभावे तु अणि, आदिवृद्धौ- दैवदत्तः ।

**भवतस्ठक्छसौ ४ । २ । १२५ ॥**

**वृद्धात् भवतः एतौ स्तः । भावत्कः ॥**

भवत्-शब्दाद् वृद्धसंज्ञकात् (त्यदादिगणपठितात्) शेषेऽर्थे ठक्, छस् इत्येतौ प्रत्ययौ भवतः ।

भातेर्डवतु-प्रत्यये निष्पन्नस्य भवत्-शब्दस्य त्यदादित्वात् 'त्यदादीनि च' इति वृद्धसंज्ञायाम् 'भवतोऽयम्' इत्यर्थे प्राप्तं छ-प्रत्ययं बाधित्वा अनेन सूत्रेण ठक्यनुबन्धलोपे 'भवत् ङस् ठ' इति जाते, विभक्तिलोपे, ठस्येकं बाधित्वा 'इसुसुक्तान्तात्कः' इति ठस्य कादेशे, कित्वादादिवृद्धौ- भावत्कः । छस्-प्रत्यये तु सकारस्य इत्संज्ञालोपे 'भवत् छ' इति जाते छस्य ईयादेशे-

**सिति च १ । ४ । १६ ॥**

**सिति तद्धिते पूर्वं पदं स्यात् । जश्त्वम् । भवदीयः । वृद्धादित्यनुवृत्तेः शत्रन्तादणेव- भावतः ।**

सकारेत्संज्ञके प्रत्यये परे सति प्रकृतेः पदसंज्ञा भवति । भसंज्ञाया अपवादोऽयम् ।

'भवत् ईय' इत्यवस्थायाम् ईयादेशस्य स्थानिवत्वेन सित्वाद् अनेन सूत्रेण पूर्वस्य पदसंज्ञायां तकारस्य पदान्तजश्त्वेन दकारे, स्वादिकार्ये- भवदीयः । भू-धातोः शतृ-प्रत्यये निष्पन्नस्य भवत्-शब्दस्य तु त्यदादित्वाभावाद् वृद्धसंज्ञाया अप्यभावे ठक्-छसोरप्रवृत्तौ शेषेऽर्थे अणि- 'भावतः' इति ।

**गहादिभ्यश्च ४ । २ । १३८ ॥**

**गहीयः ॥**

गहादिगणपठितेभ्यः शब्देभ्योऽपि शेषेऽर्थे छप्रत्ययो भवतीति सूत्रार्थः ।

'गहे जातः' इत्यर्थे सम्तम्यन्ताद् गहशब्दात् छप्रत्यये, ईयादेशे पूर्ववत् कार्ये 'गहीयः' इति ।

**युष्मदस्मदोरन्यतरस्यां खञ् च ४ । ३ । १ ॥**

**चाच्छः । पक्षेऽण् । युवयोर्युष्माकं वायं युष्मदीयः, अस्मदीयः ॥**

युष्मदस्मद्भ्यां शेषेऽर्थे विकल्पेन खञ्-प्रत्ययो भवति, छ-प्रत्ययश्च वा भवति, यथाप्राप्तम् अण्-प्रत्ययोऽपि भवतीत्याशयः ।

'युवयोर्युष्माकं वा अयम्' इति विग्रहे वृद्धसंज्ञकात् षष्ठ्यन्तसमर्थाद् (युष्मद् ओस्, युष्मद् आम्) युष्मद्-शब्दात् छ-प्रत्यये, ईयादेशे, विभक्तिकार्ये 'युष्मदीयः' इति । एवमेव 'आवयोरस्माकं वा अयम्' इति विग्रहे 'अस्मदीयः' ।

**तस्मिन्नणि च युष्माकास्माकौ ४ । ३ । २ ॥**

**युष्मदस्मदोरेतावादेशौ स्तः खञ्यणि च । यौष्माकीणः । आस्माकीनः । यौष्माकः । आस्माकः ॥**

युष्मदस्मदोः क्रमाद् 'युष्माक' 'अस्माक' इत्यादेशौ भवतः, खञि अणि च परे इत्यर्थः ।

पूर्ववद् विग्रहे युष्मद्-शब्दाद् 'युष्मदस्मदो'रिति खञि, प्रकृतसूत्रेण युष्मदः युष्माकादेशे, खस्य ईन्, आदिवृद्धौ, भत्वादलोपे, नकारस्य णत्वे, विभक्तिकार्ये 'यौष्माकीणः' इति सिद्ध्यति । एवमेव आस्माकीनोऽपि । खञभावे तु पूर्वोक्तविग्रहे अणि, पूर्ववत्कार्ये - यौष्माकः, आस्माकश्च ।

**तवकममकावेकवचने ४ । ३ । ३ ॥**

**एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञि अणि च । तावकीनः । तावकः । मामकीनः । मामकः । छे तु-**

'तव अयमि'ति विग्रहे 'युष्मद् + ङस्' इत्यस्माद् 'युष्मदस्मदो'रिति वा खञि, युष्माकादेशं बाधित्वा अनेन तावकादेशे, खस्य ईनादेशे, आदिवृद्धौ, अकारलोपे, विभक्तिकार्ये 'तावकीनः' इति । अणि तु पूर्ववत् 'तावकः' । एवमेव 'मम अयम्' इत्यर्थे अस्मद्-शब्दात् खञि 'मामकीनः', अणि तु 'मामकः' । छ-प्रत्येये परे तु-

**प्रत्ययोत्तरपदयोश्च ७ । २ । ९८ ॥**

**मपर्यन्तयोरेतयोरेकार्थवाचिनोस्त्वमौ स्तः प्रत्यये उत्तरपदे च परतः । त्वदीयः । मदीयः । त्वत्पुत्रः । मत्पुत्रः ॥**

पूर्वोक्त एव विग्रहे 'युष्मद् + ङस्' इति षष्ठ्यन्तसमर्थाद् 'युष्मदस्मदो'रिति छ-प्रत्यये, अनेन सूत्रेण 'युष्मद्' इत्यस्य मपर्यन्तभागस्य स्थाने 'त्व' इत्यादेशे, छस्य ईयादेशे, 'त्व अद् ईय' इति जाते, 'अतो गुणे'ति पररूपे, विभक्तिकार्ये 'त्वदीयः' इति सिद्ध्यति । एवम् 'अस्मद् + ङस्' इत्यस्मादपि पूर्ववत् छ-प्रत्यये, मपर्यन्तस्य स्थाने 'म' आदेशे, पररूपादिकार्ये 'मदीयः' । उत्तरपदे तु-

'तव पुत्रः' इति विग्रहे 'युष्मद् + ङस् + पुत्र + सु' इत्यवस्थायां षष्ठीसमासे, सुपो लुकि, उत्तरपदत्वाद् युष्मदो मपर्यन्तस्य त्वादेशे, पररूपे, चर्त्वे, विभक्तिकार्ये 'त्वत्पुत्रः' । एवं मम पुत्रः, मत्पुत्रः ।

**मध्यान्मः ४ । ३ । ८ ॥**

**मध्यमः ।**

मध्य-शब्दप्रकृतिकात् सुबन्तसमर्थात् शैषिको म-प्रत्ययो भवति ।

मध्ये भवो जातो वा - मध्य ङि म - मध्य म - मध्यमः ।

**कालाट्ठञ् ४ । ३ । ११ ॥**

कालवाचिभ्यष्ठञ् स्यात् ।

**मासिकम् । सांवत्सरिकम् ।**

'काले भवम्' इति विग्रहे सप्तम्यन्तात् काल-शब्दात् ठञ्यनुबन्धलोपे, ठस्य इकादेशे 'काल इक' इति जाते आदिवृद्धौ, भसंज्ञकस्य अकारस्य लोपे, विभक्तिकार्ये 'कालिकम्' इति । एवमेव कालवाचिषु- मासे भवम्- मासिकम् । संवत्सरे क्रियते- सांवत्सरिकम् ।

**वा. अव्ययानां भमात्रे टिलोपः । सायंप्रातिकः । पौनःपुनिकः ॥**

**श्वसस्तुट् च ४ । ३ । १५ ॥**

**श्वसष्ठञ् वा तुट् च ।**

**द्वारादीनां च ७ । ३ । ४ ॥**

**एषां न वृद्धिरैजागमश्च । शौवस्तिकम् ॥**

**सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ४ । ३ । १६ ॥**

**सन्धिवेलायां भवम्- सान्धिवेलम् । ग्रैष्मम् । सन्धिवेला । सन्ध्या । अमावास्या । त्रयोदशी । चतुर्दशी । पौर्णमासी । प्रतिपद् ॥**

**वर्षाभ्यष्ठक् ४ । ३ । १८ ॥**

**वर्षासु साधु- वार्षिकं वासः ।**

**सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्टचुटचुलौ तुट् च ४ । ३ । २३ ॥**

**सायमित्यादिभ्यश्चतुर्भ्यः अव्ययेभ्यश्च कालवाचिभ्यष्टचुटचुलौ स्तस्तयोस्तुट् च । सायं भवं सायन्तनम् । चिरन्तनम् । प्राह्णप्रगयोरेदन्तत्वं निपात्यते । प्राह्णेतनम् । प्रगेतनम् । दोषातनम् । दिवातनम् ॥**

**तत्र जातः ४ । ३ । २५ ॥**

**सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः । स्रुघ्ने जातः स्रौघ्नः । उत्से जातः औत्सः । राष्ट्रे जातो राष्ट्रिय ः । अवारपारे जातः- अवारपारीणः, इत्यादि ॥**

'स्रुघ्ने जातः' इति विग्रहे सप्तम्यन्तात् स्रुघ्नशब्दादणि, आदिवृद्धौ, अकारलोपे, स्वादिकार्ये, 'स्रौघ्नः'। 'उत्से जातः' इति विग्रहे 'तत्र जातः' इत्यर्थे 'उत्सादिभ्योऽञ्' इति अञि, पूर्ववत् प्रक्रियायाम् 'औत्सः'। 'राष्ट्रियः' 'अवारपारीणः' इति द्वौ प्रयोगौ 'राष्ट्रावारपाराद् घखौ' इत्यत्रैव निष्पन्नौ। अत्रापि 'तत्र जातः' इत्यर्थे पूर्ववत् सिद्ध्यतः।

**प्रायभवः** ४।३।३९॥

**तत्रेत्येव। स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः॥**

सप्तमीसमर्थात् 'प्रायभवः' इत्यर्थेऽणादयो घादयश्च प्रत्यया भवन्तीति सूत्रार्थः। 'स्रुघ्ने प्रायेण बाहुल्येन भवती'ति विग्रहे सप्तम्यन्तात् स्रुघ्नशब्दादणि, आदिवृद्धौ, अकारलोपे, ततः सौ 'स्रुघ्नः'।

**सम्भूते** ४।३।४२॥

**स्रुघ्ने सम्भवति स्रौघ्नः॥**

सप्तमीसमर्थात् 'संभूतः' इत्यर्थेऽणादयो घादयश्च प्रत्यया भवन्तीति सूत्रार्थः।

'स्रुघ्ने सम्भवति (संभूतः)' इति विग्रहे पूर्ववत् 'स्रौघ्नः'।

**तत्र भवः** ४।३।५३॥

**स्रुघ्ने भवः स्रौघ्नः॥**

सप्तमीसमर्थाद् 'भवः' इत्यर्थेऽणादयो घादयश्च प्रत्यया भवन्ति।

'स्रुघ्ने भवः' इति विग्रहे पूर्ववत् 'स्रौघ्नः'।

**शरीरावयवाच्च** ४।३।५५॥

**दन्त्यम्। कण्ठ्यम्॥**

**अन्तःपूर्वपदाट्ठञ्** ४।३।६०॥

**अव्ययीभावादित्येव। वेश्मनि इति- अन्तर्वेश्मम्, तत्र भवम् आन्तर्वेश्मिकम्। आन्तर्गणिकम्॥**

**वा. अध्यात्मादेष्ठञिष्यते। अध्यात्मं भवम् आध्यात्मिकम्॥**

**अनुशतिकादीनाञ्च** ७।३।२०॥

**एषामुभयपदवृद्धिर्ञिति णिति किति च। आधिदैविकम्। आधिभौतिकम्। ऐहलौकिकम्। आकृतिगणोऽयम्॥**

**जिह्वामूलाङ्गुलेश्छः** ४।३।६२॥

**जिह्वामूलीयम्। अङ्गुलीयम्॥**

सप्तमीसमर्थाभ्यां 'जिह्वामूल', 'अङ्गुलि' इति शब्दाभ्यां 'भवः' इत्यर्थे छप्रत्ययो भवतीति सूत्रार्थः।

'जिह्वामूले भवम्' इत्यर्थे सप्तमीसमर्थाद् जिह्वामूल-शब्दाच्छप्रत्यये, छस्य ईयादेशे, अकारलोपे, विभक्तिकार्ये 'जिह्वामूलीयम्' इति । एवमेव 'अङ्गुल्यां भवम्' इत्यर्थे पूर्ववद् 'अङ्गुलीयम्' ।

**वर्गान्ताच्च ४ । ३ । ६३ ॥**

**कवर्गीयम्** ।

**तत आगतः ४ । ३ । ७४ ॥**

**स्रुग्घ्नादागतः स्रौग्घ्नः ॥**

पञ्चमीसमर्थाद् 'आगतः' इत्यर्थेऽणादयो घादयश्च प्रत्यया भवन्तीति सूत्रार्थः ।

'स्रुघ्नादागतः' इति विग्रहे पञ्चम्यन्तात् स्रुघ्नशब्दादणि, पूर्ववत् 'स्रौघ्नः' ।

**विद्यायोनिसम्बन्धेभ्यो वुञ् ४ । ३ । ७७ ॥**

**औपाध्यायकः । पैतामहकः ॥**

**ऋतष्ठञ् ४ । ३ । ७८ ॥**

**वुञोऽपवादः । हौतृकम् । मातृकम् । भ्रातृकम् ॥**

**पितुर्यच्च ४ । ३ । ७९ ॥**

**चाठ्ठञ् । रीङृतः । यस्येति लोपः । पित्र्यम् । पैतृकम् ॥**

**हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ४ । ३ । ८१ ॥**

**समादागतं समरूप्यम् । पक्षे गहादित्वाच्छः, समीयम् । देवदत्तीयम् । देवदत्तरूप्यम् ॥**

**मयट् च ४ । ३ । ८२ ॥**

**सममयम्** ।

**प्रभवति ४ । ३ । ८३ ॥**

**हिमवतः प्रभवति हैमवती गङ्गा ॥**

पञ्चमीसमर्थात् 'प्रभवति' इत्यर्थेऽणादयो घादयश्च प्रत्यया भवन्ति ।

'हिमवतः प्रभवति' इत्यर्थे 'हिमवत् + ङस्' इत्यस्माद् अणि, सुपो लुकि, आदिवृद्धौ 'हैमवत' इति जाते, स्त्रीत्वान्ङीपि, अकारलोपे, विभक्तिकार्ये 'हैमवती' इति । (हैमवती गङ्गा)

**अधिकृत्य कृते ग्रन्थे ४ । ३ । ८७ ॥**

शारीरकमधिकृत्य कृतो ग्रन्थः- शारीरकीयः । शारीरकं भाष्यमिति त्वभेदोपचारात् ॥

**सोऽस्य निवासः ४ । ३ । ८९ ॥**

**स्रुग्घ्नो निवासोऽस्य स्रौग्घ्नः ॥**

प्रथमान्तसमर्थाद् 'अस्य निवासः' इत्यर्थेऽणादयो घादयश्च प्रत्यया भवन्तीति सूत्रार्थः ।

'स्रुघ्नो निवासोऽस्य' इति विग्रहे प्रथमान्तात् स्रुघ्नशब्दादणि, पूर्ववत् 'स्रौघ्नः' ।

**तेन प्रोक्तम् ४ । ३ । १०१ ॥**

**पाणिनिना प्रोक्तं पाणिनीयम् ॥**

तृतीयान्तसमर्थात् 'प्रोक्तम्' इत्यर्थेऽणादयः प्रत्यया भवन्ति ।

'पाणिनिना प्रोक्तम्' इत्यर्थे तृतीयान्ताद् वृद्धसंज्ञकात् पाणिनिशब्दात् 'तेन प्रोक्तम्' इत्यर्थे 'वृद्धाच्छः' इत्यनेन छप्रत्यये, छकारस्य ईयादेशे, इकारलोपे, स्वादिकार्ये 'पाणिनीयम्' इति । (पाणिनीयं व्याकरणम्)

**तस्येदम् ४ । ३ । १२० ॥**

**उपगोरिदम् औपगवम् ॥**

षष्ठीसमर्थात् 'इदम्' इत्यर्थेऽणादयः प्रत्यया भवन्ति ।

'उपगोरिदम्' इति विग्रहे 'उपगु + ङस्' इति षष्ठ्यन्तसमर्थाद् अणि, सुपो लुकि, आदिवृद्धौ 'औपगु अ' इत्यवस्थायाम् 'ओर्गुणः' इति गुणे, अवादेशे 'औपगव', ततः सौ 'औपगवः' इति सिद्ध्यति ।

## अथ प्राग्दीव्यतीयाः

**तस्य विकारः ४ । ३ । १३४ ॥**

षष्ठ्यन्तसमर्थाद् 'विकारः' इत्यर्थे यथाविहितं प्रत्यया भवन्ति ।

**वा. अश्मनो विकारे टिलोपो वक्तव्यः । अश्मनो विकारः- आश्मः ॥**

विकारार्थके प्रत्यये परे सति अश्मन्-शब्दस्य टि-भागस्य लोपो भवति ।

**मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः ४ । ३ । १४३ ॥**

**प्रकृतिमात्रान्मयड् वा स्याद्विकारावयवयोः । अश्ममयम्, आश्मनम् । अभक्षेत्यादि किम् ? मौद्गः सूपः । कार्पासमाच्छादनम् ॥**

विकारे, अवयवे चार्थे सर्वेभ्यः शब्देभ्यो विकल्पेन मयट्-प्रत्ययो भवति । पक्षान्तरे यथाप्राप्तम् अणादिप्रत्ययाश्च भवन्ति ।

**नित्यं वृद्धशरादिभ्यः ४ । ३ । १४४ ॥**

**आम्रमयम् । शरमयम् ।**

वृद्धसंज्ञकेभ्यः प्रातिपदिकेभ्यः, शरादिगणपठितेभ्यः प्रातिपदिकेभ्यश्च अभक्ष्याच्छादनयोर्विकारावयवयोः भाषायां विषये नित्यं मयट्-प्रत्ययो भवति ।

**वा. एकाचो नित्यम् । वाङ्मयम् ॥**

अभक्ष्याच्छादनयोर्विकारावयवयोरर्थयोर्भाषायां विषये एकाचः शब्दाद् नित्यं मयट्-प्रत्ययो भवति ।

**गोपयसोर्यत् ४ । ३ । १६० ॥**

**गव्यम् । पयस्यम् ॥**

गो-शब्दात्, पयस्-शब्दाच्च विकारेऽर्थे, अवयवेऽर्थे च यत्-प्रत्ययो भवति ।

**फले लुक् ४ । ३ । १६३ ॥**

**विकारावयवप्रत्ययस्य लुक् स्यात् फले ।**

फलार्थे गम्यमाने विकारार्थकस्य अवयवार्थकस्य च प्रत्ययस्य लुग् भवति ।

**लुक् तद्धितलुकि ६ । ५ । ७ ॥**

**उपसर्जनस्त्रीप्रत्ययस्य । आमलक्याः फलम्- आमलकम् ॥**

तद्धितलुकि सति स्त्रीप्रत्ययस्य उपसर्जनस्य लुग् भवति ।

## अभ्यासः

### १. अधस्तनसूत्राणामर्थं लिखत

(क) तत्र जातः

(ख) तेन प्रोक्तम्

(ग) त्यदादीनि च

(घ) ग्रामाद्यखञौ

(ङ) तस्येदम्

(च) वृद्धाच्छः

### २. प्रश्नानामुत्तराणि देयानि

(क) वृद्धसंज्ञाविधायके सूत्रे के ?

(ख) 'कालाट्ठञ् ' इति सूत्रं किं करोति ?

(ग) 'तावकः' इत्यत्र तवकादेशविधायकं सूत्रं किम् ?

(घ) 'ग्राम्यः' इत्यत्र कः प्रत्ययः ?

(ङ) 'हैमवती' इति रूपं कथं सिद्ध्यति ?

(च) 'युष्मदस्मदो०' इति सूत्रं पूरयत ।

(छ) 'तस्मिन्नणि०' इति सूत्रं पूरयत ।

### ३. अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत

त्वदीयः, मामकीनः, यौष्माकः, तावकः, अस्मदीयः, राष्ट्रियः, अवारपारीणः, श्रावणः, चाक्षुषः, ग्रामीणः, पौरस्त्यः, पाश्चात्यः, त्वत्पुत्रः, स्रौघ्नः, अङ्गुलीयम्, हैमवती ।

## ४. प्रकृतिभ्यः प्रत्ययान् विश्लेषयत

तावकीनः, तावकः, मदीयः, औपगवम्, जिह्वामूलीयम्, स्रौघ्नः, अस्मदीयः, राष्ट्रियः, ग्राम्यः, कालिकम्, मासिकम्, आस्माकः, मालीयः, पाश्चात्यः, ग्रामीणः, चातुरम् ।

## ५. प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत

श्रवण + अण्, राष्ट्र + घ, ग्राम + खञ्, शाला + छ, पुरस् + त्यक्, तद् + छ, युष्मद् + खञ्, अस्मद् + छ, युष्मद् + अण्, मास + ठञ्, उत्स + अञ्, स्रुघ्न + अण्, हिमवत् + अण्, पाणिनि + छ, उपगु + अण्, चक्षुष् + अण्, ग्राम + य ।

## ६. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां दर्शयत

ग्राम्यः, ग्रामीणः, कालिकम्, राष्ट्रियः, स्रौघ्नः, चातुर्दशम्, दाक्षिणात्यः, शालीयः, तदीयः, युष्मदीयः, आस्माकीनः, तावकः, मामकीनः, मदीयः, औत्सः, औपगवम्, पाणिनीयम् ।

## ७. समुचितपदं चित्वा रिक्तस्थानं पूरयत

(क) कालवाचिभ्यः ...................... प्रत्ययो भवति । (खञ्, ठञ्)

(ख) एकार्थवाचियुष्मदः खञि अणि च ................. आदेशो भवति । (तावक, युष्माक)

(ग) ग्रामशब्दात् शेषेऽर्थे ................. प्रत्ययौ भवतः । (यखञौ, घखौ)

(घ) 'अस्य निवासः' इत्यर्थे ................. समर्थादणादयः घादयश्च भवन्ति । (प्रथमान्तात्, सप्तम्यन्तात्)

(ङ) सप्तम्यन्ताद् जिह्वामूलशब्दाद् 'भवः' इत्यर्थे ................... प्रत्ययो भवति । (ख, छ)

## अनुप्रयोगः

## १. अधो लिखितानि वाक्यानि पठत

(क) त्वदीयः मातुः नाम किम् ?

(ख) ग्रामीणः जनः नगरे आगच्छति ।

(ग) वयं पाणिनीयं व्याकरणं पठामः ।

(घ) अस्माकं राष्ट्रिया संस्कृतिः संस्कृताश्रिता अस्ति ।

(ङ) हैमवती गङ्गा पवित्रा वर्तते ।

## २. प्रदत्तानि पदानि प्रयुज्य एकमनुच्छेदं रचयत

ग्रामीणः, मदीयः, राष्ट्रियः, तदीयः, मामकः, मासिकम्, श्रावणम् ।

# अथ ठगधिकारादिप्रक्रिया

**प्राग्वहतेष्ठक् ४ । ४ । १ ॥**

**तद्वहतीत्यतः प्राक् ठगधिक्रियते ॥**

"तद्वहतिरथयुगपासङ्गम् ४ । ४ । ७६" इति सूत्रात् प्राक् ठक्-प्रत्ययोऽधिक्रियते ।

**तेन दीव्यति खनति जयति जितम् ४ । ४ । २ ॥**

**अक्षैर्दीव्यति खनति जयति जितो वा- आक्षिकः ॥**

तृतीयान्तात् समर्थाद् 'दीव्यति', 'खनति', 'जयति', 'जितम्', इत्येतेषु चतुर्ष्वर्थेषु ठक्-प्रत्ययो विकल्पेन भवति । ककार इत् । "ठस्येकः" ।

'अक्षैर्दीव्यति, खनति, जयति, जितो वा' इत्यर्थे विवक्षिते 'अक्ष + भिस्' इत्यस्मात् तृतीयान्तसमर्थात् प्रकृतसूत्रेण ठक्प्रत्ययेऽनुबन्धलोपे, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि 'अक्ष ठ' इति जाते, "ठस्येकः" इति सूत्रेण ठस्य इकादेशे, 'अक्ष इक' इति जाते, कित्वात् "किति च" इति सूत्रेण आदिवृद्धौ, भसंज्ञकस्य अकारस्य लोपे 'आक्षिक' इति प्रातिपदिकात् सौ, विभक्तिकार्ये 'आक्षिकः' इति । (अक्षैर्दीव्यति आक्षिकः, अक्षैः खनति आक्षिकः, अक्षैर्जयति आक्षिकः, अक्षैर्जित आक्षिक इति ।)

**संस्कृतम् ४ । ४ । ३ ॥**

**दध्ना संस्कृतम्- दाधिकम् । मारीचिकम् ॥**

तृतीयान्तात् समर्थात् 'संस्कृतम्' इत्यर्थे ठक्प्रत्ययो वा भवतीति सूत्रार्थः ।

'दध्ना संस्कृतम्' इत्यर्थे 'दधि + टा' इत्यस्मात् प्रकृतसूत्रेण ठक्प्रत्यये, ठस्येकादेशे, विभक्तेर्लुकि, भसंज्ञकस्येकारस्यलोपे, स्वादिकार्ये 'दाधिकम्' इति । एवमेव मरीचेन संस्कृतं मारीचिकम् ।

**तरति ४ । ४ । ५ ॥**

**तेनेत्येव । उडुपेन तरति- औडुपिकः ॥**

तृतीयान्तात् समर्थात् तरतीत्यर्थे ठक्प्रत्ययो वा भवतीति सूत्रार्थः ।

'उडुपेन तरति' इत्यर्थे 'उडुप + टा' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत्प्रक्रियायां 'औडुपिकः' इति ।

**नौद्व्यचष्ठन् ४ । ४ । ७ ॥**

**नाविकः । घटिकः ॥**

द्वौ अचौ यस्मिन् स द्व्यच्, स्वरद्वययुक्तः शब्द इत्यर्थः । तृतीयान्ताद् नौ-शब्दात्, द्व्यच्-शब्दाच्च 'तरति' इत्यर्थे ठन्-प्रत्ययो भवति ।

नावा तरति - नौ टा ठन् (ठ) - नौ ठ - नौ इक (ठस्येकः) - न् आव् इक - नाविक - नाविकः । एवं घटेन तरति - घट टा ठन् - घट ठ - घट इक - घट् इक (यस्येति च) - घटिकः । बाहुभ्यां तरति- बाहु भ्याम् ठन् - बाहु ठ - बाहु क (इसुसुक्तान्तात्कः) - बाहुकः । स्त्रियां टापि- बाहुका स्त्री ।

**चरति ४ । ४ । ८ ॥**

**तृतीयान्ताद् गच्छति, भक्षयतीत्यर्थयोष्ठक् स्यात् । हस्तिना चरति- हास्तिकः । दध्ना चरति- दाधिकः ॥**

'हस्तिना चरति' इत्यर्थे 'हस्तिन् + टा' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत् प्रक्रियायां 'हास्तिन् इक' इति जाते "नस्तद्धिते" इति टिलोपे, स्वादिकार्ये 'हास्तिकः' इति । एवं 'दध्ना चरति' इत्यर्थे 'दधि + टा' इत्यस्मात् प्रकृतसूत्रेण ठकि, भत्वे इलोपे- दाधिकः ।

**वेतनादिभ्यो जीवति ४ । ४ । १२ ॥**

**वेतनादिभ्यो जीवति- वैतनिकः । धानुष्कः ॥**

तृतीयान्ताद् वेतनादिगणपठितशब्दाद् 'जीवति' इत्यर्थे ठक्-प्रत्ययो भवति ।

वेतन टा ठक् - वेतन ठ - वेतन इक - वैतन इक - वैतन् इक - वैतनिकः । एवं धनुष जीवति - धनुष् टा ठक् - धनुष् ठ - धानुष् ठ - धानुष् क (इसुसुक्तान्तात्कः)- धानुष्कः । अत्र षत्वस्यासिद्धत्वाद् उसः परस्य ठस्य कादेशो बोध्यः ।

**संसृष्टे ४ । ४ । २२ ॥**

दध्ना संसृष्टम्- दाधिकम् ।

तृतीयान्तात् समर्थात् संसृष्टेऽर्थे ठक्-प्रत्ययो विकल्पेन भवति ।

दधि टा ठक् - दधि ठ - दधि इक - दध् इक - दाध् इक - दाधिकम् ।

**उञ्छति ४ । ४ । ३२ ॥**

**बदराण्युञ्छति- बादरिकः ।**

द्वितीयान्तात् समर्थाद् उञ्छतीत्यर्थे ठक्-प्रत्ययो विकल्पेन भवति ।

'बदराणि उञ्छति' इत्यर्थे 'बदर + शस्' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत्- बादरिकः ।

**रक्षति ४ । ४ । ३३ ॥**

समाजं रक्षति- सामाजिकः ।

द्वितीयान्तात् समर्थाद् रक्षतीत्यर्थे ठक्-प्रत्ययो विकल्पेन भवति ।

समाजं रक्षतीत्यर्थे 'समाज + अम्' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत्- सामाजिकः ।

**शब्ददर्दुरं करोति** ४ । ४ । ३४ ॥

**शब्दं करोति शाब्दिकः । दर्दुरं करोति दार्दुरिकः** ॥

द्वितीयान्तसमर्थाभ्यां शब्द-दर्दुर-प्रातिपदिकाभ्यां करोतीत्यर्थे ठक्-प्रत्ययो वा भवति ।

शब्दं करोतीत्यर्थे 'शब्द + अम्' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत् प्रक्रियायां 'शाब्दिकः' इति सिद्ध्यति । एवमेव दर्दुरं करोति- दार्दुरिकः ।

**पक्षिमत्स्यमृगान् हन्ति** ४ । ४ । ३५ ॥

**स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणम् । मत्स्यपर्यायेषु मीनस्यैव । पक्षिणो हन्ति- पाक्षिकः । शाकुनिकः । मायूरिकः । मात्स्यिकः । मैनिकः । शाकुलिकः । मार्गिकः । हारिणिकः । सारङ्गिकः** ॥

द्वितीयान्तात् समर्थात् पक्षिवाचिनः, मत्स्यवाचिनः, मृगवाचिनश्च प्रातिपदिकाद् 'हन्ति' इत्यर्थे ठक्-प्रत्ययो भवति । अत्रोक्तशब्दानां पर्यायशब्देभ्यः, विशेषेभ्यश्च उक्तार्थे ठक्-प्रत्ययो भवति परन्तु मत्स्य-शब्दस्य पर्यायेषु तु मीन-शब्दादेव उक्तप्रत्ययो भवति ।

पक्षि-शब्दे- पक्षिणो हन्ति - पक्षिन् शस् ठक् - पक्षिन् ठ - पाक्षिन् ठ - पाक्षिन् इक - पाक्ष् इक (नस्तद्धिते) - पाक्षिकः । पक्षिपर्याये- शकुनीन् हन्ति- शकुनि शस् ठक् - शकुनि ठ - शकुनि इक - शाकुनि इक - शाकुन् इक (यस्येति च) - शाकुनिकः । एवं पक्षिविशेषे- मयूरान् = पक्षिविशेषन् हन्ति- मायूरिकः । मत्स्यशब्दे- मत्स्यान् हन्ति- मात्स्यिकः । मीनशब्दरूपे मत्स्यपर्याये- मीनान् हन्ति- मैनिकः । मत्स्यविशेषे- शाकुलान् = मत्स्यविशेषन् हन्ति- शाकुलिकः । मृगशब्दे- मृगान् हन्ति- मार्गिकः । मृगपर्याये- हरिणान् हन्ति- हारिणिकः । मृगविशेषे- सारङ्गान् = मृगविशेषान् हन्ति- सारङ्गिकः ।

**धर्मं चरति** ४ । ४ । ४१ ॥

**धार्मिकः** ।

द्वितीयान्तसमर्थात् धर्म-प्रातिपदिकात् चरतीत्यर्थे ठक्-प्रत्ययो वा भवति ।

धर्मं चरतीत्यर्थे 'धर्म + अम्' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत् प्रक्रियायां 'धार्मिकः' इति सिद्ध्यति ।

**वा. अधर्माच्चेति वक्तव्यम् । आधर्मिकः** ॥

द्वितीयान्तसमर्थाद् अधर्म-प्रातिपदिकाच्च चरतीत्यर्थे ठक्-प्रत्ययो वा भवति ।

अधर्मं चरतीत्यर्थे 'अधर्म + अम्' इत्यस्मादनेन वार्तिकेन ठकि, पूर्ववत्- आधर्मिकः ।

**शिल्पम्** ४ । ४ । ५७ ॥

**मृदङ्गवादनं शिल्पमस्य- मार्दङ्गिकः** ।

प्रथमान्तात् समर्थाद् 'अस्य शिल्पम्' इत्यर्थे ठक्-प्रत्ययो वा भवति ।

'मृदङ्गवादनं शिल्पमस्य' इत्यर्थे 'मृदङ्ग + सु' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत्- मार्दङ्गिकः । अत्र मृदङ्गशब्दस्य लक्षणया मृदङ्गवादनमित्यर्थः । एवमेव वेणुवादनं शिल्पमस्येत्यर्थे 'वेणु + अम्' इत्यस्मात् ठकि, पूर्ववत्प्रक्रियायां 'वैणु इक' इत्यवस्थायाम् "ओर्गुणः" इति गुणे अवादेशे, स्वादिकार्ये 'वैणविकः' इत्यपि सिद्ध्यति ।

**प्रहरणम्** ४ । ४ । ५७ ॥

**तदस्येत्येव । असिः प्रहरणमस्य आसिकः । धानुष्कः ॥**

प्रथमान्तात् समर्थात् 'प्रहरणमस्य' इत्यर्थे ठक्-प्रत्ययो वा भवति ।

'असिः प्रहरणम् अस्य' इत्यर्थे 'असि + सु' इत्यस्माट्ठकि, पूर्ववत्प्रक्रियायाम् 'आसिकः' इति । 'धनुः प्रहरणम् अस्य' इत्यर्थे 'धनुष् + सु' इत्यस्मात् प्रकृतसूत्रेण ठक्यनुबन्धलोपे, विभक्तेर्लुकि 'धनुष् ठ' इति जाते ठस्येकादेशं बाधित्वा 'इसुसुक्तान्तात्कः' इति कादेशे, आदिवृद्धौ, स्वादिकार्ये 'धानुष्कः' इति ।

**अस्ति नास्ति दिष्टं मतिः** ४ । ४ । ६० ॥

**अस्ति परलोक इत्येवं मतिर्यस्य सः- आस्तिकः । नास्तीति मतिर्यस्य सः- नास्तिकः । दिष्ट इति मतिर्यस्य सः- दैष्टिकः ॥**

'इति मतिरस्यास्ति' इत्यर्थे अस्ति-नास्ति-दिष्टशब्देभ्यः प्रथमान्तेभ्यः ठक्-प्रत्ययो भवति । अस्ति-नास्तिशब्दौ निपातौ । दिष्टम् = दैवम् ।

अस्ति सु ठक् - अस्ति ठ - आस्ति ठ - आस्ति इक - आस्त् इक (यस्येति च) - आस्तिकः । एवं नास्ति सु ठक् - नास्तिकः । दिष्ट सु ठक् - दैष्टिकः ।

**शीलम्** ४ । ४ । ६१ ॥

**अपूपभक्षणं शीलमस्य- आपूपिकः ।**

प्रथमान्तात् समर्थात् शीलमित्यर्थे ठक्-प्रत्ययो वा भवति ।

'अपूपभक्षणं शीलमस्य' इत्यर्थे 'अपूप + सु' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत् 'आपूपिकः' इति । लक्षणया अपूपभक्षणमित्यर्थम् । 'अपूपाः पण्यम् अस्य' इत्यर्थे तु "तदस्य पण्यम्" इति ठकि 'आपूपिकः' इति रूपं भवति । (आपूपिकः कान्दविको भक्ष्यकार इमे त्रिषु - अमरकोशः)

**छत्रादिभ्यो णः** ४ । ४ । ६२ ॥

**गुरोर्दोषाणामावरणं छत्रम्, तच्छीलमस्येति- छात्रः ।**

'अस्य शीलम्' इत्यर्थे प्रथमान्तेभ्यः छत्रादिगणपठितेभ्यः शब्देभ्य ण-प्रत्ययो भवति । ठकोऽपवादः ।

छत्रं शीलमस्य - छत्र सु ण - छत्र अ - छात्र अ - छात्र् अ - छात्रः, गुरुदोषावरणशीलक इत्यर्थः ।

**तत्र नियुक्तः ४ । ४ । ६९ ॥**

**आकरे नियुक्तः- आकरिकः ।**

सप्तम्यन्तसमर्थाद् 'नियुक्तः' इत्यर्थे ठक्-प्रत्ययो भवति ।

आकर ङि ठक् - आकर ठ - आकर ठ (किति च) - आकर इक - आकर् इक - आकरिकः ।

**निकटे वसति ४ । ४ । ३७ ॥**

नैकटिको भिक्षुकः ।

सप्तम्यन्तसमर्थान् निकटप्रातिपदिकाद् वसतीत्यर्थे ठक्प्रत्ययो वा भवतीति सूत्रार्थः ।

निकटे वसतीत्यर्थे 'निकट + ङि' इत्यस्मात् प्रकृतसूत्रेण ठकि, पूर्ववत् 'नैकटिकः' इति सिद्ध्यति । ग्रामनैकटिको भिक्षुरिति प्रयोगः ।

**॥ इति ठगधिकारः ॥**

## अथ प्राग्घितीयप्रकरणम् (यदधिकारप्रकरणम्)

**प्राग्घिताद्यत् ४ । ४ । ७५ ॥**

तस्मै हितमित्यतः प्राग् यदधिक्रियते ।

अत आरभ्य 'तस्मै हितम् ५ । १ । ५' इति सूत्रात् पूर्वं यानि सूत्राणि सन्ति तेषां विषये औत्सर्गिकरूपेण यत्-प्रत्ययो विधीयते ।

**तद्वहति रथयुगप्रासङ्गम् ४ । ४ । ७६ ॥**

**रथं वहति- रथ्यः । युग्यः । प्रासङ्ग्यः ॥**

द्वितीयान्तेभ्यो रथ-युग-प्रासङ्गशब्देभ्यः 'वहति' इत्यर्थे यत्-प्रत्ययो भवति ।

रथं वहति - रथ अम् यत् - रथ य - रथ् य (यस्येति च) - रथ्यः । एवमेव युगं वहति- युग्यः । प्रासङ्गं वहति- प्रासङ्ग्यः ।

**धुरो यड्ढकौ ४ । ४ । ७७ ॥**

धुर्यः, धौरेयः ।

**नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु ४ । ४ । ९ ॥**

**नावा तार्यं नाव्यं जलम् । वयसा तुल्यो वयस्यः । धर्मेण प्राप्यं धर्म्यम् । विषेण वध्यो विध्यः ।**

**मूलेन आनाम्यं मूल्यम्। मूलेन समो मूल्यः। सीतया समितं सीत्यं क्षेत्रम्। तुलया संमितं तुल्यम्** ॥

तृतीयान्तसमर्थाद् नौ-शब्दात् तार्येऽर्थे, वयस्-शब्दात् तुल्येऽर्थे, धर्म-शब्दात् प्राप्येऽर्थे, विष-शब्दाद् वध्येऽर्थे, मूल-शब्दाद् आनाम्येऽर्थे, मूल-शब्दात् समेऽर्थे, सीता-शब्दात् समितेऽर्थे, तुला-शब्दात् संमितेऽर्थे च यत्-प्रत्ययो भवति।

नावा तार्यम् = तरितुं शक्यम् - नौ टा यत् - नौ य - न् आव् य (वान्तो यि प्रत्यये) - नाव्यम्। वयसा तुल्यः = समानः - वयस् टा यत् - वयस् य - वयस्यः = सखा। वयसा तुल्ये शत्रौ विधिरयं न प्रवर्तते। धर्मेण प्राप्यम् = प्रापणीयम् - धर्म टा यत् - धर्म य - धर्म् य (यस्येति च) - धर्म्यम्। विषेण वध्यः = मारणीयः - विष टा यत् - विष्यः। मूलेन आनाम्यम् = अभिभवनीयम् (शेषीकरणीयम्) - मूल टा यत् - मूल्यम्। मूलेन समः = तुल्यः - मूल टा यत् - मूल्यः। सीतया समितम् = सङ्गतम् - सीता टा यत् - सीता य - सीत् य (यस्येति च) - सीत्यम्। तुलया संमितम् = समानम् (सदृशम्) - तुला टा यत् - तुल्यम्।

**तत्र साधुः ४।४।९८** ॥

**अग्रे साधुः- अग्र्यः। सामसु साधुः- सामन्यः। कर्मण्यः। शरण्यः** ॥

सप्तम्यन्तसमर्थात् 'साधुः' इत्यर्थे यत्-प्रत्ययो भवति।

अग्र ङि यत् - अग्र य - अग्र् य - अग्र्यः। सामन् सुप् यत् - सामन् य - सामन्यः। कर्मणि साधुः - कर्मन् ङि यत् - कर्मन् य - कर्मन्य - कर्मण्य (अट्कुप्वाङ्नुम्व्यवायेऽपि) - कर्मण्यः। शरणे = रक्षणे साधुः - शरण ङि यत् - शरण य - शरण् य - शरण्यः।

**सभाया यः ४।४।१०५** ॥

**सभ्यः**।

सप्तम्यन्तसमर्थात् 'सभा' इति प्रातिपदिकात् साधुरित्यर्थे य-प्रत्ययो भवति। यतोऽपवादः।

सभायां साधुरित्यर्थे 'सभा + ङि' इत्यस्मात् प्रकृतसूत्रेण य-प्रत्यये, सुब्लुकि 'सभा य' इत्यवस्थायां भसंज्ञकस्य आकारस्य लोपे, स्वादिकार्ये 'सभ्यः' इति सिद्ध्यति।

॥ **इति यतोऽवधिः** ॥

## अथ छयदधिकारप्रकरणम्

प्राक् क्रीताच्छः ५ । १ । १ ॥

तेन क्रीतमित्यतः प्राक् छोऽधिक्रियते ।

तस्मै हितम् ५ । १ । ५ ॥

वत्सेभ्यो हितो वत्सीयो गोधुक् । शङ्कव्यं दारु । गव्यम् । हविष्यम् ॥

शरीरावयवाद्यत् ५ । १ । ६ ॥

दन्त्यम् । कण्ठ्यम् । नस्यम् ॥

## अथ ठञ्धिकारप्रकरणम्

प्राग्वहतेष्ठञ् ५ । १ । १८ ॥

तेन तुल्यमित्यतः प्राक् ठञधिक्रियते ।

आर्हादगोपुच्छ५ । १ । १८ ॥

तेन तुल्यमित्यतः प्राक् ठञधिक्रियते ।

आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् ५ । १ । १९ ॥

तदर्हतीत्येतदभिव्याप्य ठञधिकारमध्ये ठञोऽपवादष्ठगधिक्रियते, गोपुच्छादीन् वर्जयित्वा ।

शताच्च ठन्यतावशते ५ । १ । २१ ॥

शतिकम्, शत्यम् । अशते किम्-

सङ्ख्याया अतिशदन्तायाः कन् ५ । १ । २२ ॥

आर्हीयेऽर्थे । शतं परिमाणमस्य- शतकः सङ्घः । पञ्चकः । बहुकः । त्यन्तायास्तु साप्ततिकः । शदन्तायाः- चत्वारिंशत्कः ।

वतोरिड्वा ५ । १ । २३ ॥

वत्वन्तात्कन इड्वा । तावकिकः, तावत्कः ॥

तेन क्रीतम् ५ । १ । ३७ ॥

ठञ्- गोपुच्छेन क्रीतं गौपुच्छिकम् । साप्ततिकम् । ठक्- नैष्किकम् ॥

तस्येश्वरः ५ । १ । ४२ ॥

सर्वभूमिपृथिवीभ्यामणञौ स्तः । अनुशतिकादीनां चेति वृद्धिः । सर्वभूमेरीश्वरः- सार्वभौमः । पार्थिवः ॥

**तदस्य परिमाणम् ५ । १ । ५७ ॥**

**प्रस्थः परिमाणमस्य- प्रास्थिको राशिः ।**

**पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ५ । १ । ५९ ॥**

**एते रूढिशब्दा निपात्यन्ते ।**

**तदर्हति ५ । १ । ६३ ॥**

**श्वेतच्छत्रमर्हति- श्वेतच्छत्रिकः ।**

**दण्डादिभ्यो यत् ५ । १ । ६६ ॥**

**एभ्यो यत् । दण्डमर्हति- दण्ड्यः । अर्घ्यः । वध्यः ॥**

**तेन निर्वृत्तम् ५ । १ । ७९ ॥**

**अह्ना निर्वृत्तमाह्निकम् ।**

**॥ इति ठञ्ठकोरवधिः ॥**

## अथ भावकर्मार्थप्रकरणम्

**तेन तुल्यं क्रिया चेद्वतिः ५ । १ । ११५ ॥**

**ब्राह्मणेन तुल्यं ब्राह्मणवत् अधीते । क्रिया चेदिति किम् ? गुणतुल्ये मा भूत् । पुत्रेण तुल्यः स्थुलः ॥**

तृतीयान्तसमर्थात् प्रातिपदिकात् तुल्यमित्यस्मिन्नर्थे यदि तुल्यक्रिया भवति चेद् तर्हि वतिप्रत्ययो भवतीत्यर्थः । वतेरिकार इत् । वतिप्रत्ययान्ताः शब्दा अव्ययसंज्ञका भवन्ति ।

'ब्राह्मणेन तुल्यमधीते' इत्यर्थे 'ब्राह्मण + टा' इत्यस्मात् प्रकृतसूत्रेण वतिप्रत्यये इकारस्य इत्संज्ञायां लोपे, विभक्तेर्लुकि 'ब्राह्मणवत्' इति जाते 'वत्' इत्यस्य स्वरादिगणे पाठात् 'ब्राह्मणवत्' इत्यस्य "स्वरादिनिपातमव्ययम्" इत्यव्ययसंज्ञायां, तस्मात् सौ, सुब्लुकि 'ब्राह्मणवत्' इति सिद्ध्यति । गुणतुल्ये तु अनेन वतिप्रत्ययो न भवति । यथा 'पुत्रेण तुल्यः स्थुलः' अत्र तुल्यक्रियाया अभावाद् वतिप्रत्ययो न ।

**तत्र तस्येव ५ । १ । ११६ ॥**

**मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः । चैत्रस्येव चैत्रवन्मैत्रस्य गावः ॥**

षष्ठीसप्तमीसमर्थाभ्याम् इवेत्यर्थे(तुल्येऽर्थे) वतिप्रत्ययो भवतीति सूत्रार्थः ।

'मथुरायामिव' इत्यर्थे 'मथुरा + ङि' इत्यस्मात् प्रकृतसूत्रेण वतिप्रत्यये, विभक्तेर्लुकि 'मथुरावत्' इत्यस्मात् सौ, वत्यन्तत्वेन अव्ययत्वात् सुब्लुकि 'मथुरावत्' इति । मथुरावत् स्रुघ्ने प्राकार इति प्रयोगः । एवमेव चैत्रस्येव - चैत्रवत् । चैत्रवन्मैत्रस्य गाव इति प्रयोगः ।

**तस्य भावस्त्वतलौ ५ । १ । ११९ ॥**

**प्रकृतिजन्यबोधे प्रकारो भावः । लि.सू. त्वान्तं क्लीवम् । लि.सू. तलन्तं स्त्रियाम् । गोर्भावो गोत्वम्, गोता ॥**

षष्ठ्यन्तात् समर्थात् प्रातिपदिकाद् भाव इत्यर्थे त्व-तलौ प्रत्ययौ वा भवत इति सूत्रार्थः ।

त्व-प्रत्ययान्ताः शब्दा नपुंसकलिङ्गे प्रयुज्यन्ते । तल्-प्रत्ययान्तास्तु स्त्रियां भवन्ति ।

'गोर्भावः' इत्यर्थे 'गो + ङस्' इत्यस्मात् प्रकृतसूत्रेण त्वप्रत्यये, सुब्लुकि 'गोत्व' इति जात्, तस्मात् प्रातिपदिकात् सौ, "त्वन्तं क्लीबम्" इति लिङ्गानुशासनान्नपुंसकत्वे, सोरमि, पूर्वरूपे 'गोत्वम्' इति सिद्ध्यति । तथा च उक्त एव विग्रहे प्रकृतसूत्रेणैव तल्प्रत्यये विहिते तु पूर्ववत् प्रक्रियायां 'गोत' इति जाते, तस्य "तलन्तं स्त्रियाम्" इति लिङ्गानुशासनात् स्त्रीत्वे, स्त्रीत्वाट्टापि 'गोता' इति जाते, तस्मात् प्रातिपदिकात् सौ, हल्ङ्यादिलोपे 'गोता' इति सिद्ध्यति ।

**पृथ्वादिभ्य इमनिज्वा ५ । १ । १२२ ॥**

**वावचनमणादिसमावेशार्थम् ।**

**र ऋतो हलादेर्लघोः ६ । ४ । १६१ ॥**

**इष्ठेमेयस्सु ।**

**टेः ६ । ४ । १४३ ॥**

**भस्य टेर्लोप इष्ठेमेयस्सु । पृथु-मृदु-भृश-कृश-दृढ-परिवृढानामेव रत्वम् । पृथोर्भावः- प्रथिमा, पार्थवम् । म्रदिमा, मार्दवम् ॥**

**वर्णदृढादिभ्यः ष्यञ् च ५ । १ । १२३ ॥**

**चादिमनिच् शौक्ल्यम्, शुक्लिमा । दार्ढ्यम्, द्रढिमा ॥**

षष्ठ्यन्तेभ्यः समर्थेभ्यो वर्णविशेषवाचिभ्यो दृढादिभ्यश्च प्रातिपदिकेभ्यो 'भावः' इत्यस्मिन्नर्थे ष्यञ्-प्रत्ययो भवति, चकारग्रहणाद् इमनिच्-प्रत्ययश्च वा भवति । त्वतलौ च वा भवतः । ष्यञो षकारञकारौ इतौ । ञित्वादादिवृद्धिः ।

'शुक्लस्य भावः' इति विग्रहे 'शुक्ल + ङस्' इत्यस्मात् प्रकृतसूत्रेण ष्यञ्प्रत्ययेऽनुबन्धलोपे, सुब्लुकि 'शुक्ल य' इति जाते, ञित्वादादिवृद्धौ, भसंज्ञकस्य अकारस्य लोपे 'शौक्ल्य' इति जाते, तस्मात् सौ, विभक्तिकार्ये 'शौक्ल्यम्' इति सिद्ध्यति । इमनिच्-प्रत्यये तु टिलोपादिकार्ये 'शुक्लिमा' इति रूपम् । त्व-तलोः पूर्ववत्प्रक्रियायां क्रमात् 'शुक्लत्वम्', 'शुक्लता' इति सिद्ध्यतः । एवमेव- दृढस्य भाव इति विग्रहे पूर्ववत्- दाढर्यम्, दृढत्वम्, दृढता । इमिनिचि- द्रढिमा ।

**गुणवचनब्राह्मणादिभ्यः कर्मणि च ५ । १ । १२४ ॥**

**चाद्भावे । जडस्य भावः कर्म वा जाडचम् । मूढस्य भावः कर्म वा मौढचम् । ब्राह्मण्यम् । आकृतिगणोऽयम् ॥**

षष्ठ्यन्तेभ्यः समर्थेभ्यो गुणवाचकेभ्यो ब्राह्मणादिभ्यश्च प्रातिपदिकेभ्यः कर्मणि (चकारग्रहणात्) भावे चाऽर्थे ष्यञ्प्रत्ययो वा भवतीत्यर्थः । पक्षे त्व-तलौ च वा भवतः ।

'जडस्य भावः कर्म वा' इत्यर्थे 'जड + ङस्' इत्यस्मात् समर्थात् प्रकृतसूत्रेण ष्यञ्प्रत्यये, विभक्तेर्लुकि, आदिवृद्धौ, भत्वादलोपे, स्वादिकार्ये 'जाडचम्' इति । त्व-तलोस्तु क्रमाद् जडत्वम्, जडता । एवमेव- मूढस्य भावः कर्म वेति- मौढचम्, मूढत्वम्, मूढता । ब्राह्मणस्य भावः कर्म वेति- ब्राह्मण्यम्, ब्राह्मणत्वम्, ब्राह्मणता । ब्राह्मणादिराकृतिगणो वर्तते ।

**वा. चतुर्वर्णादीनां स्वार्थे उपसंख्यानम् । चातुर्वर्ण्यम् । चातुराश्रम्यम् । त्रैवर्ग्यम् । षाड्गुण्यम् । सैन्यम् । सान्निध्यम् । त्रैलोक्यमित्यादि ॥**

**स्तेनाद्यन्नलोपश्च ५ । १ । १२५ ॥**

**नेति संघातग्रहणम् । स्तेनस्य भावः कर्म वा- स्तेयम् ॥**

**सख्युर्यः ५ । १ । १२६ ॥**

**सख्युर्भावः कर्म वा सख्यम् ॥**

षष्ठ्यन्तात् समर्थात् सखि-शब्दात् कर्मणि भावे चाऽर्थे य-प्रत्ययो वा भवतीति सूत्रार्थः ।

'सख्युर्भावः कर्म वा' इत्यर्थे 'सखि + ङस्' इत्यस्मात् प्रकृतसूत्रेण य-प्रत्यये, विभक्तेर्लुकि 'सखि य' इति जाते, भसंज्ञकस्य इकारस्य लोपे, स्वादिकार्ये 'सख्यम्' इति । त्वतलोस्तु क्रमात् सखित्वम्, सखिता ।

**पत्यन्तपुरोहितादिभ्यो यक् ५ । १ । १२८ ॥**

**सैनापत्यम् । पौरोहित्यम् ॥**

**हायनान्तयुवादिभ्योऽण् ५ । १ । १३० ॥**

**द्वैहायनम् । त्रैहायनम् । यौवनम् । स्थाविरम् ॥**

**वा. श्रोत्रियस्य यलोपश्च । श्रौत्रम् । कुशल-निपुण-पिशुन-कुतूहल-क्षेत्रज्ञा युवादिषु ब्राह्मणादिषु च पठ्यन्ते । कौशलम्, कौशल्यमित्यादि ॥**

**इगन्ताच्च लघुपूर्वात् ५ । १ । १३१ ॥**

**शुचेर्भावः कर्म वा- शौचम् । मौनम् ॥**

**॥ इति नञ्स्नञोरवधिः ॥**

## अथ पाञ्चमिकेषु भवनाद्यर्थकाः

**धान्यानां भवने क्षेत्रे खञ् ५ । २ । १ ॥**

**मुद्गानां भवनं क्षेत्रं मौद्गीनम् ।**

**विभाषा तिलमाषोमाभङ्गाणुभ्यः ५ । २ । ४ ॥**

**यत् । पक्षे खञ् । तिल्यम्, तैलीनम् । माष्यम्, माषीणम् । उम्यम्, औमीनम् । भङ्ग्यम्, भाङ्गीनम् । अणव्यम्, आणनीवम् ॥**

**तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति ४ । २ । ७ ॥**

**सर्वादेः पथ्यन्ताद् द्वितीयान्तात्खः । सर्वपथान् व्याप्नोति- सर्वपथीनः । सर्वाङ्गीणः । सर्वकर्मीणः । सर्वपत्रीणः । सर्वपात्रीणः ॥**

**हैयङ्गवीनं संज्ञायाम् ५ । २ । २३ ॥**

**ह्योगोदोहशब्दस्य हियङ्गुरादेशो विकारेऽर्थे खञ् प्रत्ययश्च निपात्यते संज्ञायामित्यर्थः । दुह्यते इति दोहः = क्षीरम्, ह्योगोदोहस्य विकारः- हैयङ्गवीनम् = नवनीतम् ॥**

**तेन वित्तश्चुञ्चुप्चणपौ ५ । २ । २६ ॥**

**यकारः प्रत्यययोरादौ लुप्तनिर्दिष्टः तेन चस्य नेत्वम् । विद्यया वित्तो- विद्याचुञ्चुः, विद्याचणः ॥**

**वेः शालच्छंकटचौ ५ । २ । २८ ॥**

**क्रियाविशिष्टसाधनवाचकात्स्वार्थे । विस्तृतम्- विशालम्, विशङ्कटम् ॥**

**संप्रोदश्च कटच् ५ । २ । २९ ॥**

**सङ्कटम् । प्रकटम् । उत्कटम् । चाद् विकटम् ॥**

**उपाधिभ्यां त्यकन्नासन्नारूढयोः ५ । २ । ३४ ॥**

**पर्वतस्यासन्नं स्थलम्- उपत्यका । आरूढं स्थलम्- अधित्यका ॥**

**कर्मणि घटोऽठच् ५ । २ । ३५ ॥**

**कर्मणि घटते- कर्मठः ।**

**तदस्य सञ्जातं तारकादिभ्य इतच् ५ । २ । ३६ ॥**

**तारकाः सञ्जाता अस्य- तारकितं नभः । पण्डितः । आकृतिगणोऽयम् ॥**

प्रथमान्तेभ्यः समर्थेभ्यस्तारकादिगणपठितेभ्यः शब्देभ्यः 'अस्य सञ्जातम्' इत्यस्मिन्नर्थे तद्धित इतच्-प्रत्ययो वा भवति । इतचश्चकार इत् ।

'तारकाः सञ्जाता अस्य' इत्यर्थे 'तारका + जस्' इत्यस्मात् समर्थात् प्रकृतसूत्रेण इतच्प्रत्यये, चकारस्य इत्संज्ञायां लोपे, सुब्लुकि 'तारका इत' इति जाते, भसंज्ञकस्य आकारस्य लोपे, स्वादिकार्ये 'तारकितम्' इति सिद्ध्यति। तारकितं नभः। तथा च - 'पण्डा सञ्जाता अस्य' इत्यर्थे 'पण्डा + सु' इत्यस्मादितचि पूर्ववत् प्रक्रियायां 'पण्डितः' इति। एवमेव - पुष्पाणि सञ्जातानि अस्येति पुष्पितः वृक्षः। फलानि सञ्जातानि अस्येति फलितः वृक्षः। पल्लवाः सञ्जाता अस्येति पल्लवितस्तरुरित्यादीनि। तारकादिराकृतिगणो वर्तते।

**प्रमाणे द्वयसज्दघ्नञ्मात्रचः ५। २। ३७॥**

**ऊरू प्रमाणमस्य- ऊरुद्वयसम्, ऊरुमात्रम्।**

**प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम।**

**ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः।**

**आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः॥**

**यत्तदेतेभ्यः परिमाणे वतुप् ५। २। ३९॥**

**यत्परिमाणमस्य- यावान्। तावान्। एतावन्॥**

**किमिदंभ्यां वो घः ५। २। ४०॥**

**आभ्यां वतुब्वस्य च घः।**

**इदंकिमोरीश्की ६। ३। ९०॥**

**दृग्दृशवतुषु। कियान्। इयान्॥**

**किमः संख्यापरिमाणे डति च ५। २। ४१॥**

**चाद्वतुप् तस्य च घः। का संख्या येषां ते- कति, कियन्तः॥**

**संख्याया अवयवे तयप् ५। २। ४२॥**

**पञ्च अवयवाः- पञ्चतयम्।**

**द्वित्रिभ्यां तयस्यायज्वा ५। २। ४४॥**

**द्वयम्, द्वितयम्। त्रयम्, त्रितयम्॥**

**उभादुदात्तो नित्यम् ५। २। ४४॥**

**उभशब्दात्तयपोऽयच् स्यात् स चाद्युदात्तः। उभयम्॥**

**॥ इति भवनाद्यर्थकाः॥**

## अभ्यासः

### १. प्रदत्तसूत्रवार्तिकानामर्थं लिखत

(क) प्रमाणे द्वयसज्दघ्नञ्मात्रचः

(ख) यत्तदेतेभ्यः परिमाणे वतुप्

(ग) इदंकिमोरीश्की

(घ) तदस्य सञ्जातं तारकादिभ्य इतच्

(ङ) इगन्ताच्च लघुपूर्वात्

(च) चतुर्वर्णादीनां स्वार्थे उपसंख्यानम्

(छ) गुणवचनब्राह्मणादिभ्यः कर्मणि च

(ज) र ऋतो हलादेर्लघोः

(झ) तेन तुल्यं क्रिया चेद्वतिः

(ञ) तस्येश्वरः

(ट) शरीरावयवाद्यत्

(ठ) सभाया यः

(ड) प्राग्घिताद्यत्

### २. प्रश्नानामुत्तराणि देयानि

(क) संख्याया अवयवे केन सूत्रेण कः प्रत्ययो विधीयते ?

(ख) 'तावान्' इत्यस्य कोऽर्थः ?

(ग) 'सख्युर्भाव कर्म वा' इत्यर्थे केन सूत्रेण कः प्रत्ययो भवति ? किञ्च तत्र रूपं निष्पद्यते ?

(घ) 'पृथोर्भावः' इत्यर्थे काभ्यां प्रत्ययाभ्यां के रूपे निष्पद्येते ?

(ङ) 'अह्ना निर्वृत्तम्' इत्यर्थे तद्धितप्रत्ययान्तं रूपं किम् ?

(च) 'शतकः' इत्यस्य व्युत्पत्तिं प्रदर्शयत ।

(छ) "तत्र साधुः" इति सूत्रं किं करोति ?

(ज) कीदृशेभ्यः प्रातिपदिकेभ्यः परस्य कन्-प्रत्ययस्य वैकल्पिक इडागमो भवति ?

(झ) 'दन्त्यम्' इत्यत्र प्रकृतिप्रत्ययौ कौ ?

(ञ) 'पार्थवम्' इत्यत्र केन सूत्रेण कः प्रत्ययो जातोऽस्ति ?

**३. अधस्तनपदानि प्रयुज्य वाक्यानि रचयत**

सार्वभौमः, पार्थिवः, इयान्, कति, सभ्यः, सख्यम्, गोत्वम्, दोहः, स्तेयम्, शौक्ल्यम् ।

**४. प्रकृति-प्रत्ययविभागं कुरुत**

कर्मण्यः, उरुद्वयसम्, पण्डितः, मौनम्, नैष्किकम्, हविष्यम्, तुल्यम्, नस्यम् ।

**५. प्रत्ययान् संयोज्य निष्पन्नरूपाणि लिखत**

कण्ठ + यत्, सर्वाङ्ग + ख, युवन् + अण्, जड + ष्यञ्, गो + तल्, सामन् + यत् ।

**६. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां प्रदर्शयत**

सार्वभौमः, उरुमात्रम्, उभयम्, द्वयम्, कति, पञ्चतयम्, यावान्, कियान्, कर्मठः, तारकितम्, अधित्यका, रथ्यः, धुर्यः, ब्राह्मणवत्, शुक्लिमा, मौढ्यम्, वध्यः, पञ्चकः, दन्त्यम्, मूल्यः ।

**७. "नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु" इति सूत्रस्यार्थं सोदाहरणं लिखत ।**

# अथ मत्वर्थीयप्रकरणम्

**तदस्मिन्नधिकमिति दशान्ताड्डः ५ । २ । ४५ ॥**

**एकादश अधिक अस्मिन्नेकादशम् ।**

**वा. शतसहस्रयोरेवेष्यते । नेह- एकादशाऽधिका अस्यां विंशत्याम् । 'प्रकृतिप्रत्ययार्थयोः समानजातीयत्वे एवेष्यते । नेह- एकादश माषा अधिका अस्मिन् सुवर्णशते ॥**

**शदन्तविंशतेश्च ५ । २ । ४६ ॥**

**डः स्यादुक्तेऽर्थे । त्रिंशदधिका अस्मिन्- त्रिंशम् । विंशम् ॥**

**तस्य पूरणे डट् ५ । २ । ४८ ॥**

**एकादशानां पूरणः- एकादशः ॥**

षष्ठ्यन्तसमर्थात् सङ्ख्यावाचकशब्दात् पूरणेऽर्थे डट्प्रत्ययो वा भवतीति सूत्रार्थः । टकारडकारौ इतौ ।

'एकादशानां पूरणम्' इति विग्रहे 'एकादशन् + आम्' इत्यस्मात् समर्थात् प्रकृतसूत्रेण डट्यनुबन्धलोपे, सुब्लुकि 'एकादशन् अ' इति जाते, टिलोपे, स्वादिकार्ये 'एकादशः' इति सिद्ध्यति ।

**नान्तादसङ्ख्यादेर्मट् ५ । २ । ४९ ॥**

**डटो मडागमः । पञ्चानां पूरणः पञ्चमः । नान्तात्किम् ? विंशः । असंख्यादेः किम् ? एकादशः ॥**

असङ्ख्यादेर्नकारान्तात् सङ्ख्यावाचकशब्दात् परस्य डटो मडागमो भवतीत्यर्थः । मटष्टकार इत्, अकार उच्चारणार्थः ।

'पञ्चानां पूरणः' इति विग्रहे 'पञ्चन् + आम्' इत्यस्मात् "तस्य पूरणे डट्" इत्यनेन डट्-प्रत्ययेऽनुबन्धलोपे, सुब्लुकि 'पञ्चन् अ' इति जाते, प्रकृतसूत्रेण मडागमेऽनुबन्धलोपे टित्वाड्डट आद्यवयवत्वे 'पञ्चन् म् अ' इति जाते "न लोपः प्रातिपदिकान्तस्य" इति नलोपे 'पञ्चम' इति प्रातिपदिकात् सौ 'पञ्चमः' इति । विंशत्यादिशब्देभ्यः परस्य डटो मड्वारणाय नान्तादिति निर्दिष्टम् । एवमेव 'असंख्यादेः' इति निर्देशात् संख्यादिषु एकादशः, द्वादश इत्यादिषु मडागमस्याऽप्राप्तिरिति बोध्यम् ।

**ति विंशतेर्डिति ६ । ४ । १४२ ॥**

**विंशतेर्भस्य तिशब्दस्य लोपो डिति परे । विंशः ॥**

'विंशतेः पूरणः' इति विग्रहे 'विंशति + ङस्' इत्यस्मात् "तस्य पूरणे डट्" इति डटि, विभक्तेर्लुकि 'विंशति अ' इति जाते, प्रकृतसूत्रेण भसंज्ञकस्य विंशतिशब्दस्यावयवस्य 'ति' इत्यस्य लोपे 'विंश अ' इति जाते "अतो गुणे" इति पररूपे, स्वादिकार्ये 'विंशः' इति सिद्ध्यति । अत्र नान्तस्याभावाद् मण्न ।

**षट्कतिकतिपयचतुरां थुक् ५ । १ । ५१ ॥**

**डटि । षण्णां पूरणः- षष्ठः । कतिथः । कतिपयशब्दस्यासंख्यात्वेऽपि अत एव ज्ञापकात् डट् । कतिपयथः । चतुर्थः ॥**

**द्वेस्तीयः ५ । २ । ५४ ॥**

**डटोऽपवादः । द्वयोः पूरणो द्वितीयः ॥**

**षष्ठ्यन्तात् समर्थात् द्विशब्दात् पूरणेऽर्थे तीय-प्रत्ययो भवति ।**

'द्वयोः पूरणः' इति विग्रहे 'द्वि + ओस्' इत्यस्मात् प्राप्तं डटं बाधित्वा प्रकृतसूत्रेण तीयप्रत्यये, सुब्लुकि 'द्वितीय' इति जाते, तस्मात् सौ 'द्वितीयः' इति सिद्ध्यति ।

**त्रेः संप्रसारणं च ५ । २ । ५५ ॥**

**तृतीयः ॥**

षष्ठ्यन्तात् समर्थात् त्रिशब्दात् पूरणेऽर्थे तीय-प्रत्ययो भवति, त्रेः संप्रसारणं च भवति ।

'त्रयाणां पूरणः' इति विग्रहे 'त्रि + आम्' इत्यस्मात् प्रकृतसूत्रेण तीय-प्रत्यये, त्रि-शब्दस्य रेफस्य संप्रसारणे च कृते, पूर्वरूपे, सुब्लुकि 'तृतीय' इत्यस्मात् सौ 'तृतीयः' इति सिद्ध्यति ।

**नित्यं शतादिमासार्धमाससंवत्सराच्च ५ । २ । ५७ ॥**

**शतस्य पूरणः- शततमः । मासादेरत एव ज्ञापकात् डट् । मासतमः ॥**

**श्रोत्रियश्छन्दोऽधिते ५ । २ । ८४ ॥**

**श्रोत्रियः । वेत्यनुवृत्तेः छान्दसः ॥**

**साक्षाद्द्रष्टरि संज्ञायाम् ५ । २ । ९१ ॥**

**साक्षाद् द्रष्टा = साक्षी ।**

**॥ इति पाञ्चमिकाः ॥**

## अभ्यासः

### १. प्रदत्तसूत्राणामर्थं लिखत

(क) छत्रादिभ्यो णः

(ख) अस्ति नास्ति दिष्टं मतिः

(ग) अधर्माच्चेति वक्तव्यम्

(घ) पक्षिमत्स्यमृगान् हन्ति

(ङ) वेतनादिभ्यो जीवति

(च) नौद्व्यचष्ठन्

(छ) प्राग्वहतेष्ठक्

(ज) गोपयसोर्यत्

(झ) लुक् तद्धितलुकि

(ञ) अश्मनो विकारे टिलोपो वक्तव्यः

### २. प्रश्नानामुत्तराणि देयानि

(क) सप्तम्यन्तान्निकटप्रातिपदिकात् कस्मिन्नर्थे ठक्प्रत्ययो विधीयते ? किञ्च रूपं तत्र निष्पद्यते ?

(ख) 'आकरिकः' इत्यस्य कोऽर्थः ?

(ग) 'इति मतिरस्यास्ति' इत्यर्थे केभ्यः प्रातिपदिकेभ्यः केन सूत्रेण कः प्रत्ययो भवति ?

(घ) शब्द-दर्दुरप्रातिपदिकाभ्यां करोतीत्यर्थे कः प्रत्ययः केन सूत्रेण विधीयते ?

(ङ) 'दध्ना संसृष्टम्' इत्यर्थे तद्धितप्रत्ययान्तं रूपं किम् ?

(च) 'वैतनिकः' इत्यस्य व्युत्पत्तिं प्रदर्शयत ।

(छ) "फले लुक्" इति सूत्रं किं करोति ?

(ज) केभ्यः प्रातिपदिकेभ्योऽभक्ष्याच्छादनयोर्विकारावयवयोर्भाषायां विषये नित्यं मयट्-प्रत्ययो भवति ?

(झ) 'अश्मः' इत्यत्र प्रकृतिप्रत्ययौ कौ ?

(ञ) 'गव्यम्' इत्यत्र केन सूत्रेणऽवादेशः ?

## ३. अधस्तनपदानि प्रयुज्य वाक्यानि रचयत

नैकटिकः, सामाजिकः, धानुष्कः, पयस्यम्, आस्तिकः, आधर्मिकः, शरमयम्, वाङ्मयम्, आमलकम् ।

## ४. प्रकृति-प्रत्ययविभागं कुरुत

धार्मिकः, गव्यम्, पाक्षिकः, दार्दुरिकः, बादरिकः, दाधिकः, बाहुकः, अश्ममयम्, मौद्गः ।

## ५. प्रत्ययान् संयोज्य निष्पन्नरूपाणि लिखत

शर + मयट्, धनुष् + ठक्, आकर + ठक्, मयूर + ठक्, नौ + ठन्, दधि + ठक् ।

## ६. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां प्रदर्शयत

सामाजिकः, गव्यम्, नैकटिकः, दाधिकः, आश्मः, वाङ्मयम्, आसिकः, नास्तिकः, दैष्टिकः, आक्षिकः ।

## ७. "मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः" इति सूत्रस्यार्थं सोदाहरणं लिखत ।

# अथ मतुबर्थीयादिप्रक्रिया

**तदस्यास्त्यस्मिन्निति मतुप् ५ । २ । ९४ ॥**

**गावोऽस्यास्मिन्वा सन्ति- गोमान् ॥**

प्रथमान्तात् समर्थात् प्रातिपदिकाद् 'अस्य अस्ति' इत्यर्थे 'अस्मिन् अस्ति' इत्यर्थे वा तद्धितो मतुप्-प्रत्ययो भवति । मतुप उकारपकारौ इतौ ।

(भूम-निन्दा-प्रशंसा-नित्ययोग-अतिशायन-सम्बन्धेषु विवक्षितेषु मतुबादयो भवन्तीति भाष्यम् ।)

'गावः सन्ति अस्य अस्मिन् वा' इति विग्रहे प्रथमान्ताद् गोशब्दात् प्रकृतसूत्रेण मतुप्-प्रत्यये, उकारपकारयोरित्संज्ञायां लोपे 'गो + जस् + मत्' इति जाते, तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि 'गोमत्' इति जाते, तस्मात् प्रातिपदिकात् सौ, नुमादिकार्ये 'गोमान्' इति सिद्धचति । एवमेव - धीः अस्ति अस्येति- धीमान् । श्रीः अस्ति अस्येति- श्रीमान् । बुद्धिरस्ति अस्येति- बुद्धिमान् ।

**तसौ मत्वर्थे १ । ४ । १९ ॥**

**तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे । गरुत्मान् । "वसोः संप्रसारणम्" । विदुष्मान् ।**

मत्वर्थीये प्रत्यये परे सति तकारान्तस्य, सकारान्तस्य च शब्दस्वरूपस्य भसंज्ञा भवति ।

'गरुतः सन्ति अस्य अस्मिन् वा' इति विग्रहे 'गरुत् + जस्' इत्यस्मात् "तदस्यास्तस्मिन्निति मतुप्" इति मतुप्-प्रत्ययेऽनुबन्धलोपे 'गरुत् मत्' इत्यवस्थायां प्रकृतसूत्रेण भसंज्ञायाम्, भत्वात् पदसंज्ञाभावे जश्त्वानुनासिकयोरप्यभावे 'गरुत्मत्' इत्यवस्थायां स्वादिकार्ये 'गरुत्मान्' इति सिद्धचति ।

'विद्वांसः सन्ति अस्य अस्मिन् वा' इति विग्रहे 'विद्वस् + अस्' इत्यस्मान् मतुप्-प्रत्यये, सुब्लुकि 'विद्वस् मत्' इत्यवस्थायां प्रकृतसूत्रेण भसंज्ञायाम् "वसोः संप्रसारणम्" इति वकारस्य संप्रसारणे, पूर्वरूपे, सकारस्य षत्वे 'विदुष्मत्' इति जाते सौ, विभक्तिकार्ये 'विदुष्मान्' इति । अत्रापि भत्वाभावान्न जश्वादि ।

**वा. गुणवचनेभ्यो मतुपो लुगिष्टः । शुक्लो गुणोऽस्यास्तीति शुक्लः पटः । कृष्णः ॥**

गुणवाचकात् शब्दात् परस्य मतुप्-प्रत्ययस्य लुग्भवति ।

'शुक्लो गुणोऽस्य अस्ति' इति विग्रहे 'शुक्ल + सु' इत्यस्माद् मतुप्-प्रत्ययेऽनुबन्धलोपे, विभक्तेर्लुकि 'शुक्ल मत्' इति जाते प्रकृतवार्तिकेन मतुपो लुकि 'शुक्ल' इत्यस्मात् सौ 'शुक्लः' इति सिद्ध्यति। शुक्लः पट इति प्रयोगः। एवमेव- कष्णो गुणोऽस्य अस्तीति- कृष्णः।

**प्राणिस्थादातो लजन्यतरस्याम् ५ । २ । ९६ ॥**

**चूडालः, चूडावान्। प्राणिस्थात् किम् ? शिखावान् दीपः ॥**

**फेनादिलच्च ५ । ८ । ९९ ॥**

**चाल्लच्। अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थमनुवर्तते। फेनिलः, फेनलः, फेनवान् ॥**

**प्रज्ञाश्रद्धाऽर्चाभ्यो णः ५ । २ । १०१ ॥**

**प्राज्ञो व्याकरणे। प्राज्ञा। श्राद्धः। आर्चः ॥**

**तपःसहस्राभ्यां विनीनी ५ । २ । १०२ ॥**

**विनीन्योरिकारो नकारपरित्राणार्थः। तपस्वी। सहस्री ॥**

**अण् च ५ । २ । १०३ ॥**

**तापसः। साहस्रः ॥**

**दन्त उन्नत उरच् ५ । २ । १०६ ॥**

**उन्नता दन्ता अस्य- दन्तुरः।**

**ऊषसुषिमुष्कमघो रः ५ । २ । १०७ ॥**

**ऊषरः। मुष्कोऽण्डः। मुष्करः ॥**

**वा. रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम्। खरः। मुखरः। कुञ्जो हस्तिहनुः- कुञ्जरः ॥**

**केशाद्वोऽन्यतरस्याम् ५ । २ । १०९ ॥**

**प्रकृतेनान्यतरस्याग्रहणेन मतुपि सिद्धे पुनर्ग्रहणम् इनिठनोः समावेशार्थम्। केशवः, केशी, केशिकः, केशवान् ॥**

**गाण्ड्यजगात्संज्ञायाम् ५ । २ । ११० ॥**

**ह्रस्वदीर्घयोर्यणा तन्त्रेण निर्देशः। गाण्डीवम् = अर्जुनस्य धनुः। अजगवम् = पिनाकः ॥**

**रजःकृष्यासुतिपरिषदो वलच् ५ । २ । ११२ ॥**

**रजस्वला स्त्री। कृषीवलः। 'वले' इति दीर्घः। आसुतीवलः = शौण्डिकः। परिषद्वलः। पर्षदिति पाठान्तरम्। पर्षद्वलः ॥**

**दन्तशिखात्संज्ञायाम् ५ । २ । ११३ ॥**

**दन्तावलो हस्ती। शिखावलः केकी ॥**

**अत इनिठनौ ५ । २ । ११६ ॥**

**दण्डी । दाण्डिकः ॥**

प्रथमान्तात् समर्थाद् अकारान्तशब्दाद् मत्वर्थे इनि-ठनौ वा प्रत्ययौ भवतः । मतुप्-प्रत्ययश्च भवति । इनेऽन्त्येकारष्ठनो नकारश्च इतौ ।

'दण्डोऽस्यास्ति' विग्रहेऽस्मिन् 'दण्ड + सु' इत्यस्मात् प्रकृतसूत्रेण इनिप्रत्ययेऽनुबन्धलोपे, सुब्लुकि 'दण्ड इन्' इत्यवस्थायां भत्वादलोपे, स्वादिकार्ये 'दण्डी' इति सिद्ध्यति । ठन्-प्रत्यये तु 'दण्ड ठ' इत्यवस्थायां ठस्येकादेशे, अलोपे, स्वादिकार्ये 'दण्डिकः' इति । अन्ये पक्षे मतुप्प्रत्यये 'दण्डमत्' इत्यवस्थायाम्-

**व्रीह्यादिभ्यश्च ५ । २ । ११५ ॥**

**व्रीहि । व्रीहिकः ॥**

प्रथमान्तेभ्यः समर्थेभ्यो व्रीह्यादिगणपठितेभ्यः शब्देभ्यो मत्वर्थे इनिठनौ प्रत्ययौ भवतः ।

'व्रीहयः सन्ति अस्य' इति विग्रहे 'व्रीहि + जस्' इत्यस्मात् प्रकृतसूत्रेण इनिप्रत्यये, सुब्लुकि 'व्रीहि इन्' इत्यवस्थायां, भसंज्ञकस्य इकारस्य लोपे 'व्रीहिन्' इति प्रातिपदिकात् सौ, विभक्तिकार्ये 'व्रीही' इति । ठन्-प्रत्यये तु ठस्य इकादेशे, इकारलोपे, सौ - व्रीहिकः ।

**तुन्दादिभ्य इलच्च ५ । २ । ११७ ॥**

**चादिनिठनौ मतुप् च । तुन्दिलः, तुन्दी, तुन्दिकः, तुन्दवान् । उदर, पिचण्ड, यव, व्रीहिः इति तुन्दादिः ॥**

**रूपादाहतप्रशंसयोर्यप् ५ । २ । १२० ॥**

**आहतं रूपमस्यास्तीति रूप्यः = कार्षापणः । प्रशस्तं रूपमस्यास्तीति रूप्यो गौः ॥**

**अस्मायामेधास्रजो विनिः ५ । २ । १२१ ॥**

**यशस्वी, यशस्वान् । मायावी, मायावान् । व्रीह्यादिपाठान्मायी, मायिकः । स्रग्वी ॥**

**वाचो ग्मिनिः ५ । २ । १२४ ॥**

**वाग्ग्मी ॥**

**आलजाटचौ बहुभाषिणि ५ । २ । १२५ ॥**

**वा. कुत्सित इति वक्तव्यम् । कुत्सित बहुभाषते- वाचालः, वाचाटः । यस्तु सम्यग्बहु वदति तत्र वाग्ग्मीत्येव ॥**

**स्वामिन्नैश्वर्ये ५ । २ । १२६ ॥**

**ऐश्वर्यवाचकात् स्वशब्दान्मत्वर्थे आमिनच् । स्वामी ॥**

**अर्शआदिभ्योऽच् ५ । २ । १२७ ॥**

**अर्शांसि अस्य विद्यन्ते- अर्शसः । आकृतिगणोऽयम् ॥**

**अर्शस्-शब्द आदिर्येषामिति- अर्शआदिः । अर्शआदिगणपठितेभ्यः शब्देभ्यो मत्वर्थे अच्-प्रत्ययो भवति ।**

**अहंशुभयोर्युस् ५ । २ । १०४ ॥**

**अहंयुः = अहङ्कारवान् । शुभंयुः = शुभान्वितः ॥**

**॥ इति मत्वर्थीयाः ॥**

# अथ प्राग्दिशीयप्रकरणम्

**प्राग्दिशो विभक्तिः ५ । ३ । १ ॥**

**दिक्शब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः ।**

इतः परम् 'दिक्शब्देभ्यः... ५ । ३ । २७' इति यावत् ये प्रत्ययाः पाठ्यन्ते ते विभक्तिसंज्ञका भवन्ति ।

**किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ५ । ३ । २ ॥**

**किमः सर्वनाम्नो बुहशब्दाच्चेति प्राग्दिशोऽधिकारः ।**

द्वि, युष्मद्, अस्मद्, भवत् इत्येतान् चतुरः शब्दान् वर्जयित्वा अन्येभ्यः सर्वादिगणपठितशब्देभ्यः, बहु-शब्दाच्च विभक्तिसंज्ञका वक्ष्यमाणास्तद्धितप्रत्यया भवन्ति ।

**पञ्चम्यास्तसिल् ५ । ३ । ७ ॥**

**पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिल् वा स्यात् ॥**

पञ्चम्यन्तेभ्यो द्वि-युष्मदस्मद्-भवत्-शब्दभिन्नेभ्यः सर्वनामशब्देभ्यः, पञ्चम्यन्ताद् बहु-शब्दाच्च तसिल्-प्रत्ययो विकल्पेन भवति । तसिल इकारलकारौ इतौ ।

**कु तिहोः ७ । २ । १०४ ॥**

**किमः कुः स्यात्तादौ हादौ च विभक्तौ परतः । कुतः, कस्मात् ॥**

विभक्तिसंज्ञके तकारादौ, हकारादौ च प्रत्यये परे सति किम्-शब्दस्य स्थाने 'कु' इत्यादेशो भवति । 'कस्मात्' इति विग्रहे 'किम् + ङसि' इत्यस्मात् "पञ्चम्यास्तसिल्" इति सूत्रेण तसिल्-प्रत्ययेऽनुबन्धलोपे 'किम् + ङसि + तस्' इति जाते तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां विभक्तेर्लुकि 'किम् तस्' इति जाते "प्राग्दिशो विभक्तिः" इति सूत्रेण तसिलो विभक्तित्वात् प्रकृतसूत्रेण किमः स्थाने 'कु' इत्यादेशे 'कुतस्' इति जाते "तद्धितश्चासर्वविभक्तिः" इत्यव्ययसंज्ञायां ततः सौ, सुपो लुकि, सकारस्य रुत्वे विसर्गे च 'कुतः' इति सिद्ध्यति । तसिलो विकल्पनात् 'कस्मात्' इति रूपं तु भवत्येव । एवमेव- सर्वतः, सर्वस्मात् । विश्वतः, विश्वस्मात् । बहुतः, बहुस्मात् इत्यादीन्यपि ज्ञेयानि ।

**इदम इश् ५ । १ । ३ ॥**

**प्राग्दिशीये परे । इतः ॥**

प्राग्दिशीये प्रत्यये परे सति इदम्-शब्दस्य स्थाने 'इश्' इत्यादेशो भवति । 'इश्' इत्यस्य शकार इत्, शित्वात्सर्वादेशो बोध्यः ।

'अस्मात्' इति विग्रहे 'इदम् + ङसि' इत्यस्मात् "पञ्चम्यास्तसिल्" इति तसिल्-प्रत्ययेऽनुबन्धलोपे, सुब्लुकि 'इदम् तस्' इत्यवस्थायां प्रकृतसूत्रेण इदमः स्थाने इशादेशेऽनुबन्धलोपे, शित्वात्सर्वादेशे 'इतस्' इत्यस्मात् सौ, अव्ययत्वात् सुब्लुकि, सकारस्य रुत्वविसर्गे 'इतः' इति सिद्ध्यति ।

**एतदोऽन् ५ । ३ । ५ ॥**

**एतदः प्राग्दिशीये । अनेकाल्त्वात्सर्वादेशः । अतः । अमुतः । यतः । ततः । बहुतः । द्व्यादेस्तु द्वाभ्याम् ॥**

प्राग्दिशीये प्रत्यये परे 'एतद्' इति शब्दस्य स्थाने 'अन्' इत्यादेशो भवति ।

'एतस्मात्' इति विग्रहे 'एतद् + ङसि' इत्यस्मात् तसिल्-प्रत्यये, सुब्लुकि 'एतद् तस्' इत्यवस्थायां प्रकृतसूत्रेण एतदः स्थाने अनादेशे, अनेकाल्त्वात् सर्वादेशे कृते 'अन् तस्' इति जाते "न लोपः प्रातिपदिकान्तस्य" इति सूत्रेण नलोपे, सौ, सुब्लुकि, सकारस्य रुत्वविसर्गे 'अतः' इति । 'अमुष्मात्' इति विग्रहे 'अदस् + ङसि' इत्यस्मात् तसिलि, सुब्लुकि, विभक्तिसंज्ञायां "त्यदादीनामः" इत्यत्वे पररूपे 'अद तस्' इति जाते "अदसोऽसेर्दादुदो मः" इति उत्वमत्वे 'अमुतस्' इत्यस्मात् सौ, अव्ययत्वात् सुब्लुकि, रुत्वादिकार्ये 'अमुतः' इति सिद्ध्यति । 'यस्मात्' विग्रहेऽस्मिन् 'यद् + ङसि' इत्यस्मात् तसिलि, विभक्तेर्लुकि, अत्वे पररूपे 'यतस्' इति जाते, पूर्ववद् 'यतः' इति । तथा च 'बहुभ्यः' इति विग्रहे 'बहु + भ्यस्' इत्यस्मात् तसिलि पूर्ववद् 'बहुतः' इति सिद्ध्यति ।

द्वि, युष्मद्, अस्मद् भवत् इत्येतेभ्यः शब्देभ्यस्तु तसिलभावे द्वाभ्याम्, त्वत्, मत्, भवतः इत्येव रूपाणि भवन्ति ।

**पर्यभिभ्यां च ५ । ३ । ९ ॥**

**आभ्यां तसिल् स्यात् ।**

परि-शब्दात्, अभि-शब्दाच्च तसिल्-प्रत्ययो भवति ।

**वा. सर्वोभयार्थाभ्यामेव । परितः । सर्वत इत्यर्थः । अभितः । उभयत इत्यर्थः ॥**

परि-शब्दात् सर्वार्थे, अभि-शब्दात् उभयार्थे एव तसिल्-प्रत्ययो भवतीत्यर्थः ।

'परि इति' इति विग्रहे सर्वार्थकाद् अव्ययसंज्ञकात् परि-शब्दात् प्रकृतवार्तिकसहकारेण 'पर्यभिभ्यां च' इति तसिल्-प्रत्ययेऽनुबन्धलोपे 'परितस्' इत्यस्मात् सौ, विभक्तिकार्ये 'परितः' इति सिद्ध्यति । परितः = सर्वतः । एवमेव उभयार्थकाद् अभि-शब्दात्तसिलि पूर्ववद् 'अभितः' इति । अभितः = उभयतः ।

**सप्तम्यास्त्रल् ५ । ३ । १० ॥**

**कुत्र । यत्र । तत्र । बहुत्र ॥**

सप्तम्यन्तेभ्यो द्वि-युष्मदस्मद्-भवच्छब्दभिन्नेभ्यः सर्वनामशब्देभ्यो बहु-शब्दाच्च त्रल्-प्रत्ययो भवति । त्रलो लकार इत् ।

कस्मिन्निति विग्रहे 'किम् + ङि' इत्यस्मात् प्रकृतसूत्रेण त्रल्-प्रत्ययेऽनुबन्धलोपे, सुब्लुकि 'किम् त्र' इत्यवस्थायाम् "कु तिहोः" इति किमः स्थाने 'कु' इत्यादेशे 'कुत्र' इत्यस्य अव्ययसंज्ञायां स्वादिकार्ये 'कुत्र' इति । एवं यस्मिन्निति विग्रहे 'यद् + ङि' इत्यस्मात् त्रलि, सुब्लुकि, अत्वे, पररूपे, स्वादिकार्ये 'यत्र' इति । एवमेव 'तस्मिन्' इत्यर्थे- तत्र । 'बहुषु इति' इति विग्रहे 'बहु + सुप्' इत्यस्मात् त्रलि, पूर्ववत् 'बहुत्र' इति सिद्ध्यति । एवं सर्वस्मिन् - सर्वत्र ।

**इदमो हः ५ । ३ । ११ ॥**

**त्रलोऽपवादः । इह ॥**

सप्तम्यन्ताद् इदम्-शब्दाद् ह-प्रत्ययो भवति । पूर्वसूत्रेण प्राप्तस्त्रल्-प्रत्ययोऽनेन बाध्यते ।

अस्मिन् - इदम् ङि ह - इदम् ह - इ ह (इदम इश्) - इह ।

**किमोऽत् ५ । ३ । १२ ॥**

**वा स्यात् ।**

सप्तम्यन्तात् किम्-शब्दाद् विकल्पेन अत्-प्रत्ययो भवति । पक्षे 'सप्तम्यास्त्रल्' इति त्रल् ।

**क्वाति ७ । २ । १०५ ॥**

**किमः । क्व, कुत्र ॥**

विभक्तिसंज्ञके अत्-प्रत्यये परे सति किम्-शब्दस्य स्थाने 'क्व' इत्ययमादेशो भवति ।

कस्मिन् - किम् ङि अत् (अ) (किमोऽत्) - किम् अ - क्व अ (क्वाति) - क्व् अ (यस्येति च) - क्व । पक्षे त्रलि- कुत्र ।

**इतराभ्योऽपि दृश्यन्ते ५ । ३ । १४ ॥**

**पञ्चमीसप्तमीतरविभक्त्यन्तादपि तसिलादयो दृश्यन्ते ।**

प्राग्दिशीयप्रकरणेऽस्मिन् पाठिताः तसिलादिविभक्तिसंज्ञकप्रत्ययाः प्रायेण पञ्चम्यन्तेभ्य उत सप्तम्यन्तेभ्यः किमादिशब्देभ्य उक्ताः, परन्तु केषुचन स्थलेषु एते प्रत्यया अन्यविभक्त्यन्तादपि विहिता दृश्यन्ते । अतः शिष्टप्रयोगाननुसृत्य कुत्रचित् तसिल्-त्रलादयः प्रत्ययाः पञ्चमी-सप्तमीतरस्मात् प्रथमादिविभक्त्यन्तादपि भवितुमर्हन्तीति सूत्रस्याशयः ।

**वा. दृशिग्रहणाद्भवदादियोग एव । स भवान्, ततो भवान्, तत्र भवान् । तं भवन्तम्, ततो भवन्तम्, तत्र भवन्तम् । एवं दीर्घायुः । देवानां प्रियः । आयुष्मान् ॥**

सूत्रे 'दृश्यते' इति पदस्य ग्रहणाद् भवत्-शब्दादियोगे एव = शिष्टप्रयोगमनुसृत्य एव

पञ्चमी-सप्तमीतरविभक्त्यन्तेभ्यः किमादिशब्देभ्यः तसिलादयः प्राग्दिशीयप्रत्यया विधेया इति वार्तिकार्थः । अत एव भवान्, दीर्घायुः, आयुष्मान्, देवानां प्रियः इत्येतेषां विशेषणरूपेण यदि पूर्वोक्ताः किमादिशब्दा आगच्छन्ति तर्हि तेभ्योऽन्यविभक्त्यन्तेभ्यः किमादिशब्देभ्यः तसिलादयो भवितुमर्हन्ति । यथा-

प्रथमान्तात्- स भवान् - तद् सु तसिल् (तस्) भवान् (इतराभ्योऽपि दृश्यन्ते) - ततो भवान् । त्रलि- तद् ङसि त्रल् (त्र) भवान् (इतराभ्योऽपि दृश्यन्ते) - तत्र भवान् । एवं द्वितीयान्तात्- तं भवन्तम् - तद् अम् तसिल्/त्रल् भवन्तम् - ततः/तत्र भवन्तम् । तृतीयान्तात्- तेन भवता - तद् टा तसिल्/त्रल् भवता - ततः/तत्र भवता । चतुर्थ्यन्तात्- तस्मै भवते - तद् ङे तसिल्/त्रल् भवते - ततः/तत्र भवते । षष्ठ्यन्तात्- तस्य भवतः - तद् ङस् तसिल्/त्रल् भवतः - ततः/तत्र भवतः । पञ्चमीसम्तम्यन्तयोस्तु भवत्येव- तस्मात् भवतः - ततः/तत्र भवतः । तस्मिन् भवति - ततः/तत्र भवति इति । एवं दीर्घायुरित्येतेषां विषयेऽपि बोध्यम् । यथा- स दीर्घायुः- ततः/तत्र दीर्घायुः । स आयुष्मान्- ततः/तत्र आयुष्मान् । स देवानां प्रियः- ततः/तत्र देवानां प्रियः । अयं भवान्- इतः/इह भवान् । को भवान्- कुतो भवान्, क्व/कुत्र भवान् । इत्यादि ।

**सर्वैकान्यकिंयत्तदः काले दा ५ । ३ । १५ ॥**

**सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे दा स्यात् ॥**

सप्तम्यन्तेभ्यः कालार्थेभ्यः सर्व, एक, अन्य, किम्, यद्, तद्, इत्येतेभ्यः शब्देभ्यः स्वार्थे दा-प्रत्ययो भवति ।

**सर्वस्य सोऽन्यतरस्यां दि ५ । ३ । ६ ॥**

**दादौ प्राग्दिशीये सर्वस्य सो वा स्यात् । सर्वस्मिन् काले सदा । सर्वदा । एकदा । अन्यदा । कदा । यदा । तदा । काले किम् ? सर्वत्र देशे ॥**

'सर्वस्मिन् काले' इति विग्रहे सप्तम्यन्तात् कालवाचकात् सर्वशब्दात् "सर्वैकान्यकिंयत्तदः काले दा" इति सूत्रेण स्वार्थे दाप्रत्यये, विभक्तेर्लुकि 'सर्व दा' इति जाते, प्रकृतसूत्रेण विकल्पेन 'सर्व' इत्यस्य 'स' इत्यादेशे, विभक्तिकार्ये 'सदा' इति । सादेशाभावे तु - सर्वदा । एवमेव - एकस्मिन्काल इत्यर्थे - एकदा । अन्यस्मिन् काले - अन्यदा । कस्मिन् काले - कदा । यस्मिन् काले - यदा । तस्मिन् काले - तदा । अत्र 'दा' इति विभक्तिसंज्ञकप्रत्ययपरत्वाद् अन्यदादौ अत्वपररूपम्, किमश्च कादेशः । कालभिन्नेऽर्थे वर्तमानेभ्यः सर्वैकादिशब्देभ्यस्तु दाप्रत्ययो न भवति । यथा - सर्वत्र देशे । अत्र देशवाचकात् सर्वशब्दात् त्रल्-प्रत्यये उक्तं रूपं सिद्ध्यति ।

**इदमो र्हिल् ५ । ३ । १६ ॥**

**सप्तम्यन्तात् ।**

सप्तम्यन्ताद् काले वर्तमानाद् इदम्-शब्दात् र्हिल्-प्रत्ययो भवति । हस्यापवादः । र्हिलो लकार इत् ।

**एतेतौ रथोः ५ । ३ । ४ ॥**

**इदम 'एत-इत्' एतौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे । अस्मिन् काले एतर्हि । काले किम् ? इह देशे ॥**

अस्मिन् काले - इदम् ङि र्हिल् (र्हि) (इदमो र्हिल्) - इदम् र्हि - एत र्हि (एतेतौ रथोः) - एतर्हि । 'अस्मिन् देशे' इत्यत्र तु कालभिन्नार्थत्वाद् र्हिलोऽप्राप्तौ 'इदमो हः' इति ह-प्रत्यये- इह देशे इति ।

**अधुना ५ । ३ । १७ ॥**

**इदमो निपातोऽयम् ।**

सप्तम्यन्तात् कालवाचकात् इदम्-शब्दाद् 'अधुना' इति प्रत्ययो भवति ।

अस्मिन् काले - इदम् ङि अधुना - इदम् अधुना - इश् अधुना (इदम इश्) - इ अधुना - अधुना (यस्येति च) - अधुना । अत्र प्रत्ययमात्रमवशिष्यते ।

**दानीं च ५ । ३ । १८ ॥**

**इदमो दानीं प्रत्ययः काले । इदानीम् ॥**

कालेऽर्थे वर्तमानात् सप्तम्यन्ताद् इदम्-शब्दात् 'दानीम्' इति प्रत्ययो भवति ।

अस्मिन् काले - इदम् ङि दानीम् - इदम् दानीम् - इश् (इ) दानीम् (इदम इश्) - इदानीम् ।

**तदो दा च ५ । ३ । १९ ॥**

**तदा, तदानीम् ।**

कालेऽर्थे वर्तमानात् सप्तम्यन्ताद् तद्-शब्दात् दा-प्रत्ययः, दानीम्-प्रत्ययश्च भवतः ।

तस्मिन् काले - तद् ङि दा - तद् दा - त अ दा (त्यदादीनामः) - त दा (अतो गुणे) - तदा । दानीम्पक्षे- तद् ङि दानीम् - तद् दानीम् - त अ दानीम् - त दानीम् - तदानीम् ।

**अनद्यतने र्हिलन्यतरस्याम् ५ । ३ । २१ ॥**

**कर्हि, कदा । यर्हि, यदा । तर्हि, तदा ॥**

**एतदः ५ । ३ । ५ ॥**

**एतच्छब्दस्य । एतस्मिन्काले- एतर्हि ॥**

**सद्यः परुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुत्तरेद्युः ५ । ३ । २२ ॥**

**एते निपात्यन्ते ।**

**वा. द्युश्चोभयाद्वक्तव्यः । उभयद्यः ॥**

**प्रकारवचने थाल् ५ । ३ । २३ ॥**

**प्रकारवृत्तिभ्यः किमादिभ्यस्थाल् स्यात् स्वार्थे । तेन प्रकारेण तथा । यथा ॥**

थालो लकार इत् ।

‘तेन प्रकारेण’ इति विग्रहे ‘तद् + टा’ इत्यस्मात् प्रकृतसूत्रेण थाल्प्रत्ययेऽनुबन्धलोपे, विभक्तेर्लुकि ‘तद् था’ इति जाते, थालो विभक्तित्वात् तदो दकारस्य अत्वे पररूपे, स्वादिकार्ये ‘तथा’ इति सिद्धम् । एवमेव येन प्रकारेण, यथा । (थाल्प्रत्ययोऽप्रथमान्तेभ्यः द्वितीयान्तादिभ्यः सर्वेभ्यः प्रकारवाचकसुबन्तकिमादिभ्यः भवति, प्रथमान्तात्तु न ।)

**इदमस्थमुः ५ । ३ । २४ ॥**

**थालोऽपवादः ।**

**वा. एतदोऽपि वाच्यः । अनेन एतेन वा प्रकारेण- इत्थम् ॥**

**किमश्च ५ । ३ । २५ ॥**

**केन प्रकारेण- कथम् ।**

**॥ इति प्राग्दिशीयाः ॥**

## अथ प्रागिवीयप्रकरणम्

**दिक्शब्देभ्यः सप्तमी-पञ्चमी-प्रथमाभ्यो दिग्देशकालेष्वस्तातिः ५ । ३ । २७ ॥**

**सातम्याद्यन्तेभ्यो दिशि रूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थेऽस्तातिः ।**

**पूर्वाधरावराणामसिपुरधवश्चैषाम् ५ । ३ । ३९ ॥**

**एभ्योऽस्तात्यर्थेसिस्तद्योगे चैषां पुर् अध् अव् इत्यादेशाः स्युः ।**

**अस्ताति च ५ । ३ । ४० ॥**

**पूर्वादीनां पुरादयः स्युः । पूर्वस्यां पूर्वस्याः पूर्वा वा दिक्- पुरः, पुरस्तात् । अधः, अवस्तात् । अवः ॥**

**विभाषाऽवरस्य ५ । ३ । ४१ ॥**

**अस्तातौ अव् वा स्यात् । अवस्तात्, अवरस्तात् । एवं देशे काले च दिशिरूढोभ्यः किम् ? ऐन्द्रयां वसति । सप्तम्याद्यन्तेभ्यः किम् ? पूर्वं ग्रामं गतः । दिगादिनिवृत्तिभ्यः किम् ? पूर्वस्मिन् गुरौ वसति । अस्ताति चेति ज्ञापकादसिरस्तातिं न बाधते ॥**

**उपर्युपरिष्टात् ५ । ३ । ३२ ॥**

**निपातावेतौ ।**

**पश्चात् ५ । ३ । ३१ ॥**

**तथा ।**

**संख्याया विधार्थे धा ५ । ३ । ४२ ॥**

**क्रियाप्रकारे वर्तमानात् संख्याशब्दात्स्वार्थे धा स्यात् । चतुर्धा ॥**

**भूतपूर्वे चरट् ५ । ३ । ५३ ॥**

**आढ्यो भूतपूर्वः- आढ्यचरः ।**

**अतिशायने तमबिष्ठौ ५ । ३ । ५५ ॥**

**अतिशयविशिष्टार्थवृत्तेः स्वार्थ एतौ स्तः । अयमेषामतिशयेनाढ्यः आढ्यतमः । लघुतमः, लघिष्ठः ॥**

बह्वर्थे विभज्योपपदे सति अतिशयविशिटेऽर्थे वर्तमानात् सुबन्तात् स्वार्थे तमप्, इष्ठन्, इत्यतौ प्रत्ययौ भवत इत्यर्थः । तमपो पकार इत्, इष्ठनश्च नकारः ।

'अयम् एषाम् अतिशयेन आढ्यः' इति विग्रह अतिशयविशिष्टेऽर्थे वर्तमानात् 'आढ्य + सु' इति सुबन्तात् प्रकृतसूत्रेण तमप्प्रत्ययेऽनुबन्धलोपे, प्रातिपदिकत्वात् सुपो लुकि 'आढ्यतम' इति जाते, तस्मात् सौ 'आढ्यतमः' इति । इष्ठनीयसुनौ प्रत्ययौ गुणवाचकशब्देभ्य एव भवतः । (अजादी गुणवचनादेव ५ । ३ । ५८) अत एव 'धनी' इत्यर्थकाद् आढ्यशब्दाद् इष्ठन्प्रत्ययो नैव भवति, गुणवाचकत्वाभावात् ।

'अयम् एषाम् अतिशयेन लघुः' इति विग्रहे 'लघु + सु' इति सुबन्तात् प्रकृतसूत्रेण तमप्प्रत्यये पूर्ववत् 'लघुतमः' इति सिद्ध्यति । गुणवाचकात् प्रथमान्ताल्लघुशब्दाद् इष्ठन्प्रत्यये तु 'लघु इष्ठ' इत्यवस्थायां भसंज्ञायाम् -

**टेः ६ । ४ । ११५ ॥**

**भस्य टेर्लोप इष्ठेमेयस्सु ।**

इष्ठन्, इमनिच्, ईयसुन्, इत्येतेषु प्रत्ययेषु परेषु भसंज्ञकस्य टेर्लोपो भवति ।

इति सूत्रेण टिलोपे 'लघिष्ठ' इति जाते, स्वादिकार्ये 'लघिष्ठः' इति सिद्ध्यति ।

**ङितश्च ५ । ३ । ५६ ॥**

**तिङन्तादतिशये द्योत्ये तमप् स्यात् ।**

**तरप्तमपौ घः १ । १ । २२ ॥**

**एतौ घसंज्ञौ स्तः ॥**

तरप्, तमप्, इत्येतौ प्रत्ययौ घसंज्ञकौ भवत इत्यर्थः ।

**किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ५ । ४ । ११ ॥**

**किम एदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे । किन्तमाम् । प्राह्णेतमाम् । पचतितमाम् । उच्चैस्तमाम् । द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः ॥**

किम्शब्दाद् एकारान्तशब्दात् तिङन्ताद् अव्ययशब्दाच्च परस्य यो घसंज्ञकप्रत्ययः, तदन्तशब्दाद् आमुप्रत्ययो भवति, द्रव्यस्य प्रकर्षेऽर्थे न बोधिते सतीत्यर्थः । आमोरुकार इत् ।

'अतिशयेन किम्' इति विग्रहे 'किम् + सु' इत्यस्मात् तमप्प्रत्यये, विभक्तेर्लुकि 'किन्तम' इति जाते "तरप्तमपौ घः" इति तमपो घसंज्ञायां, प्रकृतसूत्रेण 'किन्तम' इत्यस्माद् आमुप्रत्ययेऽनुबन्धलोपे 'किन्तम आम्' इत्यवस्थायां भसंज्ञकस्याकारस्य लोपे 'किन्तमाम्' इत्यव्ययसंज्ञकात् प्रातिपदिकात् सौ, सोर्लुकि 'किन्तमाम्' इति सिद्ध्यति। तिङन्तात्तु - अतिशयेन पचतीति विग्रहे तिङन्तात् पचतेः "तिङन्तश्च" इति सूत्रेण तमप्प्रत्यये 'पचतितम' इति जाते, तमपो घसंज्ञायां प्रकृतसूत्रेण आमुप्रत्ययेऽनुबन्धलोपे, भत्वादलोपे, स्वादिकार्ये 'पचतितमाम्' इति सिद्ध्यति। एवमेव 'अतिशयेन उच्चैः' इति विग्रहे 'उच्चैस्' इत्यव्ययशब्दात् तमपि, आम्वादिकार्ये पूर्ववत् 'उच्चैस्तमाम्' इति सिद्ध्यति। द्रव्यप्रकर्षे तु आमुप्रत्ययो न भवति। यथा - उच्चैस्तमस्तरुः। अत्र तरुशब्दस्य द्रव्यवाचकत्वान् नामुः।

**द्विवचनविभज्योपपदे तरबीयसुनौ ५। ३। ५७॥**

**द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः। पूर्वयोरपवादः। अयमनयोरतिशयेन लघुः, लघुतरो लघीयान्॥**

द्वयोर्मध्य एकस्यातिशयबोधके पदे द्व्यर्थे विभज्योपपदे च (अतिशयविशिष्टेऽर्थे वर्तमानात्) तद्धर्मवाचकात् सुबन्तात् तत्क्रियावाचकात् तिङन्ताच्च तरप्, ईयसुन्, इत्येतौ प्रत्ययौ भवत इत्यर्थः। तमबिष्ठनोरपवादः। तरपो पकार इत्।

'अयम् अनयोरतिशयेन लघुः' इति विग्रहे 'लघु + सु' इत्यस्मात् प्राप्तौ तमबिष्ठनौ बाधित्वा प्रकृतसूत्रेण तरप्प्रत्ययेऽनुबन्धलोपे, विभक्तेर्लुकि, 'लघुत्तर' इति जाते, स्वादिकार्ये 'लघुत्तरः' इति। प्रकृतसूत्रेणैव ईयसुन्प्रत्यये उकारनकारयोरित्संज्ञायां लोपे 'लघु सु ईयस्' इत्यवस्थायां विभक्तेर्लुकि, "टेः" इति टिलोपे 'लघीयस्' इति जाते, तस्मात् सौ 'लघीयान्' इति सिद्ध्यति। एवमेव 'उदीच्याः प्राच्येभ्यः पटवः' इति विग्रहे 'पटु + जस्' इत्यस्मात् तरबीयसुनोः क्रमात् 'पटुतराः', 'पटुयांसः' इति सिद्ध्यतः। तिङन्तात्तु ईयसुन्प्रत्ययो नैव भवति, "अजादी गुणवचनादेव" इति निषेधात्। "अयमनयोरतिशयेन पचति" इति विग्रहे तिङन्तात् पचतेः प्रकृतसूत्रेण तरप् प्रत्यये 'पचतितर' इति जाते, तरपो घसंज्ञायां "किमेत्तिङ०" इत्यादिना सूत्रेण आमुप्रत्यये, भत्वादलोपे, स्वादिकार्ये 'पचतितराम्' इति सिद्ध्यति।

**प्रशस्यस्य श्रः ५। ३। ६०॥**

**इष्ठेयसोः परतः।**

**प्रकृत्यैकाच् ६। ४। ६३॥**

**इष्ठादिष्वेकाच् प्रकृत्या स्यात्। श्रेष्ठः, श्रेयान्॥**

**ज्य च ५। ३। ६१॥**

**प्रशस्यस्य ज्यादेश इष्ठेयसोः। ज्येष्ठः॥**

ज्यायादीयसः ६ । ४ । १६० ॥

'आदेः परस्य' । ज्यायान् ॥

वृद्धस्य च ५ । ३ । ६२ ॥

ज्यादेश अजाद्योः । ज्येष्ठः, ज्यायान् ॥

अन्तिकबाढयोर्नेदसाधौ ५ । ३ । ६३ ॥

अजाद्योरिष्ठेयसोः । नेदिष्ठः, नेदीयान् । साधिष्ठः, साधीयान् ॥

स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः ६ । ४ । १५६ ॥

एषां यणादिपरं लुप्यते पूर्वस्य च गुण इष्ठादिषु । स्थविष्ठः । दविष्ठः । यविष्ठः । ह्रसिष्ठः । क्षेपिष्ठः । क्षोदिष्ठः । एवमीयसुन् । ह्रस्वक्षिप्रक्षुद्राणां पृथ्वादित्वाद्ह्रसिमा । क्षेपिमा । क्षेदिमा ॥

प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रपद्राघिवृन्दाः ६ । ४ । १५७ ॥

प्रियादीनां प्रादयः स्युरिष्ठादिषु । प्रेष्ठः । स्थेष्ठः । स्फेष्ठः । वरिष्ठः । वंहिष्ठः । गरिष्ठः । वर्षिष्ठः । त्रपिष्ठः । द्राघिष्ठः । वृन्दिष्ठः । एवमीयसुन् । प्रियोरुबहुलगुरुदीर्घाणां पृथ्वादित्वाप्रेमेत्यादि ॥

बहोर्लोपो भू च बहोः ६ । ४ । १५८ ॥

बहोः परस्त इष्ठस्य लोपो यिडागमश्च । भूयिष्ठः ॥

इष्ठस्य यिट् च ६ । ४ । १५९ ॥

बहोः परस्य इष्ठस्य लोपो यिडागमश्च । भूयिष्ठः ॥

प्रशंसायां रूपप् ५ । ३ । ६६ ॥

सुबन्तात्तिङन्ताच्च । प्रशस्तः पटुः- पटुरूपः । पचतिरूपम् ॥

ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ५ । ३ । ६७ ॥

ईषदूनो विद्वान्- विद्वत्कल्पः, विद्वद्देशीयः । पचतिकल्पम् ॥

विभाषा सुपो बहुच् पुरस्तात्तु ५ । ३ । ६८ ॥

ईषदूनः पटुर्बहुपटुः, पटुकल्पः । सुपः किम् ? यजतिकल्पम् ।

प्रागिवात्कः ५ । ३ । ७० ॥

इवे प्रतिकृतावित्यतः प्राक्काधिकारः ।

अव्ययसर्वनाम्नामकच् प्राक् टेः ५ । ३ । ७१ ॥

**कापवादः । तिङश्चेत्यनुवर्तते ॥**

**कुत्सिते ५ । ३ । ७४ ॥**

**कुत्सितोऽश्वोऽश्वकः ।**

**अल्पे ५ । ३ । ८५ ॥**

**अल्पं तैलम्- तैलकम् । ह्रस्वो वृक्षो वृक्षकः ॥**

**वा. विनाऽपि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वा वाच्यः । सत्यभामा, भामा, सत्या ॥**

**किंयत्तदोर्निर्धारणे द्वयोरेकस्य डतरच् ५ । ३ । ९२ ॥**

**अनयोः कतरो वैष्णवः । यतरः । ततरः ॥**

**वा बहूनां जातिपरिप्रश्ने डतमच् ५ । ३ । ९३ ॥**

**जातिपरिप्रश्न इति प्रत्याख्यातमाकरे । कतमो भवतां कठः । यतमः । ततमः । वाग्रहणमकजर्थम् ॥**

**एकाच्च प्राचाम् ५ । ३ । ९४ ॥**

**डतरच् डतमच्च स्यात् । अनयोरेकतरो मैत्रः । एषामेकतमः ॥**

**॥ इति प्रागिवीयाः ॥**

## अभ्यासः

### १. प्रदत्तानि सूत्राणि तेषां नेपालीभाषयामर्थं च लिखत

(क) तदस्यास्त्यस्मिन्निति मतुप्

(ख) व्रीह्यादिभ्यश्च

(ग) अत इनिठनौ

(घ) पञ्चम्यास्तसिल्

(ङ) तिङश्च

(च) कृभ्वस्तियोगे संपद्यकर्तरि च्विः

### २. प्रश्नानामुत्तराणि देयानि

(क) कस्मिन्नर्थे मतुप्प्रत्ययो भवति ?

(ख) च्वौ परेऽवर्णस्य ईत्वविधायकं सूत्रं किम् ?

(ग) केन सूत्रेण कस्य घसंज्ञा भवति ?

(घ) अतिशयविशिष्टेऽर्थे वर्तमानात् सुबन्तात् स्वार्थे कौ प्रत्ययो भवतः ?

(ङ) कीदृशेभ्यः किमादिभ्यस्थाल् प्रत्ययो भवति ?

(च) सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे दाप्रत्ययविधायकं सूत्रं लिखत ।

(छ) "सप्तम्यास्त्रल्" इति सूत्रस्यार्थं सोदाहरणं लिखत ।

(ज) तादौ हादौ च विभक्तौ परतः केन सूत्रेण किमः स्थाने कुर्भवति ?

(झ) 'गरुत्मान्' इत्यत्र तकारस्य अनुनासिकादेशः कथं न भवति ?

(ञ) "द्विवचन०" इति सूत्रं पूरयत ।

## ३. अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत

लघिष्ठः, श्रीमान्, कुतः, तथा, इतः, परितः, अभितः, तत्र, बहुत्र, अमुतः, यतः, धनवान्, यथा, सदा, कदा, पचतितमाम्, पटुतरः, कृष्णीकरोति, शीघ्रतमः, मलिनीभवति ।

## ४. प्रकृतिभ्यः प्रत्ययान् विश्लेषयत

तथा, ततः, बुद्धिमान्, एकदा, यत्र, अभितः, व्रीहिकः, दण्डी, आयुष्मान्, रूपवान्, शीघ्रतरः ।

## ५. प्रत्ययान् संयुज्य निष्पन्नरूपाणि लिखत

तद् + थाल्, गुरु + तरप्, विद्वस् + मतुप्, शुक्ल + मतुप्, दण्ड + इष्ठन्, व्रीहि + इनि, किम् + तसिल्, इदम् + तसिल्, परि + तसिल्, किम् + त्रल्, तद् + दा, यद् + थाल्, लघु + इष्ठन्, धावति + तमप्, योग्य + तमप्, द्रुत + तरप्, लघु + ईयसुन्, खादति + तरप्, पुत्र + मतुप्, दण्ड + मतुप् ।

## ६. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां प्रदर्शयत

गोमान्, गरुत्मान्, विदुष्मान्, शुक्लः, दण्डी, व्रीहिकः, इतः, अतः, परितः, कुत्र, सदा, कदा, तथा, आढचतमः, लघिष्ठः, किन्तमाम्, लघुतरः, पटीयांसः, कृष्णीकरोति, गाङ्गीस्यात् ।

## ७. "सप्तम्यास्त्रल्" इति सूत्रस्यार्थं सोदाहरणं लिखत ।

## ८. समुचितपदं चित्वा रिक्तस्थानं पूरयत

(क) तसिलादिप्राग्दिशीयप्रत्ययानां विभक्तिसंज्ञा .................. इति सूत्रेण भवति । (विभक्तिश्च, प्राग्दिशो विभक्तिः)

(ख) मत्वर्थे प्रत्यये परे तान्तसान्तयोर्भसंज्ञा ...... इति सूत्रेण भवति । (यचि भम्, तसौ मत्वर्थे)

(ग) .................. घसंज्ञौ भवतः । (तमबिष्ठनौ, तरप्तमपौ, तरबीयसुनौ)

(घ) ............ प्रत्ययौ गुणवाचकशब्दादेव भवतः । (इष्ठनीयसुनौ, तमबिष्ठनौ, तरबीयसुनौ)

(ङ) तरप्तमपौ प्रत्ययौ .................. भवतः । (सुबन्तात्, तिङन्तात्, सुबन्तात् तिङन्ताच्च)

**९. समीचीनेषु कथनेषु (✓) चिह्नमसमीचीनेषु च (✗) चिह्नं दर्शयत**

(क) प्रकारवाचकात् सुबन्तकिमादेर्थाल् प्रत्ययो भवति ।

(ख) सप्तम्यन्तेभ्यः कालार्थेभ्यः स्वार्थे त्रल्प्रत्ययो भवति ।

(ग) च्विप्रत्ययस्य सर्वापहारिलोपो भवति ।

(घ) देशवाचकात् शब्दात् इष्ठन्प्रत्ययो भवति ।

(ङ) 'रूपम् अस्ति अस्याः' इति विग्रहे रूपवतीति रूपं भवति ।

**१०. किमादिशब्दाः के ? तेषां तसिल्प्रत्ययान्तानि रूपाणि विलिख्य वाक्येषु योजयत ।**

## अनुप्रयोगः

**१. अधो लिखितानि वाक्यानि पठत**

(क) सम्प्रति विश्वस्मिन् यत्र तत्र सर्वत्रैव अशान्तिरनुभूयते ।

(ख) त्वत्तो मम अनुजो वयसा लघीयान् वर्तते ।

(ग) गोमन्तो जना गोरसं पिबन्ति ।

(घ) रूपवती भार्या शत्रुर्भवतीति कथ्यते ।

(ङ) त्वं कदा विद्यालयं गमिष्यसि ?

(च) यदा भगिन्यागमिष्यति तदा अहं गमिष्यामि ।

(छ) तवाऽवस्था कुतः ईदृग् जाता ?

(ज) यथा गुरुः कथयति तथैवाचरणं कुरु ।

(झ) अहं सदैव गुरोराज्ञां पालयामि ।

(ञ) इतः परं स्त्रीप्रत्ययप्रकरणमारभ्यते ।

(ट) शीतोऽप्यङ्गारः स्पृष्टः सन् करं कृष्णीकरोति ।

(ठ) पाश्चात्त्याः प्राच्येभ्यो मोदन्तेतरां सन्ति ।

(ड) कुवेरः सर्वेभ्य आढ्यतमो बभूव ।

(ढ) विद्यालयं परितस्तरवः सन्ति ।

(ण) मामभितः सखायौ तिष्ठन्तौ स्तः ।

(त) संस्कृतभाषा विश्वस्यैव प्राचीनतमा भाषाऽस्ति ।

(थ) रामायणो माहाभारताल्लघुतरो ग्रन्थो वर्तते ।

**२. तरप्प्रत्ययान्तानि पदानि प्रयुज्य आत्मनः सखिभ्यः पृथग्दर्शयत ।**

**३. तमप्प्रत्ययान्तानि पदानि प्रयुज्य स्वराष्ट्रं वर्णयित्वा एकमनुच्छेदं विलिख्य कक्षायां श्रावयत ।**

# अथ स्वार्थिकप्रकरणम्

इवे प्रतिकृतौ ५ । ३ । ९६ ॥

कन्स्यात् । अश्व इव प्रतिकृतिरश्वकः ॥

वा. सर्वप्रातिपदिकेभ्यः स्वार्थे कन् । अश्व एव अश्वकः ॥

शाखादिभ्यो यः ५ । ३ । १०३ ॥

शाखेव शाख्यः । मुख्यः । जघन्यः । अग्र्यः । शरण्यः ॥

कुशाग्राच्छः ५ । ३ । १०५ ॥

कुशाग्रीयः ।

तत्प्रकृतवचने मयट् ५ । ४ । २१ ॥

प्राचुर्येण प्रस्तुतम् = प्रकृतं तस्य वचनम् = प्रतिपादनम् । भावे अधिकरणे च ल्युट् । आद्ये- प्रकृतमन्नम्- अन्नमयम् । अपूपमयम् । द्वितीये- अन्नमयो यज्ञः । अपूपमयं पर्व ॥

संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ५ । ४ । १७ ॥

अभ्यावृत्तिर्जन्म, क्रियाजन्मगणनवृत्तेः संख्यायाः स्वार्थे कृत्वसुच् । पञ्चकृत्वो भुङ्क्ते । संख्यायाः किम् ? भूरिवारान्भुङ्क्ते ॥

द्वित्रिचतुर्भ्यः सुच् ५ । ४ । १८ ॥

कृत्वसुचोऽपवादः । द्विर्भुङ्क्ते । त्रिर्भुङ्क्ते । 'रात्सस्य' । चतुर्भुङ्क्ते ॥

एकस्य सकृच्च ५ । ४ । १९ ॥

सकृदादेशः चात्सुच् । सकृद्भुङ्क्ते ॥

पादार्घाभ्यां च ५ । ४ । २५ ॥

पादार्थमुदकं पाद्यम् । अर्घ्यम् ॥

अतिथेर्ञ्यः ५ । ४ । २६ ॥

अतिथये इदमातिथ्यम् ।

वा. नवस्य नू आदेशस्त्नप्तनप्खाश्च वक्तव्याः । स्वार्थे । नूत्नम्, नूतनम्, नवीनम् ॥

वा. भागरूपनामभ्यो धेयः । भागधेयम् । रूपधेयम् । नामधेयम् ॥

देवात्तल् ५ । ४ । २७ ॥

**देव एव- देवता ।**

**मृदस्तिकन् ५ । ३ । ३९ ॥**

**मृदेव- मृत्तिका ।**

**सस्नौ प्रशंसायाम् ५ । ४ । ४० ॥**

**रूपपोऽपवादः । प्रशस्ता मृन्मृत्सा, मृत्स्ना ॥**

**प्रज्ञादिभ्यश्च ५ । ४ । ३८ ॥**

**अण् स्यात् । प्रज्ञ एव एव प्राज्ञः । दैवतः । बान्धवः ॥**

**बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ५ । ४ । ४२ ॥**

**बहूनि ददाति- बहुशः । अल्पशः ॥**

**संख्यैकवचनाच्च वीप्सायाम् ५ । ४ । ४३ ॥**

**द्वौ द्वौ ददाति- द्विशः । माषं माषं ददाति- माषशः । परिमाणशब्दा वृत्तावेकार्था एव । संख्यैकवचनात् किम् ? घटं घटं ददाति । वीप्सायां किम् ? द्वौ ददाति । कारकादित्येव । द्वयोर्द्वयोः स्वामी ॥**

**कृभ्वस्तियोगे संपद्यकर्तरि च्विः ५ । ४ । ५० ॥**

संपद्यस्य कर्ता सम्पद्यकर्ता, तस्मिन् सम्पद्यकर्तरि, सम्पद्यमाने वर्तमाने वर्तमानादिति भावः । सम्पद्यकर्तरि वर्तमानाद् विकारवाचकशब्दात् कृ, भू, अस्, इत्येतैर्धातुभिर्योगे स्वार्थे च्वि-प्रत्ययो विभाषा भवति । च्विप्रत्ययस्य सर्वापहारिलोपो भवति । च्वेरिकारचकारौ इतौ, वकारस्य च "वेरपृक्तस्य ६ । १ । ६१" इति सूत्रेण लोपो भवति ।

**वा. अभूततद्भाव इति वक्तव्यम् । विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानाद्विकारशब्दात् स्वार्थे च्विर्वा स्यात्करोत्यादिभिर्योगे ॥**

सूत्रेण उक्तश्च्वि-प्रत्ययः अभूततद्भावे गम्यमाने एव भवति अथवा 'अभूततद्भावे गम्यमाने सम्पद्यकर्तरि वर्तमानाद् विकारवाचकशब्दाद् कृ, भू, अस्, इत्येतैर्धातुभिर्योगे स्वार्थे च्वि-प्रत्ययो विभाषा भवति' इति सूत्रवार्तिकयोरर्थः ।

**अस्य च्वौ ७ । ४ । ३२ ॥**

**अवर्णस्य ईत्स्यात् च्वौ । वेर्लोपः । च्व्यन्तत्वादव्ययत्वम् । अकृष्णः कृष्णः संपद्यते तं करोति कृष्णीकरोति । ब्रह्मीभवति । गङ्गीस्यात् ।**

अकृष्णः कृष्णः संपद्यते, तं करोति, अकृष्णः कृष्णो यथा संपद्यते तथा करोति वेति विग्रहे कृधातुयोगयुक्तात् प्रथमान्तात् कृष्णशब्दात् "कृभ्वस्तियोगे संपद्यकर्तरि च्विः" इति सूत्रेण च्विप्रत्यये सर्वापहारिलोपे, तद्धितान्तत्वेन प्रातिपदिकत्वात् सुब्लुकि 'कृष्ण करोति' इति जाते, प्रकृतसूत्रेण

‘कृष्ण’ इत्यस्य अकारस्य ईत्वे ‘कृष्णी करोति’ इति जाते ‘कृष्णी’ इत्यस्य “ऊर्यादिच्विडाचश्च १। ४। ६१” इति गतिसंज्ञायां “कुगतिप्रादयः” इति समासे ‘कृष्णीकरोति’ इति सिद्ध्यति। एवमेव भूधातोर्योगे ‘कृष्णीभवति’ इति। अब्रह्म ब्रह्म यथा संपद्यते तथा भवतीति विग्रहे भूधातुयोगयुक्तात् प्रथमान्ताद् ब्रह्मशब्दात् च्विप्रत्यये सर्वापहारिलोपे, विभक्तेर्लुकि ‘ब्रह्मन् भवति’ इत्यवस्थायां प्रातिपदिकान्तस्य नकारस्य लोपे, प्रकृतसूत्रेण ‘ब्रह्म’ इत्यस्य अकारस्य ईत्वे ‘ब्रह्मी भवति’ इति जाते, च्व्यन्तत्वात् पूर्ववद् गतिसंज्ञायां समासे ‘ब्रह्मीभवति’ इति। तथैव ‘अगङ्गा गङ्गा यथा संपद्यते तथा स्यात्’ इति विग्रहे ‘गङ्गा + सु’ इत्यस्माद् अस् धातोर्योगे च्विप्रच्यये सर्वापहारिलोपे, सुब्लुकि ‘गङ्गा स्यात्’ इति जाते, आकारस्य ईत्वे, पूर्ववत् गतिसंज्ञायां, समासे ‘गङगीस्यात्’ इति सिद्धचति। एवमेव - अशुक्लः शुक्लः सम्पद्यो भवतीति शुक्लीभवति। अमलिनो मलिनः सम्पद्यः स्यादिति मलिनीस्यात्। एवमेवाऽन्यत्राऽपि बोध्यम्।

**अभिविधौ संपदा च ५। ४। ५३॥**

**सम्पदाकृभ्वस्तिभिश्च योगे सातिर्वा व्याप्तौ। पक्षे- कृभ्वस्तियोगे च्विः सम्पदा तु वाक्यमेव। अग्निसात्सम्पद्यते अग्निसाद्भवति शस्त्रम्। अग्नीभवति। जलसात्सम्पद्यते- जलीभवति लवणम्॥**

**अव्यक्तानुकरणाद्व्यजवरार्धादनितौ डाच् ५। ४। ५७॥**

**द्व्यच्- अवरं न्यूनम्, न तु ततो न्यूनम्, अनेकाजिति यावत्। तादृशमर्धं यस्य तस्माड् डाच् कृभ्वस्तिभिर्योगे॥**

**वा. डाचि बहुलं द्वे भवतः। डाचि विवक्षिते द्वित्त्वम्॥**

**वा. नित्यमाम्रेडिते डाचीति वक्तव्यम्। डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोर्वर्णयोः पररूपं स्यात्। इति त-पयोः पः। पटपटाकरोति। अव्यक्तानुकरणात् किम्? ईषत्करोति। द्व्यजवरार्धात् किम्? श्रत्करोति। अवरेति किम्? खरटखरटाकरोति। अनितौ किम्? पटिति करोति॥**

**संख्यायाश्च गुणान्तायाः ५। ४। ५९॥**

**द्विगुणाकरोति क्षेत्रम्।**

**समयाच्च यापनायाम् ५। ४। ६०॥**

**कृषाविति निवृत्तम्। समयाकरोति = कालं यापयतीत्यर्थः॥**

**सुखप्रियादानुलोम्ये ५। ४। ६३॥**

**सुखाकरोति, प्रियाकरोति गुरुम् = अनुकूलाचरणेनानन्दयतीत्यर्थः।**

**दुःखात्प्रातिलोम्ये ५। ४। ६४॥**

**दुःखाकरोति स्वामिनम्, पीडयतीत्यर्थः।**

**शूलात्पाके ५ । ४ । ६५ ॥**

**शूलाकरोति मांसम् = शूलेन पचतीत्यर्थः ।**

**मद्रात्परिवापणे ५ । ४ । ६७ ॥**

**मद्रशब्दो मङ्गलार्थः । परिवापणम् = मुण्डनम् । मद्राकरोति कुमारम् = माङ्गल्यमुण्डनेन संस्करोतीत्यर्थः । परिवापणे किम् ? मद्रं करोति ॥**

## अभ्यासः

### १. प्रदत्तसूत्राणामर्थं लिखत

(क) इवे प्रतिकृतौ

(ख) सर्वप्रातिपदिकेभ्यः स्वार्थे कन्

(ग) तत्प्रकृतवचने मयट्

(घ) नवस्य नू आदेशस्त्नप्तनप्खाश्च वक्तव्याः

(ङ) बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्

(च) कृभ्वस्तियोगे संपद्यकर्तरि च्विः

(छ) अभूततद्भाव इति वक्तव्यम्

(ज) डाचि बहुलं द्वे भवतः

(झ) समयाच्च यापनायाम्

### २. प्रश्नानामुत्तराणि देयानि

(क) कस्मिन्नर्थे सर्वप्रातिपदिकेभ्यः कन् भवति ?

(ख) 'समयाकरोति' इत्यस्य कोऽर्थः ?

(ग) सङ्ख्यागुणान्तेभ्यः प्रातिपदिकेभ्यः केन सूत्रेण कः प्रत्ययो भवति ?

(घ) च्वौ प्रत्यये परे अवर्णस्य ईत्वविधायकं सूत्रं किम् ?

(ङ) कस्य प्रत्ययस्य विवक्षायां प्रातिपदिकस्य द्वित्वं भवति ?

(च) 'मृत्तिका' इत्यस्य व्युत्पत्तिं प्रदर्शयत ।

(छ) "इवे प्रतिकृतौ" इति सूत्रं किं करोति ?

(ज) सुच्प्रत्यय-सकृदादेशौ कस्य केन सूत्रेण भवति ?

(झ) 'बहुशः' इत्यत्र प्रकृतिप्रत्ययौ कौ ?

(ञ) 'मद्रं करोति' इत्यत्र कथं डाच्प्रत्ययो न भवति ?

३. **अधस्तनपदानि प्रयुज्य वाक्यानि रचयत**

मद्राकरोति, दुःखाकरोति, पटपटाकरोति, अग्नीभवति, कृष्णीकरोति, द्विशः, गङ्गीस्यात्, बान्धवः, मृत्स्ना, नामधेयम्, देवता, जघन्यः, त्रिर्भुङ्क्ते, अल्पशः, अश्वकः ।

४. **प्रकृतिभ्यः प्रत्ययान् विश्लेषयत**

बहुशः, भागधेयम्, द्विर्भुङ्क्ते, मुख्यः, अश्वकः, नूतनम्, प्राज्ञः, द्विशः, शरण्यः ।

५. **प्रत्ययान् संयोज्य निष्पन्नरूपाणि लिखत**

ब्रह्मन् + च्वि + भवति, माष + शस्, देवता + अण्, मृत् + स, मृत् + तिकन्, रूप + धेय ।

६. **अधस्तनप्रयोगाणां सिद्धिप्रक्रियां प्रदर्शयत**

कृष्णीकरोति, शूलाकरोति, दुःखाकरोति, बहुशः, दैवतः, पाद्यम्, मृत्तिका, मृत्स्ना, अश्वकः, माषशः, देवता, भागधेयम्, नवीनम् ।

७. **"कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः" इति सूत्रस्यार्थं सोदाहरणं लिखत ।**

# अथ द्विरुक्तप्रकरणम्

सर्वस्य द्वे ८।१।१॥
इत्यधिकृत्य।
परेर्वर्जने ८।१।५॥
परेर्वर्जनेऽर्थे द्वे स्तः। परि परि वङ्गेभ्यो वृष्टो देवः।
उपर्यध्यधसः सामीप्ये ८।१।७॥
उपर्युपरि ग्रामम्, ग्रामस्योपरिष्टात् समीपदेशे इत्यर्थः। अध्यधि सुखम्, सुखस्योपरिष्टात्समीपकाले दुःखमित्यर्थः। अधोऽधो लोकम्, लोकस्याधस्तात् समीपदेशे इत्यर्थः॥
वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु ८।१।८॥
सुन्दर! सुन्दर!! वृथा ते सौन्दर्यम्। देव! देव!! वन्द्योऽसि। दुर्विनीत! दुर्विनीत!! इदानीं ज्ञास्यसि। धानुष्क! धानुष्क!! वृथा ते धनुः। चोर! चोर!! घातयिष्यामि त्वाम्॥
एकं बहुव्रीहिवत् ८।१।९॥
द्विरुक्त एकशब्दो बहुव्रीहिवत्। तेन सुब्लोपपुंवद्भावौ। एकैकमक्षरम्। इह द्वयोरपि सुपोर्लुकि सति बहुव्रीहिवद्भावादेव प्रातिपदिकत्वात्समुदायात्सुप् एकैकयाऽऽहुत्या॥
आबाधे च ८।१।१०॥
पीडायां द्वे स्तो बहुव्रीहिवच्च। गतगतः। गतगता॥
प्रकारे गुणवचनस्य ८।१।१२॥
सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तस्तच्च कर्मधारयवत्। पटुपट्वी। पटुपटुः = पटुसदृशः, ईषत्पटुरिति यावत्॥
वा. आनुपूर्व्ये द्वे वाच्ये। मूले मूले स्थूलः॥
वा. संभ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः। सर्प २ बुध्यस्व २। सर्प ३ बुध्यस्व ३॥
वा. कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये, समासवच्च बहुलम्। बहुलग्रहणादन्यपरयोर्न समासवत्। इतरशब्दस्य तु नित्यम्॥
वा. असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः। अन्योन्यं विप्रा नमन्ति। अन्योन्यौ। अन्योन्येन कृतम्। अन्योन्यस्मै दत्तमित्यादि॥
वा. स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वाच्यः। अन्योन्याम्, अन्योन्यम्। परस्पराम्, परस्परम्। इतरेतराम्, इतरेतरम् वा इमे ब्राह्मण्ये कुले वा भोजयतः॥
दलद्वये टाबभावः क्लीबे चाद्ड्विरहः स्वमोः।
समासे सोरलुक् चेति सिद्धं बाहुलकात्त्रयम्॥
अन्योन्यमित्यादौ दलद्वये टाप्। अद्ड्तरेत्यद्ड् च प्राप्तः। 'अन्योन्यसंसक्तमहस्त्रियाम्'। अन्योन्याश्रयः। परस्पराक्षिसादृश्यम्। अदृष्टपरस्परैरित्यादौ सोर्लुक् च प्राप्तः। सर्वं बाहुलकात्समाधेयम्॥

॥ इति द्विरुक्तप्रक्रिया॥

## अभ्यासः

### १. प्रदत्तसूत्रवार्तिकानामर्थं लिखत

(क) परेर्वर्जने (ख) प्रकारे गुणवचनस्य (ग) आनुपूर्व्ये द्वे वाच्ये

(घ) आबाधे च (ङ) एकं बहुव्रीहिवत् (च) उपर्यध्यधसः सामीप्ये

### २. सूत्रवार्तिकानि पूरयत

(क) स्त्रीनपुंसकयोः... (ख) असमासवद्भावे... (ग) संभ्रमेण...

(घ) वाक्यादेः... (ङ) कर्मव्यतिहारे...

### ३. प्रश्नानामुत्तराणि देयानि

(क) वर्जनेऽर्थे कस्य द्वित्वं भवति ?

(ख) 'उपर्युपरि ग्रमम्' इत्यस्य कोऽर्थः ?

(ग) सादृश्येऽर्थे द्योत्ये कस्य द्वित्वं विधीयते ?

(घ) 'गतगतः' इत्यत्र केन सूत्रेण बहुव्रीहिवत्वम् ?

(ङ) 'अन्योन्यौ' इत्यस्य वाक्ये प्रयोगं दर्शयत ।

(च) 'परस्परम्' इत्यस्य व्युत्पत्तिं प्रदर्शयत ।

(छ) "एकं बहुव्रीहिवत्" इति सूत्रस्य किं कार्यम् ?

(ज) कर्मव्यतिहारेऽर्थे कस्य सर्वनामशब्दस्य नित्यं द्वित्वम् ?

(झ) 'आनुपूर्व्यम्' इत्यनेन किं ज्ञायते ?

(ञ) 'पटुपटुः' इति पदस्य कोऽर्थः ?

### ४. अधस्तनप्रयोगाणां सिद्धिप्रक्रियां प्रदर्शयत

अन्योन्यम्, परस्पराम्, मूले मूले स्थूलः, पटुपट्वी, गतगता, एकैकम्, देव देव वद्योऽसि, अध्यधि सुखम्, परि परि वङ्गेभ्यो विष्टो देवः ।

### ५. "वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु" इति सूत्रस्यार्थं सोदाहरणं लिखत ।

### ६. अधस्तनकारिकायाः सरलार्थं लिखत

दलद्वये टाबभावः क्लीबे चाद्ड्विरहः स्वमोः ।

समासे सोरलुक् चेति सिद्धं बाहुलकात्त्रयम् ॥

# न्यायखण्डः

# जलतेजोवायुनिरूपणम्

## (क) जलनिरूपणम्

पृथ्वीं निरुप्येदानीं जलनिरुपणमारभते विश्वनाथपञ्चानना भट्टाचार्यः वर्णशुक्ल इत्यादिना-

**कारिका-** वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ ॥ स्नेहस्तत्र द्रवत्वन्तु सांसिद्धिकमुदाहृतम् ॥३९॥

**मुक्तावली -** जलं निरूपयति- वर्णः शुक्ल इति। स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिः सिद्ध्यति। यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकम्, तथापि जन्यस्नेहत्वं तथा बोध्यम्। अथ परमाणौ जलत्वं न स्यात्तत्र जन्यस्नेहाभावात्, तस्य च नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावनियमादिति चेत्? न, जन्यस्नेहजनकतावच्छेदकतया जलत्वजातिसिद्धेः। शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं वर्णः शुक्ल इति, न तु शुक्लरूपवत्त्वं लक्षणम्। अथवा नैमित्तिकद्रवत्ववदवृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद् व्याप्यजातिमत्त्वम्, अभास्वरशुक्लेतररूपासमानाधिकरणरूपसमानाधिकरणद्रव्यत्वसाक्षाद् व्याप्यजातिमत्त्वं वा तदर्थः तेन स्फटिकादौ नातिव्याप्तिः। रसस्पर्शाविति। जलस्य मधुर एव रसः, शीत एव स्पर्शः। तिक्तरसवदवृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद् व्याप्यजातिमत्त्वं तदर्थः। तेन शर्करादौ नातिव्याप्तिः। शीतेतरस्पर्शवदवृत्तिस्पर्शवद् वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तदर्थः। ननु शुक्लरूपमेवेति कुतः कालिन्दीजलादौ नीलिमोपलब्धेरिति चेन्न, नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावाज्जले नीलरूपासंभवात्। कालिन्दीजले नीलत्वप्रतीतिस्त्वाश्रयौपाधिकी। अत एव वियति विक्षेपे धवलिमोपलब्धिः। अथ जले माधुर्ये किं मानम्? नहि प्रत्यक्षेण कोऽपि रसस्तत्रानुभूयते। न च नारिकेलजलादौ माधुर्यमुपलभ्यत एवेति वाच्यम्, तस्याश्रयौपाधिकत्वात्। अन्यथा जम्बीररसादावम्ब्लाद्युपलब्धेरम्ब्लादिमत्त्वमपि स्यादिति चेत्? न हरीतक्यादिभक्षणस्य जलरसव्यञ्जकत्वात्। न च हरीतक्यामेव जलोष्मसंयोगाद्रसान्तरोत्पत्तिरिरिति वाच्यम्, कल्पनागौरवात्। पृथिवीत्वस्याम्ब्लादिजनकतावच्छेदकत्वाच्च जले नाम्ब्लादिकम्। जम्बीररसादौ त्वाश्रयौपाधिकीम् तथा प्रतीतिः। एवं जन्यशीतस्पर्शजनकतावच्छेदकं जन्यजलत्वम्, तदवच्छिन्नजनकतावच्छेदकं तु जलत्वं बोध्यम्। घृष्टचन्दनादौ

**तु शैत्योपलब्धिश्चन्दनान्तर्वर्तिशीततरसलिलस्यैव। तेजःसंयोगाज्जले उष्णप्रतीतिराश्रयौपाधिकी स्फुटैव, तत्र पाकासंभवात्। स्नेहस्तत्रेति। घृतादावपि तदन्तर्वर्तिजलस्यैव स्नेहः, जलस्य स्नेहसमवायिकारणत्वात्। तेन जल एव स्नेह इति मन्तव्यम्। द्रवत्वमिति। सांसिद्धिकद्रवत्वत्वं जातिविशेषः प्रत्यक्षसिद्धः तदवच्छिन्नजनकतावच्छेदकमपि तदेवेति भावः। तैलादावपि जलस्य द्रवत्वम्, स्नेहप्रकर्षेण च दहनानुकूल्यमिति वक्ष्यति ॥३९॥**

**व्याख्या-** जलं निरूपयति विश्वनाथपञ्चाननो वर्णशुक्ल इत्यादिना। जले अभास्वरशुक्लरूपं समवायेन सम्बन्धेन वर्तते। रसश्च जले मधुरो वर्तते। स्पर्शस्तु शीतलस्पर्शो वर्तते। जले स्नेहगुणः सांसिद्धिकं द्रवत्वञ्च वर्तते। तत्र जलन्नाम जलत्वजातिमद्। जलत्वजातिस्तु स्नेहसमवाययिकारणतावच्छेदकतया सिद्धयति- तद्यथा- समवायसम्बन्धावच्छिन्नस्नेहत्वावच्छिन्न-स्नेहनिष्ठकार्यतानिरूपिततादात्म्य-सम्बन्धावच्छिन्नजलनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वाद्। या या कारणता सा किञ्चिद्धर्मावच्छिन्ना, यथा घटनिष्ठकार्यतानिरूपितकपालनिष्ठा कारणता कपालत्वधर्मावच्छिन्ना। यद्धर्मावच्छिन्ना जलनिष्ठा कारणता स धर्मो जलत्वम्, जातिबाधकाभावात् स धर्मो जातिः। ननु अस्मिन्ननुमाने स्नेहत्वावच्छिन्ना कार्यता पक्षतावच्छेदकतया प्रविष्टा सा च न सम्भवति। यतो हि स्नेहत्वं नित्यस्नेहे = परमाणुजलवृत्तिस्नेहे, अनित्यस्नेहे = कार्यजलवृत्तिस्नेहे च वर्तते, कार्यत्वञ्च अनित्यस्नेह एव वर्तते। अतः स्नेहत्वं न कार्यत्वान्यूनानतिरिक्तवृत्तीति न स्नेहत्वं स्नेहवृत्तिकार्यतावच्छेदकम्, एवञ्च स्नेहत्वावच्छिन्नकार्यताया असम्भवात् तन्निरूपितकारणतारूपपक्षोऽप्यप्रसिद्ध इत्याश्रयासिद्धोऽयं हेतुरिति चेत्, सत्यं तथा सत्यपि जन्यस्नेहनिष्ठकार्यतानिरूपितकारणावच्छेदकतया जलत्वं जातिः साधनीया। ननु तथा सति जन्यस्नेहनिष्ठकार्यतानिरूपितकारणावच्छेदकतया सिद्धा जलत्वजातिः, परमाणुजले न सिद्धेदिति चेत्तदपि सत्यम्, यतो हि जन्यस्नेहनिष्ठकार्यतानिरूपिता कारणता जन्यजल एव न तु नित्यजलेऽतो जन्यजलनिष्ठकारणतावच्छेदकं जन्यजलत्वमेव न तु जलत्वम्।

ननु जन्यस्नेहं प्रति नित्यानित्यसाधारणं जलं कारणं स्यादिति चेन्न, यतो हि सकलकारणसमवधानेऽपि नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभाव इति नियमाज्जन्यस्नेहं प्रति नित्यजलस्य स्वरूपयोग्यत्वरूपकारणत्वे कदाचिद् नित्यजलेऽप्यनित्यस्नेहोत्पत्तिः स्यादतो जन्यस्नेहसमवायिकारणतावच्छेदकतया जन्यजलत्वं संसाध्य पुनः जन्यजलसमवायिकारणतावच्छेदकतया नित्यानित्यजलवृत्तिशुद्धं जलत्वं जातिः साधनीया। तथा चानुमानाकारः - समवायसम्बन्धावच्छिन्नजन्यस्नेहत्वावच्छिन्नजन्यस्नेहनिष्ठकार्यता-निरूपिततादात्म्यसम्बन्धावच्छिन्न-जन्यजलनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वाद्, या या कारणता सा किञ्चिद् धर्मावच्छिन्ना यथा घटनिष्ठकार्यतानिरूपितकपालनिष्ठा कारणता कपालत्वधर्मावच्छिन्ना यद्धर्मावच्छिन्ना जन्यजलनिष्ठा कारणता स धर्मो जन्यजलत्वमित्यनुमानेन जन्यजलत्वं जातिं संसाध्य पुनः समवायसम्बन्धावच्छिन्नजन्यजलत्वावच्छिन्नजन्यजलनिष्ठ-कार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्न-जलनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वाद्, या या कारणता सा किञ्चिद् धर्मावच्छिन्ना यथा घटनिष्ठकार्यतानिरूपितकपालनिष्ठा कारणता कपालत्वधर्मावच्छिन्ना यद्धर्मावच्छिन्ना जलनिष्ठा कारणता स धर्मो जलत्वम्, जातिबाधकाभावात्

स धर्मो जातिरिति रीत्या जलत्वं जातिः साधनीया। इदानीं जलत्वं जातिं संसाध्य जलस्य गुणादिकं निरूपयति मुक्तावलीकारः - शुक्लरूपमेव जलस्येति। अर्थाज्जले अभास्वरशुक्लरूपमेव तिष्ठति। एतावता अभास्वरशुक्लरूपवत्त्वं जलस्य लक्षणमिति तु जलस्य लक्षणं न, यदि लक्षणमेव वक्तव्यं तदा तु नैमित्तिकद्रवत्ववदवृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमिति जातिघटितं लक्षणं कार्यम्। तत्र नैमित्तिकद्रवत्ववती पृथ्वीतेजसी तत्रावृत्तिरथ च रूपवद्वृत्तिः द्रव्यत्वसाक्षाद्व्याप्यजातिः जलत्वं जातिः तद्वत्त्वस्य जले सर्वत्र सत्त्वाल्लक्षणसमन्वयः। अथवा अभास्वरशुक्लेतररूपासमानाधिकरण-रूपवद् वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः। अर्थाद् अभास्वरशुक्लेतररूपं भास्वरशुक्लनीलादिरूपम्, तेषां भास्वरशुक्लनीलादिरूपाणामसमानाधिकरणा अथ च रूपसमानाधिकरणा द्रव्यत्वसाक्षाद्व्याप्यजातिः जलत्वं जातिः तद्वत्त्वस्य जले सत्त्वाज्जले लक्षणसमन्वयः। स्फटिकादौ पृथिव्यां शुक्लरूपसत्त्वेऽपि तादृशजातेर्जलत्वस्य तत्रासत्त्वात्तत्र लक्षणासमन्वयान्नातिव्याप्तिः।

जले मधुर एव रसो वर्तते, अस्याशयश्च तिक्तरसवदवृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्य-जातिमत्त्वं जलस्य लक्षणमिति। तत्र तिक्तरसवती पृथ्वी, तत्रावृत्तिः मधुरवद्वृत्तिः द्रव्यत्वसाक्षाद्व्याप्यजातिः जलत्वं जातिः तद्वत्त्वस्य जले सत्त्वाल्लक्षणसमन्वयः। शर्करादौ पृथिव्यां मधुरवत्त्वस्य सत्त्वेऽपि तिक्तरसवत्यां पृथिव्यामवर्तमाना अथ च मधुरवति जले वर्तमाना द्रव्यत्वसाक्षाद्व्याप्यजातेर्जलत्वस्य तत्रासत्त्वाल्लक्षणसमन्वयाभावेन नातिव्याप्तिः। एवमेव जले शीतस्पर्शो वर्तते। अत्रापि शीतेतरस्पर्शवदवृत्तिस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं जलस्य लक्षणमिति बोध्यम्। ननु जले अभास्वरशुक्लरूपमेव वर्तत इत्युक्तम्, तत्कथं कालिन्दीजले नीलिमोपलब्धिरिति चेन्न, यतो हि नीलरूपजनकतावच्छेदकं हि पृथिवीत्वं तच्च जले नास्तीति नास्ति जले नीलरूपं, कालिन्दीजले तत्प्रतीतिस्तु कालिन्दीरूपाश्रयगतनीलिम्नौपाधिकतया जले नीलवत्त्वमिति। वस्तुतः कालिन्दीजले नीलरूपं सर्वदैव नास्ति, अत एव तदेव जलं यदा वियति विक्षिप्यते तदा धवलमेव तज्जलं दृश्यते, तस्माज्जलमभास्वरशुक्लमेव। अस्तु जलमभास्वरशुक्लं किन्तु जलं मधुरमित्यत्र किं मानम्? यदि नारिकेलजलगतमाधुर्यं प्रत्यक्षसिद्धं तदेव जलस्य माधुर्ये प्रमाणमित्युच्यते तदा जम्बीररसगताम्ब्लादिनाम्ब्लादिमज्जलमित्यप्युच्यताम्, अतो यथा जम्बीररसादेरम्ब्लत्वमौपाधिकं तथैव नारिकेलजलगतमाधुर्यमपि- औपाधिकमेवातो जलस्य माधुर्ये किं मानमिति चेद् हरीतकीभक्षणस्य जलरसव्यञ्जकत्वात्, अर्थाद् हरीतकीभक्षणानन्तरं यदा जलं पीयते तदा जलगतमाधुर्यं सर्वैरनुभूयते तदेव जलगतमाधुर्ये प्रमाणम्। तत्र हरीतकीभक्षणे हरीतकीगतकषायेण यदा जलात्मकरसनाया माधुर्यं नश्यति तदा पुनः जलपाने कृते तत्र जलगतः स्वकीयो रसोऽनुभूयते। न च तत्र हरीतक्यामेव जलोष्मसंयोगाद्रसान्तरोत्पत्तिर्जायत इति कल्पनीयमिति चेन्न, एतादृशकल्पनाया जलीयमाधुर्यकल्पनापेक्षया गौरवान्नेयं कल्पानोचिता। एवञ्च अम्ब्लादिजनकतावच्छेदकं हि पृथिवीत्वं तच्च जले नास्तीति जले नास्त्यम्ब्लादिकम्। जम्बीररसादौ त्वाश्रयौपाधिकी अम्ब्लादिप्रतीतिः।

शीतस्पर्शो जले तिष्ठतीति पूर्वमुक्तमतोऽत्रापि जन्यशीतस्पर्शजनकतावच्छेदकतया जन्यजलत्वं जातिं प्रसाध्य पुनः जन्यजलजनकतावच्छेदकतया नित्यजन्यसाधारणजलवृत्तिजलत्वं जातिः साधनीया। एवञ्च शीतस्पर्शो जल एव बोध्यः घृष्टचन्दनादौ तु शैत्योपलब्धिस्तद्गतजलीयशैत्योपलब्धिरेव न तु चन्दनस्य

तस्य स्पर्शस्यानुष्णाशीतत्वात्। जले उष्णप्रतीतिस्तु तेजःसंयोगजन्यौपाधिकी न तु स्वाभाविकी जले पाकासंभवान्न जलीयस्पर्शस्य परिवर्तनमिति वह्निसंयोगेऽपि जलं वस्तुतः शीतमेव परं वह्निगतोष्मणा जलीयशीतस्पर्शस्याभिभवान्न तदा जले शीतप्रतीतिः। स्नेहो गुणो जल एव वर्तते। घृतादावपि तदन्तवर्तिजलस्यैव स्नेहः। एवमेव जले सांसिद्धिकद्रवत्वं बोध्यं स्नेहप्रकर्षाच्च तैलं दहनानुकूलम्। अत्रापि जन्यसांसिद्धिकद्रवत्वत्वावच्छिन्नजनकतावच्छेदकतया जन्यजलत्वम्, तदवच्छिन्नजनकतावच्छेदकतया च जलत्वं जातिं साधयितुं शक्यते।

**तच्च जलं कतिविधं किञ्च तदित्याकाङ्क्षायामाह विश्वनाथः-**

**कारिका-** **नित्यतादि प्रथमवत् किन्तु देहमयोनिजम्।**

**इन्द्रियं रसनं सिन्धुहिमादिर्विषयो मतः॥४०॥**

**मुक्तावली -** **प्रथमवदिति। पृथिव्या इवेत्यर्थः,। तथा हि जलं द्विविधं- नित्यमनित्यञ्च, परमाणुरूपं नित्यम्, द्व्यणुकादिकं सर्वमनित्यमवयवसमवेतञ्च। अनित्यमपि त्रिविधम्, शरीरेन्द्रियविषयभेदात्। पृथिवीतो यो विशेषस्तमाह- किन्त्विति। देहमयोनिजम्, अयोनिजमेवेत्यर्थः। जलीयं शरीरं वरुणलोके प्रसिद्धम्। इन्द्रियमिति। जलीयमित्यर्थः। तथाहि, रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकोदकवत्। रसनेन्द्रियसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम्। विषयं दर्शयति- सिन्धुहिमादिरिति। सिन्धुः = समुद्रः। हिमं = तुषारः। आदिपदात् सरित्कासारकरकादिः सर्वोऽपि ग्राह्यः। न च हिमकरकयोः कठिनत्वात् पार्थिवत्वमिति वाच्यम्, उष्मणा विलीनस्य तस्य जलत्वस्य प्रत्यक्षसिद्धत्वात्। यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः, अदृष्टविशेषेण द्रवत्वप्रतिरोधात् करकादीनां काठिन्यप्रत्ययस्य भ्रान्तित्वात्॥४०॥**

**व्याख्या-** जलीयभेदं दर्शयति- नित्यतादिप्रथमवदित्यादिना, पृथिव्या इवेत्यर्थः। तथा च जलं द्विविधं, नित्यमनित्यञ्च नित्यं परमाणुरूपम्, अनित्यं कार्यरूपम्। अनित्यमपि जलं त्रिविधं शरीरेन्द्रियविषयभेदात्। तत्र शरीरमयोनिजमेव तच्चायोनिजं जलीयं शरीरं वरुणलोके प्रसिद्धम्। जलीयमिन्द्रियं रसनेन्द्रियम्, तत्र चानुमानं प्रमाणं यथा– रसनेन्द्रियं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात्, यो यो गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकः स जलीयः, यथा सक्तुरसाभिव्यञ्जकोदकम्। तत्रोदकं रूपाद्यभिव्यञ्जनमकुर्वत् सक्तुरसाभिव्यञ्जनं यथा करोति, तथैव रसनेन्द्रियमपि रूपाद्यभिव्यञ्जनमकुर्वत् रसाभिव्यञ्जनं करोतीति रसनेन्द्रियं जलीयमिति सिद्धम्।

अत्र हेतौ मनसि व्यभिचारवारणाय गन्धाद्यव्यञ्जकत्वं विशेषणं देयम्। रसनेन्द्रियरससन्निकर्षे व्यभिचारवारणाय द्रव्यत्वे सतीति विशेषणमपि देयम्। जलीयं विषयं दर्शयति सिन्धुहिमादिरित्यादिना, तत्र सिन्धुः=समुद्रः, हिमं=तुषारः, आदिपदेन च सरित्=नदी, कासारः=सरः, करकाः=जलवृष्टिपाषाणः, करकादिरित्यत्रादिपदेन, अभ्रपटलस्वेदादयः सर्वेऽपि जलत्वेनानुभूयमानाः पदार्था ग्राह्याः। न च

हिमकरकयोः कठिनत्वात् कथं तस्य जलत्वम्, कठिनस्पर्शवतः पार्थिवत्वनियमाद् यथा घटादय इति चेन्न, विलीनयोस्तयोर्हिमकरकयोः जलत्वसिद्धेरविलीनयोरपि तयोर्जलीयत्वनियमः, यतो हि यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्त्या हिमकरकाविलीनजन्यद्रव्यस्य जलत्वसिद्धौ तयोर्हिमकरकयोरपि जलत्वमेव सिद्ध्यति। ननु तर्हि कथं हिमकरकयोर्जलयोः कठिनत्वमिति चेदाह अदृष्ट विशेषेणेत्यादि। अर्थाद् भोक्त्रदृष्टेन हिमकरकयोर्द्रवत्वप्रतिरोधान्नैमित्तिकं काठिन्यं तत्र प्रतीयते, न तु स्वाभाविकं काठिन्यं तत्र।

## (ख) तेजोनिरूपणम्

**कारिका-** **उष्णः स्पर्शस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्।**
**नैमित्तिकं द्रवत्वन्तु नित्यतादि च पूर्ववत् ॥४१॥**

**मुक्तावली-** **तेजो निरूपयति- उष्ण इति। उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः। इत्थञ्च जन्योष्णस्पर्शसमवायिकारणातावच्छेदकं तेजस्त्वं जातिविशेषः, तस्य परमाणुवृत्तित्वन्तु जलत्वस्येवानुसन्धेयम्। न चोष्णस्पर्शवत्त्वं चन्द्रकिरणादावव्याप्तमिति वाच्यम्, तत्राप्युष्णस्पर्शस्य सत्त्वात्। किन्तु तदन्तःपातिजलस्पर्शेनाभिभवादग्रहः। एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वादग्रहः। रूपमित्यादि। वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाभिभवाच्छुक्लरूपाग्रहः। अथ तद्रूपाग्रहे धर्मिणोऽपि चाक्षुषत्वं न स्यादिति चेत्? न, अन्यदीयरूपेणापि धर्मिणो ग्रहसंभवात्, शङ्खस्येव पित्तपीतिम्ना। वह्नेस्तु शुक्लरूपं नाभिभूतम्, किन्तु तदीयं शुक्लत्वमभिभूतमित्यन्ये। नैमित्तिकमिति। सुवर्णादिरूपे तेजसि तत्सत्त्वात्। न च नैमित्तिकद्रवत्वं लक्षणं दहनादावव्याप्तं घृतादावतिव्याप्तञ्चेति वाच्यम्, पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद् वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य विवक्षितत्वात्। पूर्ववदिति। जलस्यैवेत्यर्थः। तथाहि, तद् द्विविधं नित्यमनित्यञ्च। नित्यं परमाणुरूपम्। तदन्यदनित्यम्, अवयवि च। तच्च त्रिधा शरीरेन्द्रियविषयभेदात्। शरीरमयोनिजमेव। तच्च सूर्यलोकादौ प्रसिद्धम् ॥४१॥**

**व्याख्या-** तेजसि उष्णस्पर्शो वर्तत इति उष्णस्पर्शवत्त्वं तेजसो लक्षणमिति। भास्वरशुक्लरूपञ्च तेजसि वर्तत इति तदपि तेजसो लक्षणं वर्तते। एवमेव तेजसि अग्निसंयोगजन्यं नैमित्तिकं द्रव्यत्वं वर्तते। तत्तु न लक्षणम्। तेजसो नित्यानित्यत्वे जलस्येव बोध्यम्। तेजस्त्वं जातिस्तु, जन्योष्णस्पर्शसमवायिकारणतावच्छेदकतया जन्यतेजस्त्वं जातिं संसाध्य पुनः जन्यतेजस्त्वावच्छिन्नसमवायिकारणतावच्छेदकतया नित्यानित्यसाधारण-तेजोवृत्ति तेजस्त्वं जातिः सिद्ध्यति अनुमानप्रकारस्तु जलत्वस्येव बोध्यम्।

**तदित्थम्-** समवायसम्बन्धावच्छिन्नजन्योष्णस्पर्शत्वावच्छिन्नजन्योष्णस्पर्शनिष्ठकार्यता-निरूपिततादात्म्यसम्बन्धावच्छिन्न- जन्यतेजोनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वाद्, या या कारणता सा किञ्चिद् धर्मावच्छिन्ना, यथा घटनिष्ठकार्यतानिरूपितकपालनिष्ठा कारणता कपालत्वधर्मावच्छिन्ना यद्धर्मावच्छिन्ना जन्यतेजोनिष्ठा कारणता स धर्मो जन्यतेजस्त्वमित्यनुमानेन

जन्यतेजस्त्वं जातिं संसाध्य पुनः समवायसम्बन्धावच्छिन्नजन्यतेजस्त्वावच्छिन्नजन्यतेजोनिष्ठकार्यता-निरूपिततादात्म्यसम्बन्धावच्छिन्न-तेजोनिष्ठकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वाद्, या या कारणता सा किञ्चिद् धर्मावच्छिन्ना यथा घटनिष्ठकार्यतानिरूपितकपालनिष्ठा कारणता कपालत्वधर्मावच्छिन्ना यद्धर्मावच्छिन्ना तेजोनिष्ठा कारणता स धर्मः तेजस्त्वम्, जातिबाधकाभावात् स धर्मो जातिरिति रीत्या तेजस्त्वं जातिः सिद्ध्यति। ननु यदि उष्णस्पर्शवत्त्वं तेजसो लक्षणमिति तेजोलक्षणं क्रियते तदा चन्द्रकिरणादौ तेजसि तदभावादव्याप्तिरिति चेन्न, यतो हि चन्द्रकिरणादावपि उष्णस्पर्शो वर्तत एव किन्तु तदन्तःपातिजलस्पर्शेनाभिभवान्न चन्द्रकिरणादावुष्णस्पर्शः प्रतीयते। एवमेव रत्नकिरणादावपि पार्थिवस्पर्शेनाभिभवान्नोष्णस्पर्शानुभवः। चक्षुरादौ तेजसि त्वनुद्भूतत्वान्नोष्णस्पर्शप्रतीतिः। तेजसि भास्वरशुक्लं रूपं वर्तते परं वह्नौ, मरकतकिरणादौ च पार्थिवरूपेणाभिभवान्न शुक्लरूपप्रतीतिः, अत एव लोहितो वह्निरिति लोकानुभवः, तल्लौहित्यमौपाधिकम्। ननु तर्हि यदि वह्नौ स्वकीयं रूपं न दृश्यते तदा वह्नेरपि प्रत्यक्षं न स्याद्रूपवतो द्रव्यस्यैव प्रत्यक्षविषयत्वादिति चेन्न, अन्यदीयरूपेणापि धर्मिणः प्रत्यक्षसम्भवात्। यथा पित्तपीतिम्ना दोषेण ग्रस्तो मनुष्यः चक्षुःगतपीतरूपाश्रयतया पाण्डुरमपि शङ्खं पीत शङ्ख इति प्रत्यक्षयति तथैवाभास्वरशुक्लमपि वह्निं स्वकीयरूपाभिभवाद् लोहितो वह्निरिति प्रत्यक्षयन्ति जनाः। अन्ये तु वह्नेः शुक्लं रूपं नाभिभूतं किन्तु तदीयं शुक्लत्वमभिभूतमिति वदन्ति। सुवर्णादिरूपे तेजसि नैमित्तिकं द्रवत्वं तिष्ठति। कुत्रचिदेव तेजसि वर्तमानं नैमित्तिकद्रवत्ववत्त्वन्तु न तेजसो लक्षणम्, लक्षणन्तु पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमिति, तेन दहनादौ तादृशजातेः सत्त्वान्नाव्याप्तिः, घृतादौ पृथिव्याञ्च तादृशजातेरसत्त्वान्नातिव्याप्तिः। तेजसो नित्यानित्यत्वे जलस्येव बोध्यमर्थात् तेजः द्विविधं नित्यमनित्यञ्च, तत्र नित्यं तेजः परमाणुरूपम्, अनित्यन्तु तेजः कार्यरूपम्, अवयवसमवेतञ्च। अनित्यमपि तेजः त्रिविधं शरीरेन्द्रियविषयभेदात्। तत्र अनित्यं तेजःशरीरं सूर्यलोके प्रसिद्धं सूर्यदेवादीनाम्। तैजसमिन्द्रियं विषयञ्च दर्शयति-

**कारिका-** **इन्द्रियं नयनं वह्निस्वर्णादिर्विषयो मतः॥**

**मुक्तावली-** **अत्र यो विशेषस्तमाह- इन्द्रियमिति। ननु चक्षुषस्तैजसत्वे किं मानमिति चेत्? चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत्, प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादत्र दृष्टान्तेऽव्याप्तिवारणाय प्रथमं परकीयेति। घटादेः स्वीयरूपव्यञ्जकत्वाद् व्यभिचारवारणाय द्वितीयं परकीयेति। अथवा प्रभाया दृष्टान्तत्वसंभवादाद्यं परकीयेति ने देयम्, चक्षुःसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वे सतीति विशेषणं देयम्। विषयं दर्शयति- वह्नीति। ननु सुवर्णस्य तैजसत्वे किं मानमिति चेद्? सुवर्णं तैजसं असति प्रतिबन्धकेऽत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वात्। यन्नैवं तन्नैवं यथा पृथिवीत्यनुमानमेव तत्र प्रमाणम्। न चेदमप्रयोजकं पृथ्वीद्रवत्वस्य जन्यजलद्रवत्वस्य चात्यन्तानलसंयोगनाश्यत्वात्, सुवर्णद्रवत्वस्य च तथाभावान्नायं हेतुरप्रयोजकः। ननु पीतिमगुरुत्वाश्रयस्य पार्थिवभागस्यापि तदानीं द्रुतत्वात्तेन व्यभिचार इति चेद्? न, जलमध्यस्थमसीक्षोदवत्तस्याद्रुतत्वात्। अपरे तु पीतिमाश्रयस्यात्यन्ताग्निसंयोगेऽपि पूर्वरूपापरावृत्तिदर्शनात्तत्प्रतिबन्धकं विजातीयद्रवद्रव्यं कल्प्यते। तथा हि- अत्यन्ताग्निसंयोगी**

**पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः, अत्यन्ताग्निसंयोगे सत्यपि पूर्वरूपविजातीयरूपानधिकरणत्वात्, जलमध्यस्थपीतपटवत्। तस्य च पृथिवीजलभिन्नस्य तेजस्त्वनियमात्।**

**व्याख्या-** तैजसमिन्द्रियं चक्षुर्वर्तते, तत्र प्रमाणन्तु- चक्षुः तैजसं, परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवदित्यनुमानम्। अत्रानुमाने हेतौ यदि प्रथमं परकीयेति विशेषणं न दीयते तदा प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वाद् दृष्टान्तासिद्धिदोषः स्यादतः प्रथमं परकीयेति पदम्। तथा सति प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वेऽपि परकीयस्पर्शाव्यञ्जकत्वान्न दृष्टान्तासिद्धिदोषः। घटादेरपि परकीयस्पर्शाद्यव्यञ्जकत्वविशिष्टस्वकीयरूपव्यञ्जकत्वात् तत्र च तैजसत्वाभावात्तत्र व्यभिचारवारणाय द्वितीयं परकीयेति विशेषणम्। तथा च यथा प्रदीपः परकीयस्पर्शादिविषयकप्रत्यक्षाजनकत्वे सति परकीयरूपविषयकप्रत्यक्षजनकत्ववान् सन् तैजसः तथैव चक्षुरिन्द्रियमपि, परकीयस्पर्शादिविषयकप्रत्यक्षाजनकः सन् परकीयरूपविषयकप्रत्यक्षजनकोऽतस्तैजसं चक्षुः। यदि चात्रानुमाने प्रदीपस्य स्थाने प्रभाया दृष्टान्तत्वेन स्वीक्रियते तदा तस्याः प्रभायाः स्वीयस्पर्शादेरप्यव्यञ्जकत्वात् प्रथमं परकीयेतिपदं न देयम्। चक्षुर्विषयसन्निकर्षस्यापि स्पर्शाद्यव्यञ्जकत्वेन रूपव्यञ्जकत्वेन च व्यभिचारादतो हेतौ द्रव्यत्वे सतीति विशेषणं देयम्। तैजसं विषयं दर्शयति- वह्निस्वर्णादिरिति तत्र तैजसविषयाश्चतुर्विधा भौमदिव्यौदर्याकरजाः, तत्र भौमं तेजः वह्निखद्योतादिकम्, दिव्यमबिन्धनं विद्युदादिकम्, सूर्यचन्द्रादिकञ्च, औदर्यं जठराग्निः, आकरजानि सुवर्णादिकानि अष्टलौहानि। अष्टलौहानि च- "सुवर्णं रजतं ताम्रं रीतिःकांस्यं तथा त्रपुः। सीसं कालायसं चैवमष्टौ लौहानि चक्षते" इति ॥

ननु सुवर्णादेः तैजसत्वे किं मानमिति चेदित्थम्- सुवर्णं तैजसम्, असति प्रतिबन्धकेऽत्यन्तानलसंयोगेऽप्यनुच्छिद्यमानजन्यद्रवत्वाद्, यन्नैवं तन्नैवं यथा पृथ्वीति केवलव्यतिरेकानुमानेन सुवर्णस्य तैजसत्वं सिद्धयति। अत्रानुमाने हेतौ जलमध्यस्थघृतादौ व्यभिचारवारणाय असति प्रतिबन्धक इति विशेषणं देयम्। जन्यपदानुपादाने जलपरमाणौ व्यभिचारोऽतो जन्येऽति द्रवत्वविशेषणं देयम्। ननु सुवर्णे हेतुरस्तु साध्यं मास्तु इति व्यभिचारशङ्कायां तन्निवारकतर्काभावादयं हेतुरप्रयोजक इति चेन्न, यतो हि पृथिवीद्रवत्वं जन्यजलद्रवत्वञ्चात्यन्तानलसंयोगे सति नाश्यत्वात् सुवर्णद्रवत्वस्य च तथाभावात् सुवर्णस्य तैजसत्वं सिद्धयति। तत्र यदि सुवर्णं तैजसं न स्यात्तदासति प्रतिबन्धकेऽत्यन्तानलसंयोगे नाश्यं स्याद्, यतो न तथातः सुवर्णं तैजसमिति सिद्धेः। न च पीतिमगुरुत्वाश्रयस्य पार्थिवभागस्याप्यसति प्रतिबन्धकेऽत्यन्तानलसंयोगे द्रुतत्वात्तत्र हेतोः सत्त्वात् साध्यस्य तैजसत्वस्य चासत्त्वाद् व्यभिचार इति चेन्न, यथा जलमध्यस्थो मसीक्षोदः अद्रुतः सन्नपि द्रुतवत् प्रतीयते तथैव सुवर्णस्य पीतिमभागस्य पार्थिवस्याप्यद्रुतत्वेऽपि द्रुतवत् प्रतीतिः।

केवलव्यतिरेक्यनुमानेन सुवर्णस्य तैजसत्वं संसाध्य पुनः अन्वयव्यतिरेक्यनुमानेन तत्साधयति विश्वनाथपञ्चाननः- अपरे त्वित्यादिना, तस्य भावश्चेत्थं पृथिव्यामत्यन्ताग्निसंयोगे सति प्रतिबन्धकाभावे सति रूपपरिवर्तनं भवतीति दृश्यते परं सुवर्णे अत्यन्ताग्निसंयोगेऽपि पीतिमाश्रयस्य पार्थिवभागस्य

रूपपरावृत्यदर्शनात्तत्र पूर्वरूपपरावृत्तिप्रतिबन्धकविजातीयद्रवद्रव्यसंयोगः कल्पनीयः। यथा जलमध्यस्थे पीतपटे पूर्वरूपपरावृत्तिर्नभवति प्रतिबन्धकस्य जलस्य सत्त्वात्तद्वदत्रापि पूर्वरूपविजातीयरूपादर्शनात् तदानीं तत्र पूर्वरूपपरावृत्तिप्रतिबन्धकविजातीयद्रवद्रव्यसंयोगः कल्पनीयः, तच्च द्रवद्रव्यमत्र पृथ्वीजले न संभवत इति तद्द्रवद्रव्यं तेज इति कल्पनीयमिति। तथा च सुवर्णे तेजसत्वं सिद्धयति। अनुमानाकारश्च- अत्यन्ताग्निसंयोगी पीतिमगुरुत्वाश्रयो विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः, अत्यन्ताग्निसंयोगे सत्यपि पूर्वरूपविजातीयरूपानधिकरणत्वाद्, जलमध्यस्थपीतपटवदित्यनुमानेन सुवर्णे पूर्वरूपविजातीयरूपप्रतिबन्धकं द्रवद्रव्यसंयुक्तत्वं कल्पनीयम्, तस्य च पृथिवीजलभिन्नस्य तेजस्त्वनियमात् सुवर्णं तैजसमिति सिद्धयति।

## (ग) वायुनिरूपणम्

**कारिका-** **अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः ॥४२॥**

**मुक्तावली–** **वायुं निरूपयति- अपाकज इति। अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वादुक्तमपाकज इति। अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तमनुष्णाशीत इति। एतेन वायवीयो विजातीयः स्पर्शो दर्शितः। तज्जनकतावच्छेदकं वायुत्वमिति भावः।**

**व्याख्या-** अपाकजानुष्णाशीतस्पर्शवत्त्वं वायोर्लक्षणम्। केवलापाकजस्पर्शवत्त्वमात्रं जलादावपि वर्तत इत्यनुष्णाशीतत्वं स्पर्शविशेषणं देयम्। केवलमनुष्णाशीतस्पर्शवत्त्वं पृथिव्यामपि वर्तत इत्यपाकजमित्यपि देयम्। तथा चापाकजानुष्णाशीतस्पर्शवत्त्वं केवलं वायावेवेति तदेव वायोर्लक्षणं संभवति। वायुत्वजातिस्तु जन्यापाकजानुष्णाशीतस्पर्शजनकतावच्छेदकतया जन्यवायुत्वं जातिं संसाध्य पुनः जन्यवायुत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकतया साधनीया। तथा चानुमानाकारः- समवायसम्बन्धावच्छिन्नजन्यापाकजानुष्णाशीतस्पर्शत्वावच्छिन्नजन्यापाकजानुष्णाशीतस्पर्शनिष्ठजन्यतानि-रूपिततादात्म्यसम्बन्धावच्छिन्नजन्यवायुनिष्ठा कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वाद् इत्यनुमानेन तादृशकारणतावच्छेदकधर्मविधया जन्यवायुत्वं जातिं संसाध्य पुनः समवायसम्बन्धावच्छिन्नजन्यवायुत्वावच्छिन्नजन्यवायु-निष्ठकार्यतानिरूपिततादात्म्य-संबन्धावच्छिन्नवायु- निष्ठा कारणता किञ्चिद् धर्मावच्छिन्ना कारणतात्वाद्, या या कारणता सा किञ्चिद् धर्मावच्छिन्ना, यद्धर्मावच्छिन्ना वायुनिष्ठा कारणता स धर्मो वायुत्वम्, जातिबाधकाभावात् स धर्मो जातिरित्यनुमानेन वायुत्वं जातिः सिद्धयति। स च वायुः त्वगिन्द्रियजन्यप्रत्यक्षविषय इति नवीना वदन्ति। प्राचीनास्तु वायोः प्रत्यक्षत्वं न स्वीकुर्वन्ति, किन्तु वायुरनुमेय इति वदन्ति, तथा चाह विश्वनाथपञ्चाननः-

**कारिका-** **तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः।**
**पूर्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् ॥४३॥**

**मुक्तावली-** **एष वायुः स्पर्शादिलिङ्गकः। वायुर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते, विजातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कम्पनेन च वायोरनुमानात्। यथा च**

**वायुर्न प्रत्यक्षस्तथाऽग्रे वक्ष्यते। पूर्ववदिति। वायुर्द्विविधो नित्योऽनित्यश्च परमाणुरूपो नित्यस्तदन्योऽनित्योऽवयवसमवेतश्च। सोऽपि त्रिविधः, शरीरेन्द्रियविषयभेदात्। तत्र शरीरमयोनिजं पिशाचादीनाम्। परन्तु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टम्भादुपभोगक्षमत्वम्, जलादीनां प्राधान्याज्जलीयत्वादिकमिति। अत्र यो विशेषस्तमाह- देहव्यापीति। शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक्। तच्च वायवीयं, रूपादीषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वाद्, अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत्।**

**व्याख्या-** वक्रगतिमानेष वायुः शतजालैर्व्यवहितेऽपि प्रदेशे वक्रगत्या प्रविशत्यतो वायुः तिर्यग्गमवान् उच्यते। स च वायुः न प्रत्यक्षः किन्त्वनुमेय इति प्राचीना वदन्ति। वायोरनुमानन्तु स्पर्शशब्दधृतिकम्पैश्चतुर्भिर्हेतुभिर्जायते। अर्थाद् विजातीयस्पर्शेन विलक्षणशब्देन, तृणादीनां धृत्या, शाखादीनां कम्पनेन च वायोरनुमानं भवति। अत्र स्पर्शशब्दः स्पर्शत्ववाची, तथा चानुमानाकार इत्थम्- रूपवदद्रव्यासमवेतः प्रत्यक्षविषयीभूतः स्पर्शः क्वचिद्द्रव्यसमवेतः स्पर्शत्वात्, पृथिवीसमवेतस्पर्शवदिति। अनेनानुमानेन तादृशस्पर्शाश्रयतया वायोः सिद्धिः। एवमेवात्र शब्दशब्दोऽपि भावपरः तथा च- वीणाध्वनिः स्पर्शवद्वेगवद्द्रव्यसंयोगजन्यः, विभागाजन्यशब्दसन्तानत्वाद्, मृदङ्गावच्छेद्यशब्दसन्तानवदित्यनुमानेन तादृशसंयोगाश्रयतया वायोः सिद्धिः। एवमेव धृत्याऽपि वायुः सिद्ध्यति। धृतिशब्दोऽप्यत्र भावपर एव। तथाहि- नभसि तृणतूलविमानादीनां धृतिः स्पर्शवद्वेगवद्द्रव्यसंयोगजन्या जन्यप्रयत्नाजन्यधृतित्वाद् नौकाधृतिवद्, अत्रापि यत् स्पर्शवद्वेगवद्द्रव्यं स वायुरिति। कम्पनेन वायोरनुमानन्तु रूपवद्द्रव्याभिघातशून्यतृणसमवेतकर्म स्पर्शवद्वेगवद्द्रव्याभिघातजन्यं विजातीयकर्मत्वादित्यनुमानेन प्रवाहाहतकाशकर्मदृष्टान्तेन स्पर्शवद्वेगवद्द्रव्यत्वेन वायोः सिद्धिः। ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यनुमानेन वायोः प्रत्यक्षत्वात् कथं वायोरनुमानेन साधनं क्रियत इति चेद्, यथा न वायुः प्रत्यक्षः तथाऽग्रे प्रत्यक्षप्रकरणे प्रतिपादयिष्यति विश्वनाथपञ्चाननः।

वायुर्हि द्विविधो नित्योऽनित्यश्च नित्यो वायुः परमाणुरूपः, अनित्यो वायुस्त्रिविधः शरीरेन्द्रियविषयभेदात्। शरीरमयोनिजं पिशाचादीनाम्। ननु वायौ करचरणाद्यवयवाभावादिति तदीयं शरीरं न सम्भवतीति चेन्न, जलीय-तैजस-वायवीयशरीराणां पार्थिवादिभागोपष्टम्भादेवोपभोगक्षमत्वं संभवति नान्यथा। जलीयतैजसवायवीयत्वव्यवहारस्तु जलादीनां प्राधान्याद् बोध्यम्। वायवीयमिन्द्रियं शरीरव्यापकं स्पर्शग्राहकं त्वगिन्द्रियं बोध्यम्। तच्चानुमानात् सिद्ध्यति। तद्यथा त्वगिन्द्रियं वायवीयं रूपादिषु मध्ये स्पर्शस्यैवाभिव्यञ्जकत्वाद् अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवदिति।

### वायवीयं विषयं दर्शयति

**कारिका- प्राणादिस्तु महावायुपर्यन्तो विषयो मतः।**

**मुक्तावली- विषयं दर्शयति प्राणादिरिति। यद्यप्यनित्यो वायुश्चतुर्विधः, तस्य चतुर्थी विधा प्राणादिरित्युक्तमाकरे, तथापि संक्षेपादत्र त्रैविध्यमुक्तम्, प्राणस्त्वेक एव हृदादिनानास्थानवशान्मुखनिर्गमनादिनानाक्रियावशाच्च नानासंज्ञां लभत इति।**

**व्याख्या-** वायवीयो विषयः प्राणादयो महावाय्वन्ता वायवः । तत्र प्राण एक एव सन्नपि हृदादिस्थानभेदेन मुखनिर्गमनादिक्रियाभेदेन च नानाविधो भवति । तत्र स्थानभेदो यथा- "हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले । उदानः कण्ठदेशे तु व्यानः सर्वशरीरगः" ॥ इति ॥

प्राणस्य क्रियाश्च मुखनासिकाभ्यां निर्गमनप्रवेशनात् प्राणः, जलादेरधोनयनादपानः, भुक्तपरिणामाय जठरानलसमुन्नयनात् समानः, अन्नादेरूर्ध्वनयनादुदानः, नाडीमुखेषु विततनाद् व्यान इति । यद्यपि भाष्यादिग्रन्थेषु प्राणस्यातिरिक्तत्वेन गणनादनित्यवायोश्चातुर्विध्यमुक्तं तथाप्यत्र संक्षेपेणानित्यस्य वायोस्त्रैविध्यमुक्तं प्राणस्य विषयेऽन्तर्भावादिति संक्षेपः ।

## पदानामर्थपरिचयः

| | |
|---|---|
| स्नेहः | = चूर्णादिपिण्डीभावहेतुर्गुणविशेषः |
| स्वरूपयोग्यत्वम् | = कारणतावच्छेदकधर्मवत्त्वम् |
| नैमित्तिकम् | = निमित्तादागतम् |
| साक्षाद्व्याप्यत्वम् | = तद्व्याप्यत्वे सति तद्व्याप्याव्यापकत्वम् |
| शीतेतरत्वम् | = शीतभिन्नत्वम् |
| औपाधिकी | = उपाधिं निमित्तीकृत्य जायमाना |
| दहनानुकूल्यम् | = वह्निजनकत्वम् |
| हरीतकी | = हैमवती(हर्रो) |
| धवलिमा | = श्वेतरूपत्वम्, (श्वेतिमा) |
| करका | = वर्षोत्पलः (जलवृष्टिपाषाणः) |
| भास्वरशुक्लः | = दीप्तियुक्तश्वेतरूपम् |
| अभिभवः | = तिरोभवः |
| अग्रहः | = अप्रत्यक्षम् |
| व्यञ्जकः | = प्रत्यक्षजनकः |
| वैश्वानरः | = काष्ठीयरक्तवर्णाग्निविशेषः |
| पित्तपीतिम्ना | = नेत्रस्थपित्तदोषप्रयुक्तेन |
| अनुच्छिद्यमानम् | = अविनाश्यम् |

| | |
|---|---|
| पीतिमा | = पीतरूपत्वम् |
| द्रुतत्वम् | = द्रवत्वम् |
| क्षोदम् | = चूर्णम् |
| परावृत्तिः | = परिवर्तनम् |
| उपष्टम्भः | = संयोगः (पतनप्रतिरोधः) |
| अभिव्यञ्जकः | = ज्ञानजनकः |
| अपाकजः | = पाकाजन्यम् |
| तिर्यग्गमनम् | = वक्रगतिः |
| धृतिः | = धारणम् (पतनप्रतिबन्धकम्) |
| आकरः | = खनिः, पदार्थप्रतिपादको भाष्यग्रन्थो वा |

## अभ्यासः

### १. विस्तृतमुत्तरं स्वोपज्ञतया देयम्

(क) जललक्षणं विलिख्य जलत्वजातिः परमाणुजले कथं सिद्धयतीति चर्चयत ।

(ख) जले माधुर्यं संसाध्य रसनेन्द्रियस्य जलीयत्वं साधयत ।

(ग) तेजोलक्षणं विलिख्य तेजस्त्वजातिसाधकानुमानं प्रदर्शयत ।

(घ) सुवर्णस्य तैजसत्वसाधनकमनुमानं विशदतया चर्चयत ।

(ङ) वायुलक्षणं विलिख्य वायोः प्रत्यक्षत्वाप्रत्यक्षत्वे विचारयत ।

### २. सङ्क्षिप्तमुत्तरं देयम्

(क) स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिसाधने दोषमुद्भावयत ।

(ख) जातिघटितं किमप्येकं जललक्षणं लिखत ।

(ग) कथन्न हिमकरके पार्थिवे ? विचारयत ।

(घ) ससमन्वयं किमप्येकं जातिघटितं तेजोलक्षणं प्रतिपादयत ।

(ङ) चक्षुषस्तैजसत्वसाधकानुमानमुपस्थापयत ।

(च) सपदकृत्यं वायुलक्षणं लिखत ।

(छ) प्राणस्यैकत्वे कथं नानात्वव्यवहारः ?

## ३. अतिसङ्क्षिप्ततयोत्तरयत

(क) जन्यस्नेहसमवायिकारणतावच्छेदकं किम्?

(ख) शुक्लेतररूपासमानाधिकरणमित्यस्यार्थः कः?

(ग) नीलजनकतावच्छेदिका जाति का?

(घ) जलीयं शरीरं योनिजं भवितु शक्नोति न वा?

(ङ) जन्योष्णस्पर्शसमवायिकारणं किम् ?

(च) सुवर्णस्य तैजसत्वसाधकः केवलव्यतिरेकी हेतुः कः ?

(छ) प्रतिबन्धक इत्यस्य कोऽर्थः ?

(ज) कः स्पर्शादिलिङ्गकः ?

(झ) प्राचीनमते वायुः प्रत्यक्षो वाप्रत्यक्षः ?

## ४. कक्षायां सखिभिः सह चर्चयत-

(क) स्नेहसमवायिकारणतावच्छेदकं जलत्वं कथं भवितुं न शक्नोति ? कथञ्च जलत्वजातिसिद्धिरिति चर्चयत ।

(ख) रसनेन्द्रियस्य जलीयत्वसाधकानुमाने पञ्चावयववाक्यानि कीदृशानि ?

(ग) सुवर्णस्य तैजसत्वसाधकहेतुघटकविशेषणानामर्थाः के ? तत्तद्विशेषणा-नामावश्यकता च का ?

(घ) प्राणाश्रयस्थानानि प्राणस्य क्रियाश्च चर्चयत ।

**द्वितीयः पाठः**

# आकाशकालदिङ्निरूपणम्

## (क) आकाशनिरूपणम्

**कारिका-** **आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ।**

**मुक्तावली-** **आकाशं निरूपयति आकाशस्येत्यादिना । आकाशकाल-दिशामेकैकव्यक्तित्वादाकाशत्वादिकं न जातिः । किन्तु आकाशत्वं शब्दाश्रयत्वम् । वैशेषिक इति कथनं तु विशेषगुणान्तरव्यवच्छेदाय । एतेन प्रमाणमपि दर्शितम् । तथा हि- शब्दो विशेषगुणश्चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वात् स्पर्शवत् । शब्दो द्रव्यसमवेतो गुणत्वात् संयोगवद् इत्यनुमानेन शब्दस्य द्रव्यसमवेतत्वे सिद्धे, शब्दो न स्पर्शवद्विशेषगुणः, अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत् । पाकजरूपादौ व्यभिचारवारणाय सत्यन्तम् । पटरूपादौ व्यभिचारवारणाय अकारणगुणपूर्वकेति । जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति । शब्दो न दिक्कालमनसां गुणो विशेषगुणत्वात् । नात्मविशेषगुणो बहिरिन्द्रियग्राह्यत्वाद् रूपवद् । इत्थं च शब्दाधिकरणं नवमं द्रव्यं गगनात्मकं सिद्ध्यति । न च वाय्ववयवेषु सूक्ष्मशब्दक्रमेण वायौ कारणगुणपूर्वकः शब्द उत्पद्यतामिति वाच्यम्, अयथावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाभावात् ।**

**व्याख्या-** आकाशं साधयति- आकाशस्येत्यादिना । आकाशत्वं कालत्वं दिक्त्वञ्च न जातिः तत्तदाश्रयाणामेकैकत्वाद् व्यक्तेरभेदरूपजातिबाधकदोषसद्भावात् । तत्र षोडशविशेषगुणेषु शब्द एव विशेषगुण आकाशे तिष्ठति । विशेषगुणाश्च- बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः । अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः इति । विशेष एव वैशेषिकः, स्वार्थे ठक् । तथा च शब्दरूपविशेषगुणवत्त्वमाकाशस्य लक्षणम् । वस्तुतः शब्दवत्त्वमाकाशस्य लक्षणमित्येव लक्षणं साधु, वैशेषिक इति कथनन्तु आकाशे शब्दातिरिक्ता विशेषगुणा न तिष्ठन्तीति द्योतनाय । शब्दस्य विशेषगुणत्वन्तु अनुमानसिद्धम्, तथा हि- शब्दो विशेषगुणः, चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वात् स्पर्शवदिति । अत्रानुमाने हेतौ चक्षुर्ग्रहणायोग्येति विशेषणं बहिरिन्द्रियग्राह्यसङ्ख्यावृत्तिएकत्वत्वादिजातिमत्त्वस्यैकत्वसङ्ख्यायां सत्त्वात्तत्र च विशेषगुणत्वाभावाद् व्यभिचारः स्यादतस्तद्वारणाय चक्षुर्ग्रहणायोग्येति विशेषणं सङ्ख्यावृत्त्येकत्वत्वादिजातेः त्वगिन्द्रियेणेव

चक्षुषापि ग्राह्यत्वान्न तदादाय व्यभिचारः, यत्र यत्र च चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिर्वतते तत्र विशेषगुणत्वमित्यनुमानेन शब्दे विशेषगुणत्वसिद्धौ, शब्दो द्रव्यसमवेतो गुणत्वात् संयोगवदित्यनुमानेन शब्दस्य द्रव्यसमवेतत्वे सिद्धे, शब्दो न स्पर्शवद्विशेषगुणः, अग्निसंयोगासमवायिकारणकत्वाभावे सत्यकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत्। अत्रानुमाने शब्दः पक्षः स्पर्शवद्विशेषगुणभेदः साध्यः, अग्निसंयोगासमवायिकारणकत्वाभावे सत्यकारणगुणपूर्वकप्रत्यक्ष(विषय) त्वादिति हेतुः। अत्र हेतौ घटादेः पाकजरूपादौ अकारणगुणपूर्वकप्रत्यक्षविषयत्वस्य सत्त्वात्तत्र साध्यस्य स्पर्शवद्विशेषगुणभेदस्याभावाद् व्यभिचारः प्रसरतीत्यग्निसंयोगासमवायिकारणकत्वाभावे सतीति हेतुविशेषणम्, तथा सति पाकजरूपादेरग्निसंयोगासमवायिकारणकत्वेन तत्रैतद्हेतोरभावान्न व्यभिचारः। पाकजगुणाश्च पृथिव्यां पाकाज्जायन्ते। पाकश्च रूपादिपरावृत्तिजनको विजातीयतेजःसंयोगः। स च पाकः पृथिव्यामेव सम्भवति न जलादिषु। पाकवशाच्च पृथिव्यां रूपादिकं परिवर्तन्ते। अर्थात् पार्थिवरूपरसादिकं विजातीयाग्निसंयोगेन विपरिणमते, न तु जलीयादिकम्। नहि शतधापि ध्मायमाने जले रूपादिकं परावर्तते। जले सौरभमौष्ण्याञ्चान्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते। पार्थिवं तु रूपरसादिकं पूर्वं कारणगुणपूर्वकमपि पश्चादग्निसंयोगरूपपाकेन परावर्तते। स च पाको विजातीयरूपजनकाद् गन्धजनको विजातीयः, गन्धजनकाच्च रसजनको विजातीयः, भिन्न इत्यर्थः। अत एव तृणपुञ्जनिक्षिप्ताम्रादौ क्वचिद्रूपपरिवर्तनेऽपि तत्र रसादिकं न परावर्तते। क्वचिच्च रसपरिवर्तनेऽपि रूपं न परावर्तते, तथैवानुभवात्। तस्माद्रूपादिजनका विजातीया एव पाकाः स्वीकार्याः। एतत्पाकमहिम्नैव एकस्मिन्नेव पार्थिवावयवे कालक्रमेण भिन्नभिन्नपदार्थानुभवो जायते। यथा गोभुक्ततृणादीनामापरमाण्वन्तभङ्गे तृणारम्भकपरमाणुषु विजातीयतेजः। संयोगात्पूर्वरूपादिचतुष्टयनाशे तदनन्तरं दुग्धे यादृशं रूपादिकं वर्तते तादृशरूपरसगन्धस्पर्शजनकास्तेजःसंयोगा जायन्ते, ततस्तादृशरूपरसादिविशिष्टपरमाणुभ्यां दुग्धद्वयणुकमारभ्यते ततस्त्र्यणुकादिक्रमेण महादुग्धारम्भः, एवं दुग्धारम्भकैः परमाणुभिरेव दध्यारभ्यते एवमेव पाकमहिम्ना दध्यारम्भकैरेव परमाणुभिर्नवनीतादिकमिति। एवमेव क्रमेण घटादिजनकेषु केषुचन परमाणुष्वेव भिन्नभिन्नानि पत्रमृद्कपालघटादीनि द्रव्याण्यनुभूयन्ते। एतत्सर्वं पाकमहिम्नैव भवति। अतः पाकजरूपादेरग्निसंयोगासमवायिकारणकत्वेन तत्र व्यभिचारवारणायाग्निसंयोगासमवायिकारण-कत्वाभावे सतीति हेतुविशेषणम्। हेतुविशेष्यानुपादाने घटीयकारणगुणपूर्वकश्यामादिरूपादौ व्यभिचारोऽतो विशेष्यपदोपादानम्। अनेनानुमानेन शब्दे स्पर्शवद्विशेषगुणभिन्नत्वसिद्धौ, शब्दो न दिक्कालमनसां गुणो विशेषगुणत्वादित्यनुमानेन शब्दे दिक्कालमनोगुणभेदः सिद्ध्यति, एवञ्च शब्दो नात्मविशेषगुणो बहिरिन्द्रियग्राह्यत्वाद् रूपवदित्यनेनानुमानेन शब्दस्यात्मविशेषगुणभिन्नत्वसिद्धिः। एवं प्रकारेण शब्दस्य द्रव्यसमवेतत्वसिद्धौ च परिशेषानुमानेन शब्दरूपविशेषगुणाश्रयतयाकाशरूपनवमद्रव्यस्य सिद्धिर्भवति। परिशेषानुमानञ्च शब्दोऽष्टद्रव्यातिरिक्तद्रव्याश्रितः, अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वाद्, यन्नैवं तन्नैवं यथा रूपादिकमित्यनुमानेन शब्दस्य नवमद्रव्याश्रितत्वे सिद्धे पुनः विवादास्पदमाकाशमिति व्यवहर्तव्यम्, शब्दाश्रयत्वादित्यनुमानेन शब्दाश्रयतयाकाशद्रव्यस्य सिद्धिर्भवतीति। न च शब्दः वाय्ववयवेषु सूक्ष्मशब्दक्रमेणार्थात् पूर्वं सूक्ष्मे वाय्यवयवे सूक्ष्मः शब्द उत्पद्यते पुनः स्थूलावयवपूर्वकस्थूलवायौ स्थूलशब्द उत्पद्यत इति स्वीकृत्य शब्दस्य कारणगुणपूर्वकगुणत्वं स्वीक्रियतां तथा च शब्दस्य

स्पर्शवद्वायुगुणत्वसिद्धौ शब्दाश्रयतया नाकाशः सिद्धयतीति चेत्तदयुक्तम्, यतो हि शब्दो न यावद्द्रव्यभावी (यावत्कालमाश्रयद्रव्यं तिष्ठति तावत्कालं शब्दो न तिष्ठति ) वायोश्च विशेषगुणाः यावद्वायुस्तिष्ठति तावत्कालपर्यन्तं तिष्ठन्तीति न शब्दो वायुविशेषगुणोऽतः शब्दो न वायुविशेषगुणः, किन्तु शब्दाश्रयो नवममाकाशद्रव्यमिति ।

आकाशस्य नित्यत्वेन विभुत्वेन च तद्भेदाभावादाकाशस्य शरीरेन्द्रियविषयभेदो यद्यपि न सम्भवति तथापि शब्दग्राहकमिन्द्रियमाकाशात्मकमेव वर्तते, तच्च श्रोत्रमिन्द्रियमाकाशत्वेन यद्यप्येकं तथापि कर्णशष्कुलीरूपोपकरणभेदात् श्रोत्रात्मकेन्द्रियेऽपि भेदोपचारो भवतीत्याह विश्वनाथपञ्चाननः-

**कारिका-** **इन्द्रियन्तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः ।**

**मुक्तावली-** **नन्वाकाशं लाघवादेकं सिद्धं, श्रोत्रं तु पुरुषभेदेन भिन्नं कथमाकाशं स्यादिति चेत्तत्राह- एक सन्नपीत्यादि । आकाश एक एव सन्नपि उपाधेः कर्णशष्कुल्यादेर्भेदाद् भिन्नं श्रोत्रात्मकं भवतीत्यर्थः ।**

**व्याख्या-** चतुर्विंशतिगुणेषु शब्दमात्रग्राहकं श्रोत्रेन्द्रियमाकाशात्मकम्, तच्च श्रोत्रं एकं सदपि तस्योपाधेः कर्णशष्कुल्याः पुरुषभेदेन भिन्नत्वात् तदवच्छिन्नाकाशोऽपि भिन्न इति व्यवह्रियते, वस्तुतः आकाशः एक एव । तत्र करणस्य श्रोत्रस्य एकत्वेऽपि उपकरणस्य कर्णशष्कुल्या भेदेन तदवच्छिन्नाकाशात्मकं श्रोत्रेन्द्रियमपि भिन्नमिति व्यवह्रियते । अत एव चैत्रेण श्रुतः शब्दः मैत्रेण न श्रूयते । यथैकोऽप्याकाशो घटादिरूपोपाधिभेदाद् घटाकाशो मठाकाशाद् भिन्न इति भिन्नप्रतीतिस्तथैव एकोऽप्याकाशः कर्णशष्कुलीरूपोपाधिभेदेन भिन्नभिन्नः श्रोत्रात्मको भवतीत्यर्थः ।

## (ख) कालनिरूपणम्

**कारिका-** **जन्यानां जनकः कालो जगतामाश्रयो मतः ॥४५॥**

**मुक्तावली-** **कालं निरूपयति जन्यानामिति । तत्र प्रमाणं दर्शयितुमाह- जगतामिति । तथाहि -इदानीं घट इत्यादिप्रतीतिः सूर्यपरिस्पन्दादिकं यदा विषयीकरोति तदा सूर्यपरिस्पन्दादिना घटादेः सम्बन्धो वाच्यः । स च सम्बन्धः संयोगादिर्न सम्भवतीति काल एव तत्सम्बन्धघटकः कल्प्यते । इत्थं च तस्याश्रयत्वमपि सम्यक् ॥४५॥**

**व्याख्या-** कालो जन्यमात्रस्य वस्तुनो जनकः, समुचितकालं विना किमपि वस्तु नोत्पद्यते, स च कालः सर्वेषां वस्तूनामाश्रयः । अत एवेदानीं तद्वस्तु वर्तते, तदानीं नासीदित्यादिप्रतीतिर्लोकानाम् । एतादृश्या च प्रतीत्या कालोऽनुमीयते । यतो हि इदानीं घट इत्यादिप्रतीतिर्यदा सूर्यपरिस्पन्दादिकं विषयीकरोति तदा सूर्यपरिस्पन्दस्य घटादिना साकं कश्चित्सम्बन्धो वाच्यो भवति, स च सम्बन्धः संयोगादिर्न सम्भवतीति स्वाश्रयतपनसंयोगिसंयोगात्मकः कश्चन तत्र सम्बन्धः कल्पनीयः, तत्र च स्वम् = सूर्यक्रिया, स्वाश्रयो यत्तपनं=सूर्यः, तस्य संयोगः काले, संयोगिनः कालस्य संयोगो

घटादाविति स्वाश्रयतपनसंयोगिसंयोगस्य सम्बन्धस्य घटे सत्त्वात् तत्र स्वात्मकसूर्यक्रियायाः सम्बन्धः स्वीकार्य इतीदानीं घट इत्याद्यभ्रान्तप्रतीतिर्भवति, एतादृशप्रतीतिविषयीभूतसम्बन्धघटकतया च कालः सिद्धयति। कालं विना स्वाश्रयतपनसंयोगिसंयोगसम्बन्धो न सम्भवति, एतत्सम्बन्धं विना चैतादृशी प्रतीतिः नसम्भवतीति यद्येन विना न सम्भवति तत्तेनैवाक्षिप्यत इति नियमादेतादृशप्रतीत्या कालोऽनुमीयते।

### कालसाधकप्रमाणान्तरं दर्शयति विश्वनाथपञ्चाननः-

**कारिका-** **परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः।**

**मुक्तावली-** **प्रमाणान्तरं दर्शयति- परापरत्वेति। परापरत्वबुद्धेरसाधारणं निमित्तं काल एव, परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघवादतिरिक्तः काल एव कल्प्यत इति भावः। नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदो न स्यादत आह- क्षणादिरिति। कालस्त्वेकोऽप्युपाधिभेदात्क्षणादिव्यवहारविषयः। उपाधिस्तु- स्वजन्यविभागप्रागभावावच्छिन्नं कर्म, पूर्वसंयोगावच्छिन्नविभागो वा, पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वा, उत्तरसंयोगावच्छिन्नं कर्म वा। न चोत्तरसंयोगानन्तरं क्षणव्यवहारो न स्यादिति वाच्यम्, कर्मान्तरस्यापि सत्त्वादिति। महाप्रलये क्षणादिव्यवहारो यद्यस्ति तदाऽनायत्या ध्वंसेनोपपादनीय इति। दिनादिव्यवहारस्तु तत्तत्क्षणकूटैरेवेति।**

**व्याख्या-** अयं घटः परः, अयञ्चापर इति बुद्धेरसाधारणं कारणं काल एव, तत्रेत्थं बोद्धव्यं, ज्येष्ठे वस्तुनि कालकृतपरत्वबुद्धिः, कनिष्ठे वस्तुनि कालकृतापरत्वबुद्धिश्च जायते, एतस्या बुद्धेरसाधारणं निमित्तं कारणं कालः। तत्र परत्वापरत्वे द्विविधे भवतः, दिक्कृते कालकृते च कालकृतपरत्वापरत्वयोः समवायिकारणं ज्येष्ठकनिष्ठवस्तूनि भवन्ति। असमवायिकारणञ्च कालपिण्डसंयोगः तादृशसंयोगस्याश्रयश्च काल इति परत्वापरत्वबुद्धेरसाधारणं निमित्तं कारणम्, परत्वापरत्वयोश्च गुणयोरसमवायिकारणसंयोगाश्रयश्च काल इति। स च कालः एकः सन्नपि उपाधिभेदात् क्षणदिनमासवर्षादिनानारूपतया प्रतीयते, कालस्योपाधिस्तु क्रियैव, क्रियायाश्च स्वभावः प्रथमतः क्रिया, क्रियातो विभागः, विभागात् पूर्वसंयोगनाशः ततश्चतुर्थक्षण उत्तरदेशसंयोगः तत क्रियानाशः। अर्थाद् या काचन क्रियोत्पद्यते, सा च क्रिया चतुर्थक्षणं यावत्तिष्ठति, तस्याः क्रियायाः पञ्चमे क्षणे नाशो भवति। तत्र प्रथमे क्षणे काचन क्रियोत्पद्यते, ततो द्वितीयक्षणे क्रियातो विभागः, विभागात्तृतीये क्षणे पूर्वसंयोगनाशः, ततः चतुर्थक्षणे उत्तरदेशसंयोगः, तत क्रियानाशः। तथा च स्वजन्यविभागप्रागभावावच्छिन्नं कर्म प्रथमः कालोपाधिः। स्वम् = क्रिया, क्रियाजन्यविभागस्य प्रागभावः प्रथमे क्षणे वर्ततेऽतः स्वजन्यविभागप्रागभावावच्छिन्नं कर्म कालस्योपाधिः, तदवच्छिन्नश्च कालः। प्रथमक्षणे उत्पनया क्रियया जायमानो विभागः पूर्वसंयोगेन सह द्वितीये क्षण एव तिष्ठति, प्रथमे क्षणे विभागो नासीत्, तृतीये च क्षणे पूर्वसंयोगो न भविष्यति इति द्वितीये क्षणे पूर्वसंयोगविशिष्टविभागो वर्ततेऽतः पूर्वसंयोगावच्छिन्नं विभागावच्छिन्नं कर्म कालस्य द्वितीयोपाधिः, तद्विशिष्टः कालः। तृतीये क्षणे पूर्वसंयोगस्य नाशो भवति, नाशश्चानन्तकालिकः परं स पूर्वसंयोगनाश

उत्तरदेशप्रागाभावावच्छिन्नः सन् तृतीये क्षण एव तिष्ठति चतुर्थक्षणे उत्तरदेशसंयोगस्योत्पत्तिर्भवति तस्मिन्नेव काले तस्य प्रागभावस्यापि नाशो जायते, कार्यमात्रस्य स्वोत्पत्तिकाले स्वप्रागभावस्य नाशस्वीकारादतः पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावः तृतीये क्षणे तिष्ठतीति तदवच्छिन्नं कर्म कालस्य तृतीयोपाधिः, चतुर्थक्षणे उत्तरदेशसंयोगो भवतीति तदवच्छिन्नं कर्म कालस्य चतुर्थोपाधिः। एतानि चत्वारि कर्माण्येव कालस्योपाधयः सन्ति । एवमेव प्रत्येकं क्रिया चतुःक्षणावस्थायिनीति तासां तासां क्रियाणां तान् तानुपाधीनादाय क्षणदिनमासवर्षादिसमयव्यवहारः प्रचलति । महाप्रलये यद्यपि क्षणव्यवहारो न भवति तथापि तत्रापि महाप्रलयक्षण इति व्यवहारो भवतीति दुराग्रहस्तथा सति सर्वजन्यध्वंसोऽप्येकः कालस्योपाधिरिति स्वीकरणीयः। तमुपाधिमादाय तत्र क्षणव्यवहारो भवतीति कल्पनीयः। एतावतैकस्य नित्यस्य विभोः कालस्यैवोपाधिवशात् क्षणदिनमासवर्षादिरूपेणव्यवहारः प्रचलतीति ।

### (ग) दिङ्निरूपणम्

**कारिका-** **दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते** ॥४६॥

**मुक्तावली–** **दिशं निरूपयति दूरान्तिकेति। दूरत्वमन्तिकत्वञ्च दैशिकं परत्वमपरत्वं बोध्यम्। तद्बुद्धेरसाधारणं बीजं दिगेव। दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया लाघवादेका दिक् सिद्ध्यतीति भावः** ॥४६॥

**व्याख्या-** दूरत्वमन्तिकत्वञ्च दैशिकपरत्वमपरत्वञ्च तयोः = दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो दिक्। अर्थात् लोके इदं दूरं, इदञ्चचान्तिकमिति यो व्यवहारो दृश्यते तस्य व्यवहारस्य व्यवहार्यो विषयः, दैशिकपरत्वमपरत्वञ्च ते च परत्वापरत्वे सासमवायिकारणके, तयोरसमवायिकारणं दिक्पिण्डसंयोग एव तदाश्रयश्च दिगिति दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो दिक्। दैशिकपरत्वापरत्वबुद्धेस्त्वसाधारणनिमित्तिकारणं दिगिति। सा च दिगैकैव लाघवात्।

ननु दिश एकत्वे कथं प्राचीप्रतीचीत्यादिनानात्वव्यवहारः सम्पद्यत इति चेदाह विश्वनाथपञ्चाननः:-

**कारिका-** **उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक्**।

**मुक्तावली-** **नन्वेकैव दिक् तदा प्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यत इत्यत आह उपाधीति। यत्पुरुषस्योदयगिरिसन्निहिता या दिक् सा तस्य प्राची। एवमुदयगिरिव्यवहिता या दिक् सा प्रतीची एवं यत्पुरुषस्य सुमेरुसन्निहिता या दिक् सोदिची। तद्व्यवहिता त्ववाची। सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थित इति नियमात्**।

**व्याख्या-** दिगेकाप्युपाधिभेदान्नाना प्रतीयते। दिश उपाधिस्तु देश एव। तत्र यत्पुरुषस्योदयगिरिसन्निकटवर्ती यो देशः स तस्य पुरुषस्य कृते प्राची, यस्य च पुरुषस्योदयगिरिव्यवहितो यो देशः स तस्य पुरुषस्य कृते प्रतीची, सुमेरुसन्निहितो यो देशः स तस्योदीची, सुमेरुव्यवहितश्च यो देशः स तस्यावाची इत्येवं रीत्या

सर्वत्र दिग्व्यवहारे देश एवोपाधितया प्रतीतेर्दिशः उपाधिः देशः । वस्तुतो देशगतप्राचीत्वप्रतीचीत्वादयो धर्मा दिश्युपचर्यते । अतो देशभेदवसादेव दिशि नानात्वव्यवहारः, न तु दिङ्नाना, दिगेकैव । सा च दिग् विभ्वी नित्या च ।

## पदानामर्थपरिचयः

| | |
|---|---|
| गुणान्तरम् | = अन्यो गुण इति गुणान्तरम्, भिन्नगुण इत्यर्थः |
| व्यवच्छेदः | = व्यावर्तनम्, पृथक्करणं वा |
| कारणगुणपूर्वकगुणः | = कारणगुणेन कार्ये उत्पन्नो गुणः |
| पाकजः | = रूपादिपरावृत्तिजनकविजातीयतेजःसंयोगः पाकः, तस्माज्जायमानः |
| व्यभिचारः | = हेतुदोषविशेषः ( साध्याभाववद्वृत्तित्वम्) |
| बहिरिन्द्रियाणि | = शरीरबहिस्थितानीन्द्रियाणि चक्षुःरसनाघ्राणत्वक्श्रोत्राणि |
| अन्तरिन्द्रियम् | = शरीरान्तर्वर्तीन्द्रियं मनः |
| अयावद्द्रव्यभाविगुणः | = यावत्कालं द्रव्यं तिष्ठति तावत्कालमवर्तमानो गुणः |
| उपाधिः | = उप=समीपवर्तनि वस्तूनि आधीयते = स्थापयति स्वधर्मानित्युपाधिः, स्वकीयधर्मानन्यपदार्थे स्थापको धर्मी |
| परिस्पन्दः | = क्रिया |
| कूटः | = समूहः |
| अन्तिकत्वम् | = समीपत्वम् |

## अभ्यासः

### १. विस्तृतमुत्तरं लिखत

(क) आकाशसाधकान्यनुमानानि प्रदर्शयत ।

(ख) कालसाधकं प्रमाणं प्रतिपाद्य कालस्यैकत्वं साधयत ।

(ग) दिक्साधकं प्रमाणं निरूप्य दिशि कथं प्राच्यादिव्यवहारो जायत इति लिखत ।

### २. सङ्क्षेपेणोत्तरयत

(क) शब्दः कथन्न वायोः कारणगुणपूर्वको गुणः?

(ख) शब्दस्य दिक्कालमनोगुणभिन्नत्वे युक्तिं प्रदर्शयत ।

(ग) शब्दः कारणगुणपूर्वको गुण ? पाकजो वा गुणः? तद्भिन्नो वा गुण इति विचारयत ।

(घ) महाप्रलये कथं क्षणत्वव्यवहारो जायते ।

### ३. अतिसङ्क्षिप्ततयोत्तरयत

(क) आकाश एको वानेकः ?

(ख) शब्दः कारणगुणपूर्वको भवितुं शक्नोति न वा ?

(ग) परत्वापरत्वयोरसमवायिकारणं किम् ?

(घ) सूर्यक्रियाया घटादिना सह संबन्धः कीदृशः ?

### ४. कक्षायां मित्रैः सह परामृशत ।

१. शब्दो न स्पर्शवद्विशेषगुण अग्निसंयोगाासमवायिकारणकत्वाभावे सत्यकारणगुण-पूर्वक प्रत्यक्षविषयत्वादित्यनुमानस्थलीयहेतुविशेषणविषये चर्चयत ।

२. कालोस्योपाधिविषये कक्षायां सखिभिः सह परार्मशं कुरुत ।

# आत्मनिरूपणम्

**कारिका-** **आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तकम् ॥४७॥**

**मुक्तावली–** **आत्मानं निरूपयति- आत्मेन्दियाद्य इति। आत्मत्वजातिस्तु सुखदुःखादिसमवायिकारणतावच्छेदकतया सिध्यति। ईश्वरेऽपि सा जातिरस्त्येव। अदृष्टादिरूपकारणाभावान्न सुखदुःखाद्युत्पत्तिः। नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभाव इति नियमस्याप्रयोजनकत्वात्। परे तु ईश्वरे सा जातिर्नास्त्येव प्रमाणाभावत्। न च दशमद्रव्यत्वापत्तिः, ज्ञानवत्त्वेन विभजनादित्याहुः। आत्मसत्त्वे प्रमाणं प्रदर्शयन्नाह विश्वनाथपञ्चाननः-**

**व्याख्या-** आत्मेन्द्रियादि। अर्थाद् इन्द्रियाणाम्=चक्षुःरसना-घ्राण-त्वक्-श्रोत्र-मनसां शरीरस्य चाधिष्ठाता= सञ्चालक आत्मैव, आत्मानं विना शरीरेन्द्रियादयः स्व-स्वकार्यं कर्तुमसमर्थाः भवन्ति शरीरेन्द्रियादयः स्वकार्यं कुर्वन्तीति तत्क्रिययात्मानुमेयः। यतो हि शरीरेन्द्रियादयस्तत्तत्कार्यादानप्रदानादिकं कार्यं, ज्ञानादिकञ्च कार्यं प्रति करणानि सन्ति, करणानि हि कर्तारं विना स्वकार्यायासमर्थानि भवन्ति, तस्मादचेतनशरीरादिकार्येण तदधिष्ठातात्मा कल्पनीयः। अनुमानाकारश्चेत्थम्– इन्द्रियादिकं सकर्तृकं करणत्वाद्, यद्यत् करणं तत्सकर्तृकम्, यथा छिदाकरणं कुठारादि। यञ्च शरीरेन्द्रियादीनामधिष्ठाता स आत्मेत्यनुमानेनात्मा सिद्ध्यति। तत्रात्मा नामात्मत्वजातिमान्, आत्मत्वजातिस्तु सुखादिसमवायिकारणतावच्छेदकतया सिद्ध्यति। तथाहि - समवायसम्बन्धावच्छिन्नसुखत्वावच्छिन्नसुखनिष्ठकार्यतानिरूपि-ततादत्म्यसम्बन्धावच्छिन्नात्मनिष्ठा कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वाद्, या या कारणता सा किञ्चिद्धर्मावच्छिन्ना, यथा घटनिष्ठकार्यतानिरूपितकपालनिष्ठा कारणता कपालत्वधर्मावच्छिन्ना, यद्धर्मावच्छिन्नात्मनिष्ठा कारणता स धर्म आत्मत्वम्, जातिबाधकाभावात् स धर्मो जातिरिति परिशेषानुमानेनात्मत्वं जातिः सिद्ध्यति। ननु यद्यात्मत्वजातिः सुखादिसमवायिकारणतावच्छेदकतया साध्यते तदा सुखसमवायिकारणताया ईश्वरेऽभवादीश्वरे आत्मत्वं जातिः न सिद्धेदिति चेन्नेश्वरेऽपि सुखसमवायिकारणता स्वरूपयोग्यतारूपास्त्येवात ईश्वरेऽपि आत्मत्वं सिद्ध्यत्येव, अदृष्टरूपकारणान्तरासमवधानाच्च न तत्र सुखदुःखाद्युत्पत्तिरिति। ननु नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभाव इति नियमविरोधापत्तिरिति चेन्न, यतो हि सकलकारणान्तरसमवधाने एव नित्यस्य स्वरूपयोग्यत्वे फलावश्यं भाव इत्येव नियम, ईश्वरे तु कारणान्तरस्यादृष्टादेः कदापि समवधानाभावान्न

तत्र सुखाद्युत्पत्तेरापत्तिः। एतावतेश्वरेऽपि सुखसमवायिकारणतायाः सत्त्वात्तत्रात्मत्वजातिरिति सिद्धैव। परे तु ईश्वरे आत्मत्वं जातिः न स्वीकुर्वन्ति, ईश्वरे सुखसमवायिकारणतायाः सत्त्वे प्रमाणाभावात्। न चेश्वरे यदि आत्मत्वं जातिर्न स्वीक्रियते तदेश्वरस्य दशमद्रव्यत्वापत्तिरिति चेन्न, यतो ह्यत्रात्मा नात्मत्वजातिमान् किन्तु ज्ञानवान् अतो ज्ञानस्येश्वरेऽपि सत्त्वादीश्वरोऽप्यात्मपदवाच्यो भवत्येवातो न दशमद्रव्यत्वापत्तिः। मुक्तावल्यामात्मसाधकं प्रमाणं विशदयति-

**मुक्तावली-** **इन्द्रियादीति। इन्द्रियाणां शरीरस्य च परम्परया चैतन्यसम्पादकः यद्यपि आत्मनि अहं जाने, अहं सुखी इत्यादि प्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्तत्प्रतीतिगोचर इति प्रतिपादयितुं न शक्यते इत्यतः प्रमाणान्तरं दर्शयति- करणमिति। कुठारादीनां छिदाकरणानां कर्तारमन्तरेण फलानुपधानं दृष्टम्, एवं चक्षुरादीनां ज्ञानकरणानां फलोपधानमपि कर्तारमन्तरेण नोपपद्यत इत्यतिरिक्तः कर्ता कल्प्यते॥४७॥**

**व्याख्या-** आत्मा इन्द्रियाणां, शरीरस्य च चैतन्यसम्पादकः। अर्थाद् इन्द्रियाणि शरीरञ्च ज्ञातृतया (ज्ञानवत्त्वेन) व्यवह्रियतेऽर्थात् शरीरं इन्द्रियाणि च तत्तद्विषयं जानन्ति, शरीरं इन्द्रियाणि च जडात्मकानि, जडानि चेन्द्रियादीनि आत्मनः सहाय्येनैव ज्ञानवन्ति भवन्ति, तत्रात्मा ज्ञानजनकताख्यपरम्परासम्बन्धेनेन्द्रियाणां ज्ञानवत्त्वं सम्पादयति, अर्थादिन्द्रियरूप करणाद्वरैवात्मनि ज्ञानमुत्पद्यते, इन्द्रियाभावे आत्मा ज्ञानं जनयितुं न शक्नोतीति इन्द्रियद्वारेणात्मनि उत्पद्यमानेन ज्ञानेनात्मा कल्पनीयः शरीरावच्छेदेनैवात्मनि ज्ञानमुत्पद्यत इति। शरीरमवच्छेदकत्वरूपपरम्परासम्बन्धेन ज्ञानवत् करोत्यात्मा तथा च इन्द्रियाणां शरीरस्य च चैतन्यसम्पादकात्मा कल्पनीयः। यद्यपि स्वात्मा स्वानुभवेनैवाहं जानामि, अहं सुखी, दुःखीत्यादिप्रतीत्यैव प्रत्यक्षतयैव सिद्धयति। तत्रानुमानेनात्मकल्पनमनावश्यकं तथापि यो हि विप्रतिपन्नः = विपरितज्ञानवान्, शरीराद्यतिरिक्तात्मानं नैव स्वीकरोति, अर्थात् अहं प्रतीतेर्विषयः शरीराद्यतिरिक्त आत्मेति नैव मन्यते तं पुरुषं अहं जानामीत्यादिप्रतीत्या शरीराद्यतिरिक्तमात्मतत्त्व बोधयितुं नाशक्यत इति तं तादृशमात्मतत्त्वं बोधयितुमनुमानप्रमाणेनात्मा साधनीय इति प्रमाणान्तरेणानुमानेनात्मानं साधयति विश्वनाथपञ्चाननः। तथा चानुमानाकारः इन्द्रियादिकरणानि सकर्तृकाणि करणत्वात्, यद्यत् करणं तत्तत्सकर्तृकम्, यथा छिदाकरणं कुठारादिकम्। छिदाकरणं कुठारादिकं हि कर्तृसहितमेव छिदाकार्याय समर्थं दृश्यते तथैव ज्ञानकरणं शरीरेन्द्रियादिकमपि कर्तारं विना स्वज्ञानादिकार्याय समर्थं भवितुं न शक्नोतीति शरीरेन्द्रियादिसञ्चालककर्तृत्वेनात्मा सिद्धयति। अनुमानञ्च शरीरेन्द्रियादीनि सकर्तृकाणि करणत्वात्, यद्यत् करणं तत् सकर्तृकमिति व्याप्त्या कुठारादिदृष्टान्तेन सकर्तृकत्वव्याप्यकरणत्ववन्ति शरीरेन्द्रियादीनि इति परामर्शेण शरीरेन्द्रियादीनि सकर्तृकाणीत्यनुमितिः सिद्धयति पुनश्च शरीरेन्द्रियादीनि आत्मरूपकर्तृकाणि तदन्याकर्तृकत्वे सति सकर्तृकत्वादिति परिशेषानुमानेन शरीरेन्द्रियकर्तृत्वेनात्मा सिद्धयतीति।

**ननु शरीरमेव चेतनः स्यात् ज्ञानादेस्तदतिरिक्तवृत्तित्वे मानाभावादिति चेदाह विश्वनाथपञ्चाननः-**

**मुक्तवली-** **शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः। ननु शरीरस्यैव कर्तृत्वमस्त्वत आह शरीरस्येति। ननु चैतन्यं ज्ञानादिकमेव, मुक्तात्मनां त्वन्मत इव मृतशरीराणामपि तदभावे का**

**क्षतिः ? प्राणाभावेन ज्ञानाभावस्य सिद्धेदिति चेन्न, शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थविरे स्मरणानुपपत्तेः शरीराणामवयवोपचयापचयैरूत्पादविनाशशालित्वात्। न च पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उत्पद्यत इति वाच्यम्, अनन्तसंस्कारकल्पने गौरवात्, एवं शरीरस्य चैतन्ये बालकस्य स्तन्यपाने प्रवृतिर्न स्यात्, इष्टसाधनताज्ञानस्य तद्धेतुत्वात्तदानीमिष्टसाधनतास्मारकाभावात्। मन्मते तु जन्मान्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः। न च जन्मान्तरानुभूतमन्यदपि स्मर्यतामिति वाच्यम्, उद्बोधाभावात्। अत्र त्वनायत्या जीवनादृष्टमेवोद्बोधकं कल्प्यते। इत्थञ्च संसारस्यानादितया आत्मनोऽनादित्वसिद्धावनादिभावस्य नाशासम्भवान्नित्यत्वं सिद्धयतीति बोध्यम्।**

**व्याख्या-** चार्वाकाः शरीरमेवात्मेति स्वीकुर्वन्ति, यतो हि अहं स्थूलः, सूक्ष्म इत्यादिप्रतीत्या शरीरस्य चैतन्यसिद्धेरिति चेद् अत्राह नैय्यायिकाः शरीरस्य न चैतन्यं मृतेषु व्यभिचारत इति अर्थात् यदि शरीरमात्मा स्यात्तदा शरीररूपात्मसत्त्वे ज्ञानादितत्कार्यमपि स्यादिति मृतावस्थायां शरीरस्य सत्त्वात्तत्रापि ज्ञानादिकमपि स्यात् यदि च ज्ञानं तदा नास्तीत्युच्यते तदा शरीरमपि न स्यात् किन्तु तथा न भवतीति शरीरं नात्मा। ननु चैतन्यं यद्यात्मधर्मोऽथवात्मकार्यं तदा मुक्तावस्थायां ज्ञानाभावादात्मरूपकारणसत्त्वेन व्यभिचारः प्रसरतीति ज्ञानं प्रति प्राणविशिष्टात्मा कारणमिति यथा नैय्यायिकानां सम्मतिस्तथैवास्मन्मतेऽपि ज्ञानं प्रति प्राणविशिष्टशरीरं कारणमिति स्वीकृत्य मृतशरीरे आदितव्यभिचारं वारयितुं शक्यतेऽतः शरीरस्यात्मत्वं सम्भवतीति चार्वाकाणां शरीरात्मवादं निराकुर्वन् नैय्यायिकाः वदन्ति शरीरस्य चैतन्ये इत्यादि तस्यायमाशयः। यदि शरीरमात्मा स्यात् तदा तस्यावयवोपचयापचययैरुत्पादविनाशशालित्वेन प्रतिक्षणं परिवर्तनशीलत्वं सिद्धयतीति तस्य अनित्यत्वेन बाल्ये दृष्टवस्तुनः संस्कारस्यापि शरीरनाशेन नाशात् स्थविरे तस्य वस्तुनः स्मरणं न स्यात् किन्तु भवति स्मरणमिति शरीरं नात्मा। न च तत्र बाल्यशरीरोत्पन्नेन संस्कारेण तच्छरीरनाशकाले संस्कारान्तरोत्पाद्यते इति वाच्यम् तदानन्तशरीरेषु अनन्तसंस्कारकल्पनायां महद्गौरवमायाति।

नन्वस्तु गौरवम्, फलमुखगौरवस्यादोषात्वादिति चेद् दोषान्तरमाह शरीरस्य चैतन्ये बालकस्य स्तन्यपाने प्रवृत्तिर्न स्यादिति, अर्थादिष्टसाधनताज्ञानस्य प्रवृत्तिसामान्यं प्रति कारणत्वेन बालकस्योत्पत्तिपूर्वकाले इदानीं तदभावात् पूर्वजन्मनः इष्टसाधनताज्ञानजन्यसंस्कारस्य च नाशात् स्मरणाभावात् बालकस्य स्तन्यपाने प्रवृतिर्न स्यात् तद्विना च बालो न जीवेदिति शरीरं नात्मा। ननु तव मते कथं बालकस्य प्रवृत्तिरिति चेदाह नैय्यायिकः मन्मते इत्यादिना। अर्थात् नैय्यायिकमते त्वात्मा नित्यः, नित्ये चात्मनि विद्यमानः पूर्वजन्मानुभवेन वस्तुविषयकस्य संस्कारस्येदानीमपि सत्त्वात् तेनोत्पन्नेन स्मरणेन प्रवृत्तिरिति न काचनापत्तिः। न च जन्मान्तरानुभूतमन्यदपि वस्तु स्मर्यतामिति चेन्न, अन्यवस्तुविषयकसंस्कारस्योद्बोधकाभावान्न स्मरणम्। ननु तर्ह्यत्रापि संस्कारोद्बोधकं न स्यादिति चेन्न अत्र तूद्बोधकाभावे स्मरणाभावेन प्रवृत्यभावाज्जीवनमेव न स्यादित्यनायत्या किञ्चन जीवनादृष्टरूपमुद्बोधकं कल्पनीयम्।यददृष्टवशाज्जीवः पुनरुत्पद्यते तदेव जीवनादृष्टं बालकस्य स्तन्यपाने प्रवृत्तौ उद्बोधकमिति। इत्थञ्चैतच्छरीरस्य कृते पूर्वजन्मनः संस्कारस्यावश्यकत्वात्तदानीन्तनशरीरस्य

कृते तत्पूर्वजन्मनः संस्कारस्येत्यनादित्वं सिद्ध्यति संसारस्य, संसारस्यानादितया चात्मनोऽप्यनादित्वं सिद्ध्यतीति अनादिभावस्य नाशासंभवादात्मा नित्यः, संसारस्य तु जन्ममरणरूपस्याभावतया नाशः संभवत्येव। नन्वस्तु शरीरं नात्मा किन्त्विन्द्रियमात्मा स्यादिति चेदाह-

**कारिका-** **तथात्वं चेन्द्रियाणामुपघाते कथं स्मृतिः ॥४८॥**

**मुक्तावली-** **ननु चक्षुरादीनामेव ज्ञानादिकं प्रति करणत्वं कर्तृत्वञ्चास्तु विरोधे साधकाभावाद्, अत आह तथात्वमिति। चैतन्यमित्यर्थः। उपघाते=नाशे सति अथाच्चक्षुरादीनामेव। कथं स्मृतिरिति। पूर्वं चक्षुषा साक्षात्कृतानां चक्षुषोऽभावे स्मरणं न स्यात्, अनुभवितुरभावात्, अन्यदृष्टस्यान्येन स्मरणसंभवात्, अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति भावः ॥४८॥**

**व्याख्या-** शरीरस्यात्मत्वं निरस्येदानीमिन्द्रियाणामात्मत्वं निराकरोति तथात्वमित्यादिना। यदीन्द्रियाणामात्मत्वं स्यात्तदेन्द्रियाणां नाशे स्मृतिः कथं स्यात्, अनुभवितुरभावात्, अनुभवस्मरणयोरेककर्तृकत्वनियमेनानुभवितुरभावात् स्मरणं न स्यादित्यर्थः। ननु चक्षुरादीनामिन्द्रियाणां ज्ञानं प्रति करणत्वान्न तेषां कर्तृत्वं कर्तृकरणयोः भिन्नत्वनियमादित्याक्षेपो पूर्वपक्षी तन्निराकरोति, चक्षुरादीनामेव ज्ञानादिकं प्रति करणत्वं कर्तृत्वञ्चास्तु विरोधे साधकाभावादिति अर्थात् घटस्योपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमतः कुलालस्य तल्लक्षणाक्रान्तत्वाद्यथा कर्तृत्वं तथैव तस्य कुलालस्य घटंप्रति व्यापारवदसाधारणकारणत्वात् करणत्वमपि स्वीकार्यमेवोभयलक्षणाक्रान्तत्वादुभयोर्विरोधे प्रमाणाभावात् कुलालः घटं प्रति यथा कर्ता करणञ्च तथैवेन्द्रियाणामपि ज्ञानादिकार्यं प्रति कर्तृत्वं करणत्वञ्चास्तु इति चेन्न, उभयलक्षणाक्रान्तत्वादस्तु कुलालः कर्ता करणञ्च, किन्तु ज्ञानं प्रति इन्द्रियाणि तु करणान्येव, यतो हि यदि ज्ञानं प्रति कर्तार इन्द्रियाणि स्युस्तदेन्द्रियाणां नाशे स्मृतिर्नस्यादर्थात् चक्षुषा साक्षात्कृतस्य वस्तुनः चक्षुषोऽभावे स्मरणं न स्यादनुभवितुरभावात्, यदि च चक्षुषानुभूतस्य वस्तुनः स्मरणमन्येन त्वगादिन्द्रियेण क्रियत इत्युच्यते तदाह अन्येनेत्यादि। अर्थात् यः साक्षात्करोति स एव स्मरति इति अनुभवस्मरणयोरेककर्तृकत्वनियमेन चक्षुषा साक्षात्कृतस्यान्येन स्मरणासंभवाच्चक्षुषा साक्षात्कृतस्यान्येन त्वङ्मनसादिन्द्रियेण स्मरणं न संभवति, न संभवतीदं चैत्रेण दृष्टं वस्तु मैत्रेण स्मर्यत इति। अत इन्द्रियाणि नात्मा। नन्वस्त्विन्द्रियाणि नात्मा किन्तु नित्यस्य मनस आत्मत्वं स्यादत आह-

**कारिका-** **मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्।**

**मुक्तावली–** **ननु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यादत आह- मनोपीति। न तथा =न चेतनम्। ज्ञानादीति। मनसोऽणुत्वात्प्रत्यक्षे च महत्त्वस्य हेतुत्वात् मनसि ज्ञानसुखादिसत्त्वे तत्प्रत्क्षानुपपत्तिरित्यर्थः। यथा च मनसोऽणुत्वं तथाग्रे वक्ष्यते।**

**व्याख्या-** यथेन्द्रियाणि नात्मा तथैव मनोऽप्यात्मा भवितुं न शक्नोति। यदि मन आत्मेति स्वीक्रियते तदा ज्ञानसुखादेः मनो गुणत्वेन तेषां प्रत्यक्षं न स्याद् मनसोऽणुत्वेनाणुवृत्तिगुणादेर्ज्ञानसुखादेः प्रत्यक्षं न स्यात्। भवति च ज्ञानसुखादेः प्रत्यक्षमते ज्ञानसुखादेरणुमनसो गुणत्वं न सम्भवति किन्तु महदात्मगुणत्वमेव,

तदा चात्मपरममहत्त्वगुणयोगादात्मवृत्तिज्ञानसुखादेः प्रत्यक्षत्वं सम्भवति। अयंभावोऽत्र प्रत्यक्षं प्रति महत्त्वपरिमाणं कारणं भवति, यत्र महत्त्वसंबन्धो वर्तते तस्यैव प्रत्यक्षं भवति, अतः पार्थिवपरमाणुवृत्तिरूपादेः प्रत्यक्षं न सम्भवति, यदि च चैतन्यं मनसो धर्मः तदा ज्ञानस्य मनोवृत्तितया तत्र महत्त्वसम्बन्धो न सम्भवति महत्त्वसम्बन्धाभावेन च मनोवृत्तिज्ञानसुखादेः प्रत्यक्षं न स्याद्, भवति च ज्ञानादेः प्रत्यक्षमत ज्ञानादि न मनो धर्मः ज्ञानरूपचैतन्यस्य मनस्यभावान्न मनः चेतनरूपात्मा। ननु कथं मनोऽणु इति चेत्तदग्रे साधयिष्यते।

शरीरेन्द्रियमनसामात्मत्वं निरस्येदानीं विज्ञानस्यात्मत्वं खण्डयति-

**मुक्तावली-** **नन्वस्तु विज्ञानमेवात्मा तस्य स्वतः प्रकाशरूपत्वाच्चेतनत्वम् ज्ञानसुखादिकं तु तस्यैवाकरविशेषः। तस्यापि भावत्वादेव क्षणिकत्वम्, पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञाने हेतुत्वात् सुषुप्त्यवस्थायामप्यालयविज्ञानधारा निराबाधैव, मृगमदवासनावासितवसन इव पूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रान्तत्वान्नानुपपत्तिः, स्मरणादेरिति चेन्न, तस्य जगद्विषयकत्वे सर्वज्ञत्वापत्तिः, यत्किञ्चिद्विषयकत्वे विनिगमनाविरहः, सुषुप्तावपि विषयावभासप्रसङ्गाच्च ज्ञानस्य सविषयत्वात्। तदानीं निराकारा चित्सन्ततिरनुवर्तत इति चेन्न, तस्याः स्वप्रकाशत्वे प्रमाणाभावात्, अन्यथा घटादीनामपि ज्ञानत्वापत्तिः। न चेष्टापत्तिर्विज्ञानव्यतिरिक्तवस्तुनोऽभावादिति वाच्यं, घटादेरनुभूयमानस्यापलपितुमशक्यत्वात्। आकारविशेष एवायं विज्ञानस्येति चेत्, किमयमाकारोऽतिरिच्यते विज्ञानात्, तर्हि समयातं विज्ञानव्यतिरिक्तेन नातिरिच्यते चेत्, तर्हि समूहालम्बने नीलाकारोऽपि पीताकारः स्यात्, स्वरूपतो विज्ञानस्याविशेषात्, अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न, नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशात्। इतरथा विरोधावधारणस्यैव दुरुपपादत्वात्। न वा वासनासंक्रमः सम्भवति, मातृपुत्रयोरपि वासनासंक्रमप्रसङ्गात्। न चोपादानोपादेयभावो नियामक इति वाच्यम्, वासनायाः संक्रमासंभवात्। उत्तरस्मिन्नुत्पत्तिरेव संक्रम इति चेन्न, तदुत्पादकाभावात्, चितामेवोत्पादकत्वे संस्कारानन्त्यप्रसङ्गः। क्षणिकविज्ञानेष्वतिशयविशेषः कल्प्यत इति चेन्न, मानाभावात् कल्पनागौरवाच्च। एतेन क्षणिकशरीरेष्वेव चैतन्यमिति प्रत्युक्तं गौरवादतिशये मानाभावाच्च बीजादावपि सहकारिसमवधानासमवधानाभ्यामेवोपपत्तेः कुर्वद्रूपत्वाकल्पनात्।**

**व्याख्या-** चार्वाकाभिमतशरीरेन्द्रियमनसामात्मत्वं खण्डयित्वेदानी बौद्धाभिमतक्षणिकविज्ञानवादं निरसयितुमारभते। तत्र योगचारबौद्धाः क्षणिकविज्ञानस्यात्मत्वमिच्छन्ति, विज्ञानञ्च ज्ञानमेव, ज्ञानञ्च स्वप्रकाशरूपम्, स्वप्रकाशनायान्यप्रकाशं नापेक्षत इत्यर्थः यथा प्रदीपः। ज्ञानसुखादय आत्मधर्मास्तस्यैव विज्ञानस्याकारविशेषाः, आकारश्च आकार्यभिन्नः सन् आकारिभिन्नत्वेन भासते (तदभिन्नत्वे सति तद्भिन्नत्वेन प्रतीयमान आकारः) यथा कुण्डलकटकादयः स्वर्णस्याकाराः। विज्ञानञ्च क्षणपरिवर्ति पूर्वपूर्वविज्ञानमुत्तरोत्तरं विज्ञानं जनयतीत्यर्थः। विज्ञानस्य च द्वे स्रोतसी (धारे) स्तः, एकमालयविज्ञानमपरञ्च

प्रवृत्तिविज्ञानम्, तत्र प्रवृत्तिविज्ञाने अयं घटः, पट इत्यादिरूपेण विषया भासन्ते चेदालयविज्ञाने विषयाः सर्वे आलीयन्ते केवलं अहमहमित्यात्मकमहमाकारा धारा तत्र चलति। विज्ञानस्यानित्यत्वेन नाशेऽपि पूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने सङ्क्रान्तत्वाद् बाल्यकालानुभूतवस्तुनः स्मरणं स्थविरे संभवति, यथा मृगमदवासनावासितवसनादुत्तरवसने गन्धः सङ्क्रमते तथैव विज्ञानेऽपि संस्काराः सङ्क्रमन्ते। इति बौद्धानामाक्षेपे नैय्यायिका वदन्ति- यदि आत्मा विज्ञानरूपः तदा तस्य विज्ञानरूपात्मनो विषयः कः ? यदि सर्वं जगत्तदास्मदादीनां सर्वज्ञत्वापत्तिः। यदि च यत्किञ्चिद् वस्तु तदा विनिगमनाविरहात् पुनः सर्वज्ञत्वापत्तिरिति नात्मा विज्ञानरूपः किन्तु विज्ञानाश्रयश्चेतनः अन्यच्च यद्यात्मा विज्ञानारूपस्तदा तस्य सुषुप्तावपि सत्त्वात्तदानीमपि विषयावभासापत्तिः स्यात्, विज्ञानस्य सविषयकत्वात्। न च तदानीं निराकारा चित्सन्ततिरनुवर्तत इति चेन्न, तस्याः स्वप्रकाशत्वे=अर्थादात्मत्वे प्रमाणाभावात् विज्ञानस्य सविषयकत्वान्निर्विषयस्य आत्मनो विज्ञानत्वे प्रमाणाभावात्। अन्यथा यदि निर्विषयकस्यापि विज्ञानत्वं स्वीक्रियते तदा घटादीनां विज्ञानविषयाणामपि विज्ञानत्वापत्तिः स्यात्, न चेष्टापत्तिरिति वदितुं शक्यते घटादीनां विज्ञानविषयाणां विज्ञानव्यतिरिक्तत्वेनानुभवस्यापलपितुमशक्यात्वात्। यदि च बौद्धाः घटादीनां विषयाणां विज्ञानस्याकारत्वं स्वीकृत्य तेषां विज्ञानरूपत्वं स्वीक्रियेरन् तदपि निरसति नैय्यायिकः किमयमाकारो विज्ञानादतिरिच्यते न वा ? यद्यतिरिच्यते तदा विज्ञानव्यतिरिक्तवस्तुनः स्वीकारात् सर्वं विज्ञानमयं, विज्ञानव्यतिरिक्तं किमपि नास्तीति तव प्रतिज्ञाहानिः स्यात्, विज्ञानव्यतिरिक्तवस्तुस्वीकारात् समायातं भवता अस्मन्मतं, यदि चाकारो विज्ञानान्नातिरिच्यतेऽर्थाद् घटपटादिवस्तुजातं सर्वं विज्ञानमेवेत्युच्यते तदा विज्ञानस्य स्वरूपत एकत्वेन समूहालम्बनज्ञाने नीलाकारः पीताकारः स्यात्। अयं भावः, यदि आकार आकारिविज्ञानादभिन्नस्तदा विज्ञानस्यैकत्वेन नीलपीतरक्तादीनां विज्ञानाकाराणामपि भेदो न स्याद्, एवञ्च नीलरूपमपि पीतरूपं स्यात्, एवञ्च व्यवहारविरोधः स्यात्। यद्यत्र पुनर्बौद्धा वदेयुः यद्यपि विज्ञानादाकारा अभिन्नास्तथापि नीलरूपाकारे पीतरूपादाकाराद् भेदसाधकोऽनीले पीतादाववर्तमानो नीले एव वर्तमानो नीलत्वरूपोऽपोहधर्मो वर्तते येनाभिन्नेऽपि विज्ञानाकारे परस्परं भेदः साध्यते। अपोह्यते=व्यावर्ततेऽनेनेति व्युत्पत्त्यापोहधर्मोऽभिन्नेऽपि विज्ञानाकारे भेदं साधयति, तस्मान्नीलत्वपीतत्वादिरूपेणातद्व्यावर्तकेन धर्मेण स्वरूपतोऽभिन्नेऽपि विज्ञानाकारे भेदसाधनाद् व्यवहारकाले नीलपीतादौ भिन्नत्वव्यवहारो जायते वस्तुतस्तेऽप्याकारा अभिन्ना एवेति चेत्तदपि न समीचीनम्, यतो हि किं नीलत्वपीतत्वादयो धर्मा विरुद्धा अविरुद्धा वा? यदि विरुद्धास्तर्हि विरुद्धा नीलत्वादय एकत्र विज्ञाने ते वर्तितुमशक्याः, विरुद्धानामेकत्र सत्त्वायोगाद्, यदि चाविरुद्धास्तदा तैः नीलादीनां भेदावधारणं न स्यादतो घटादयो विज्ञानविषया न विज्ञानरूपाः किन्तु विज्ञानभिन्ना विरुद्धधर्मवन्तो वाच्याः।

किञ्च मृगमदवासनावासितवसन इव पूर्वपूर्वविज्ञानस्य संस्कारा उत्तरोत्तरविज्ञाने सङ्क्रमन्तीति यदुक्तं तदप्यसमीचीनं वासनाया गुणत्वेन गुणस्य च निष्क्रियत्वेन सङ्क्रमासंभवान्न पूर्वविज्ञानोत्पन्नसंस्कारस्योत्तरविज्ञाने सङ्क्रमः सम्भवतीति बाल्यानुभूतस्य स्थाविरे स्मरणानुपत्तिस्तदवस्थैव, यदि च गुणस्यापि सक्रियत्वस्वीकारेण वासनायाः सङ्क्रमः स्वीक्रियते तदा मातृवासनायाः पुत्रे सङ्क्रमापतिस्तथा च मात्रानुभूतस्य पुत्रेण स्मरणापत्तिः स्यात्। यदि च वासनासङ्क्रमणे

उपादानोपादेयभावोऽप्यपेक्षत इत्युच्यतेऽर्थादुपादानवासनाया उपादेये सङ्क्रमो भवति, मातुः पुत्रं प्रत्युपादानत्वाभावेन न मातृवासनायाः पुत्रे सङ्क्रमापत्तिरिति चेत्तदप्यकिञ्चित्करं वासनाया गुणत्वेन सङ्क्रमासंभवात् । न चोत्तरस्मिन्नुत्पत्तिरेव सङ्क्रम इति चेत् तत्रोत्तरस्मिन् पूर्वविज्ञानोत्पन्नाया वासनाया उत्पादकाभावात्तदुत्पत्तिर्न संभवति । न चोत्तरविज्ञाने तदेव विज्ञानं पूर्वविज्ञानजनितवासनामुत्पादयतीति चेत्तदा एकस्या एव वासनाया अनन्तधारा कल्पनीया भवतीति महद्गौरवं स्यादतो वासनाश्रयो न विज्ञानं किन्त्वात्मा, स च नित्यः तत्र वृत्तिः वासना चान्त्यस्मृत्यवसायिनीति । न चात्मा न नित्यः किन्तु क्षणिकविज्ञानरूपः किन्तु क्षणिकविज्ञानरूपे आत्मन्येकोऽतिशयविशेषस्तिष्ठति येन च पूर्ववासनामुत्तरस्मिन्नुत्पादयतीति चेत्तादृशातिशयविशेषसत्त्वे प्रमाणाभावान्नातिशयः कल्पनीयः, कल्प्यते चेन्महद्गौरवं स्यादिति नात्मा क्षणिकविज्ञानरूपः किन्तु विज्ञानाश्रयः नित्यो विभुश्च ।

क्षणिकविज्ञानस्यात्मत्वनिरसनेन ये च बौद्धैकदेशिनः क्षणिकशरीरस्यात्मत्वं स्वीकुर्वन्ति तेषामपि मतं खण्डितं भवति, पूर्वोक्तातिशयकल्पने प्रमाणाभावरूपदोषात् तत्कल्पने च महद्गौरवापत्तिरूपदोषाच्च । यथा क्षणिकविज्ञानेऽतिशयो न कल्प्यते तथैव बीजादावपि अतिशयं कल्पयित्वाङ्कुरोत्पत्यनुत्पत्तिकल्पनमपि व्यर्थं यतो हि तद्व्यवस्था सहकारिधरणीसलिलसंयोगासंयोगाभ्यां सम्भवति । अर्थाद् धरणीसलिलादिसहकृताद् बीजादङ्कुरोत्पत्तिः तदसहकृताच्च बीजादङ्कुरानुत्पत्तिरिति सहजकल्पनयैव व्यवस्था सम्भवे महद्गुरुभूतकुर्वद्रूपत्वरूपातिशयकल्पनं व्यर्थं भवतीति तत्रापि कुर्वद्रूपत्वरूपातिशयं न कल्प्यते । तथा च क्षणिकविज्ञानस्यात्मत्वं निरस्तं भवति ।

नन्वस्तु क्षणिकविज्ञाने गौरवादात्तस्यात्मत्वासंभवेऽपि लाघवान्नित्यं विज्ञानमेवात्मास्तु इति वदतां वेदान्तिनां मतमुपपाद्य निरसति ग्रन्थकारः-

मुक्तावली- **अस्तु तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा, अविनाशी वाऽरेऽयमात्मा (वृ. उ. ५ ब्रा १४कं.) सत्यं विज्ञानमनन्तं ब्रह्म (तैति.आ. व. अनु.१) इत्यादिश्रुतेरिति चेन्न, तस्य सविषयकत्वासंभवस्य दर्शितत्वात्, निर्विषयकस्य ज्ञानत्वे मानाभावात्, सविषयकत्वस्याप्यननुभवात् । अतो ज्ञानादिभिन्नो नित्य आत्मेति सिद्धम् । सत्यं ज्ञानमिति तु ब्रह्मपरं जीवे तु नोपयुज्यते । ज्ञानाज्ञानसुखित्वादिभिर्जीवानां भेदसिद्धौ सुतरामीश्वरभेदः । अन्यथा बन्धमोक्षव्यवस्थानुपपत्तेः । योऽपीश्वराभेदबोधको वेदः सोऽपि तदभेदेन तदीयत्वं प्रतिपादयन् स्तौति, अभेदभावनयैव यतितव्यमिति वदति । अत एव "सर्व एवात्मनि समर्पिताः" इति श्रूयते । मोक्षदशायामज्ञाननिवृत्तावभेदो जायत इत्यपि न, भेदस्य नित्यत्वेन नाशासम्भवात् । भेदनाशेऽपि व्यक्तिद्वयं स्थास्यत्येव । न च द्वित्वमपि नश्यतीति वाच्यम्, तव निर्धर्मके ब्रह्मणि सत्यत्वाभावेऽपि सत्यस्वरूपं तदितिवद् द्वित्वाभावेऽपि व्यक्तिद्वयात्मकौ ताविति सुवचत्वात् । मिथ्यात्वाभावोऽधिकरणात्मकस्तत्र सत्यत्वमिति चेदेकत्वाभावो व्यक्तिद्वयात्मको द्वित्वमित्यप्युच्यताम्, प्रत्येकमेकत्वेऽपि पृथिवीजलयोर्न गन्ध इतिवदुभयं नैकमित्यस्य सर्वजनसिद्धत्वात् । योऽपि तदानीमभेदप्रतिपादको वेदः सोऽपि निर्दुःखत्वादिना साम्यं प्रतिपादयति, संपदाधिक्ये पुरोहितोऽयं राजा संवृत्त इतिवत् । अत एव "निरञ्जनः**

**परमं साम्यमुपैति" इति श्रूयते। ईश्वरोऽपि न ज्ञानसुखात्मा, किन्तु ज्ञानाद्याश्रयः। नित्यं विज्ञानमानन्दं ब्रह्म इत्यादौ विज्ञानपदेन ज्ञानाश्रय एवोक्तः, "यः सर्वज्ञः स सर्वविद्" इत्याद्यनुरोधात्। आनन्दमित्यस्याप्यानन्दवदित्यर्थः। अर्शादित्वान्मत्वर्थीयाच्प्रत्ययात्। अन्यथा पुंल्लिङ्गत्वापत्तिः। आनन्दोऽपि दुःखाभावे उपचर्यते, भाराद्यपगमे सुखी संवृत्तोऽहमितिवत्। अस्तु वा तस्मिन्नानन्दो न त्वसावानन्दः, "असुखम्" इति श्रुतेः। न विद्यते सुखं यस्येति कुतो नार्थ इति चेन्न, क्लिष्टकल्पनापत्तेः, प्रकरणविरोधात्, आनन्दमित्यत्र मत्वर्थीयाच्प्रत्यविरोधाच्चेति संक्षेपः।**

**व्याख्या-** बौद्धमते विज्ञानं क्षणिकं = स्वोत्पत्तिद्वितीयक्षणे नश्यति। तथा सति बाल्यानुभूतस्य स्थविरे स्मरणसम्पादनाय पूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने सङ्क्रमः कल्पनीय इत्यनन्तसंस्कारकल्पनाद् गौरवापत्तेस्तच्क्षणिकं विज्ञानं नात्मा किन्तु नित्यस्य विज्ञानस्यात्मत्वेऽनन्तसंस्कारकल्पनाया अनावश्यकत्वेन गौरवाभावात्तदेव नित्यं विज्ञानमात्मा स्यादिति वेदान्तिनो वदन्ति। नित्यस्य विज्ञानस्यात्मत्वे श्रुतिप्रमाणमपि दर्शयति- अविनाशी वाऽरेऽयमात्मा, रे गार्गि! अयमात्माविनाशी=नित्यः। "सत्यं विज्ञानमनन्तं ब्रह्म" ब्रह्म= आत्मा सत्यं= त्रिकालाबाध्यम्, विज्ञानं=चित्स्वरूपं, अनन्तं= अविनाशि, चेति। तथा च श्रुतिप्रमाणसिद्धात्मा स्वप्रकाशरूपो नित्यविज्ञानरूपश्चेति वेदान्तमतमप्यसमीचीनं, यतो हि विज्ञानस्यात्मत्वासम्भवस्य पूर्वमेव प्रतिपादित्वात्। तथा हि यतो विज्ञानं ज्ञानमेव तच्च सविषयकमेव, आत्मा च सविषयको भवितुं न शक्नोति, अस्मदादीनां जीवानां सर्वज्ञत्वापत्तेरतो नित्यं विज्ञानं नात्मा, किन्तु विज्ञानादिभिन्नो विज्ञानाश्रय एवात्मेति। न च श्रुतिविरोधः, यतो हि श्रुतिः नित्यस्य विज्ञानस्यात्मत्वं प्रतिपादयति "सत्यं विज्ञानमनन्तं ब्रह्म" इत्यादिनेति वाच्यम्, सत्यं ज्ञानमित्यादिश्रुतिः न जीवपरा, किन्त्वीश्वरपरा, नन्वीश्वरस्य विज्ञानस्वरूपत्वे तदभिन्नस्य जीवस्यापि विज्ञानस्वरूपत्वं सिद्धयत्येवेति चेन्न, यतो कश्चिज्जीवः सुखी, कश्चिच्च दुःखी, कश्चिज्जीवो ज्ञानी, कश्चिच्चाज्ञानीति जीवानामेव परस्परभेदादीश्वरजीवयोस्तु भेदः सुतरां सिद्धयत्येव। जीवस्य बद्धत्वादल्पज्ञत्वाच्चेश्वरस्य तु स्वतन्त्रत्वात् सर्वज्ञत्वाच्च जीवेश्वरौ भिन्नौ। अतो न जीवेश्वरावभिन्नौ। अन्यथा यदि जीवश्वरयोर्भेदो न स्वीक्रियते तदेश्वरस्य सदा स्वतन्त्रत्वेन जीवस्यापि बन्धमोक्षौ न स्याताम्। अतो जीवस्य बन्धमोक्षव्यवस्थापनाय जीवेश्वरयोः परस्परभेदः स्वीकार्य एव। नन्वयमात्मा ब्रह्म, अहं ब्रह्मास्मि, इत्यादिश्रुतिभिर्जीवब्रह्मणोरभेदप्रतिपादनाज्जीवो नेश्वरभिन्न इति चेन्न, योऽपि वेदो जीवश्वरयोरभेदं प्रतिपादयति स वेद ईश्वराभेदभावनयेश्वरोपासनायां जीवं प्रेरयति। न तु जीवेश्वरयोरभेदं प्रतिपादयति। वस्तुतः स वेद ईश्वरोपासनायै शुद्धत्वादिना जीवे ईश्वरसादृश्यं प्रतिपादयन्तीत्यर्थवादपरास्ताः श्रुतयः। अभेदभावनयेश्वरोपासने जीवः सिद्धिं प्राप्नोतीत्यर्थः। जीवेश्वरयोर्वस्तुतो भिन्नत्वादेव "सर्व एवात्मनि समर्पिताः" इति श्रुतिः सङ्गच्छते। अन्यथा कः कस्मै किं समर्पयेत्। अतः समर्पको जीवः समर्प्यवस्तुतः सम्प्रदानेश्वराच्च भिन्नः।

ननु बन्धदशायामीश्वरो जीवश्च भिन्नौ स्याताम्, मोक्षदशायान्तु जीवो नेश्वरभिन्नः किन्तु तदेश्वर एव जीव इति चेन्न, ज्ञानाज्ञानादिना बन्धदशायां जीवे ईश्वरभेदसिद्धौ, भेदस्य नित्यत्वेन मोक्षदशायामपि स भेदस्तिष्ठत्येव। ननु भेदो न नित्यः किन्तु नश्यतीति चेद् भेदनाशेऽपि जीवेश्वरव्यक्तिद्वयं तिष्ठति।

ननु भेदनाशे द्वित्वमपि नश्यतीति चेद् द्वित्वनाशेऽपि व्यक्तिद्वयं तिष्ठत्येव। यथा वेदान्तिनां मते निर्धर्मके ब्रह्मणि सत्यत्वाभावेऽपि ब्रह्म सत्यम्, तद्वद् द्वित्वाभावेऽपि जीवेश्वरव्यक्तिद्वयं सत्यम्। ननु सत्ये ब्रह्मणि सत्यत्वं वर्तत एव किन्तु तत्सत्यत्वं मिथ्यात्वाभावरूपम्, अभावश्चाधिरणात्मक इति मिथ्यात्वाभावरूपं सत्यत्वं सत्यरूपे ब्रह्मणीति चेदेकत्वाभावरूपं द्वित्वं व्यक्तिद्वयात्मकं जीवेश्वरयोर्वर्तत एव। ननु जीवो ब्रह्म च प्रत्येकमेकं कथं तत्रैकत्वाभाव इति चेत्, प्रत्येकस्मिन् जीव ईश्वरे चैकत्वस्य सत्त्वेऽपि तयोरेकत्वावच्छेदेनैवैकत्वं तिष्ठतीति द्वित्वावच्छेदेन तस्यैकत्वाभावस्य सत्त्वे न विरोधः। यथा पृथिव्यां गन्धस्य जले च स्नेहस्य सत्त्वेऽपि द्वित्वावच्छेदेन पृथिवीजलयोर्न गन्धो न वा स्नेह इति प्रतीतिः प्रमात्मिका। तथैव जीवेश्वरयोरेकत्वावच्छेदेनैकत्वसत्त्वेऽपि द्वित्वावच्छेदेन तयोर्नैकत्वमिति प्रतीतेः प्रमात्वात्। योऽपि मोक्षदशायामभेदप्रतिपादको वेदः सोऽपि मोक्षदशायां तत्त्वज्ञानेन मिथ्याज्ञाननिवृत्तौ परम्परया वासनादिनाशनेन निर्दुःखत्वादीश्वरसाम्यं प्रतिपादयति न त्वभेदः। सम्पदाधिक्ये पुरोहितोऽयं राजा संवृत्त इतिवत्। मोक्षदशायां जीवस्येश्वरसाम्यादेव निरञ्जनः परमं साम्यमुपैतीति प्रतिपादयति वेदः। निर्गताः अञ्जना रागादयो दोषा यस्मादिति निरञ्जनः =ज्ञानिपुरुष ईश्वरस्य परमं साम्यं प्राप्नोतीत्यर्थः। नन्वस्तु जीव ईश्वराद् भिन्नः, अस्तु च जीवो विज्ञानाश्रयः, परमीश्वरस्तु "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिश्रुतिप्रतिपादितत्वाद् विज्ञानरूपोऽस्त्वीति चेद्, नेश्वरोऽपि विज्ञानरूपोऽपि तु विज्ञानाश्रयरूप एव। नित्यं विज्ञानमानन्दं ब्रह्मेति श्रुतौ विज्ञानपदेन विज्ञानाश्रय एवोक्तः। अत एव श्रुतिराह "यः सर्वज्ञः स सर्वविद्" इति, यः सर्वविषयकविशेषज्ञानवान् सः सर्वविषयकसामान्यज्ञानवानित्यर्थः। आनन्दमित्यस्याप्यानन्दाश्रय एवार्थः, अन्यथा "स्यादानन्दः स्थुरानन्दः" इत्यादिकोशनिर्देशादानन्दशब्दस्य पुंल्लिङ्गत्वेन सत्यं ज्ञानमानन्दो ब्रह्मेति श्रुतिनिर्देशः स्यात्, अतः अर्शादिगणपठितत्वेन आनन्दशब्दान्मत्वार्थीयाच्प्रत्ययेन सिद्धानन्दशब्दस्य विशेष्यब्रह्मलिङ्गत्वेन क्लिवत्वमुपपद्यते। अत एव "आनन्दो ब्रह्मेति व्यजानत" इत्यादिगौणी श्रुतिः प्रसिद्धास्ति। ईश्वरे आनन्दोऽपि दुःखाभावे उपचर्यते। भाराद्यपगमे सुखी संवृत्तोऽहमितिवत्।

किञ्चास्त्वीश्वरे आनन्दः, न त्वीश्वर आनन्दरूपः। "असुखम्" इत्यादिश्रुतिनिर्देशात्। ननु असुखमित्यत्र न विद्यते सुखं यत्रेति बहुब्रीहिः कथं न कल्प्यत इति चेन्न, तथा सति क्लिष्टकल्पनापत्तिः स्यात्। न च फलमुखगौरवमिष्टापत्तिकरमिति चेन्न, प्रकरणविरोधात्, असुखमित्यादिप्रकरणे अशरीरं, अस्थूलं, अनणुः, इत्यादौ नञ्तत्पुरुषस्यैव ग्रहणात् असुखमित्यत्र वहुब्रीहिकल्पनं प्रकरणविरुद्धं स्यादित्यर्थः। आनन्दमित्यत्र मत्वर्थीयाच्प्रत्ययविरोधाश्च। अत ईश्वरो नानन्दरूपः किन्तु आनन्दाश्रयः। तथा च नित्यविज्ञानस्याप्यात्मत्वं निरस्तमिति।

नन्वस्त्वात्मा विज्ञानादिभिन्नो नित्यो विज्ञानाश्रयः, किन्तु स आत्मा न कर्तापि तु पुष्करपलाशवन्निर्लिप्तः, कर्त्री तु प्रकृतिरेवेति वदतां साङ्ख्यानामतमप्युपपाद्य निरस्यति विश्वनाथपञ्चाननः-

**मुक्तावली-** **एतेन प्रकृतिः कर्त्री, पुरुषस्तु पुष्करपलाशवन्निर्लेपः, किन्तु चेतनः कार्यकारणयोरभेदात् कार्यनाशे सति कार्यरूपतया तन्नाशोऽपि स्यादित्यकारणत्वं तस्य, बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत्कल्पनम्। बुद्धिश्च प्रकृतेः परिणामः। सैव**

**महत्तत्त्वम्, अन्तःकरणमित्युच्यते। तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ। तस्या एवेन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना सम्बन्धः। पुरुषे कर्तृत्वाभिमानो, बुद्धौ चैतन्याभिमानश्च भेदाग्रहात्। ममेदं कर्तव्यमिति मदंशः पुरुषोपरागो, बुद्धेः स्वच्छतया तत्प्रतिबिम्बादतात्विको दर्पणस्येव मुखोपरागः। इदमिति विषयोपरागः, इन्द्रियप्रणालिकया परिणतिभेदस्तात्विको निःश्वासाभिहतदर्पणस्येव मलिनिमा। कर्तव्यमिति व्यापारांशः, तेनांशत्रयवती बुद्धिः, तत्परिणामेन ज्ञानेन पुरुषस्यातात्विकः सम्बन्धो दर्पणमलिनिम्नेव मुखस्योपलब्धिरुच्यते। ज्ञानवत्सुखदुःखेच्छाद्वेषधर्माधर्मा अपि बुद्धेरेव, कृतिसामानाधिकरण्येन प्रतीतेः। न च बुद्धिश्चेतना परिणामित्वादिति मतपमास्तम्। कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेस्तद्भिन्ने मानाभावाच्च। चेतनोऽहं करोमीति प्रतीतिश्चैतन्यांशे भ्रम इति चेत्, कृत्यंशेऽपि किं नेष्यते। अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्वमसंसारापत्तिः। नन्वचेतनायाः प्रकृतेः कार्यत्वाद् बुद्धेरचैतन्यं कार्यकारणयोस्तादात्म्यादिति चेन्न, असिद्धेः। कर्तुर्जन्यत्वे मानाभावात्। "वीतरागजन्मादर्शनात्" अनादित्वम्। अनादिभावस्य नाशासंभवान्नित्यत्वम्। तत्किं प्रकृत्यादिकल्पनेन ? न च "प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताहमिति मन्यते" इत्यनेन विरोध इति वाच्यम्, प्रकृतेः = अदृष्टस्य, गुणैः = अदृष्टजन्यैरिच्छादिभिः, कर्ताहमेवेत्यस्य तदर्थत्वात्। तत्रैवं सति कर्तारमात्मानं केवलं तु य इत्यादिवदता भगवता प्रकटीकृतोऽयमुपरिष्टादाशय इति संक्षेपः।**

**व्याख्या-** ज्ञानस्य सविषयकत्वेनात्मनश्च सविषयकत्वासंभवान्नात्मा विज्ञानरूप इत्यादियुक्तिभिरात्मनो ज्ञानादिभिन्नज्ञानादिमत्त्वसाधनेन वक्ष्यमाणकृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्येन प्रतीतेरिति युक्त्या चात्मा निर्गुणः, प्रकृतिः कर्त्रीत्यादिसाङ्ख्यमतमप्यपास्तं भवति। तत्र साङ्ख्यमतमित्थं निरूपयति विश्वनाथपञ्चाननः- प्रकृतिपुरुषौ मूलभूतौ पदार्थौ स्तः। तत्र मूलप्रकृतिर्हि महत्तत्वस्य कारणभूता, ततो मूलप्रकृतित उत्पन्नया बुद्ध्याहङ्कार उत्पद्यते, तस्माच्चाहङ्कारात् शब्दस्पर्शरूपरसगन्धतन्मात्राणि पञ्च, श्रोत्रत्वक्चक्षूरसनाघ्राणख्यानि ज्ञानेन्द्रियाणि पञ्च, वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि पञ्च, एकमन्तरेन्द्रियं मनश्चेति षोडशगणा उत्पद्यन्ते, तेषु षोडशसु मध्ये पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि (शब्दतन्मात्रादाकाशः, स्पर्शतन्मात्राद् वायुः, रूपतन्मात्रात्तेजः, रसतन्मात्राज्जलम्, गन्धतन्मात्राच्च पृथिवी) उत्पद्यन्ते। एवञ्चैते चतुर्विंशतिसंख्यकाः पदार्थाः प्राकृतिकाः, पुरुषस्त्वेतैरसंपृक्तः पुष्करपलाशवन्निर्लिप्तः, किन्तु चेतनः, प्रकृतेर्जडवत्वात् प्राकृतिकाः पदार्था अपि जडाः। साङ्ख्यसिद्धान्तानुसारेण कार्यकारणयोरभेदेन कार्यनाशे कारणस्यापि नाशात् पुरुषः न कस्यापि कार्यः, नापि कारणम्। कारणञ्च प्रकृतिः तस्याः परिणामा बुद्ध्यादयः। कर्तृभूतायां बुद्धौ चैतन्याभिमानान्यथानुपपत्या पुरुषः कल्पनीयः। अभिमानस्य भ्रमरूपतया भ्रमस्य चाधिष्ठानं विनासंभवात् पुरुषः कल्पनीयः।

बुद्धेरेव महत्तत्त्वं, अन्तःकरणमिति नामान्तरम्। बुद्धिपुरुषयोः सम्बन्धादेव संसारः, असम्बन्धाच्च लयः। सैव बुद्धिर्यदेन्द्रियप्रणालिकया बहिःनिःसृत्य घटाद्याकारेण परिणमते, स एव परिणामः बुद्ध्याः घटादिना

सम्बन्धो ज्ञानम् । बुद्धिपुरुषयोरभेदग्रहाच्च ज्ञानस्य पुरुषेण सहातात्विकः सम्बन्धो जायते । अभेदभ्रमादेव पुरुषस्य चैतन्यं बुद्धावाभासते । तथा च चैतन्यं ज्ञानभिन्नं पुरुषधर्मः ज्ञानञ्च बुद्धिपरिणामो बुद्धेरेव धर्मः ।

एवमेवेच्छा-सुख-दुःखादयोऽपि धर्मा बुद्धेरेव ।

ममेदं कर्तव्यमिति व्यवहारेंऽशत्रयमस्ति । तत्र मदंशः पुरुषोरागः, तस्य बुद्ध्या सह सम्बन्धोऽतात्विकः, आरोपित इत्यर्थः । यथा स्वच्छदर्पणे मुखस्यारोपितोऽवास्तवः सम्बन्धो जायते, तथैव बुद्धेरपि स्वच्छतया दर्पणस्थानापन्नायां बुद्धौ पुरुषस्यावास्तवः सम्बन्धः । इदमिति विषयभागः, तस्य च बुद्ध्या सह वास्तवः सम्बन्धः, बुद्धिर्हीन्द्रियप्रणालिकया विषयदेशेन सह सम्बद्ध्यते । यथा निःश्वासाभिहतदर्पणस्य साकं मलिम्नः सम्बन्धो वास्तवः । कर्तव्यमिति व्यापारः बुद्धेरेव साक्षाद्धर्म इत्यंशत्रयवती बुद्धिः । तत्रैवेयं ममेदं कर्तव्यमिति प्रतीतिः बुद्धिपुरुषयोरभेदादत्र बुद्धिपरिणामेन ज्ञानेन सह पुरुषस्य सम्बन्धो यो भासते स त्वतात्विकः । यथा दर्पणगतमलिम्ना मुखे मलिम्नः प्रतीतिर्भवति, तत्र दर्पणगतमलिम्नो मुखे सम्बन्धो यद्यपि नास्ति तथापि दर्पणस्य स्वच्छतया तत्र मुखप्रतिबिम्बाद् दर्पणगतमलिम्नः सम्बन्धोऽपि मुखे भासते स तु भ्रमः । ज्ञानवत्सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव धर्माः कृतिसामानाधिकरण्येन प्रतीतेः । यो जानाति स एव करोति स एव च सुखं भुङ्क्ते इति प्रत्ययात् । ननु तर्हि चैतन्यमपि बुद्धेरेव स्यादिति चेन्न, मूलप्रकृतेः परिणामित्वाद् बुद्धिरपि परिणामिनी, चेतनश्चापरिणामीति बुद्धिर्न चेतनेति साङ्ख्यमतसंक्षेपः । परमेतन्मतं नैय्यायिका न रोचन्ते । यतो हि यदि ज्ञानसुखादयः कृतिसमानाधिकरणास्तदा चैतन्यमपि तत्समानाधिकरणमेव स्वीकार्यं, चेतनोऽहं करोमीति प्रत्ययात् । तत्र कृतिः यत्र तिष्ठति तत्र चैतन्यं न तिष्ठति । बुद्धेः कर्तृत्वेन कृतिस्तत्र वर्तते कृतिमतः कर्तृत्वनियमात् चैतन्यञ्चापरिणामिनो धर्म इति तन्न कृतिसमानाधिकरणमिति युक्तिस्तु व्यवहारापलापिनी । चेतनोऽहं करोमीति प्रतीतौ बुद्धौ चैतन्यांशो भ्रम इति चेत्, तत्र कृत्यंशस्यापि भ्रमत्वं स्वीकृत्य कृतिचैतन्ये उभेऽपि आत्मनो धर्म इति किं न स्वीक्रियते । अतः साङ्ख्याभिमतप्रकृतिकारणतावादं स्वीकृत्य बुद्धिसम्बन्धकृत्संसार इति स्वीकर्तुं न शक्यते । यदि च युक्तिविरोधेऽपि स्वीक्रियते तदा किं बुद्धिर्नित्या ? अनित्या ? वा, यदि नित्या तदा मोक्षाभावः स्यात्, नित्यया बुद्धेः सर्वदैव पुरुषेण नित्येन सह सम्बन्धात्सर्वदैव बन्धनं स्यात्, यदि च बुद्धिरनित्या तदानित्यया बुद्धेरुत्पत्तेः पूर्वमसंसारापत्तिः स्यात्, स्वोत्पत्तेः पूर्वं बुद्धिसम्बन्धाभावात् संसारो न स्यात्, साङ्ख्यमते च संसारोऽनादिमान् स्वीक्रियते ।

किञ्चाचेतनाया बुद्धेः परिणामित्वाद् बुद्धिरचेतना, अनुमानाकारश्चेत्थम्- बुद्धिरचेतना, अचेतनायाः प्रकृतेः कार्यत्वादिति यदुक्तं तदप्यकिञ्चित्करं, यतो ह्यस्यानुमानस्यासिद्धत्वात्, अत्र हि बुद्धिरूपे पक्षे प्रकृतिकार्यत्वरूपस्य हेतोरसत्त्वेन स्वरूपासिद्धिरत्रानुमाने द्रष्टव्या । नन्वस्मन्मते बुद्धौ प्रकृतिजन्यत्वं स्वीक्रियत एवेति कुतोऽसिद्धिरिति चेत्, त्वन्मते सर्वं हि कार्यजातमन्तःकरणरूपबुद्धिजन्यं स्वीक्रियते सर्वकर्तुर्जन्यत्वे तस्यापि जनकोऽपेक्षणीयस्तस्य जनको यदि कश्चित् स्वीक्रियते तदा तत्रैव सर्वकार्यकारणत्वं स्वीकरणीयम्, एवञ्च तस्य सर्वकार्यकारणस्यापि नित्यानित्यत्वे पूर्वोक्त एव दोषस्तदवस्थ इति साङ्ख्यमतं न समीचीनम् । ननु तर्हि सर्वजनिकर्तुर्नित्यत्वे कोऽयं कर्तेत्याकाङ्क्षायामिच्छादिजनिकर्तुनित्यत्वे प्रमाणत्वेन दर्शयति गौतमीयं सूत्रं विश्वनाथपञ्चाननः- "वीतरागजन्मादर्शनाद्" इति अर्थाद् वीतो=नष्टो

रागो=वासना यस्मादितिव्युत्पत्त्या यस्य रागादयो दोषा नष्टा तस्यैव जन्माभावः, यस्य तु रागादयो दोषाः सन्ति तस्य जन्मनियमाद् एतज्जन्मप्रति पूर्वजन्मनो रागस्य कारणत्वेनात्मनोऽनादित्वं सिद्ध्यति, अनादिभावस्य च नाशो न सम्भवतीति आत्मा नित्यः, स एव कर्ता, भोक्ता, ज्ञाता चेति आत्मनः कर्तृत्वेनैव निर्वाहे किं प्रकृत्यादिकल्पनेन । ननु प्रकृत्यादिकल्पनं विना "प्रकृतेः क्रियमाणनि गुणैः कर्माणि सर्वशः । अहंकारविमूढात्मा कर्ताहमिति मन्यते" । इति गीतोक्तभगवद्वचनस्य का गतिः ? इति वाच्यम्,

तस्यार्थान्तरत्वात्, यतो हि– अधिष्ठानं तथा कर्ता करणञ्च पृथग्विधम् । विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् । इत्यादितः पञ्चानां कारणत्वप्रतिपादनानन्तरं–

तत्रैवं सति कर्तारमात्मानं केवलन्तु यः । पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः । इत्यादिना केवलस्यात्मन एव कर्तृत्वनिषेधात्, सहकारिसहकृतस्यात्मनः कर्तृत्वं न निषिद्धम् । तथा च तस्याः कारिकाया अर्थ इत्थं करणीयः– प्रकृतेः=अदृष्टस्य, गुणैः=अदृष्टजन्यैरिच्छादिगुणैः क्रिमाणानि कर्माणि, अहंकारविमूढात्मा कर्ताहमेव, मदतिरिक्तस्तत्र कोऽपि नावश्यक इति मन्यते, स चाभिमानस्तस्य भ्रमः, स दुर्मतिः पश्यन्नपि न पश्यति इत्यादिनाशयेनात्मनः कर्तृत्वमेव प्रतिपादयति भगवान् । अत आत्मा कर्ता, भोक्ता च । तस्य चात्मनो गुणादीन् प्रतिपादयति विश्वनाथपञ्चाननः-

**कारिका-** **धर्माधर्माश्रयाध्यक्षो विशेषगुणयोगतः ॥४९॥**

**मुक्तावली–** **धर्माधर्माश्रय इति । आत्मेत्यनुषज्यते । शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणा देहान्तरेण भोगानुपपत्तेः । विशेषगुणयोगत इति । योग्यविशेषगुणस्य ज्ञानसुखादेः सम्बन्धेनात्मनः प्रत्यक्षत्वं सम्भवति न त्वन्यथा, अहं जाने, अहं करोमीत्यादिप्रतीतेः ।**

**व्याख्या-** अयमात्मा धर्माधर्मसुखदुःखेच्छाद्वेषप्रयत्नभावनाश्रयश्च वर्तते । धर्मादेः शरीरवृत्तित्वे शरीरनाशे तेषामपि नाशात् पूर्वजन्मनि कृतकर्मणः संस्कारस्य नाशाद् देहान्तरेण तत्फलभोगानुपपत्तेः, देहान्तरञ्च पूर्वजन्मार्जितसंस्काराधीनम्, तं विना चोत्तरदेहस्य स्थितिरेव न स्यादतो धर्माधर्मसंस्कारादेराश्रयो नित्य आत्मा स्वीकार्यः । स चात्मा ज्ञानसुखादिगुणयोगेनैव प्रत्यक्षविषयो न तु ज्ञानादिरहितः शुद्ध आत्मा प्रत्यक्षयितुं शक्यः, अहं जाने, अहं सुखी, अहं करोमीत्यादिप्रत्ययाद् विशेषगुणयोगादेवात्मा प्रत्यक्षविषय इति सिद्धम् ।

ननु परकीये शरीरे परकीयात्मा कथं ज्ञायत इत्यत आह-

**कारिका-** **प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः ।**

**मुक्तावली–** **अयमात्मा परदेहादौ प्रवृत्त्यादिनानुमीयते, प्रवृत्तिरत्र चेष्टा, ज्ञानेच्छायत्नादीनां देहेऽभावस्योक्तप्रायत्वाच्चेष्टायाश्च प्रयत्नसाध्यत्वाच्चेष्टया प्रयत्नवानात्मानुमीयत इति भावः । अत्र दृष्टान्तमाह- रथेति । यद्यपि रथकर्म चेष्टा न भवति तथापि तेन कर्मणा सारथिर्यथानुमीयते तथा चेष्टात्मकेन कर्मणा परात्मानुमीयते इति भावः ।**

**व्याख्या-** स्वदेहे आत्मा अहं जाने, अहं सुखीत्याद्यपरोक्षज्ञानेन सिद्ध्यति परदेहे त्वात्मा तदीयशरीरवृत्तिकर्मणानुमेयः। यतो परकीयदेहवृत्तिचेष्टात्मकं कर्म प्रयत्नसाध्यं वर्तते, प्रयत्नं विना चेष्टादीनां गुणानामनुत्पत्तेः परकीयदेहवृत्तिचेष्टया तज्जनकीभूतः प्रयत्नस्तत्रानुमेयो भवति तथा चानुमानकारः– परकीयशरीरं अवच्छेदकतासम्बन्धेन प्रयत्नवत् चेष्टावत्त्वात्, मच्छरीरवद्, यत्र च चेष्टा वर्तते तत्र प्रयत्नोऽवश्यंभावी । चेष्टायाः प्रयत्नजन्यत्वात्, तस्य च प्रयत्नस्याश्रयो न शरीरं न वेन्द्रियमन आदिकम्, प्रयत्नस्य ज्ञानसुखधर्मादिसमानाधिकरणत्वाज्ज्ञानसुखादीनां शरीरादिवृत्तित्वे बाल्यानुभूतस्य स्थविरे स्मरणानुपपत्तिदोषात्, बालकस्य स्तन्यपाने प्रवृत्यनुपपत्त्यादिदोषाच्च प्रयत्नादयो न शरीरवृत्तयः । अतस्तेषां प्रयत्नादीनामाश्रय आत्मा तत्रानुमेयः। अनुमानाकारश्च परकीयदेहवृत्तिचेष्टाजनकप्रयत्नादयो गुणाः क्वचिद्द्रव्याश्रिता गुणत्वाद्, ज्ञानादिवदित्यनुमानेन तादृशप्रयत्नाश्रयतया पारिशेष्यात् परकीय आत्मा सिद्ध्यति। यथा रथस्य गत्या रथसञ्चालकः सारथिरनुमीयते, तथैव परदेहवृत्तिचेष्टया परकीयात्मानुमीयते। यद्यपि दृष्टान्ते जडात्मकरथे चेष्टा न भवति तथापि जडरथवृत्तिकर्मणा यथा तत्सञ्चालकः सारथिरनुमीयते तथैव जडदेहवृत्तिचेष्टात्मककर्मणा तादृशचेष्टाजनकः परकीयात्मा तत्र कल्पनीय इत्येव सामान्यम्। पुनरपि परकीयात्मसाधारणधर्मान् निरूपयति-

**कारिका–** **अहंकारस्याश्रयोऽयं मनोमात्रस्य गोचरः ॥५०॥**

**विभुर्बुद्ध्यादिगुणवान्..........................।**

**मुक्तावली–** **अहङ्कारस्येति। अहङ्कारोऽहमितिप्रत्ययस्तस्याश्रयो विषय आत्मा, न शरीरादिरिति भावः। मन इति। मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयो मानसप्रत्यक्षविषयश्चेत्यर्थः। रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात् ॥५०॥ विभुरिति। विभुत्वं परममहत्परिमाणवत्त्वम्। तच्च पूर्वमूक्तमपि स्पष्टार्थमुक्तम्। बुद्ध्यादीति। बुद्धिसुखदुःखेच्छादयश्चतुर्दशगुणाः पूर्वमुक्ता वेदितव्याः ॥**

**व्याख्या-** आत्माहमिति प्रतीतिविषयः, अहं जाने, अहं करोमि, अहं सुखीत्यादिप्रत्ययेऽहं पदेनात्मा बुध्यते। अहं प्रतीतिविषयः शरीरादिर्न संभवति। स चात्मा मन इन्द्रियेण प्रत्यक्षविषयो भवति। मनोभिन्नेन्द्रियेणात्मा प्रत्यक्षयितुं न शक्यते रूपाद्यभावात्। आत्मा च विभुः = परममहत्परिणामवान्। आत्मनि बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाश्चतुर्दश सन्ति ।

## पदानामर्थपरिचयः

अप्रयोजकत्वम् = व्यभिचारवारकतर्कशून्यत्वम्

फलानुपधानम् = कार्याविशिष्टम्

उपचयः = वृद्धिः

अपचयः = ह्रासः

विनिगमना = एकतरपक्षपातिनी युक्तिः

चित्सन्ततिः = ज्ञानधारा

स्वप्रकाशः = आत्मप्रकाशाय प्रकाशान्तरनिरपेक्षः

अपलापः = सतोऽप्यसत्त्वेन कथनम्

आकारः = तदभिन्नत्वे सति तद्भिन्नत्वेन प्रतीयमानः

अपोहः = व्यावर्तकः (अपोह्यते व्यावर्ततेऽनेन सोऽपोहः

निरञ्जनः = निर्गतमञ्जनं रागादि यस्मात् सः, निर्दोषः, अज्ञानरहितः

कुर्वद्रूपवत्वम् = कुर्वत् फलोन्मुखं रूपं यस्य तत् कुर्वद्रूपं तस्य भावः कुर्वद्रूपत्वम्, फलस्यासाधारणकारणीभूतातिशयविशेषत्वम्

जीवनादृष्टम् = शरीरधारणानुकूलवासनाविशेषः, ( जीवनं = प्राणस्थितिस्तत्प्रयोजकमदृष्टम्)

अनायत्या = अगत्या (अन्याथानुपपत्त्या)

संसारः = सम्यक्प्रवहमानं जन्ममरणचक्रम् ।

सामानाधिकरण्यम् = एकाधिकरणवृत्तित्वम् ।(एककर्तृकत्वम्)

मृगमदः = कस्तूरिका

वासना = गन्धविशेषः, भावना वा

समूहालम्बनं = नानामुख्यविशेष्यताशालि ज्ञानम्

उपादानोपादेयभावः = समवायिकारणस्य कार्येण सह कार्यकारणभावः

अतिशयः = शक्तिविशेषः

वीतरागः = विगता रागादयो दोषा यस्मात् स तत्त्वज्ञानी

## अभ्यासः

### १. विस्तृतेनोत्तरेणोत्तरयत

(क) आत्मत्वजातिसाधकं प्रमाणमुपस्थाप्य सा जातिरीश्वरेऽस्ति न वेति विचारयत ।

(ख) बौद्धाभिमतक्षणिकात्मवादमुपपाद्य खण्डयत ।

(ग) नित्यविज्ञानस्यात्मत्वे प्रमाणमुपपाद्य तन्निराकुरुत ।

(घ) प्रकृतिकर्तृत्ववादिनां साङ्ख्यानामतमुपपाद्यात्मकर्तृत्ववादं स्थापयत ।

## २. सङ्क्षिप्तोत्तरेणोत्तरयत

(क) आत्मसाधकमनुमानप्रमाणं दर्शयत ।

(ख) मानसप्रत्यक्षेणैवात्मनो ज्ञानसम्भवे तत्रानुमानप्रमाणप्रदर्शनस्यावश्यकत्वं प्रदर्शयत ।

(ग) शरीरात्मवादं निरशत ।

(घ) इन्द्रियाणामात्मत्वे दोषं प्रदत्त ।

(ङ) मन आत्मवादं निराकुरुत ।

(च) क्षणिकविज्ञानस्यात्मत्वे बाल्येऽनुभूतस्य कथं स्थाविरे स्मरणं संभवतीति चर्चयत ।

(छ) जीवेश्वरयोर्भेदेऽभेदप्रतिपादिकानां श्रुतीनां का गतिः ?

(ज) अज्ञाननिवृत्तौ जीवेश्वरयोरभेदो भवति न वेति विचारयत ।

(झ) साङ्ख्यमतानुसारेण बुद्धौ चैतन्यसम्बन्धः, पुरुषे च कर्तृत्वसम्बन्धो भवति न वा ?

(ञ) परकीयात्मसाधकं प्रमाणमुपपादयत ।

## ३. अतिसङ्क्षेपेणोत्तरयत

(क) शरीरेन्द्रियादीनामधिष्ठाता कः ?

(ख) शरीरात्मवादिनः के ?

(ग) अन्येनानुभूतस्यान्येन स्मरणं संभवति न वा ?

(घ) न्यायमते मनोऽणुर्वा विभुः ?

(ङ) योगाचारमते सुषुप्तौ विज्ञानस्य कीदृशीधारा प्रवहति ?

(च) निरञ्जन इत्यस्य कोऽर्थः ?

(छ) न्यायमते परमेश्वरो नित्यज्ञानरूपो न वा ?

(ज) साङ्ख्यमते पुरुषः कीदृशः ?

(झ) साङ्ख्यमते बुद्धिश्चेतनाचेतना वा ?

(ञ) चेष्टया परकीये शरीरे किमनुमीयते ?

## ४. कक्षाभ्यासः

(क) चार्वाकाभिमतात्मविषयिणीं चर्चां कक्षायां सखिभिः सह कुरुत ।

(ख) बैद्धाभिमतक्षणिकविज्ञानरूपात्मा कीदृशः? कीदृशञ्च तत्स्वीकृतं क्षणिकत्वमित्यस्मिन् विषये संवादो विधेयः ।

(ग) साङ्ख्याभिमतानि पञ्चविंशतितत्त्वानि कानीति सखिभिः सह परस्परं गणयत ।

**चतुर्थः पाठः**

# बुद्धिनिरूपणम्

**कारिका-** ................**बुद्धिस्तु द्विविधा मता ।**

**अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा ॥५१॥**

**प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ।**

**मुक्तावली–** **अत्रैव प्रसङ्गाद् बुद्धेः कतिपयं प्रपञ्चं दर्शयति- बुद्धिस्त्विवति । द्वैविध्यं व्युत्पादयति अनुभूतिरिति । अनुभूतिश्चतुर्विधेति । एतासां चतसृणां करणानि चत्वारि, "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति सूत्रोक्तानि वेदितव्यानि ।**

**व्याख्या-** आत्मनिरूपणानन्तरमात्मनो गुणभूतां बुद्धिं निरूपयति बुद्धिस्तु इत्यादिना । तत्र बुद्धिर्नाम सर्वव्यवहारासाधारणकारणं गुणः । सा च बुद्धिः द्विविधा । स्मृतिः, अनुभवश्च । तत्रानुभूतिश्चतुर्विधा प्रत्यक्षम्, अनुमितिः, उपमितिः, शाब्दश्चेति । अनुभूतेरेव नामान्तरं प्रमेति । प्रमा च यथार्थानुभवः । यथार्थानुभवात्मिकायाः प्रमायाः करणानि प्रमाणान्यपि चतुर्विधानि, "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति गौतमसूत्रानुसारेण । प्रमायाः = यथार्थानुभवस्य, करणं = साधकतममर्थादसाधारणं कारणमेव प्रमाणमुच्यते । तेन च प्रमाणेन जन्यं यज्ज्ञानं सैव प्रमा यथार्थानुभव इत्यर्थः ।

चतसृषु प्रमासु या प्रत्यक्षप्रमा सा का ? कतिविधा च सेति जिज्ञासायामाह-

**मुक्तावली-** **प्रत्यक्षेति । इन्द्रियजन्यं ज्ञानं प्रत्यक्षम् । यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानं, तथापीन्द्रियत्वेन रूपेणेन्द्रियाणां यत्र ज्ञानम्, करणत्वं तत्प्रत्यक्षमिति विवक्षितम् । ईश्वरप्रत्यक्षन्तु न लक्ष्यम् । "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षम्" इति सूत्रे तथैवोक्तत्वात् । अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्, अनुमितौ व्याप्तिज्ञानस्योपमितौ सादृश्यज्ञानस्य, शाब्दबोधे पदज्ञानस्य स्मृतावनुभवस्य करणत्वात्तत्र तत्र नातिव्याप्तिः । इदं लक्षणमीश्वरप्रत्यक्षसाधारणम् ।**

**व्याख्या-** चतसृषु प्रमासु प्रत्यक्षप्रमेन्द्रियजन्या तथा च भ्रमभिन्नमिन्द्रियजन्यं ज्ञानमेव प्रत्यक्षप्रमा । यद्यपि न्यायमते मनसोऽपीन्द्रियत्वेन मनसो ज्ञानमात्रं प्रति कारणत्वेन चेन्द्रियजन्यज्ञानत्वमिदं लक्षणं प्रत्यक्षभिन्ने ज्ञानमात्रेऽतिव्याप्तम्, तथापि तत्र मनसि द्वौ धर्मौ स्तः, एकं मनस्त्वम्, अपरञ्चेन्द्रियत्वम् ।

यत्र ज्ञाने मनस्त्वेन मनः करणं न तत् प्रत्यक्षं, किन्तु इन्द्रियत्वेन यत्र ज्ञाने मनः करणं तदेव ज्ञानं प्रत्यक्षम् । अत एवेन्द्रियजन्यं ज्ञानं प्रत्यक्षमिति ।

नन्वीश्वरप्रत्यक्षेऽव्याप्तमीश्वरस्येन्द्रियाभावादिति चेन्न, लक्षणस्यास्य जीवप्रत्यक्षमात्रपरत्वात् । अत एव महर्षिगौतमः सूत्रयति- "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षम्" इति । अत्र च सूत्रे इन्द्रियार्थसन्निकर्षोत्पन्नम्, अव्यभिचारि, ज्ञानमिति पदत्रयं प्रत्यक्षस्य लक्षणपरम्, अव्यपदेश्यं व्यवसायात्मकञ्चेति पदद्वयं प्रत्यक्षस्य विभागपरम्, प्रत्यक्षमितिपदं लक्ष्यपरं वर्तते । तत्र व्यभिचारिज्ञानं भ्रमात्मकं ज्ञानम् । तच्च विषयमन्तरा जायतेऽतस्तज्ज्ञानं भ्रमः, भ्रमभिन्नमिन्द्रियजन्यञ्च ज्ञानं प्रत्यक्षं प्रमा । तच्च प्रत्यक्षप्रमात्मकं ज्ञानं द्विविधम्, अव्यपदेश्यं =निर्विकल्पकम्, व्यवसायात्मकं= सविकल्पकम् । तत्र निर्विकल्पकं ज्ञानं शब्देन न भासते, यच्च ज्ञानं शब्देन प्रतिपादयितुं शक्यते तज्ज्ञानं सविकल्पकं वर्तते, यच्च ज्ञानं शब्देनेदमित्थमित्यादिरूपेण प्रतिपादयितुं न शक्यते तदिन्द्रियसन्निपातानन्तरं प्रथमतो जायमानं सूक्ष्मं ज्ञानं यच्च प्रत्यक्षयितुं न शक्यते तज्ज्ञानं निर्विकल्पकम् । यच्च घटोऽयं नील इत्यादिरूपेण शब्देन भासमानं वैशिष्ट्यावगाहि (विशेषणविशेष्ययोः सम्बन्धावगाहि) ज्ञानं तत् सविकल्पकं =व्यवसायात्मकं ज्ञानम् । एवञ्च महर्षिणैवेन्द्रियजन्यस्य ज्ञानस्य प्रत्यक्षत्वप्रतिपादनादिदं लक्षणं जीवप्रत्यक्षमात्रपरम् । अर्थादस्य लक्षणस्य लक्ष्यं जीवप्रत्यक्षमात्रम् । ईश्वरप्रत्यक्षमस्य लक्षणस्य न लक्ष्यम् । यदि च प्रत्यक्षसामान्यस्य प्रकरणत्वादत्रेश्वरप्रत्यक्षसाधारणलक्षणमिष्टमित्युच्यते, तदा "ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्" इति लक्षणं करणीयम् । अनुमितौ ज्ञाने व्याप्तिज्ञानं करणम्, उपमितौ ज्ञाने सादृश्यज्ञानं करणम्, शाब्दे ज्ञाने पदज्ञानं करणम्, स्मृतौ ज्ञाने अनुभवात्मकं ज्ञानं करणं भवतीति तत्तज्ज्ञानं ज्ञानकरणकं ज्ञानमित्युच्यते । जीवप्रत्यक्षस्य तु ज्ञानस्य करणानीन्द्रियाणि भवन्तीति जीवप्रत्यक्षं ज्ञानं ज्ञानाकरणकं ज्ञानमिति तत्र लक्षणसमन्वयः । ईश्वरप्रत्यक्षस्य ज्ञानस्य नित्यत्वेनाजन्यत्वात्तत्र कस्यापि करणस्यापेक्षा न भवतीति तदीश्वरप्रत्यक्षं ज्ञानाकरणकं ज्ञानमिति तत्रापि लक्षणसमन्वयः ।

प्रत्यक्षप्रमाया लक्षणं निरूप्येदानीमनुमित्यादिप्रमाणां लक्षणमाह विश्वनाथपञ्चाननो भट्टाचार्यः-

**मुक्तावली-** **परामर्शजन्यं ज्ञानमनुमितिः । यद्यपि परामर्शप्रत्यक्षादिकमपि ज्ञानं परामर्शजन्यम्, तथापि परामर्शजन्यं हेत्वविषयकं यज्ज्ञानं तदेवानुमितिः । न च कादाचित्कहेतुविषयकानुमितावव्याप्तिरिति वाच्यम्, तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः । एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः । पदज्ञानकरणकं ज्ञानं शाब्दबोधः ।**

वस्तुतो यां काञ्चिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्यक्षावृत्तिजातिमत्त्वमनुमितित्वम् । एवं यत्किञ्चित्प्रत्यक्षादिकमादाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं वाच्यमिति ।

**व्याख्या-** परामर्शो नाम = व्याप्तिविशिष्टपक्षधर्मताज्ञानम्, तत्र व्याप्तिज्ञानं=हेतुः साध्यव्याप्य इतिज्ञानम्, पक्षधर्मताज्ञानं= हेतुमान् पक्ष इत्यात्मकं ज्ञानम् एतद्द्वयज्ञानमनुमितौ कारणम् । ताभ्यां व्याप्तिपक्षधर्मताज्ञानाभ्यां जायमानं साध्यव्याप्यहेतुमान् पक्ष इति ज्ञानं परामर्शः । यथा वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं परामर्शस्तस्मात् परामर्शज्ञानाज्जायमानं पर्वतो वह्निमानिति

ज्ञानमनुमितिः। एवञ्च परामर्शजन्यत्वे सति ज्ञानत्वमनुमितेर्लक्षणमायातम्। नन्विन्द्रियार्थसन्निकर्षात् प्रथमतो जायमानं साध्यव्याप्यहेतुमान् पक्ष इति परामर्शज्ञानं व्यवसायात्मकं=विषयमात्रावगाहि ज्ञानं वर्तते, तस्माच्च परामर्शानुव्यवसायः= व्यवसायस्य पश्चाज्जायमानमात्मविषयज्ञानत्रितयावगाहि ज्ञानं जायते तच्च ज्ञानं परामर्शप्रत्यक्षम्, परामर्शमानसप्रत्यक्षम्, परामर्शानुव्यवसाय इत्यादिशब्दैर्ज्ञायते तस्मिंश्च परामर्शानुव्यवसाये ज्ञाने परामर्शजन्यत्वस्य ज्ञानत्वस्य च सत्त्वात् तत्रातिव्याप्तिरिति चेन्न, हेत्वविषयकपरामर्शजन्यं ज्ञानं परामर्शः, तथा च साध्यव्याप्यहेतुमान् पक्ष इत्यात्मकस्य परामर्शानुव्यवसायज्ञानस्य हेतुविषयकत्वेन परामर्शजन्यत्वेऽपि न तत्रातिव्याप्तिः। न च यत्र हेतुरेव पक्षविशेषणतया पक्षेऽन्तर्भूतः, साध्यविशेषणतया साध्ये वान्तर्भूतः, तत्रानुमितिः धूमविशिष्टपर्वतो वह्निमानित्यात्मिका, पर्वतो धूमव्यापकवह्निमानित्यात्किा वा, तस्या अनुमितेर्हेतुविषयकत्वेन तदनुमितावव्याप्तिः। अथवाचार्यादयोऽनुमितौ लिङ्गोपहितलैङ्गिकत्वं भासत इत्यामनन्ति। अर्थादनुमितिः सर्वत्र साध्यव्याप्यहेतुविशिष्टपक्षावगाहिनी साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्यात्मिकैव जायत इति स्वीकुर्वन्ति तथा च। तन्मतानुसारेणानुमितेराकारः सर्वदैव साध्यवाप्यहेतुमान् पक्षः साध्यवानित्यात्मक इति तादृश्या अनुमितेर्हेतुविषयकतया तत्राव्याप्तिरिति चेत्, काञ्चित् परामर्शजन्यहेत्वविषयिकां पर्वतो वह्निमान् धूमादिति स्थलीयामनुमितिमादाय तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। तादृशज्ञानवृत्त्यनुभवत्वव्याप्या जातिश्चानुमितित्वं जातिः तद्वत्त्वस्यानुमितौ सर्वत्र सत्त्वाल्लक्षणसमन्वयः। अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः। तत्र व्याप्तिनार्म हेतुसाध्ययोरव्यभिचारसम्बन्धः, हेतुव्यापकसाध्यसामानाधिकरण्यं वा, तस्या व्याप्तेर्ज्ञानं हेतुः साध्यव्याप्य इत्यात्मकं पक्षः साध्यवानित्यनुमितौ करणं भवति, साध्यव्याप्यहेतुमान् पक्ष इति परामर्शस्त्वनुमितौ व्यापारः, तथा च व्याप्तिज्ञानकरणकं ज्ञानमनुमितिरित्यनुमितिलक्षणमुपपन्नम्।

अनुमितिलक्षणं विलिख्योपमितिलक्षणं निरूपयति सादृश्यज्ञानकरणकं ज्ञानमुपमितेर्लक्षणमिति। यथा गोसदृशो गवय इति सादृश्यज्ञानाद् गवयो गवयपदवाच्य इत्युपमितिरुत्पद्यते, तत्र ज्ञाने गोसदृशो गवय इति सादृश्यज्ञानं करणं भवतीति समन्वितमुपमितेर्लक्षणम्। अत्रैव प्रसङ्गे शाब्दस्यापि लक्षणं निरूपयति पदज्ञानकरणकं ज्ञानं शाब्दबोधः। शाब्दे हि ज्ञाने पदज्ञानं करणं भवति अतः पदज्ञानकरणकं ज्ञानं शाब्दबोधः। प्रत्यक्षादिप्रमाणामेकप्रकारकलक्षणन्तु यथानुमितेः यां काञ्चिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्यक्षावृत्तिः या जातिः तादृशजातिमत्त्वमनुमितेः लक्षणम्, तादृशी च जातिरनुमितित्वं जातिः। प्रत्यक्षप्रमायास्तु यत्किञ्चित्प्रत्यक्षादिकमादाय तद्व्यक्तिवृत्तिरनुमित्यवृत्तिः या जातिः तादृशजातिमत्त्वं प्रत्यक्षस्य लक्षणम्। एवमेवोपमितिशाब्दयोरपि लक्षणेऽनुसरणीये।

प्रत्यक्षादिप्रमालक्षणं निरूप्येदानीं प्रत्यक्षानुभवभेदान् दर्शयति-

**कारिका-** **घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम्॥५२॥**

**मुक्तावली–** **जन्यप्रत्यक्षं विभजते- घ्राणजादीति। घ्राणजं, रासनं, चाक्षुषं, स्पार्शनं, श्रौत्रं मानसमिति षड्विधं प्रत्यक्षम्। न चेश्वरप्रत्यक्षस्याविभजनान्न्यूनत्वम्, जन्यप्रत्यक्षस्यैव निरूपणीयत्वाद् उक्तसूत्रानुसारात्।**

**व्याख्या-** इन्द्रियजन्यं प्रत्यक्षं षड्विधम्, इन्द्रियाणां षड्विधत्वादिन्द्रियजन्यं प्रत्यक्षमपि षड्विधम्। तत्र षड्विधानीन्द्रियाणि घ्राणरसनाचक्षुःत्वक्श्रोत्रमनांसि, तैर्जायमानानि षड्विधानि प्रत्यक्षाणि घ्राणजरासनचाक्षुषस्पार्शनश्रौत्रमानसानि सन्ति। न चेश्वरप्रत्यक्षस्य नित्यस्यात्राविभजनान्न्यूनत्वमिति वाच्यम्, अत्र प्रकरणे जन्यप्रत्यक्षस्यैव विभजनादीश्वरप्रत्यक्षस्य नित्यत्वेनात्र तन्न विभज्यते। यतो हि लक्षणमप्यत्र जन्यप्रत्यक्षस्यैव कृतमिति विभागोऽपि जन्यप्रत्यक्षस्यैव। इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षमिति गौतमसूत्रे जन्यप्रत्यक्षस्यैव लक्षितत्वात् तस्यैव विभजनाच्च।

इदानीं जन्यप्रत्यक्षं विभज्य तेषां प्रत्यक्षादीनां विषयान् दर्शयति-

**कारिका-** **घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः।**
**तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः॥५३॥**

**मुक्तावली–** **गोचर इति ग्राह्य इत्यर्थः। गन्धत्वादिरिति। आदिपदात् सुरभित्वासुरभित्वपरिग्रहः। गन्धस्य प्रत्यक्षत्वात्तद्वृत्तिजातिरपि प्रत्यक्षा। गन्धाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यमिति बोध्यम्। तथा रस इति रसत्वादिसहित इत्यर्थः। तथा शब्दोऽपि शब्दत्वादिसहितः। गन्धो रसश्च उद्भूतो बोध्यः॥५३॥**

**व्याख्या-** घ्राणेन्द्रियस्य गोचरः =विषयः गन्धत्वगन्धाभावसहितो गन्धोऽस्ति। आदिपदेन सुरभित्वासुरभित्वतदभावाश्च बोध्याः। गन्धाश्रयग्रहणे तु घ्राणस्य योग्यतैव नास्ति। गन्धोऽप्युत्कट एव घ्राणेन ग्राह्यः, रसनेन्द्रियस्य विषयो रसत्वादिसहितो रसः, रसाभावश्च। अत्राप्यादिपदेन मधुरत्वादिजातिर्ग्राह्या। यो गुणो येनेन्द्रियेण गृह्यते तद्गता जातिस्तदभावश्च तेनैवेन्द्रियेण गृह्यत इति नियमाद् मधुरादिरसग्राहकेन्द्रियेण मधुरत्वादिजातिरपि गृह्यत इति। श्रोत्रेन्द्रियस्य विषयास्तु शब्दशब्दत्वशब्दाभावाश्च सन्ति। कत्वखत्वादिजातिरपि श्रोत्रेणैव गृह्यते, पूर्वोक्तनियमात्। रसनया रसोऽप्युद्भूतो गृह्यते। शब्दस्तु श्रोत्रेण श्रोत्रदेशोत्पन्न एव गृह्यते भेर्यादिदेशोत्पन्नः शब्दस्तु न गृह्यते। चक्षुर्ग्राह्यविषयान् दर्शयतीदानीम् -

**कारिका-** **उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसङ्ख्ये।**
**विभागसंयोपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम्॥५४॥**

**क्रिया जातिर्योग्यवृत्तिः समवायश्च तादृशः।**
**गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः॥५५॥**

**मुक्तावली–** **उद्भूतरूपमिति। ग्रीष्मादौ अनुद्भूतरूपमिति न तत्प्रत्यक्षम्। तद्वन्ति उद्भूतरूपवन्ति॥ ५४॥ योग्येति। पृथक्त्वादिकमपि योग्यवृत्तितया बोध्यम्। तादृशः= योग्यव्यक्तिवृत्तिरित्यर्थः। चक्षुर्योग्यत्वमेव कथं तदाह गृह्णाति इति। आलोकसंयोग उद्भूतरूपञ्च चाक्षुषप्रत्यक्षे कारणम्। तत्र द्रव्यचाक्षुषं प्रति तयोः समवायसम्बन्धेन**

**कारणत्वम्। द्रव्यसमवेतरूपादिप्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन, द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेनेति ॥५५॥**

**व्याख्या-** चक्षुषेन्द्रियेणोद्भूतरूपं, उद्भूतरूपवन्ति द्रव्याणि, पृथक्त्वं, सङ्ख्या, विभागः, संयोगः, परत्वं, अपरत्वं, स्नेहः, द्रवत्वं, परिमाणं, क्रिया, योग्यवृत्तिजातिः, योग्यवृत्तिसमवायश्च गृह्यते। परं चक्षुरेतान् पदार्थान् आलोकोद्भूतरूपयोः सम्बन्धे सत्येव गृह्णाति, न केवलं चक्षुरेतान् द्रष्टुं शक्नोति किन्तु आलोकसंयोगोद्भूतरूपसम्बन्धसहकृतं चक्षुः महत्त्वविशिष्टान्नेतान् पश्यति। महत्त्ववैशिष्ट्यञ्चाग्रे वक्ष्यते। पृथक्त्वादयः समवायपर्यन्ता विषयाः सर्वेऽपि योग्यवृत्तय एव प्रत्यक्षविषया भवन्ति। रूपमपि उद्भूतमेव प्रत्यक्षविषयो न त्वनुद्भूतम्, अत एव ग्रीष्मादिगतं चक्षुरादीन्द्रियगतञ्च रूपं प्रत्यक्षयितुं न शक्यते। वह्न्यादेस्तु स्वकीयं रूपं परकीयरूपेणाभिभूतमिति न तत्प्रत्यक्षम्। उद्भूतरूपवन्ति द्रव्याण्यपि महत्त्वविशिष्टान्येव प्रत्यक्षाणि। चक्षुषि पदार्थग्रहणयोग्यता तदैवाच्छति यदा चक्षुरालोकसंयोगविशिष्टं सदुद्भूतरूपविशिष्टमहत्त्वविशिष्टद्रव्यं सङ्गच्छते। तत्र द्रव्यचाक्षुषं प्रत्यालोकसंयोगोद्भूतरूपञ्च समवायेन हेतुः, द्रव्यसमवेतरूपादिचाक्षुषं प्रति आलोकसंयोगोद्भूतरूपे स्वाश्रयसमवायेन हेतुः, द्रव्यसमवेतसमवेतरूपत्वादिचाक्षुषं प्रति आलोकसंयोगोद्भूतरूपे स्वाश्रयसमवेतसमवायेन हेतुर्वर्तते। अर्थाद् यत्र द्रव्ये आलोकसंयोगः, उद्भूतरूपञ्च समवायेन वर्तेते तत्र चक्षुःसंयोगे जाते तस्य द्रव्यस्य प्रत्यक्षं भवति यत्र च द्रव्यसमवेतरूपादौ स्वाश्रयसमवायसम्बन्धेनालोकसंयोगः, उद्भूतरूपञ्च वर्तेते तत्र रूपादौ चक्षुःसंयुक्तसमवायसम्बन्धे जाते तस्य रूपादेः, प्रत्यक्षं जायते। एवमेव यत्र द्रव्यसमवेतसमवेते रूपत्वादौ आलोकसंयोगः, उद्भूतरूपञ्च स्वाश्रयसमवेतसमवायसम्बन्धेन वर्तेते तत्र रूपत्वादौ चक्षुषः संयुक्तसमवेतसमवायसम्बन्धे जाते तस्य रूपत्वादेः प्रत्यक्षं जायते।

**इदानीं त्वचो विषयं दर्शयति-**

**कारिका-** **उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः। रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम् ॥५६॥**

**द्रव्याध्यक्षे.............................।**

**मुक्तावली–** **उद्भूतेति। उद्भूतस्पर्शवद्द्रव्यं त्वचो गोचरः। सोऽपि = उद्भूतस्पर्शोऽपि स्पर्शत्वादिसहितः। रूपान्यदिति। रूपभिन्नं रूपत्वादिभिन्नं यच्चक्षुषो योग्यं तत्त्वगिन्द्रियस्यापि ग्राह्यम्। तथा च पृथक्त्वसङ्ख्यादयो ये चक्षुर्ग्राह्या गुणा उक्ता, एवं क्रियाजातयो योग्यवृत्तयश्च ते त्वचो ग्राह्या इत्यर्थः। अत्रापि = त्वगिन्द्रियजन्येऽपि द्रव्यप्रत्यक्षे रूपं कारणम्। तथा च बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणम्।**

**व्याख्या-** उद्भूतस्पर्शवद्द्रव्यम्, उद्भूतस्पर्शः, स्पर्शत्वं जातिः, उद्भूतस्पर्शाभावश्च त्वगिन्द्रियस्य विषयः। एवमेव रूपरूपत्वरूपाभावभिन्नं यच्चक्षुषा ग्राह्यं तत्सर्वमपि त्वगिन्द्रियेणापि ग्राह्यम्। तथा च योग्यवृत्तिपृथक्त्वं, योग्यवृत्तिसङ्ख्याम्, योग्यवृत्तिविभागः, तादृश एव संयोगः, तादृशमेव परत्वमपरत्वञ्च, एवमेव योग्यवृत्तिस्नेहः, योग्यवृत्तिद्रवत्वं, योग्यवृत्तिपरिमाणम्, योग्यवृत्तिक्रिया, योग्यवृत्तिसमवायः,

योग्यवृत्तिजातिरपि त्वचा ग्राह्या वर्तन्ते । अत्र बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणमर्थादुद्भूतरूपवतो द्रव्यस्यैव यथा चाक्षुषं प्रत्यक्षं तथैव बहिरिन्द्रियजन्यद्रव्यत्वाचं प्रत्यपि रूपं कारणमर्थादुद्भूतरूपवतो द्रव्यस्यैव स्पार्शनं प्रत्यक्षम् । अत एव वायोः स्पार्शनमपि प्रत्यक्षं न भवतीति प्राचां मतम् ।

अत्र नवीनमतमाह विश्वनाथपञ्चाननभट्टाचार्यः-

**मुक्तावली-** **नवीनास्तु बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे न रूपं न वा स्पर्शः कारणं प्रमाणाभावात् । किन्तु चाक्षुषप्रत्यक्षे रूपं, स्पार्शनप्रत्यक्षे स्पर्शः कारणम्, अन्वयव्यतिरेकात् । बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति चेत्, न किञ्चिद्, आत्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु । रूपस्य कारणत्वे लाघवमिति चेन्न, वायोस्त्वगिन्द्रियेणाग्रहणप्रसङ्गात् । इष्टापत्तिरिति चेद् उद्भूतस्पर्श एव लाघवात्कारणमस्तु । प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरेव किं नेष्यते, तस्मात् प्रभां पश्यामीतिवद् वायुं स्पृशामीति प्रत्ययस्य संभवाद् वायोरपि प्रत्यक्षं सम्भवत्येव । बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वम्, वायुप्रभयोरेकत्वं गृह्यत एव, क्वचिद् द्वित्वादिकमपि, क्वचित्सङ्ख्यापरिमाणाद्यग्रहो दोषादित्याहुः ॥५६॥**

**व्याख्या-** तत्र प्राचीना बहिरिन्द्रियजन्यद्रव्यचाक्षुषादिप्रत्यक्षं प्रति पृथक्पृथग्रूपेण रूपादेः कारणत्वापेक्षयैकरूपेणैव बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं प्रति रूपस्य कारणत्वकल्पनायां लाघवात्तदेव कार्यकारणभावः कल्पनीय इति वदन्ति । तथा च वायौ रूपाभावात् वायोः प्रत्यक्षं न भवति, किन्तु वायुः शब्दस्पर्शधृतिकम्पैरनुमीयत इति वदन्ति । नवीनास्तु तथा न स्वीकुर्वन्ति किन्तु बहिरिन्द्रियजन्यद्रव्यचाक्षुषं प्रति रूपं कारणम्, बहिरिन्द्रियजन्यद्रव्यत्वाचं प्रति स्पर्शः कारणमिति रीत्या भिन्नं भिन्नं कार्यकारणभावं प्रकल्प्य वायोः स्पार्शनप्रत्यक्षं स्वीकुर्वन्ति । बहिरिन्द्रियजन्यचाक्षुषं प्रति रूपस्य, बहिरिन्द्रियजन्यस्पार्शनप्रत्यक्षं प्रति स्पर्शस्य कारणत्वे गौरवापत्तिः स्यादिति चेन्न, फलमुखगौरवस्यादोषत्वाद् बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे नैकं किमपि कारणम्, उभयप्रत्यक्षे रूपादेरेकस्य कस्याप्यन्वयव्यतिरेकाभावात् ।

अन्वयव्यतिरेकाच्च बहिरिन्द्रियजन्यद्रव्यचाक्षुषं प्रति रूपं बहिरिन्द्रियजन्यद्रव्यस्पार्शनं प्रति स्पर्शः कारणमिति भिन्नं भिन्नं कारणं स्वीकार्यम् । यद्येकं कारणं स्वीकार्यमेवेत्यभिमानस्तदा आत्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वं बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं प्रत्येकं कारणम् । तादृशगुणपदेन च क्वचिद् रूपं क्वचिच्च स्पर्शः ग्राह्य इति न काप्यनुपपत्तिः । ननु बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं प्रति आत्मावृत्तिशब्दभिन्नविशेषगुणापेक्षया लाघवाद्रूपं कारणमिति किं नेष्यत इति चेन्न, तथा सति वायोरप्रत्यक्षत्वप्रसङ्गात्, वायौ रूपाभावात् । नन्विष्टापत्तिरिति किं नेष्यत इति चेत्तदा- उद्भूतस्पर्श एव बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं प्रति कारणमित्येव स्वीक्रियताम् । ननु तथा सति प्रभायामुद्भूतस्पर्शस्याभावेन तस्या अप्रत्यक्षापत्तिरिति चेत्तदपीष्टापत्तिरिति किं नेष्यते । अतो यथा प्रभां पश्यामीत्यनुव्यवसायेन प्रभायाः चाक्षुषत्वं सिद्धं तथैव वायुं स्पृशामीत्यनुव्यवसायेन वायोरपि स्पार्शनप्रत्यक्षमभ्युपगन्तव्यमेव । तथा च वायोः प्रत्यक्षत्वस्वीकाराद् बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रं प्रति न रूपस्य न वा स्पर्शस्यैकस्य कारणत्वं किन्तु भिन्नभिन्नस्यैव कारणत्वमिति सर्वं समञ्जसम् । ननु वायोः प्रत्यक्षत्वे तद्गतसङ्ख्यापरिमाणादिकं

कथं न गृह्यत इति चेन्न, वायोरेकत्वं सर्वदैव गृह्यते, द्वित्वादिकन्तु कदाचिद् गृह्यते कदाचिन्न गृह्यते सङ्घातादिदोषात् । परिमाणमपि वायोः कदाचिद् गृह्यते कदाचिद् दोषान्न गृह्यते ।

प्रत्यक्षविशेषस्य कारणं निरूप्येदानीं ज्ञानसामान्यकारणत्वं प्रतिपादयति-

**कारिका–** .........**त्वचो योगो मनसा ज्ञानकारणम् ।**

**मुक्तावली-** **त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणमित्यर्थः ॥ किं तत्र प्रमाणम् ? सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्तमानेन मनसा ज्ञानाजननमिति । ननु सुषुप्तिकाले किं ज्ञानं भविष्यति ? अनुभवरूपं स्मरणरूपं वा ? नाद्यः, अनुभवसामग्र्यभावात् । तथा हि प्रत्यक्षे चक्षुरादिना मनःसंयोगस्य हेतुत्वात्तदभावादेव न चाक्षुसादिप्रत्यक्षम् । ज्ञानादेरभावादेव न मानसं प्रत्यक्षम् । ज्ञानाद्यभावे चात्मनोऽपि न प्रत्यक्षमिति । एवं व्याप्तिज्ञानाभावादेव नानुमितिः । सादृश्यज्ञानाभावान्नोपमितिः । पदज्ञानाभावान्न शाब्दबोधः । इत्यनुभवसामग्र्यभावान्नानुभवः । उद्बोधकाभावाच्च न स्मरणम् । मैवम् - सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेस्तत्सम्बन्धेनात्मनश्च प्रत्यक्षत्वप्रसङ्गात् । तदतीन्द्रियत्वे मानाभावात् । सुषुप्तिप्राक्काले निर्विकल्पकमेव नियमेन जायत इत्यत्रापि प्रमाणाभावात् ।**

**अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादिप्रत्यक्षकाले त्वाचप्रत्यक्षं स्यात् । विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात् । परस्परप्रतिबन्धादेकमपि वा न स्यादिति ।**

**अत्र केचित्-** **पूर्वोक्तयुक्त्या त्वङ्मनोयोगस्य ज्ञानहेतुत्वे सिद्धे चाक्षुषादिसामग्र्या स्पार्शनादिप्रतिबन्धकत्वम्, अनुभवानुरोधात् कल्प्यत इति । अन्ये तु सुषुप्त्यनुरोधाच्चर्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यते । चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसंयोगाभावान्न स्पार्शनप्रत्यक्षमिति वदन्ति ।**

**व्याख्या-** त्वचा सह मनसः संयोगो ज्ञानसामान्यं प्रति कारणमर्थात् त्वङ्मनसोः संयोगः सर्वाणि ज्ञानानि प्रत्येकरूपेण कारणं भवति । अर्थात् त्वङ्मनःसंयोगं विना किमपि ज्ञानं न भवति । ननु किं तत्र प्रमाणमिति चेत्, सुषुप्तिकाले मनः त्वचं त्यक्त्वा पुरीतति नाड्यां शेते, तदा तन्मनः किमपि ज्ञानं न जनयतीति ज्ञानसामान्यं प्रति त्वङ्मनःसंयोगः कारणम् । अर्थादात्मना प्रेरितं मनो यदा त्वचा संयुक्तं भवति तदैव चक्षुरादिकारणेन किमपि ज्ञानं जन्यते । त्वचा असंयुक्तं तु मनः किमपि ज्ञानं न जनयतीति सर्वं ज्ञानं प्रति त्वङ्मनःसंयोगः कारणम् । ननु सुषुप्तौ किं ज्ञानमापाद्यते येन त्वङ्मनःसंयोगस्य ज्ञानसामान्यं प्रति कारणत्वं कल्प्येत, नानुभवरूपम्, अनुभवसामग्र्यभावात् । अनुभवात्मकं हि ज्ञानं चतुर्विधम्, प्रत्यक्षम्, अनुमितिः, उपमितिः, शाब्दश्चेति । तत्र सुषुप्तौ प्रत्यक्षज्ञानमापादयितुं न शक्यते । यतो हि प्रत्यक्षं ज्ञानं द्विविधं, बाह्यम्, मानसञ्च । तत्र बाह्यं हि प्रत्यक्षं आत्ममनःसंयोगे सति मन इन्द्रियसंयोगे च सति विषयेन्द्रियसंयोगेन जायते । सुषुप्तौ चेन्द्रियमनःसंयोगस्याभावान्नात्मप्रत्यक्षमापादयितुं शक्यते तदेति प्रत्यक्षसामग्र्यभावान्न प्रत्यक्षम्, व्याप्तिज्ञानाभावान्नानुमितिः, सादृश्यज्ञानाभावान्नोपमितिः, पदज्ञानभावान्न शाब्दबोध

इत्यनुभवसामग्र्यभावान्नानुभवः, उद्बोधकाभावान्न स्मरणम् । इत्थञ्च ज्ञानविशेषसामग्र्यभावात् सुषुप्तौ किमपि ज्ञानमेवापादयितुं न शक्यते चेत् किमर्थं ज्ञानसामान्यं प्रति त्वङ्मनःसंयोगस्य कारणत्वं स्वीक्रियत इति चेन्न, सुषुप्तिप्राक्काले यत्किञ्चिज्ज्ञानादिकमुत्पन्नं तच्च ज्ञानादिकं सुषुप्तिप्रथमक्षणं यावत्तिष्ठतीति तज्ज्ञानसंबन्धादात्मनः प्रत्यक्षापत्तिभिया ज्ञानसामान्यं प्रति त्वङ्मनोयोगस्य कारणत्वं वाच्यं, तथा च व्याप्यधर्मावच्छिन्ने कार्ये जननीये व्यापकधर्मावच्छिन्नकार्योत्पादकसामग्र्यपेक्षिता भवतीति न्यायेनात्ममानसप्रत्यक्षे ज्ञानसामान्यसामग्र्यपेक्षते, तदभावाच्च न सुषुप्तिप्रथमे क्षणे आत्मनः प्रत्यक्षापत्तिरिति ज्ञानसामान्यं प्रति त्वङ्मनःसंयोगस्य हेतुत्वं सिद्धम् ।

अथ यदि ज्ञानसामान्यं प्रति त्वङ्मनोयोगस्य कारणत्वं स्वीक्रियते तदा रासनचाक्षुषाद्यव्यवहितपूर्वकालेऽपि त्वङ्मनःसंयोगस्य सत्त्वमपेक्षणीयमिति रासनचाक्षुषादिकाले त्वग्विषयसंयोगस्य, त्वङ्मनःसंयोगस्य च सत्त्वात् तत्र चाक्षुषमिव त्वाचमपि प्रत्यक्षं सहैव जायेत, उभयप्रत्यक्षसामग्र्योः सत्त्वात् । इष्टापत्तिस्तु नसम्भवति योग्यविभुविशेषगुणानां युगपदुत्पत्तिनिषेधाद् । अथवा एकज्ञानीयसामग्र्यापरज्ञानप्रतिबन्धकत्वे परस्परज्ञानसामग्र्योः प्रतिबन्धकयोः सत्त्वादुभयमप्यर्थात् किमपि ज्ञानं न स्यादिति चेद्, अत्र केचिदित्थमाहुः- सुषुप्तिप्राक्कालोत्पन्नेच्छाज्ञानादिसम्बन्धेन सुषुप्तिप्रथमक्षणे आत्मनः प्रत्यक्षापत्तिभिया त्वङ्मनःसंयोगस्य ज्ञानहेतुत्वे सिद्धेः रासनचाक्षुषादिकाले त्वाचप्रत्यक्षवारणाय रासनप्रत्यक्षं प्रति त्वाचप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वम्, त्वाचप्रत्यक्षं प्रति च रासनप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वं फलबलात्कल्पनीयम् । अर्थाद् यदि उत्तरकाले रासनं प्रत्यक्षमनुभवसिद्धं तदा रासनप्रत्यक्षजनकसामग्र्या बलीयस्त्वं, यदि चोत्तरकाले त्वाचप्रत्यक्षमनुभवसिद्धं तदा त्वाचसामग्र्याः प्रतिबन्धकत्वं फलबलादेव कल्पनीयमिति न काप्यनुपपत्तिरिति ।

अन्ये त्वत्र सुषुप्तिकाले ज्ञानसामान्याभावानुरोधेन ज्ञानसामान्यं प्रति चर्ममनःसंयोगस्य हेतुत्वं प्रकल्प्य रासनप्रत्यक्षकाले चर्ममनःसंयोगस्य सत्त्वेऽपि त्वङ्मनोयोगस्याभावसत्त्वान्न तत्र त्वाचप्रत्यक्षापत्तिरिति सर्वं समञ्जसमेवेति वदन्ति । इदानीं मन इन्द्रियग्राह्यान् विषयान् दर्शयति-

**कारिका -** **मनोग्राह्यं सुखं दुःखमिच्छाद्वेषो मतिः कृतिः ॥५७॥**

**मुक्तावली–** **मनोग्राह्यमिति । मनोजन्यप्रत्यक्षविषय इत्यर्थः । मतिर्ज्ञानम् । कृतिः प्रयत्नः । एवं सुखत्वदुःखत्वादिकमपि मनोग्राह्यम्, एवमात्मापि मनोग्राह्यः, किन्तु मनोमात्रस्य गोचर इत्यनेन पुर्वमुक्तत्वादत्र नोक्तः ॥५७॥**

**व्याख्या-** मन इन्द्रियजन्यप्रत्यक्षविषया आत्मा, आत्मवृत्तिज्ञानेच्छाप्रयत्नसुखदुःखद्वेषाः, तत्तद्वृत्ति-आत्मत्वज्ञानत्वादयो जातयः, ज्ञानाद्यभावाश्च सन्ति । यद्यप्यात्मा मनोग्राह्य इति विषयः पूर्वमेव मनोमात्रस्य गोचरः इत्यनेनैव प्रतिपादितोऽतोऽत्र स न प्रतिपादितः ।

तत्तदिन्द्रियजन्यप्रत्यक्षविषयान् प्रदर्श्येदानीमिन्द्रियजन्यप्राथमिकीं निर्विकल्पकप्रमां निरूपयति-

**कारिका-** **ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते ।**

**मुक्तावली–** **चक्षुःसंयोगाद्यनन्तरं घट इत्याकारकं घटत्वादिविशिष्टं ज्ञानं न सम्भवति, पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात्, विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्। तथा च प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाह्येव ज्ञानं जायते, तदेव निर्विकल्पकम्। तच्च न प्रत्यक्षम्, तथाहि वैशिष्ट्यानवगाहिज्ञानस्य प्रत्यक्षं न भवति घटमहं जानामीति प्रत्ययात्। तत्रात्मनि ज्ञानं प्रकारीभूय भासते, ज्ञाने घटस्तत्र घटत्वम्। यः प्रकारः स विशेषणमित्युच्यते। विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते। विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणम्। निर्विकल्पके च घटत्वादिकं न प्रकारस्तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं ज्ञाने न सम्भवति। जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्मप्रकारकत्वनियमात्।**

**व्याख्या-** प्रत्यक्षं ज्ञानं द्विविधं सविकल्पकं निर्विकल्पकञ्च। तत्र सविकल्पकं ज्ञानं सप्रकारकमर्थात् किञ्चित्प्रकारतया किञ्चिद्विशेष्यतया किञ्चिच्च संसर्गतया यत्र ज्ञाने विषया अवभासन्ते तज्ज्ञानं सविकल्पकम्। सविकल्पकस्य ज्ञानस्यानन्तरमनुव्यवसायरूपेण तस्य ज्ञानस्य प्रत्यक्षमपि भवति निर्विकल्पकन्तु ज्ञानं निष्प्रकारकमर्थान्निर्गतो विकल्पो=विशेष्यविशेषणभावो यस्मात् तज्ज्ञानं निर्विकल्पकं तदेवाख्या यस्य तदेतादृशं यज्ज्ञानं तज्ज्ञानमतीन्द्रियमर्थात्तस्य ज्ञानस्य प्रत्यक्षं न भवति। विशेषणताविशेष्यतासंसर्गतारूपविषयतातिरिक्तविषयतानिरूपकं ज्ञानं निर्विकल्पकम् अर्थात् संसर्गानवगाहि ज्ञानं निर्विकल्पकम्। संसर्गानवगाहिज्ञानस्य च प्रत्यक्षं न भवति। ननु यदि निर्विकल्पकस्य ज्ञानस्य प्रत्यक्षं न भवति तदा तज्ज्ञानं भवत्येव नहीति स्वीक्रियतामिति चेन्न, यतो चक्षुःसन्निकर्षानन्तरमनुभूयमानं घटोऽयमिति सविकल्पकं ज्ञानं विशिष्टं ज्ञानम्, विशिष्टञ्च ज्ञानं विशेषणज्ञानमन्तरा न सम्भवति। विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वादत इन्द्रियसन्निकर्षोत्तरं प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाहि सूक्ष्ममेकं घटघटत्वमात्रावगाहि "घटघटत्वे" इत्याकारकं विशकलितं वैशिष्ट्यानवगाहि ज्ञानं जायते तदेव ज्ञानं निर्विकल्पकं, ततो वैशिष्ट्यावगाहि अयं घट इत्याकारकं ज्ञानं जायते। तत्र द्वितीयस्यायं घट इत्याकारकज्ञानस्य प्रत्यक्षं घटमहं जानामीत्याकारकमनुव्यवसायात्मकं जायते, किन्तु प्रथमस्य निर्विकल्पज्ञानस्यानुव्यवसायात्मकं ज्ञानं न भवति। यतो हि ज्ञानस्य ज्ञानमनुव्यवसायात्मकं ज्ञातृज्ञेयज्ञानतत्संसर्गावगाहि त्रिपुट्यात्मकमेव जायते न तु विषयमात्रावगाहि मितिज्ञानं सम्भवति, घटमहं जानामि पटमहं जानामीत्याद्यनुव्यवसायानुभवात्। घटमहं जानामीति ज्ञाने आत्मनि ज्ञानं प्रकारतया भासते, ज्ञाने घटः प्रकारतया भासते, घटे च घटत्वं प्रकारतया भासते। यः प्रकारः स एव विशेषणम्, विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकम्, विशिष्टवैशिष्ट्यावगाहिज्ञाने च विशेषणतावच्छेदकप्रकारकं ज्ञानं कारणमिति। अत्र च ज्ञाने घटः प्रकारः घटे च घटत्वमिति घटमहं जानामीत्यनुव्यवसायात्मकविशिष्टवैशिष्ट्यावगाहिज्ञाने घटत्वप्रकारकं अयं घट इति विशिष्टबुद्धिः कारणं भवति, निर्विकल्पकज्ञानपूर्वञ्च तादृशं घटोऽयमिति विशिष्टं ज्ञानं न भवतीति तस्य ज्ञानस्यानुव्यवसायात्मकं प्रत्यक्षमपि न सम्भवति सामग्र्यभावात्। ननु निर्विकल्पकज्ञानोत्तरं घटघटत्वयोर्वैशिष्ट्यानवगाहि शुद्धघटविषयकमनुव्यवसायात्मकं घटज्ञानवानहम् घटमहं जानामीत्याकारकं ज्ञानं जायतामिति चेन्न, यतो हि घटत्वादिजातिगगनत्वाद्यखण्डोपाध्यतिरिक्तघटादिपदार्थानां भानं

किञ्चिद्धर्मप्रकारतयैव जायतेऽर्थाद् घटादिपदार्थानां भानं घटत्वादिधर्ममतिरिच्य न सम्भवति, शब्दस्य स्वभावो हि धर्मविशिष्टधर्मिणमुपस्थापयति। तस्मादनुलिख्यमानघटत्वादिधर्मातिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्मपुरस्कृतत्वमेव नियमः। स एवाशयः जात्यखण्डोपाध्यतिरिक्तपदार्थानां किञ्चिद्धर्मपुरस्कारेण भासमानत्वनियम इत्यस्य। तथा च घटघटत्वयोः संसर्गानवगाहिनिर्विकल्पकज्ञानस्यानुव्यवसायात्मकं ज्ञानं विशकलित तथापि न सम्भवति, तस्मात्तज्ज्ञानमतीन्द्रियम्।

प्रत्यक्षं ज्ञानं निरूप्येदानीं प्रत्यक्षज्ञानसामान्यकारणं निरूपयति-

**कारिका-** **महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम् ॥५८॥**

**मुक्तावली-** **महत्त्वमिति। द्रव्यप्रत्यक्षे महत्त्वं समवायसम्बन्धेन कारणम्। द्रव्यसमवेतानां गुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन कारणम्। द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेन कारणमिति। इन्द्रियमिति। अत्रापि षड्विध इत्यनुषज्यते। इन्द्रियत्वन्तु न जातिः, पृथिवीत्वादिना साङ्कर्यप्रसङ्गात्। किन्तु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वम्। आत्मादिवारणाय सत्यन्तम्। उद्भूतविशेषगुणस्य शब्दस्य श्रोत्रे सत्त्वात् शब्देतरेति। विशेषगुणस्य रूपादेश्चक्षुरादावपि सत्त्वादुद्भूतेति। उद्भूतत्वं न जातिः शुक्लत्वादिना साङ्कर्यात्। न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यम्, उद्भूतरूपत्वादिना चाक्षुषादौ जनकत्वानुपपत्तेः, किन्तु शुक्लत्वादिव्याप्यं नानैवानुद्भूतत्वं, तदभावकूटश्चोद्भूतत्वम्, तच्च संयोगादावप्यस्ति, तथा च शब्देतरोद्भूतगुणः संयोगादिश्चक्षुरादावप्यस्ति- अतो विशेषेति। कालादिवारणाय विशेष्यदलम्। इन्द्रियावयवविषयसंयोगस्यापि प्राचां मते प्रत्यक्षजनकत्वादिन्द्रियावयववारणाय, नवीनमतेकालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणीभूतचक्षुःसंयोगाश्रयस्य कालादेश्च वारणाय मनःपदम्। ज्ञानकारणमित्यपि तद्वारणाय। करणमिति। असाधारणं कारणं करणम्। असाधारणत्वं व्यापारवत्त्वम् ॥५८॥**

**व्याख्या-** चाक्षुषरासनत्वाचघ्राणजश्रौत्रमानसेषु षड्विधप्रत्यक्षेषु महत्त्वं कारणं भवति। यत्र महत्त्वं वर्तते तस्यैव षड्विधेष्वन्यतमं प्रत्यक्षं भवति। अत एवाणुत्ववतः परमाणोर्द्व्यणुकस्य च प्रत्यक्षं न भवति। षड्विधेष्वपि रासनादिप्रत्यक्षेषु इन्द्रियमेव करणम्। अत एव प्रत्यक्षं सर्वमपि ज्ञानमैन्द्रियकमित्युच्यते। ननु महत्त्वस्य गुणत्वेन यत्र द्रव्यप्रत्यक्षं विषयतासम्बन्धेन वर्तते तत्र द्रव्ये महत्त्वं समवायेन वर्तितुं शक्नोतीति तत्प्रत्यक्षं प्रति महत्त्वस्य कारणत्वकथनन्तु समीचीनं, किन्तु गुणादिप्रत्यक्षं यत्र गुणादौ वर्तते तत्र तु महत्त्वं समवायेन सम्बन्धेन वर्तितुं न शक्नोति, गुणादीनां निर्गुणत्वादिति तत्कथं तत्प्रत्यक्षे महत्त्वं कारणमिति चेन्न, यतो न वयं ब्रूमः सर्वेषां प्रत्यक्षं प्रति महत्त्वं समवायेनैव साक्षात् सम्बन्धेन हेतुः, किन्तु द्रव्यस्य प्रत्यक्षं प्रति महत्त्वं समवायेन सम्बन्धेन हेतुः, द्रव्यसमवेतगुणकर्मद्रव्यवृत्तिजातिप्रत्यक्षे महत्त्वं स्वाश्रयसमवायसम्बन्धेन हेतुः। अत्र स्वं=महत्त्वं, तदाश्रयो द्रव्यम्, तत्र समवायसम्बन्धेन वर्तन्ते

गुणकर्मद्रव्यवृत्तिजातय इति स्वाश्रयसमवायसम्बन्धेन महत्त्वं गुणकर्मद्रव्यवृत्तिजातिषु वर्तत इति तत्र तत्र च गुणकर्मद्रव्यवृत्तिजातिप्रत्यक्षमपि वर्ततेऽतस्तत्प्रत्यक्षं प्रति महत्त्वं स्वाश्रयसमवायेन सम्बन्धेन कारणमर्थाद् यत्र गुणकर्मजातिषु स्वाश्रयसमवायसम्बन्धेन महत्त्वं वर्तते तासामेव गुणकर्मद्रव्यवृत्तिजातीनां प्रत्यक्षं भवति। एवमेव द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां जातीनां प्रत्यक्षं प्रति तु महत्त्वं स्वाश्रयसमवेतसमवायसम्बन्धेन कारणं भवति। अत्रापि स्वं=महत्त्वं, स्वाश्रयो द्रव्यं, स्वाश्रयसमवेतानि गुणकर्माणि, तत्र समवायेन सम्बन्धेन वर्तन्ते गुणत्वकर्मत्वादीनीति स्वाश्रयसमवेतसमवायेन सम्बन्धेन महत्त्वं गुणत्वकर्मत्वादिजातिषु वर्तत इति तत्प्रत्यक्षं प्रति महत्त्वं स्वाश्रयसमवेतसमवायेन सम्बन्धेन कारणम्।

षड्विधप्रत्यक्षं प्रति करणन्त्विन्द्रियमेवेत्युक्तप्रायम्, तत्रेन्द्रियन्नाम नेन्द्रियत्वजातिमत्, इन्द्रियत्वस्य जातित्वाभावात्, कथमिति चेद् इन्द्रियत्वे जातिबाधकस्य साङ्कर्यस्य दोषस्य सत्त्वात्। तत्र साङ्कर्यन्नाम परस्परात्यन्ताभावसमानाधिकरणयोः धर्मयोरेकत्र समावेशः। अत्र चेन्द्रियत्वपृथिवीत्वयोः परस्परात्यन्ताभावसमानाधिकरणयोः धर्मयोरेकत्र समावेशो वर्तते, तद्यथा- इन्द्रियत्वाभाववति घटे पृथिवीत्वम्, पृथिवीत्वाभाववति रसनेन्द्रिये चेन्द्रियत्वमिति पृथिवीत्वेन्द्रियत्वयोः परस्परात्यन्ताभावसमानाधिकरणत्वरूपविरोधः, विरुद्धयोस्तयोर्धर्मयोरेकत्र पार्थिवेन्द्रिये घ्राणे समावेशो वर्तत इति इन्द्रियत्वं संकीर्णम्, संकीर्णस्य च धर्मस्य जातित्वास्वीकारादिन्द्रियत्वजातिमदिन्द्रियमिति लक्षणं न सम्भवति। किन्तु इन्द्रियत्वन्नाम शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम्। लक्षणमिदं चक्षुरादिन्द्रियाणाम्, तत्र चक्षुरादिषट्सु इन्द्रियेषु उद्भूतरूपादयोविशेषगुणा न तिष्ठन्ति तत्रानुद्भूतरूपादीनां सत्त्वात्, अत उद्भूतविशेषगुणानाश्रयत्वमिन्द्रियेषु वर्तते। श्रोत्रेन्द्रिये उद्भूतस्य शब्दरूपविशेषगुणस्य सत्त्वादुक्तं शब्देतरोद्भूतविशेषगुणानाश्रयत्वमिति। श्रोत्रेन्द्रियेऽपि शब्देतरोद्भूतविशेषगुणा उद्भूतरूपादयो न तिष्ठन्तीति तत्रापि लक्षणसमन्वयः। प्रत्यक्षज्ञानं प्रति आत्ममनःसंयोगस्य मनइन्द्रियसंयोगस्य च सत्त्वाज्ज्ञानकारणमनःसंयोगाश्रयत्वमपि मन आदि इन्द्रियेषु वर्तत इति तत्र विशेष्यविशेषणयोः सङ्गतिः।

लक्षणेऽत्र ज्ञानकारणात्ममनःसंयोगस्यात्मन्यपि सत्त्वात्तत्रातिव्याप्तिवारणाय सत्यन्तं विशेषणं देयम्। तथा सति ज्ञानसुखाद्युद्भूतविशेषणगुणस्यात्मनि सत्त्वान्न तत्रातिव्याप्तिः। श्रोत्रेन्द्रियेऽव्याप्तिवारणाय शब्देतरेति उद्भूतविशेषणगुणविशेषणं देयम्। चक्षुरादीन्द्रियेषु अनुद्भूतविशेषगुणस्य सत्त्वात्तत्राव्याप्तिवारणायोद्भूतेति विशेषगुणे विशेषणं देयम्। अत्रोद्भूतत्त्वमपि न जातिः शुक्लत्वनीलत्वादिना साङ्कर्यात्। तथा हि शुक्लत्वं विहायोद्भूतनीले उद्भूतत्वम्, उद्भूतत्वं विहायाऽनुद्भूतशुक्ले शुक्लत्वमिति शुक्लत्वोद्भूतत्वे विरुद्धे, विरुद्धयोस्तयोरुद्भूतशुक्ले एकत्रैव समावेशादुद्भूतत्वं संकीर्णमत एव तन्न जातिः। न चोद्भूतत्वमुपाधिः स च शुक्लत्वादिव्याप्यो नानैवेति चेन्न, यतो हि सिद्धान्ते चक्षुरिन्द्रियजन्यद्रव्यादिप्रत्यक्षं प्रत्युद्भूतरूपत्वावच्छिन्नस्यैकरूपेण कारणता स्वीकृता वर्तते तत्रोद्भूतरूपस्य कारणत्वे कारणतावच्छेदकमेकमुद्भूतरूपत्वं स्वीकरणीयं भवति। तत्र यद्युद्भूतत्वं भिन्नं भिन्नं नानेति स्वीक्रियते तदा सामान्यतश्चाक्षुषप्रत्यक्षं प्रति एकेनोद्भूतरूपत्वेन धर्मेणोद्भूतरूपस्य

कारणत्वेऽन्यस्योद्भूतरूपस्याकारणत्वापत्तेस्तत्र च चाक्षुषप्रत्यक्षस्य विद्यमानत्वात् कारणाभावेऽपि कार्यसत्त्वात्मकव्यतिरेकव्यभिचारः स्यादतः उद्भूतत्वं न नाना, किन्तूद्भूतत्वमेकं स्वीकार्यं तथा च शुक्लत्वादिव्याप्यं नानानुद्भूतत्वं तदभावकूटश्चोद्भूतत्वं तादृशानुद्भूतत्वाभावकूटश्चैकमिति तेनैवरूपेण प्रत्यक्षं प्रति उद्भूतरूपस्यैककारणता स्वीकार्या तादृशोद्भूतगुणत्वञ्च संयोगादावप्यस्तीति शब्देत्तरोद्भूतसंयोगादिगुणाश्रयत्वस्य चक्षुरादौ सत्त्वाच्चक्षुरादावव्याप्तिरतो विशेषेति गुणस्य विशेषणं देयम् ।

केवलं शब्देतरोद्भूतविशेषणगुणानाश्रयत्वमात्रलक्षणकरणे सकलविशेषगुणानाश्रये कालादावतिव्याप्तिः प्रसज्यत इति ज्ञानकारणमनः संयोगाश्रयत्वरूपं विशेष्यदलमपि देयम्, तथा सति कालादेर्ज्ञानकारणमनः संयोगाश्रयत्वाभावान्न तत्रातिव्याप्तिः । विशेष्यदलान्तर्गतमनःपदानुपादाने प्राचां मते यथेन्द्रियविषयसंयोगो ज्ञानकारणं तथैव इन्द्रियावयवविषयसंयोगस्यापि ज्ञानकारणत्वस्वीकारादिन्द्रियावयवेऽतिव्याप्तिः स्यादतो मनःपदं देयम् । तथा सतीन्द्रियावयवसंयोगस्य ज्ञानकारणत्वेऽपि इन्द्रियावयवस्य ज्ञानकारणमनःसंयोगाश्रयत्वाभावान्न तत्रातिव्याप्तिः । नवीनमते तु कालो रूपाभाववानिति कालवृत्तिरूपाभावप्रत्यक्षं प्रति चक्षुःसंयुक्तविशेषणतात्मकसन्निकर्षस्य-कारणत्वात् तत्सन्निकर्षान्तः पतितोः यः कालचक्षुःसंयोगः सोऽपि ज्ञानकारणसंयोगत्वेन तदाश्रयत्वस्य काले सत्त्वात्तत्रातिव्याप्तिः स्यादतो मनःपदं देयम् तथा सति कालस्य ज्ञानकारणमनःसंयोगाश्रयत्वाभावान्न तत्रातिव्याप्तिरिति निर्दुष्टं लक्षणमिदम् ।

ज्ञानकारणपदमपि कालादावतिव्याप्तिवारणायैव देयम् । इन्द्रियं करणमित्युक्तं पूर्वं तत्र करणत्वन्नाम असाधारणं कारणत्वम् असाधारणत्वञ्च व्यापारवत्त्वम्, व्यापारत्वञ्च द्रव्यान्यत्वे सति तज्जन्यत्वे सति तज्जन्यजकत्वम्, प्रत्यक्षं प्रति च करणमिन्द्रियं चेद् व्यापारः इन्द्रियविषयसम्बन्धो मनःइन्द्रियसंयोगो वेति बोध्यम् ।

## पदानामर्थपरिचयः

| | |
|---|---|
| अव्यपदेश्यम् | = व्यपदेशः शब्दव्यवहारः, तस्य अयोग्यम् अव्यपदेश्यम् । निर्विकल्पकं ज्ञानम् |
| व्यवसायः | = अयं घटः इति व्यवहारविषयकं ज्ञानम्, सविकल्पकमित्यर्थः |
| अव्यभिचारारिज्ञानम् | = भ्रमभिन्नज्ञानम् |
| कादाचित्कम् | = कदाचिज्जायमानम् |
| अव्याप्ति | = लक्ष्यैकदेशावृत्तित्वमव्याप्तिः । अव्याप्तिः कश्चन लक्षणगतदोषविशेषो वर्तते |
| व्याप्यम् | = व्याप्तिविशिष्टम् |
| परामर्शः | = व्याप्तिविशिष्टपक्षधर्मताज्ञानम् । यथा वह्निव्याप्यधूमवान् पर्वत इति ज्ञानम् |
| अनुभवः | = स्मृतिभिन्नज्ञानम् |

| | | |
|---|---|---|
| गोचरः | = | इन्द्रियजन्यज्ञानविषयः, ज्ञानविषयमात्रम् |
| सुरभिः | = | सुगन्धः |
| असुरभिः | = | दुर्गन्धः |
| उद्भूतत्वम् | = | प्रत्यक्षविषयत्वम् |
| ग्रीष्मा | = | उष्मा |
| पृथक्त्वम् | = | पृथक्प्रत्ययहेतुः |
| आलोकः | = | प्रकाशः |
| अध्यक्षः | = | प्रत्यक्षम् |
| अन्वयः | = | सम्बन्धः, सम्बन्धकृतसहचारो वा यस्य ज्ञानाद् अन्वयव्याप्तिः निश्चियते |
| व्यतिरेकः | = | अभावः, अभावप्रयोज्यसहचारो वा यस्य ज्ञानाद् व्यतिरेकव्याप्तेर्निश्चयो जायते |
| सुषुप्तिः | = | गाढनिद्रानाड्यवच्छिन्नात्ममनोयोगविशिष्टावस्था |
| पुरीतत् | = | गाढनिद्रानाडी |
| अतीन्द्रियम् | = | इन्द्रियजन्यप्रत्यक्षाविषयः |
| विशेषणम् | = | विद्यमानत्वे सतीतरव्यावर्तकम् |
| विशेष्यम् | = | संसर्गानुयोगि विशेष्यम् । यथा घटवद् भूतलमित्यत्र भूतलं विशेष्यम्, |
| विशिष्टम् | = | विशेषणविशेष्ययुक्तम् |
| विशेषणतावच्छेदकम् | = | विशेषणवृत्तिधर्मविशेषः, विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकम् |
| वैशिष्ट्यम् | = | विशेषणविशेष्ययोः सम्बन्धः |
| जातिः | = | नित्यत्वे सत्यनेकवृत्तिधर्मः |
| अखण्डोपाधिः | = | जातिभिन्नधर्मविशेषः |
| प्रकारः | = | संसर्गांशे भासमानप्रतियोगी |
| करणम् | = | अनन्यथासिद्धकार्यनियतपूर्ववृत्ति कारणम् |
| असाधारणम् | = | असाधारणं द्विविधं धर्मः, कारणञ्च । तन्मात्रवृत्तिधर्मोऽसाधारणधर्मः, कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यतानिरूपितकारणता असाधारणकारणता, तद्वदसाधारणकारणम् |
| व्यापारः | = | द्रव्यभिन्नत्वे सति तज्जन्यत्वे सति तज्जन्यजनको व्यापारः |
| सन्निकर्षः | = | सम्बन्धः |

## अभ्यासः

### १. विस्तृतमुत्तरं लिखत

(क) सौत्रं प्रत्यक्षलक्षणं विलिख्य तल्लक्षणघटकतत्तत्पदानामर्थविवेचनपुरस्सरं तत्तत्पदानां कृत्यं प्रदर्शयत ।

(ख) प्रत्यक्षप्रमाभेदान् प्रदर्श्य चक्षुषो विषयान् प्रतिपादयत ।

(ग) त्वङ्मनःसंयोगस्य ज्ञानसामान्यहेतुत्वे युक्तिं प्रदर्शयत ।

(घ) निर्विकल्पस्य प्रत्यक्षस्य सत्त्वे प्रमाणमुपपाद्य तस्याप्रत्यक्षत्वे युक्तिं प्रदर्शयत ।

(ङ) इन्द्रियलक्षणं सपदकृत्यं निरूपयत ।

### २. सङ्क्षेपेणोत्तरयत

(क) अनुभूतिभेदान् सोदाहरणं प्रदर्शयत ।

(ख) ईश्वरप्रत्यक्षसाधारणं प्रत्यक्षलक्षणं भणत ।

(ग) अनुमितेर्लक्षणं लिखत ।

(घ) बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रं प्रति रूपस्य कारणत्वे आपत्तिं प्रदर्शयत ।

(ङ) त्वाचप्रत्यक्षविषयान् प्रदर्शयत ।

(छ) गुणादिप्रत्यक्षं प्रति महत्त्वं कथं कारणम् ।

(ज) इन्द्रियलक्षणघटकमनःपदस्यानुपादाने कथं कालादावतिव्याप्तिः ?

(ञ) इन्द्रियलक्षणघटकमुद्भूतत्वं कीदृशम् ?

### ३. अतिसङ्क्षिप्तोत्तरं दत्त

(क) ज्ञानाकरणकं ज्ञानं किम् ?

(ख) अनुमितिः हेतुविषयिणी वा हेत्वविषयिणी ?

(ग) परामर्शकरणमनुमितावुपमितौ वा ?

(घ) सादृश्यज्ञानं कुत्र करणं वर्तते ?

(ङ) अव्यपद्देश्यमित्यस्य कोऽर्थः ?

(च) सुषुप्तिकाले किमपि ज्ञानं भवति न वा ?

(छ) नवीनमते बहिरिन्द्रियजन्यद्रव्यचाक्षुषं प्रत्येकं कारणं किम् ?

(ज) निर्विकल्पकं ज्ञानं वैशिष्ट्यमवगाहते न वा ?

(झ) निर्विकल्पकज्ञानस्य प्रत्यक्षं भवति न वा ?

## ४. कक्षायां सखिभिः सह चर्चयत

(क) सौत्रप्रत्यक्षलक्षणमादाय चर्चां विधत्त ।

(ख) सविकल्पकनिर्विकल्पकयोर्भेदविषये तत्स्वरूपविषये च सम्यक् सखीन् प्रकाशयत ।

(ग) निर्विकल्पकज्ञानस्य सत्त्वे तत्स्वरूपविषये तत्प्रत्यक्षाप्रत्यक्षविषये च कक्षायां शिक्षकसखिभिः सह संवादो विधेयः ।

(घ) विविधदार्शनिकाभ्युपगतानां प्रमाणानां सङ्ख्याविषये तत्स्वरूपविषये च कक्षायां शिक्षकेण सह संवादो विधेयः ।

# सन्निकर्षनिरूपणम्

## (क) लौकिकसन्निकर्षनिरूपणम् ।

कारिका- विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः । द्रव्यग्रहस्तु संयोगात्संयुक्तसमवायतः ॥५९॥

द्रव्येषु समवेतानां तथा तत्समवायतः । तत्रापि समवेतानां शब्दस्य समवायः ॥६०॥

तद्वृत्तीनां समवेतसमवायेन तु ग्रहः । प्रत्यक्षं समवायस्य विशेषणतया भवेत् ॥६१ ॥

मुक्तावली- विषयेन्द्रियेति । व्यापारः सन्निकर्षः । षड्विधं सन्निकर्षमुदाहरणद्वारा प्रदर्शयति- द्रव्यग्रह इति । द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यम्, द्रव्यसमवेतप्रत्यक्षमिन्द्रियसंयुक्तसमवायजन्यम् । एवमग्रेऽपि । वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम् । द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः कारणम् । द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः कारणम् । एवमन्यत्रापि विशिष्टस्यैव कार्यकारणभावः । परन्तु पृथिवीपरमाणुनीले नीलत्वं पृथिवीपरमाणौ पृथिवीत्वञ्च चक्षुषा कथं न गृह्यते, तत्र परम्परयोद्भूतरूपसम्बन्धस्य महत्त्वसम्बन्धस्य च सत्त्वात् । तथाहि - नीले नीलत्वं जातिरेकैव घटनीले परमाणुनीले च वर्तते । तथा च महत्त्वसम्बन्धो घटनीलमादाय वर्तते । उद्भूतरूपसम्बन्धस्तूभयमादायैव वर्तते । एवं पृथिवीपरमाणौ पृथिवीत्वेऽपि घटादिकमादाय महत्त्वसम्बन्धो बोध्यः ।

एवं वायौ तदीयस्पर्शादौ च सत्तायाश्चाक्षुषप्रत्यक्षं स्यात् । तस्माद् उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य, द्रव्यसमवेतचाक्षुषप्रत्यक्षे, तादृशचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्यसमवेतसमवेतचाक्षुषप्रत्यक्षे कारणत्वं वाच्यम् । इत्थञ्च परमाणुनीलादौ न नीलत्वादिग्रहः, परमाणौ चक्षुःसंयोगस्य महत्त्वावच्छिन्नत्वाभावात् । एवं वाय्वादौ न सत्तादिचाक्षुषम्, तत्र चक्षुःसंयोगस्य रूपावच्छिन्नत्वाभावात् । एवं यत्र घटस्य मध्यावच्छेदेनालोकसंयोगः चक्षुःसंयोगस्तु बाह्यावच्छेदेन तत्र घटप्रत्यक्षाभावादालोकसंयोगावीच्छिन्नत्वं चक्षुःसंयोगे विशेषणं देयम् । एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणम्, द्रव्यसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवायः, द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः कारणम् ।

**अत्रापि महत्त्वावच्छिन्नत्वम्, उद्भूतरूपावच्छिन्नत्वञ्च पूर्ववदेव बोध्यम्। एवं गन्धप्रत्यक्षे घ्राणसंयुक्तसमवायः, गन्धसमवेतस्य घ्राणजन्यप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः कारणम्॥ एवं रसप्रत्यक्षे रसनासंयुक्तसमवायः। रसमवेतरासनप्रत्यक्षे रसनासंयुक्तसमवेतसमवायः कारणम्॥ शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः कारणम्। शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः कारणम्। अत्र सर्वमपि प्रत्यक्षं लौकिकं बोध्यम्। वक्ष्यमाणमलौकिकप्रत्यक्षमिन्द्रियसंयोगादिकं विनापि भवति। एवमात्मनः प्रत्यक्षे मनःसंयोगः, आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः, आत्मसमवेतसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणम्।**

**व्याख्या-** इन्द्रियार्थसन्निकर्षजन्यप्रत्यक्षप्रमां प्रति व्यापारवदसाधारणकारणरूपं करणमिन्द्रियमित्युक्तप्रायम्। तत्र व्यापारः कः? इति जिज्ञासायामुदाहरणसहितमिन्द्रियव्यापारं दर्शयति विश्वनाथपञ्चाननः- विषयेन्द्रियेत्यादिना। तत्र व्यापारो नाम द्वारम्= आन्तरालिककारणमित्यर्थः। अर्थाद् यद् वस्तु कस्माच्चित् करणादुत्पद्य करणजन्यकार्यस्य जनको भवति स एव व्यापारः। तल्लक्षणञ्च द्रव्यान्यत्वे सति तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारत्वम्। यथा घटात्मककार्ये तत्पदेन करणं ग्राह्यम्, अत्र च दण्डादयस्तत्पदवाच्याः, तज्जन्यत्वं दण्डभ्रम्यां वर्तते, एवं पुनः तत्पदेन ते एव दण्डादयः, तज्जन्यो घटः, तस्य जनकश्च सैव भ्रमिः सा च भ्रमिः द्रव्यभिन्नापि वर्तत इति घटं प्रति दण्डादेर्व्यापारः दण्डभ्रमिः, चक्रभ्रमिः, कपालभ्रमिः, कपालद्वयसंयोग इत्यादयः सन्ति। इदमत्र बोध्यं कारणं हि द्विविधं करणरूपं व्यापाररूपञ्च। घटं प्रति च दण्डादयः प्राथमिककारणानि करणानि, दण्डभ्रमिकपालसंयोगादय आन्तरालिककारणानि तु व्यापारपदवाच्यानि सन्ति।

अत्र प्रत्यक्षप्रमायां चेन्द्रियाणि करणानि, विषयेन्द्रियसम्बन्धो मनइन्द्रियसंयोगो वा व्यापारः। विषयेन्द्रियसम्बन्धश्च षड्विधो वर्तते। तैः षड्विधसम्बन्धैः सहकृतैरिन्द्रियैः करणैः प्रत्यक्षं ज्ञानं जन्यते, ते च विषयेन्द्रियसम्बन्धा यथा- संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति षड्विधाः। तेषु षड्विधेषु सन्निकर्षेषु संयोगः सन्निकर्ष इन्द्रियस्य द्रव्यैः सह भवति। अर्थात् संयोगसम्बन्धेनेन्द्रियैश्चक्षुःत्वङ्मनोभिस्त्रिभिः द्रव्याणां प्रत्यक्षं भवति। द्रव्यग्राहकाणीन्द्रियाणि त्रिणि, चक्षुःत्वङ्मनांसि सन्ति, तेषां त्रयाणामिन्द्रियाणां द्रव्यैः सह संयोगेन द्रव्यप्रत्यक्षं भवति। यतो हि द्रव्ययोरेव संयोग इति नियमेनेन्द्रियाणां सर्वेषामिन्द्रियत्वेन तेषां द्रव्यैः सह संयोगो भवति। तथा चेन्द्रियविषयसंयोगेन द्रव्यस्य प्रत्यक्षं भवति। द्रव्यसमवेतानां रूपरसादिगुणानां कर्मणां, द्रव्यसमवेतजातीनाञ्च प्रत्यक्षं इन्द्रियसंयुक्तसमवायेन सम्बन्धेन भवति। इन्द्रियसंयुक्तसमवायेन द्वितीयेन सम्बन्धेन चक्षुस्त्वग्रसनाघ्राणमनोभिः पञ्चभिरिन्द्रियैः रूपादिगुणानां, उत्क्षेपणादीनां कर्मणां, घटत्वादिद्रव्यवृत्तिजातीनाञ्च प्रत्यक्षं भवति। एवमेवेन्द्रियसंयुक्तसमवेतसमवायेन तृतीयेन सन्निकर्षेण तैः पञ्चभिरेवेन्द्रियैः रूपरसादिगुणवृत्तीनां, उत्क्षेपणादिकर्मवृत्तीनाञ्च जातीनां प्रत्यक्षं भवति। चतुर्थेन समवायसम्बन्धेन श्रोत्रेन्द्रियेण शब्दानां प्रत्यक्षं भवति। पञ्चमेन समवेतसमवायेन सम्बन्धेन श्रोत्रेन्द्रियेण शब्दवृत्तीनां कत्वखत्वशब्दत्वादीनां जातीनां प्रत्यक्षं भवति। षष्ठेन विशेषणविशेष्यभावसन्निकर्षेण समवायस्याभावस्य च प्रत्यक्षं भवति। तथा च द्रव्यप्रत्यक्षं प्रतीन्द्रियसंयोगः, द्रव्यसमवेतप्रत्यक्षं

प्रतीन्द्रियसंयुक्तसमवायः, द्रव्यसमवेतसमवेतप्रत्यक्षं प्रतीन्द्रियसंयुक्तसमवेतसमवायः कारणमिति सामान्यकार्यकारणभावो विज्ञेयः ।

वस्तुतो द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम्, द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः कारणम्, द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः कारणम् । एवमेव द्रव्यस्य त्वाचप्रत्यक्षं प्रति त्वक्संयोगः कारणम्, द्रव्यसमवेतत्वाचं प्रति त्वक्संयुक्तसमवायः कारणम्, द्रव्यसमवेतसमवेतस्पर्शत्वादित्वाचं प्रति त्वक्संयुक्तसमवेतसमवायसन्निकर्षः कारणम् । एवमेव स्वात्मरूपद्रव्यमानसं प्रति मनःसंयोगः कारणम्, द्रव्यसमवेतसुखादिमानसंप्रत्यक्षं प्रति मनःसंयुक्तसमवायः कारणम्, द्रव्यसमवेतसमवेतसुखत्वादिमानसं प्रति मनःसंयुक्तसमवेतसमवायः कारणम् । एवं रीत्या पृथक्पृथगेव कारणं वाच्यम् । अन्यथैकेन्द्रियसंयोगादिसत्त्वेऽपरेन्द्रियजन्यप्रत्यक्षस्यासत्त्वाद् व्यभिचारापत्तिः स्यादतो विशिष्यैव कार्यकारणभावो वक्तव्यः ।

अत्रेयमाशङ्का जायते यद् यथा घटवृत्तिनीलं रूपं चक्षुषा चक्षुःसंयुक्तसमवायेन सन्निकर्षेण गृह्यते । यथा वा घटे पृथिवीत्वं जातिः चक्षुःसंयुक्तसमवायेन सम्बन्धेन चक्षुषा गृह्यते, एवमेव घटनीले नीलत्वं जातिः चक्षुःसंयुक्तसमवेतसमवायेन सम्बन्धेन गृह्यते, परं सैव जातिः पृथिवीपरमाणुनीले कथं न गृह्यते ? यतो नीलत्वं जातिरेकैव परमाणुनीले घटनीले च, तथैव पृथिवीत्वं जातिरेकैव घटे पार्थिवपरमाणौ च किन्तु घटे पृथिवीत्वं गृह्यते, परमाणौ तदेव पृथिवीत्वं न गृह्यते । घटनीले नीलत्वं गृह्यते परं परमाणुनीले तदेव नीलत्वं न गृह्यत इति तत्कथम् ? न च परमाणुवृत्तिपृथिवीत्वे महत्त्वं नास्ति, यतो हि महत्त्वं चाक्षुषादिषड्विधप्रत्यक्षं प्रत्येव हेतुरतो न तत्र परमाणौ पृथिवीत्वम्, परमाणुनीले च नीलत्वं गृह्यत इति वाच्यम्, यतो हि नीलत्वं जातिरेकैवार्थात् सर्वेषु नीलेषु प्रत्यक्षाप्रत्यक्षेषु नीलत्वं जातिरेकैव, सर्वासु पृथिवीषु पृथिवीत्वं जातिरेकैवातस्तदेव पृथिवीत्वं घटे प्रत्यक्षयितुं शक्यते चेत् कथन्न तत् परमाणावपि प्रत्यक्षयितुं शक्यमिति । तथा च परमाणुवृत्तिपृथिवीत्वे महत्त्वसम्बन्धः परम्परया वर्ततेऽर्थात् स्वाश्रयसमवायसम्बन्धेन महत्त्वं द्रव्यसमवेतजातिप्रत्यक्षे कारणं वर्तते । अत्रापि स्वं = महत्त्वं, तदाश्रयो घटः, तत्र समवेतं पृथिवीत्वमिति रीत्या पृथिवीत्वे जातौ महत्त्वं वर्तते, तदेव पृथिवीत्वं परमाणावपि वर्तते चेत्तत्रापि तस्य प्रत्यक्षं स्यात् । एवमेव परमाणुनीलवृत्तिनीलत्वेऽपि स्वं=महत्त्वं, स्वाश्रयो घटः, तत्र समवेतं घटनीलं, तत्समवायश्च नीलत्वे इति स्वाश्रयसमवेतसमवायेन सम्बन्धेन नीलत्वे जातौ महत्त्वं परम्परया सम्बद्धं तत्र चोद्भूतरूपसम्बन्धोऽपि साक्षात्परमाणुमादायैव वर्तत इति परमाणुनीले नीलत्वस्य प्रत्यक्षं स्यादिति चेन्न, यतो हि प्रत्यक्षं प्रति महत्त्वोद्भूतरूपालोकसम्बन्धेन्द्रियसम्बन्धस्य विशिष्टस्य कारणत्वं भवति । अर्थाद् द्रव्यप्रत्यक्षं प्रति महत्त्वावच्छिन्नोद्भूतरूपावच्छिन्नालोकसंयोगावच्छिन्नचक्षुःसंयोगः कारणं भवति । तथा च परमाणौ चक्षुःसंयोगस्य सत्त्वेऽपि तत्र महत्त्वावच्छिन्नचक्षुःसंयोगाभावान्न परमाणोः प्रत्यक्षम् । वायौ चोद्भूतरूपावच्छिन्नचक्षुःसंयोगाभावान्न वायोः चाक्षुषं प्रत्यक्षम् । एवमेव यत्र घटे बहिर्देशावच्छेदेन चक्षुः संयोगः, अन्तर्देशावच्छेदेन चालोकसंयोगस्तत्र घटस्य न प्रत्यक्षम्, तत्र चक्षुःसंयोगस्य आलोकसंयोगावच्छिन्नाभावात् । तथा च विशिष्टस्यैव चक्षुः सम्बन्धस्य द्रव्यसमवेतचाक्षुषं प्रत्यपि कारणत्वात् परमाणुनीलस्य न प्रत्यक्षं यतो हि महत्त्वावच्छिन्नोद्भूतरूपावच्छिन्नालोकसंयोगावच्छिन्नच

क्षुःसंयुक्तसमवायः द्रव्यसमवेतप्रत्यक्षं प्रति कारणं भवति। एवमेव द्रव्यसमवेतसमवेतनीलत्वादिप्रत्यक्षं प्रति महत्त्वावच्छिन्नोद्भूतरूपावच्छिन्नालोकसंयोगावच्छिन्नचक्षुःसंयुक्तसमवेतसमवायः कारणम्। एवञ्च परमाणौ पृथिवीत्वस्य न प्रत्यक्षम्, परमाणौ चक्षुःसंयोगस्य महत्त्वावच्छिन्नाभावात्। एवमेव परमाणुनीलेऽपि नीलत्वं न प्रत्यक्षम्, परमाणौ चक्षुःसंयोगस्य महत्त्वावच्छिन्नाभावात्। अनेनैव कारणेन घटे सत्तायाः चाक्षुषप्रत्यक्षे सत्यपि वायौ तदीयस्पर्शादौ च सत्ताया न चाक्षुषम्। वायौ चक्षुःसंयोगस्य उद्भूतरूपावच्छिन्नाभावात्। एवं त्वाचप्रत्यक्षं प्रति त्वक्सम्बन्धस्यापि विशिष्टस्यैव कारणत्वं बोध्यम्। प्राचीनानां मते त्वाचप्रत्यक्षं प्रत्यपि उद्भूतरूपस्य कारणत्वेन स्वीकाराद् द्रव्यत्वाचं प्रति महत्त्वावच्छिन्नोद्भूतरूपावच्छिन्नत्वक्संयोगः कारणम्, द्रव्यसमेवतत्वाचं प्रति महत्वावच्छिन्नोद्भूतरूपावच्छिन्नत्वक्संयुक्तसमवायः कारणम्। द्रव्यसमवेतसमवेतत्वाचं प्रति तु महत्त्वावच्छिन्नोद्भूतरूपावच्छिन्नत्वक्संयुक्तसमवेतसमवायः कारणम्। अत्र त्वाचप्रत्यक्ष आलोकसंयोगस्य नापेक्षा, तं विनापि त्वाचप्रत्यक्षस्यानुभवात्। नवीनानां मते तूद्भूतरूपावच्छिन्नत्वमपि त्वक्संयोगे विशेषणं न देयम्। नवीनमते त्वाचप्रत्यक्षं प्रत्युद्भूतरूपस्य कारणत्वस्वीकारात्, किन्तूद्भूतस्पर्शत्वावच्छिन्नत्वं विशेषणं देयं त्वक्संयोगे। तथा च नवीनमते महत्त्वावच्छिन्नोद्भूतस्पर्शावच्छिन्नत्वक्संयोगो द्रव्यत्वाचं प्रति कारणमति। एवमेवाग्रेऽपि सम्बन्धो ज्ञेयः।

गन्धप्रत्यक्षे घ्राणसंयुक्तसमवायः कारणम्, गन्धसमवेतसुरभित्वादिजातिप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः कारणम्। अत्रापि महत्त्वावच्छिन्नत्वं विशेषणं तु देयमेव। एवं रसप्रत्यक्षे रसनासंयुक्तसमवायः कारणम्। रससमवेतमधुरत्वादिरासनप्रत्यक्षे रसनासंयुक्तसमवेतसमवायः कारणम्। शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः कारणम्। शब्दसमवेतशब्दत्वकत्वखत्वादिजातिप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः कारणम्। महत्त्वस्य षड्विधप्रत्यक्षं प्रति कारणत्वेनात्रापि महत्त्वावच्छिन्नत्वन्तु तत्तदिन्द्रियसम्बन्धे विशेषणं देयमेव।

एवमात्मनो प्रत्यक्षं प्रति मनःसंयोगः कारणम्। आत्मसमवेतज्ञानसुखादिप्रत्यक्षं प्रति मनःसंयुक्तसमवायः कारणम्। आत्मसमवेतसमवेतसुखत्वादिमानसप्रत्यक्षं प्रति मनःसंयुक्तसमवेतसमवायः कारणम्। समवायप्रत्यक्षमिन्द्रियसम्बद्धविशेषणतासन्निकर्षेण जायते। समवायो न प्रत्यक्षः किन्त्वनुमेय इति वैशेषिका वदन्ति।

एवं भावप्रत्यक्षकारणीभूतसन्निकर्षं व्याख्यायेदानीमभावप्रत्यक्षकारणीभूतसन्निकर्ष-मुदाहरणसहितं प्रतिपादयति विश्वनाथः-

**कारिका-** **विशेषणतया तद्वदभावानां ग्रहो भवेत्। यदि स्यादुपलभ्येतेत्येव यत्र प्रसज्यते ॥६२॥**

**मुक्तावली-** **अभावप्रत्यक्षे समवायप्रत्यक्षे चेन्द्रियसम्बद्धविशेषणता हेतुः। वैशेषिकमते तु समवायो न प्रत्यक्षः। अत्र यद्यपि विशेषणता नानाविधा। तथाहि भूतलादौ घटाद्यभावः स्वसंयुक्तविशेषणतया गृह्यते। सङ्ख्यादौ रूपाद्यभावः स्वसंयुक्तसमवेतविशेषणतया। सङ्ख्यात्वादौ रूपाद्यभावः स्वसंयुक्तसमवेतसमवेतविशेषणतया। शब्दाभावः**

**केवलश्रोत्रावच्छिन्नविशेषणतया ।कादौ खत्वाद्यभावःश्रोत्रावच्छिन्नसमवेतविशेषणतया ।एवं कत्वाद्यवच्छिन्नाभावे गत्वाभावादिकं श्रोत्रावच्छिन्नविशेषणविशेषणतया । एवं घटाभावादौ पटाभावः चक्षुःसंयुक्तविशेषणविशेषणतया । एवमन्यदप्यूह्यम् । तथापि विशेषणतात्वेन रूपेणैकैव सा गण्यते । अन्यथा षोढा सन्निकर्ष इति प्राचां प्रवादो व्याहन्येतेति । यदि स्यादुपलभ्येत इति । अत्राभावप्रत्यक्षे योग्यानुपलब्धिः कारणम् । तथाहि भूतलादौ घटादिज्ञाने जाते घटाभावादिकं न ज्ञायते । तेनाभावोपलम्भे प्रतियोग्युपलम्भाभावः कारणम् । तत्र योग्यताप्यपेक्षिता, सा च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपा । तदर्थञ्च प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्रसञ्जित उपलम्भरूपः प्रतियोगी यस्य सोऽभावप्रत्यक्षे हेतुः ।**

**तथा हि- यत्रालोकसंयोगादिकं वर्तते तत्र यद्यत्र घटः स्यात्तर्हि उपलभ्येतेत्यापादयितुं यत्र शक्यते तत्र घटाभावादिप्रत्यक्षं भवति । अन्धकारे तु नापादयितुं शक्यते । तेन घटाभावादेरन्धकारे न चाक्षुषप्रत्यक्षम् स्पार्शनप्रत्यक्षन्तु भवत्येव, आलोकसंयोगं विनापि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात् । गुरुत्वादिकं यदयोग्यं तदभावस्तु न प्रत्यक्षस्तत्र गुरुत्वादिप्रत्यक्षस्यापादयितुमशक्यत्वात् । वायौ रूपाभावः । पाषाणे सौरभाभावः, गुडे तिक्ताभावः । श्रोत्रे शब्दाभावः आत्मनि सुखाभावः, एवमादयस्तत्तदिन्द्रियैर्गृह्यन्ते तत्तत्प्रत्यक्षस्यापादयितुं शक्यत्वात् । संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता, अन्योन्याभावप्रत्यक्षे त्वधिकरणयोग्यताऽपेक्षिता । अतः स्तम्भादौ पिशाचादिभेदोऽपि चक्षुषा गृह्यत एव । एवं प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम् । तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षो वर्णितः ॥६२॥**

**व्याख्या-** अभावप्रत्यक्षं विशेषणतासन्निकर्षेण जायते । यथा समवायस्य प्रत्यक्षमिन्द्रियसंयुक्तविशेषणतासन्निकर्षेण जायते, तथा हि घटेन साकमिन्द्रियसंयोगे घटघटत्वयोः समवायस्यापि प्रत्यक्षं भवति तत्र चक्षुषः समवायेन साकं सम्बन्धस्तु चक्षुःसम्बद्धविशेषणतारूपः सम्बन्धो भवति । यतो हि अत्र विशेषणता वृत्तितारूपा तत्र चक्षुः सम्बद्धे घटे वृत्तिः समवायः सम्बन्धो वर्ततेऽतः चक्षुःसम्बद्धविशेषणता समवायसम्बन्धे वर्ततेऽतस्तेन सम्बन्धेन चक्षुषा घटघटत्वयोः समवायस्य प्रत्यक्षं भवति । यथा समवायस्य प्रत्यक्षं विशेषणतासन्निकर्षेण भवति तथैवाभावस्यापि प्रत्यक्षं विशेषणता सन्निकर्षेण जायते । अत्र विशेषणता नानाविधाः । तत्र विशेषणता न स्वतन्त्रः सम्बन्धः किन्तु पूर्वोक्तभावग्राहकसम्बन्धस्थले संयोगस्थले संयुक्तपदं संयोज्य, समवायस्थले च समवेतपदं संयोज्य विशेषणतासम्बन्धो ग्राह्यः तथा चेन्द्रियसंयुक्तविशेषणता, इन्द्रियसंयुक्तसमवेतविशेषणता, इन्द्रियसंयुक्तसमवेतसमवेतविशेषणता, श्रोत्रसमवेतविशेषणता, श्रोत्रसमवेतसमवेतविशेषणतेत्यादिनानाविधो विशेषणतासम्बन्धो भवति । एवमेवात्र विशेषणता पदं विशेष्यताया अप्युपलक्षकम् । तथा च विशेषणताविशेष्यतारूपोऽयं सम्बन्धो नानाप्रकारकस्तथापि विशेष्यविशेषणतात्वेनैकेव सम्बन्धो गृहीतः अन्यथा षोढा सन्निकर्ष इति अभियुक्तानां प्रवादो व्याहन्येत ।

तत्र द्रव्यवृत्यभावप्रत्यक्षे इन्द्रियसंयुक्तविशेषणता, इन्द्रियसंयुक्तविशेष्यता वा सन्निकर्षो भवति। यथा भूतलादौ घटाद्यभावप्रत्यक्षं घटाभावावद् भूतलमित्यादिरूपेण यदि जायते तदा चक्षुःसंयुक्ते भूतले घटाभावो यो विशेषणमतः चक्षुःसंयुक्तविशेषणतासन्निकर्षेण भूतलादौ द्रव्येऽभावस्य प्रत्यक्षं भवति। द्रव्यसमवेतेषु गुणकर्मद्रव्यवृत्तिजातिषु वर्तमानानामभावानां प्रत्यक्षमिन्द्रियसंयुक्तसमवेतविशेषणतासन्निकर्षेण जायते। यथा सङ्ख्यायां रूपाद्यभावाप्रत्यक्षं चक्षुःसंयुक्तसमवेतविशेषणतासन्निकर्षेण जायते। अत्र चक्षुःसंयुक्तो घटः तत्र समवेता सङ्ख्या, तत्र विशेषणं रूपाभावः, सङ्ख्या रूपाभाववती इति प्रतीतेः। तथा च सङ्ख्यायां रूपाद्यभावानां प्रत्यक्षं चक्षुःसंयुक्तसमवेतविशेषणतासन्निकर्षजन्यम्। एवमेव द्रव्यसमवेतसमवेतसङ्ख्यात्वादिजातौ रूपाद्यभावानां प्रत्यक्षमिन्द्रियसंयुक्तसमवेतसमवेतविशेषणतासन्निकर्षेण जायते। अत्रापि चक्षुःसंयुक्तो घटः, तत्र समवेता सङ्ख्या, तत्र च समवेतं सङ्ख्यात्वं तत्र विशेषणं रूपाद्यभाव इति द्रव्यसमवेतसमवेतसङ्ख्यात्वादिजातौ वर्तमानानामभावानां प्रत्यक्षमिन्द्रियसंयुक्तसमवेतसमवेतविशेषणतासन्निकर्षजन्यम्। प्रतीतिस्त्वत्र सङ्ख्यात्वं रूपाद्यभाववत् इत्याद्यात्मकम्।

शब्दाभावस्य प्रत्यक्षं केवलश्रोत्रावच्छिन्नविशेषणता सन्निकर्षेण जायते। श्रोत्रावच्छिन्ने तत्तदाकाशे शब्दाभावस्य विशेषणत्वात्। अत्र केवलमिति कथनमेतत्सम्बन्धे पूर्वोक्तानां केषाञ्चानानामपि सम्बन्धनामत्र सम्बन्धो नास्तीत्याशयेन। एवमेव श्रोत्रवृत्तिककारवृत्ति-खत्वाद्यभावानां प्रत्यक्षं श्रोत्रावच्छिन्नसमवेतविशेषणतासन्निकर्षेण जायते। एवं प्रकारेण भाववृत्ति-अभावानां प्रत्यक्षं तत्तदभावग्राहकसन्निकर्षविशिष्टविशेषणतया विशेष्यतया वा सन्निकर्षेण जायते। एवमेवाभाववृत्यभावप्रत्यक्षमपि विशिष्टेनैवविशेषणतासन्निकर्षेण विशेष्यतासन्निकर्षेण वा जायते। यथा भूतलवृत्तिघटाभावे पटाभावस्य प्रत्यक्षं भूतलवृत्तिघटाभावः पटाभाववानित्यात्मकं चक्षुःसंयुक्तविशेषणविशेषणतासन्निकर्षप्रयोज्यम्। एवं कत्वावच्छिन्नकशब्दाभावे गत्वावच्छिन्नाभावः श्रोत्रावच्छिन्नविशेषणविशेषणतासन्निकर्षेण गृह्यते। एवं प्रकारेण येन येन सम्बन्धेन पदार्थाः संकलितास्तत्तत्सम्बन्धपरम्परान्ते विशेषणता योजनीया, यथा घटे गुणः, गुणे च गुणत्वं, गुणत्वे जातौ पदार्थत्वं, पदार्थत्वे धर्मे घटाभावः तत्र च घटाभावे विद्यमानस्य गुणत्वाभावस्य प्रत्यक्षं चक्षुःसंयुक्तसमवेतसमवेतविशेषणविशेषणविशेषणतासन्निकर्षेण जन्यते। तत्र चक्षुःसंयुक्तो घटस्तत्र समवेतो गुणः तत्र समवेतं गुणत्वं, तत्र विशेषणं(वृत्तिः) पदार्थत्वं तत्र विशेषणं घटाभावः तत्रापि विशेषणं गुणत्वाभावः इति तादृशविशेषणतासन्निकर्षेण तादृशस्य गुणत्वाभावस्य प्रत्यक्षं भवति। तथा च तत्तद्विशेष्येण विशेषणानां ये ये सम्बन्धा भवेयुस्तांस्तानादाय सम्बन्धपरम्पराकल्पनीया।

इत्थञ्च विशेषणतारूपसम्बन्धोऽन्योऽपि कल्पयितुं शक्यते। प्रतीतिभेदाच्च कुत्रचिद् विशेषणता कुत्रचिच्च विशेष्यता कल्पनीया। न्यायमते प्रथमान्तार्थो मुख्यविशेष्योऽन्यत् सर्वं विशेषणम्। यथा भूतलं घटाभाववदित्यत्र भूतलं विशेष्यम्, घटाभावो विशेषणम्, अत एवात्र चक्षुःसंयुक्तविशेषणतासन्निकर्षो भवति। भूतले घटाभावः इति प्रतीतौ तु घटाभावो विशेष्योऽतः चक्षुःसंयुक्तविशेष्यतात्र सम्बन्धो बोध्यः। विशेष्यविशेषणतात्वेनायं सम्बन्धो नानापि एक एव स्वीक्रियते। अतो न षोढासन्निकर्षव्याघातः। तत्र

मीमांसकाः अभावस्य प्रत्यक्षं नैव स्वीकुर्वन्ति किन्तु अनुपलब्धिप्रमाणेनाभावस्य ज्ञानं जायत इति वदन्ति, अतस्तन्मतं दूषयति विश्वनाथपञ्चाननः-

यदि स्यादुपलभ्येत इत्यादिना। अर्थाद् अनुपलब्धिसहकृतेनेन्द्रियेणैवाभावस्य प्रत्यक्षत्वं सम्भवेऽनुपलब्धेः प्रमाणान्तरत्वकल्पन व्यर्थमिति। तथा चेन्द्रियजन्याभावप्रत्यक्षे योग्यानुपलब्धिः सहकारिकारणं भवति। योग्यस्य= प्रत्यक्षस्वरूपयोग्यस्य घटादेरनुपलब्धिः=उपलब्ध्यभावः=प्रत्यक्षप्रतीत्यभावो घटाद्यभावप्रत्यक्षं प्रति सहकारिकारणमिति। तथा चाभावप्रत्यक्षे प्रतियोगिन उपलम्भाभावः=प्रतियोगिनः प्रत्यक्षप्रतीत्यभावः कारणम्। प्रतियोगिन उपलम्भाभावोऽपि योग्यताविशिष्टोऽभावप्रत्यक्षं प्रति अपेक्षणीयः।

ननु का सा प्रतियोग्यनुपलब्धिनिष्ठा योग्यता ? अर्थात् अभावप्रत्यक्षकारणीभूता प्रतियोग्यनुपलब्धेर्योग्यता का ? कीदृशी प्रतियोग्यनुपलब्धिरभावप्रत्यक्षस्योपयोगिनी ? यतो हि घटानुपलब्ध्या घटाभावस्य प्रत्यक्षं स्वीक्रियते, परं पिशाचानुपलब्ध्या पिशाचाभावस्य प्रत्यक्षं न भवति, अत्र का विशेषता येनोभयोरनुपलब्ध्योरेकाभावप्रत्यक्षस्य कारणम् द्वितीया(अपरा) नाभावप्रत्यक्षस्य कारणमिति चेत् सत्यम्, यतो हि अभावप्रत्यक्षस्य कारणीभूतायां प्रतियोग्यनुपलब्ध्यां योग्यतापेक्षता भवति। अर्थाद् योग्यताविशिष्टा प्रतियोग्यनुपलब्धिरेवाभावप्रत्यक्षेऽपेक्षेणीया। सा च प्रतियोग्यनुपलब्धिनिष्ठा योग्यता प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपा वर्तते। तस्यार्थश्च यस्याभावस्य प्रत्यक्षमपेक्षणीयं तस्याभावस्य प्रतियोगिनः सत्त्वप्रसञ्जनेन=आरोपेण प्रसञ्जितः=आरोपितः, प्रतियोगी यस्या अनुपलब्धेर्वर्तते सा प्रतियोग्यनुपलब्धिः योग्या तया प्रतियोग्यनुपलब्ध्या अभावस्य प्रत्यक्षं भवति। यथा घटाभाववति भूतले घटाभावस्य प्रतियोगिनो घटस्य सत्त्वारोपेण घटोपलब्धेरारोपः कर्तुं शक्यते यद्यत्र भूतले घटः स्यात्तदोपलभ्येत इत्येवं रूपेणातो घटानुपलब्धिः योग्या, तया च घटाभावस्य प्रत्यक्षं भवति। पिशाचसत्त्वेन पिशाचोपलब्धिस्तु नारोपयितुं शक्या पिशाचस्यैव प्रत्यक्षायोग्यत्वादतो न पिशाचानुपलब्ध्या पिशाचाभावस्य प्रत्यक्षम्। तथा च प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्रसञ्जितः उपलम्भरूपः प्रतियोगी यस्योपलम्भावस्य स उपलम्भाभावः अभावप्रत्यक्षे हेतुरिति सिद्धम्, अन्धकारे तु घटसत्त्वेन घटोपलम्भस्यैवापादयितुमशक्यत्वात्तत्र न घटाभावस्य प्रत्यक्षम्, सालोकस्थले तु घटसत्त्वेन घटोपलम्भमापादयितुं शक्यः इति तत्र घटाभावः चक्षुषा प्रत्यक्षः। त्वचा तु अन्धकारेऽप्यापादयितुं शक्यते इति अन्धकारेऽपि घटाभावः त्वाचप्रत्यक्षविषयः। पिशाचगुरुत्वादीनान्त्वभावः न कदापि प्रत्यक्षयोग्यः, अयोग्यानां पिशाचादीनां कदापि आपादयितुमशक्यत्वात्। वायौ रूपाभावः, पाषाणे उद्भूतसौरभाभावः, गुडे तिक्ताभावः, श्रोत्रे शब्दाभावः, आत्मनि सुखाद्यभावः एवमादयोऽभावाः प्रत्यक्षयोग्य तत्तदभावानां प्रतियोगिनः तत्र तत्रापादयितुं शक्यत्वात्। येनेन्द्रियेण प्रतियोगी गृह्यते तेनैवेन्द्रियेण तदभावोऽपि गृह्यते, प्रतियोगिसत्त्वेन तत्तदिन्द्रियैः तत्तत्प्रतियोग्युपलब्धेरापादनयोग्यत्वात्। एवमेवाभावप्रत्यक्षेऽपि परम्परया प्रतियोगिता योग्यतापि कारणं भवति, तत्र संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता, अन्योन्याभावप्रत्यक्षे तु अधिकरणयोग्यतापेक्षिता भवति। अत एव भूतले पिशाचादीनामयोग्यान्याभावस्तु गृह्यते एव। प्रतियोगिनः पिशाचस्यायोग्यत्वेऽपि पिशाचान्योन्याभावस्य प्रत्यक्षयोग्यत्वात्। एवञ्च लौकिकालौकिकभेदेन द्विविधप्रत्यक्षयोर्मध्ये लौकिकप्रत्यक्षकारणीभूताः सन्निकर्षाः षड्विधास्ते च प्रदर्शिताः सोदाहरणम्।

## (ख) अलौकिकसन्निकर्षाः

**कारिका-** **अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः। सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥६३॥**

**मुक्तावली–** **अलौकिकस्तु सन्निकर्ष इदानीमुच्यते- अलौकिकस्त्विति। व्यापारः= सन्निकर्षः। सामान्यलक्षण इति। सामान्यं लक्षणं यस्येत्यर्थः। अत्र लक्षणपदेन यदि स्वरूपमुच्यते, तदा सामान्यस्वरूपा प्रत्यासत्तिरित्यर्थो लभ्यते। तच्चेन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं बोध्यम्। तथा हि यत्रेन्द्रियसंयुक्तो धूमादिस्तद्विशेष्यकं ज्ञानं धूम इति ज्ञानं यत्र जातं, तत्र ज्ञाने धूमत्वं प्रकारः, तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवं रूपं सकलधूमविषयकं ज्ञानं जायते। अत्र यदीन्द्रियसम्बद्धमित्येवोच्यते, तदा यत्र धूलीपटले धूमत्वभ्रमानन्तरं सकलधूमविषयकं ज्ञानं जायते तन्न स्यात्, तत्र धूमत्वेन सहेन्द्रियसम्बन्धाभावात्। मन्मते तु इन्द्रियसम्बद्धं धूलीपटलं तद्विशेष्यकं धूम इति ज्ञानं तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिः। इन्द्रियसम्बन्धश्च लौकिको ग्राह्यः। इदञ्च बहिरिन्द्रियस्थले मानसस्थले तु ज्ञानप्रकारीभूतं सामान्यं प्रत्यासत्तिः ॥६३॥**

**व्याख्या-** लौकिकालौकिकसन्निकर्षयोर्मध्ये लौकिकसन्निकर्षः षड्विधः, संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेष्यविशेषणभावश्चेत्युक्तप्रायम्। अलौकिकसन्निकर्षभेदान् तत्स्वरूपञ्चोच्यते। तत्रालौकिकसन्निकर्षरूपः प्रत्यक्षज्ञानस्य कारणीभूत इन्द्रियव्यापारस्त्रिविधः। सामान्यलक्षणः सन्निकर्षः, ज्ञानलक्षणः सन्निकर्षः, योगजसन्निकर्षश्चेति। तत्राद्यः सामान्यलक्षणः सन्निकर्षस्तावत् सामान्यं साधारणोधर्मः लक्षणं=स्वरूपं यस्य सन्निकर्षस्येति व्युत्पत्त्या सामान्यस्वरूपा प्रत्यासत्तिः। तच्च सामान्यं इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतरूपं बोध्यम्। तथा चेन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतसामान्यलक्षणया प्रत्यासत्त्या तत्सामान्याश्रयविषयकमलौकिकज्ञानमुत्पद्यते। तथा हि यत्रैकेन धूमेन साकमिन्द्रियसंयोगेनायं धूमः इत्याकारकं ज्ञानमुत्पद्यते, ततस्तत्र ज्ञाने प्रकारीभूय भासमानेन धूमत्वेन धूमत्वाश्रयसकलधूमविषयकं धूमा इति ज्ञानमुत्पद्यते तदेव ज्ञानं सामान्यलक्षणाप्रत्यासत्तिजन्यं ज्ञानम्, तस्य ज्ञानस्य कारणीभूतं धूमत्वञ्च प्रत्यासत्तिः। नन्वत्र किन्नेन्द्रियसम्बद्धमित्येव नोक्तम्? इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूत इत्यपेक्षया इन्द्रियसम्बद्धसामान्यमिति कथने लाघवात् इति तदेव किन्नोक्तमिति चेन्न, यतो हि यदि इन्द्रियसम्बद्धसामान्यमित्येवोच्यते तदा यत्र धूलीपटले धूमत्वभ्रमानन्तरं धूम इत्येवं ज्ञानं जायते तत्र धूमत्वलक्षणसामान्यप्रत्यासत्त्या सकलधूमविषयकं धूमा इति ज्ञानं जायते परं यदीन्द्रियसम्बद्धं सामान्यमित्येवोच्यते तदा तत्रेन्द्रियसम्बद्धो न धूमो न वा धूमत्वं किन्तु धूलीपटलं तत्र च धूमत्वमस्त्येव नहीति धूमत्वेन सकलधूमत्वाश्रयस्य प्रत्यक्षं यदनुभूतं वर्तते, तन्न स्यादिति नेन्द्रियसम्बद्धं सामान्यमलौकिकप्रत्यासत्तिः, किन्त्विन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतमेव सामान्यं प्रत्यासत्तिः। तथा च तत्रेन्द्रियसम्बद्धं धूलीपटलं तद्विशेष्यकं ज्ञानं भ्रमात्मकं धूम इत्याकारकं तत्र ज्ञाने प्रकारीभूय भासमानो धर्मः धूमत्वमिति धूमत्वेन सामान्यलक्षणया सकलधूमविषयकं धूमा इति ज्ञानं तत्रोत्पद्यत इति इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतसामान्यमेव सामान्यलक्षणा प्रत्यासत्तिः।

अत्रेन्द्रियसम्बन्धश्च लौकिकसम्बन्धो बोध्यः। इदञ्चेन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं सामान्यं प्रत्यासत्तिरिति कथनं बहिरिन्द्रियस्थल एव, मानसप्रत्यक्षस्थले तु ज्ञानप्रकारीभूतसामान्यं धर्म एव प्रत्यासत्तिः तत्रेन्द्रियसम्बद्धेत्यादिविशेषणं नावश्यकम्।

नन्विन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतसामान्यलक्षणप्रत्यासत्त्या केन सम्बन्धेन तदाश्रयस्य प्रत्यक्षं कारयति ? एवं यत्र सामान्यो धर्म एव नष्टः तत्र तत्स्मरणे सति कथं तदाश्रयस्य मानसप्रत्यक्षम् ? किञ्च यत्र पूर्वदिने एवेन्द्रियसम्बन्धेनेन्द्रियसम्बद्धविशेष्यकं ज्ञानं जातं तत्र परदिने इन्द्रियसम्बन्धं विनापि सामान्यलक्षणप्रत्यासत्तिजन्यज्ञानं स्यादित्याद्याकांक्षायां सामान्यलक्षणप्रत्यासत्तिं व्यवस्थापयति विश्वनाथपञ्चाननः-

**मुक्तावली-** **परन्तु समानानां भाव सामान्यम्। तच्च क्वचिन्नित्यं धूमत्वादि, क्वचिच्चानित्यं घटादि, यत्रैको घटः संयोगेन भूतले, समवायेन कपाले ज्ञानस्तदनन्तरं सर्वेषामेव तद्घटवतां भूतलादीनां कपालादीनां वा ज्ञानं भवति। तत्रेदं बोध्यम्, परन्तु सामान्यं येन सम्बन्धेन ज्ञायते तेन सम्बन्धेनाधिकरणानां प्रत्यासत्तिः। किन्तु यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातम्, तत्र सामान्यलक्षणया सर्वेषां तद्घटवतां भानं न स्यात्, सामान्यस्य तदानीमभावात्। किञ्चेन्द्रियसम्बद्धविशेष्यकं घटः इति ज्ञानं यत्र जातम्, तत्र परदिने इन्द्रियसम्बन्धं विनापि तादृशज्ञानप्रकारीभूतसामान्यस्य सत्त्वात्तादृशज्ञानं कुतो न जायते, तस्मात् सामान्यविषयकं ज्ञानं प्रत्यासत्तिर्न तु सामान्यमित्याह-**

**कारिका-** **आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते। तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ॥६४ ॥**

**मुक्तावली-** **आसत्तिः= प्रत्यासत्तिरित्यर्थः। तथा च सामान्यलक्षण इत्यत्र लक्षणशब्दस्य विषयोऽर्थः। तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थो लभ्यते। ननु चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र वर्तते तत्र सकलघटादीनां चाक्षुषादिप्रत्यक्षं स्यादतः आह- तदिति। अस्यार्थः- यदा बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानं जननीयं तदा यत्किञ्चिद्धर्मिणि तत्सामान्यस्य तदिन्द्रियजन्यज्ञानस्य सामग्री अपेक्षिता। सा च सामग्री चक्षुःसंयोगालोकसंयोगादिकम्। तेनान्धकारादौ चक्षुरादिना तादृशज्ञानं न जायते ॥६४॥**

**व्याख्या-** सामान्यलक्षणा इत्यस्याः प्रत्यासत्त्या व्युत्पत्तिलभ्यार्थमाह समानानां भावः इत्यादि। अर्थात् समानानां = एकधर्माश्रयाणां भावो धर्मः सामान्यं, तदेव लक्षणं= स्वरूपं यस्याः प्रत्यासत्तेः सा प्रत्यासत्तिर्हि सामान्यलक्षणा प्रत्यासत्तिः। तच्च सामान्यं कुत्रचिन्नित्यं घटत्वादि, कुत्रचिच्चानित्यं घटादि, उभयमपि सामान्यपदवाच्यम्। तत्र सामान्यं धर्मः भिन्नभिन्नसम्बन्धेन विभिन्नाधिकरणे तिष्ठति। यथैको घटः समवायेन कपाले, संयोगेन भूतले, कालिकेन जन्यमात्रे काले वा तिष्ठति, तत्रेन्द्रियसम्बद्धभूतलविशेष्यकज्ञानप्रकारीभूतघटरूपसामान्यलक्षणाप्रत्यासत्त्या समवायेन घटाश्रयसकल कपालविषयकं सामान्यलक्षणाप्रत्यासत्तिजन्यं ज्ञानं जायते न वा। संयोगेन घटवद्भूतलमिति ज्ञानोत्तरं इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतघटात्मकप्रत्यासत्त्या कालिकेन घटवद्यावद्जन्यादिविषयकं

घटवज्जन्यम्, घटवान् कालोवेत्यादिसामान्यलक्षणप्रत्यासत्तिजन्यमलौकिकं ज्ञानं जायते न वेति जिज्ञासायां विश्वनाथपञ्चाननो वदति- तत्रेदं बोध्यम् परन्तु सामान्यं येन सम्बन्धेन ज्ञायते तेनैव सम्बन्धेन तदाश्रयविषयकं ज्ञानं जनयति तत्सामान्यमिति। अर्थात् यदि घटः भूतले संयोगेन ज्ञायते तदा घटरूपं सामान्यं संयोगेनैव तदाश्रययावद्भूतलविषयकं भूतलानीति अलौकिकं ज्ञानं जनयति। यदि च घटः समवायेन कपाले ज्ञायते तदा घटरूपसामान्यं समवायेन यावद्घटाश्रयकपालविषयकं कपालानीत्यलौकिकमेव ज्ञानं जनयति न तु तत्र संयोगेन घटाश्रयभूतलविषयकं कालिकेन घटाश्रययावज्जन्यविषयकं ज्ञानं जनयति।

ननु अनित्यस्य घटादेर्यदि सामान्यलक्षणप्रत्यासत्तित्वं स्वीक्रियते तदा यत्र तद्घटनाशानन्तरं तद्घटवतः भूतलादेः स्मरणात्मकं ज्ञानं जातं तत्र तादृशज्ञानप्रकारीभूतस्य तद्घटस्य सामान्यलक्षणप्रत्यासत्तेर्नाशेन तत्र तद्घटवतां सर्वेषां भूतलादीनां प्रत्यक्षं न स्यात् सामान्यस्य तदानीं नष्टत्वात् कारणाभावेन कार्यं नोत्पद्येतेति अनित्यस्य सामान्यस्य प्रत्यासत्तित्वे दोषः। किञ्च यदि सामान्यं नित्यं घटत्वादिकं यत्र तत्राप्यपरो दोषः सम्भवति तद्यथा-

यत्रेद्रियसंयोगेन पूर्वदिने घट इत्याकारकं ज्ञानमुत्पन्नं ततस्तत्र तज्ज्ञानप्रकारीभूतस्य घटत्वस्य नित्यत्वेन परदिने इन्द्रियसम्बन्धं विनापि पूर्वदिवसीयतादृशज्ञानप्रकारीभूतघटत्वरूपसामान्यस्य नित्यस्य सत्त्वेन परदिने सकलघटत्वाश्रयघटविषयकं घटा इत्यात्मकं ज्ञानं कुतो न जायते? इत्यत आह विश्वनाथपञ्चाननः-

आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते इति। अर्थात् सामान्यलक्षणेत्यत्र लक्षणपदं न स्वरूपस्य वाचकं किन्तु लक्षणपदं विषयस्य वाचकं तथा च सामान्यं=धर्मः लक्षणं विषयो यस्याः सा सामान्यलक्षणा प्रत्यासत्तिरपितु सामान्यविषयकं ज्ञानं प्रत्यासत्तिरिति। एवञ्च सामान्यं नित्यं वानित्यं यत्किमपि भवेत् तद्विषयकं ज्ञानं प्रत्यासत्तिरिति। तथा चेन्द्रियसम्बद्धभूतलविशेष्यकज्ञानप्रकारीभूतस्य तद्घटस्य नाशेऽपि तद्घटस्मरणानन्तरं तद्घटवद्यावद्भूतलविषयकं भूतलानीति ज्ञानस्योत्पत्तौ न कापि बाधा। तत्र सामान्यस्यानित्यत्वेन नाशेन सामान्याभावेऽपि तद्विषयकज्ञानस्य सत्त्वेन तत्र तदाश्रयविषयकालौकिकज्ञानोत्पत्तेः। एवञ्च यत्र घटत्वादिरूपनित्यं सामान्यं तत्रापि यदि परदिने घटविषकं ज्ञानं नोत्पन्नं तदा तज्ज्ञानप्रकारीभूतस्य नित्यस्य घटत्वरूपस्य सामान्यस्य सत्त्वेऽपि घटत्वसामान्यविषकज्ञानरूपायाः प्रत्यासत्तेरभावान्न तत्र परदिने सकलघटविषयकमलौकिकं ज्ञानमिति सामान्यं न प्रत्यासत्तिरपितु सामान्यविषयकं ज्ञानं प्रत्यासत्तिः। ननु यदि सामान्यविषयकं ज्ञानं प्रत्यासत्तिस्तदा यत्र चक्षुःसंयोगादिकं विनैव संस्कारादिविशाद्यत्र घटत्वादिसामान्यज्ञानं ज्ञातं तदा तत्र तेन घटत्वादिरूपसामान्यज्ञानरूपेण सन्निकर्षेण घटत्वाश्रयसकलघटविषयकं चाक्षुषमलौकिकं ज्ञानमुत्पद्येत, तत्र सकलघटविषयकमानसं तु भवत्येव परं चाक्षुषमपि ज्ञानं स्यादिति चेत्तदाह विश्वनाथपञ्चाननः-

**तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते** इति। अर्थाद यदि सामान्यधर्मविषयकज्ञानरूपेण सामान्यलक्षणसन्निकर्षेण चाक्षुषं ज्ञानं जननीयं तदा तत्र घटविषयकलौकिकचाक्षुषसामग्र्यप्यपेक्षिता भवति, अर्थाल्लौकिकचाक्षुषसामग्रीं विना–अलौकिकमपि चाक्षुषं न भवतीति भावः। तथा

च पूर्वोक्तस्थले चक्षुःसंयोगादिकं विनैव यत्र घटस्य स्मरणादिकंज्ञानं जातं तत्रोत्तरक्षणे घटत्वविषयकसामान्यज्ञानरूपप्रत्यासत्त्या न सकलघटानां चाक्षुषं ज्ञानमपितु तत्र सकलघटविषयकमानसं ज्ञानमेव। मानसालौकिकज्ञानं चक्षुरादीन्द्रियसंयोगादिकं विनैव ज्ञानप्रकारीभूतसामान्यविषयकज्ञानेन जायते। तत्र लौकिकप्रत्यक्षसामग्र्यप्यात्ममनःसंयोगरूपैव। चाक्षुषादितत्तदिन्द्रियजन्यालौकिकप्रत्यक्षे तु यत्किञ्चिद्धर्मिणि तत्समान्यविषयकस्य तदिन्द्रियजन्यलौकिकप्रत्यक्षज्ञानस्य सामग्र्यप्यपेक्षिता भवत्येव। सा च सामग्री चक्षुरादिसंयोगालोकसम्बन्धोद्भूतरूपमहत्त्वादिरूपं यच्च पूर्वमेव प्रतिपादितं तदेवात्राप्यलौकिकसामान्यलक्षणसन्निकर्षजन्यज्ञानेऽपेक्षितमिति। अत एवान्धकारादौ चक्षुषा न सकलघटविषयकमलौकिकं प्रत्यक्षम्। न वा पिशाचादिविषयकलौकिकं प्रत्यक्षम्। तद्विषयकलौकिकप्रत्यक्षसामग्र्या एवाभावात्।

ननु यदि सामान्यलक्षणा प्रत्यासत्तिः ज्ञानरूपा तदा वक्ष्यमाणज्ञानलक्षणापि प्रत्यासत्ति ज्ञानरूपैवेति तयोः को भेद इत्याकांक्षायां जिज्ञासाप्रदर्शनपुरस्सरं ज्ञानलक्षणायाः प्रत्यासत्तेः स्वरूपं प्रदर्श्य तयोर्भेदमप्याह विश्वनाथपञ्चाननः-

ननु ज्ञानलक्षणा प्रत्यासत्तिर्हि ज्ञानरूपा सामान्यलक्षणापि ज्ञानरूपा तदा तयोर्भेदो न स्यादत आह-

**कारिका-** **विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः।**

**मुक्तावली-** **सामान्यलक्षणा प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति। ज्ञानलक्षणा प्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति। अत्रायमर्थः- प्रत्यक्षे सन्निकर्षं विना भानं न सम्भवति। तथा च सामान्यलक्षणां विना धूमत्वेन सकलधूमानां, वह्नित्वेन सकलवह्नीनां च भानं कथं भवेत्? तदर्थं सामान्यलक्षणा स्वीक्रियते। न च सकलवह्निधूमभानाभावे का क्षतिरिति वाच्यम्, प्रत्यक्षधूमे वह्निसम्बन्धस्य गृहीतत्वादन्यधूमस्य चानुपस्थितत्वाद् धूमो वह्निव्याप्यो न वेति संशयानुपपत्तेः। मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीयधूमे वह्निव्याप्यत्वसन्देहः सम्भवति।**

**न च सामान्यलक्षणायाः स्वीकारे प्रमेयत्वेन सकलप्रमेय ज्ञाने जाते सार्वज्ञापत्तिरिति वाच्यम्, प्रमेयत्वेन सकलप्रमेयज्ञाने जातेऽपि विशिष्य सकलपदार्थानामज्ञातत्वेन सार्वज्ञाभावात्। एवं ज्ञानलक्षणाया अस्वीकारे सुरभिचन्दनमिति ज्ञाने सौरभस्य भानं कथं स्यात्। यद्यपि सामान्यलक्षणयापि सौरभस्य भानं सम्भवति। तथापि सौरभत्वस्य भानं ज्ञानलक्षणया। एवं यत्र धूमत्वेन धूलीपटलं ज्ञातं तत्र धूलीपटलस्यानुव्यवसाये भानं ज्ञानलक्षणया॥**

**व्याख्या-** सामान्यलक्षणाप्रत्यासत्तितो ज्ञानलक्षणाया विशेषोऽयमेव यद् उभयोर्ज्ञानस्वरूपत्वेऽपि तयोर्ज्ञानयोर्भेदः। यतो हि ज्ञानलक्षणप्रत्यासत्तिः यद्विषयकं ज्ञानमलौकिकं जननीयं तद्विषयकमेव ज्ञानं ज्ञानलक्षणतया प्रत्यासत्तित्वेन कारणम्। सामान्यलक्षणा प्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तदाश्रयविषयकं ज्ञानं कारयति। यथा घटेन साकमिन्द्रियसम्बन्धे जातेऽयं घट इति ज्ञानमुत्पद्यते ततस्तत्रोत्तरकाले घटत्वज्ञानविषयकज्ञानलक्षणातः घटत्वाश्रयसकलघटविषयकं घटा इत्येवं ज्ञानं जायते तज्ज्ञानं

सामान्यलक्षणाप्रत्यासत्तिजन्यम् । यत्र तु पूर्वकाले चक्षुषा पुष्पस्य, घ्राणेन च सौरभस्येति द्विविधेन्द्रियाभ्यामेकं ज्ञानमनुभूतं पश्चाच्च पुष्पमात्रस्य चक्षुषा सह सन्निकर्षे जाते घ्राणेन्द्रियस्य सौरभेन साकं सन्निकर्षं विनैव तत्र पूर्वज्ञानजन्यविशिष्टसंस्कारेण विशिष्टस्मृतौ तादृशस्मृत्यात्मकज्ञानोपरक्तचक्षुषा सुरभिपुष्पमिदमित्यात्मकं यत्प्रत्यक्षं जायते तज्ज्ञानं ज्ञानलक्षणाप्रत्यासत्तिजन्यं प्रत्यक्षम् । तत्र सुरभिपुष्पमिति स्मरणात्मकं ज्ञानं प्रत्यासत्तिः, तदुपरक्तचक्षुषा जायमानं सुरभिपुष्पमिदमित्यात्मकमनुभवरूपं प्रत्यक्षं कार्यमिति सुरभिपुष्पमित्यात्मकेन सुरभिपुष्पविषयकस्मरणात्मकज्ञानरूपप्रत्यासत्त्या सुरभिपुष्पविषयकविशिष्टं प्रत्यक्षं जन्यत इति यद्विषयकं ज्ञानं ज्ञानलक्षणा प्रत्यासत्तिस्तद्विषयकमेवालौकिकज्ञानं जनयतीति सामान्यलक्षणाप्रत्यासत्तितोः ज्ञानलक्षणाप्रत्यासत्तेर्भेदः ।

ननु कावश्यकता एतयोः सन्निकर्षयोरर्थादेकघटेन साकमिन्द्रियसंयुक्ते सति एकस्यैव घटस्य प्रत्यक्षन्त्वनुभवसिद्धम्, किन्तु तत्र घटत्वज्ञानरूपसामान्यलक्षणातः सकलघटविषयकस्य घटा इत्यात्मकज्ञानस्य कावश्यकता ? एवमेव ज्ञानलक्षणायाः प्रत्यासत्तेरपि कावश्यकता ? पुष्पसन्निकर्षे सौरभविशिष्टस्य स्मरणमात्रेणैव व्यवहारोत्पत्तेः सम्भवाद् इति चेदित्थं- प्रत्यक्षं ज्ञानं विषयेन्द्रियसन्निकर्षं विना न सम्भवति, तथा च यदि सामान्यलक्षणा प्रत्यासत्तिर्न स्वीक्रियते तदा प्रत्यक्षधूमे वह्निव्याप्तेर्निश्चितत्वेन, परोक्षधूमस्य च धर्मिज्ञानाभावात् अनुमितिदशायां लिङ्गदर्शने सति धूमो वह्निव्याप्यो न वेति व्याप्तिसन्देहो न स्यात्, व्याप्तिसन्देहश्चानुभवसिद्धः ।

किञ्च यदि सामान्यलक्षणा न स्वीक्रियते तदा धूमसामान्ये वह्निसामान्यस्य व्याप्तिनिश्चयोऽपि न स्यात्, सकलधूमस्य सकलवह्नेश्च लौकिकसन्निकर्षाभावेन लौकिकप्रत्यक्षासम्भवात् । सकलधूमे वह्निव्याप्तिनिश्चयाभावे च पर्वतीयधूमलिङ्गकपरामर्शाभावेन पर्वतो वह्निमानित्याद्यनुमितिमात्रस्योच्छेदापत्तिः स्यात्, अतोऽनुमितिसम्पादनाय सामान्यलक्षणा प्रत्यासत्तिः स्वीकार्या ।

एवमेव यदि ज्ञानलक्षणाप्रत्यासत्तिः न स्वीक्रियते तदा चन्दनप्रत्यक्षे सौरभविशिष्टं चन्दनमित्यनुव्यवसायो न स्यात्, स चानुव्यवसायः प्रत्यक्षसिद्धः । अतश्चन्दने सौरभभानाय ज्ञानलक्षणा प्रत्यासत्तिः स्वीकार्या । यद्यपि पुष्पेण साकमिन्द्रियसन्निकर्षे तद्विशिष्येकज्ञानप्रकारीभूतसौरभस्य तद्विशिष्टपुष्पस्य च भानं सामान्यलक्षणयापि सम्भवति तथापि तत्र भाषितसौरभांशे सौरभत्वस्य भानं सामान्यलक्षणयापि न सम्भवतीति सौरभांशे सौरभत्वभानाय ज्ञानलक्षणा स्वीकार्या । सौरभत्व विना च सौरभस्य भानं न सम्भवति, जात्यखण्डोपाध्यतिरिक्तपदार्थभानस्य किञ्चिद्धर्मपुरस्कृतत्वनियमात् । एवं यत्र धूलीपटले चक्षुःसन्निकर्षानन्तरं दोषवशाद्यत्र धूमत्वेन धूलीपटलस्य भानं जातं तत्र धर्मिदर्शनानन्तरं धूमत्वेन धूलीपटलमहं जानामीत्यनुव्यवसायो भवति, तत्रानुव्यवसाये धूलीपटस्य भानं ज्ञानलक्षणाप्रत्यासत्तिं विना न सम्भवतीति ज्ञानलक्षणाप्रत्यासत्तिः स्वीकार्या ।

किञ्च ज्ञानलक्षणसन्निकर्षं विना भ्रमोऽसंभवः, यतो हि रज्वा साकमिन्द्रियसन्निकर्षे सर्पस्य यद्भानमनुभवसिद्धं तत्र सर्पेण सह लौकिकसन्निकर्षासम्भवने तत्र सर्पभानं न स्याद्यदि ज्ञानलक्षणा न स्वीक्रियतेऽतस्तत्र रज्जुदर्शने रज्वाः लम्बायमानत्वेन सामान्यधर्मेण तद्विशिष्टसर्पस्मृतौ,

स्मरणात्मकज्ञानरूपज्ञानलक्षणाप्रत्यासत्त्या सर्पभानं भवतीति ज्ञानलक्षणाप्रत्यासत्तिः स्वीकार्यैव ।

ननु यदि सामान्यलक्षणा प्रत्यासत्तिः स्वीक्रियते तदा प्रमेयत्वेन सकलप्रमेयज्ञाने जातेऽस्मदादीनां सार्वज्ञापत्तिरिति चेन्न यतो हि सर्वज्ञो नाम न सर्वविषयकसामान्यज्ञानवान् किन्तु सर्वविषयकविशेषज्ञान्, अत्र च प्रमेयत्वेन सर्वविषयकसामान्यज्ञानसत्त्वेऽपि सर्वविषयकविशेषज्ञानाभावान्नास्मदादीनां सार्वज्ञमिति ।

सामान्यलक्षणा प्रत्यासत्तिं ज्ञानलक्षणाप्रत्यासत्तिञ्च निरूप्येदानीं योगजरूपालौकिकं सन्निकर्षं निरूपयति-

**कारिका-** **योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ॥६५॥**

**युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः ।**

**मुक्तावली-** **योगज इति । योगाभ्यासजनितो धर्मविशेषः श्रुतिस्मृतिपुराणादिप्रतिपाद्यः इत्यर्थः । युक्तयुञ्जानभेदतः इति । युक्तयुञ्जानरूपयोगिद्वैविध्याद्धर्मस्यापि द्वैविध्यमिति भावः ॥६५॥ युक्तस्य तावद् योगजधर्मसहाय्येन मनसाकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति । द्वितीयस्य चिन्ताविशेषोऽपि सहकारीति ।**

**इति विश्वनाथपञ्चाननभट्टाचार्यविरचितायां सिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डम् ।**

**व्याख्या-** तृतीयोऽलौकिकसन्निकर्षः योगजः, स च यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपाष्टविधयोगाभ्यासजनितो धर्मविशेषः, चित्तनिरोधजन्यधर्मविशेषो वा योगजः सन्निकर्षः । स च योगजसन्निकर्षो द्विविधः युक्तयोगिनिष्ठो, युञ्जानयोगिनिष्ठश्चेति, अर्थात् योगाज्जायत इति योगजः सन्निकर्षो द्विविधः । वस्तुतो योगजसन्निकर्षः धर्मविशेषरूपः, स च योगिभेदाद् भिन्नः, तत्र योगो नाम चित्तवृत्तिनिरोधः, यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिष्वभ्यासाज्जायते, चित्तनिरोधश्चेश्वरानुग्रहो जायते तेनानुग्रहेण युक्तो योगी सर्वदा परमाण्वाकाशादिसर्वविषयकं तत्त्वज्ञानं करोति, तादृशसर्वविषयकसर्वकालिकत्तत्त्वज्ञानकारणीभूतेश्वरानुग्रहजन्यधर्मविशेष एव युक्तयोगजसन्निकर्ष इत्युच्यते तेन च योगजसन्निकर्षेण युक्तः सिद्धो योगी सर्वदा सर्वकालीकं ज्ञानं सहजतः करोति । ततो भिन्नो युञ्जानयोगजसन्निकर्षस्तु यमनियमासनाद्यष्टाविधसाधानानुष्ठानेन संयमसहकृतं महत्पुण्यं प्राप्नोति युञ्जानः साधकः, तस्य साधकस्य यमाद्यष्टविधसाधनानुष्ठानजन्यसंयमसहकृतं महत्पुण्यमेव द्वितीयो योगजसन्निकर्षः, तेन द्वितीयेन योगजसन्निकर्षेण चिन्तनसहाय्येन युञ्जानयोगी चिन्तनदशायामेव सर्वपदार्थान् साक्षात्करोति नान्यथा । वस्तुतोऽत्र सन्निकर्षः योगिभेदाद् भिन्नः । योगी हि युक्तः युञ्जानश्चेति द्विविधः । युक्तः सिद्धः ईश्वरानुग्रहात् स्वभावतः आकाशादिपरमाण्वन्तसर्वपदार्थान् साक्षात्करोति । युञ्जानो योगरतः साधको योगी यमाद्यष्टविधसाधरतः सन् चित्तं निरोध्य संयमादिरूपमहत्पुण्येन चिन्तनकाले परमाण्वाकाशादिसर्वपदार्थान् साक्षात्करोति स जगत्शिक्षकः व्यवहारकाले व्यवहारं कुर्वन् चिन्तनदशायां सर्वपदार्थान् साक्षात्करोतीति ।

## पदानामर्थपरिचयः

व्यापारः = द्वारम् (द्रव्यान्यत्वे सति तज्जत्वे सति तज्जन्यजनकः)।
समवेतः = समवायेन सम्बन्धेन वृत्तिमान्।
संयोगः = द्रव्ययोः सम्बन्धविशेषः।
समवायः = अयुतसिद्धयोः सम्बन्धविशेषः।
विशेषणता = वृत्तिता, इतरव्यावर्तकत्वे सति विद्यमानत्वम्।
विशेष्यता = विशिष्यते भेद्यते इति विशेष्यम्, तस्य भावः।
सम्बद्धः = किञ्चित्सम्बन्धेन वर्तमानः।
षोढा = षड्विधः।
प्रसञ्जनम् = आरोपः।
प्रसञ्जितः = आरोपितः।
आपादकः = आपत्तिप्रदाता।
अलौकिकः = लौकिकभिन्नः (लौकैः सहजतोऽननुभूतः सन्निकर्षविशेषः)
लक्षणम् = स्वरूपम्।
धूलीयपटलम् = उड्डीयमानफणविशेषसमूहः।
सामग्री = कारणसमूहः।
आसत्तिः = सम्बन्धः।
प्रत्यासत्तिः = सम्बन्धः।
सन्निकर्षः = सम्बन्धः।
विषयी = विषयो यस्य तज्ज्ञानं विषयि। ज्ञानेच्छाकृतिद्वेषसंस्कारा विषयिणः।
सामान्यलक्षणा = समानानां भावः सामान्यं, तदेव स्वरूपं विषयो वा यस्याः प्रत्यासत्तेः सा प्रात्यासत्तिः सामान्यलक्षणा प्रत्यासत्तिः।
ज्ञानलक्षणा = ज्ञानं लक्षणं =स्वरूपं यस्याः प्रत्यासत्तेः सा प्रत्यासत्ति ज्ञानलक्षणा।
योगजः = योगाज्जायमानः सन्निकर्षविशेषः। (धर्मरूपः)
कालान्तरीयः = अन्यत् कालः कालान्तरं तत्र भवः।
प्रमेयः = प्रमाया विषयः।
सौरभम् = सुरभेः भावः सौरभं, सुगन्धत्वं, तदस्यास्त्यस्मिनिति सौरभं सुरभिः= सुगन्धः।
युक्तः = सिद्धः।
युञ्जानः = साधकः।
योगः = चित्तवृत्तिनिरोधः।

## अभ्यासः

### १. विस्तरेणोत्तरयत

(क) लौकिकसंन्निकर्षभेदान् प्रदर्श्य चक्षुःसंयुक्तसमवेतसमवायेन संन्निकर्षेण परमाणुनीले नीलत्वस्य प्रत्यक्षं किमर्थं न भवतीति प्रतिपादयत ।

(ख) अभावप्रत्यक्षकारणीभूतानुपलब्धिगता योग्यता कीदृशीति विचारयत ।

(ग) सामान्यलक्षणाप्रत्यासत्तेः स्वरूपं प्रदर्श्य तस्या आवश्यकत्वे युक्तिं प्रदत्त ।

(घ) सामान्यलक्षणाप्रत्यासत्तेः ज्ञानस्वरूपत्वे तस्या ज्ञानलक्षणातः को भेदः ?

### २. सङ्क्षेपतयोत्तरयत

(क) द्रव्यसमवेतसमवेतजातिप्रत्यक्षं प्रतीन्द्रियस्य कः सन्निकर्षः ?

(ख) अभावप्रत्यक्षकारणीभूतविशेषणतासंन्निकर्षस्य स्वरूपं तद्भेदांश्च निरूपयत ।

(ग) अन्धकारे घटस्य चाक्षुषं प्रत्यक्षं कथन्नभवतीति विचारयत ।

(घ) संसर्गाभावप्रत्यक्षेऽन्योन्याभावप्रत्यक्षे च किङ्गता योग्यतापेक्षिता भवतीति स्फोरयत ।

(ङ) अलौकिकसन्निकर्षभेदान् सोदाहरणं प्रतिपादयत ।

(च) ज्ञानलक्षणाप्रत्यासत्तेः स्वरूपमुदाहरणसहितं प्रदर्श्य तदावश्कत्वं निरूपयत ।

(छ) युक्तयुञ्जानयोर्योगजसंन्निकर्षयोः को भेदः?

### ३. अतिसङ्क्षिप्ततयोत्तरयत

(क) प्रत्यक्षज्ञानं प्रति व्यपारः कः ?

(ख) संयोगसंन्निकर्षेण किं गृह्यते ?

(ग) समवेतसमवायः संन्निकर्षः कुत्र ?

(घ) पिशाचात्यन्ताभावस्य प्रत्यक्षं भवति न वा ?

(ङ) अभावप्रत्यक्षे कीदृश्यनुपलब्धिरपेक्षिता ?

(च) अभावप्रत्यक्षकारणीभूतानुपलब्धिगता योग्यता कीदृशी ?

(छ) युञ्जानो योगी कदा सर्वान् साक्षात्करोति ?

### ४. कक्षाभ्यासः

(क) सन्निकर्षस्वरूपविषये तद्भेदविषये च कक्षायां सहपाठिभिः सह संवादो विधेयः ।

# परिभाषिकपदार्थपरिचयः

पौरस्त्यदर्शनस्यास्तिकदर्शनेष्वन्यतमं दर्शनं न्यायदर्शनं वर्तते । न्यायदर्शनस्य प्रणेता महर्षिगौतमोऽस्ति । महर्षिणा गौतमेन न्यायसूत्रप्रणयनेनास्य दर्शनस्य पल्लवनं कृतम् । अस्य च न्यायनयस्य द्वे सरण्यौ स्तः । तत्राद्या प्राचीनन्यायनाम्ना प्रसिद्धा, सूत्रभाष्यक्रमेणषोडशपदार्थप्रतिपादिका, प्रमेयनिरूपणप्रधाना, व्यवहारिकपदबहुला चास्ति चेद् द्वितीया नव्यन्यायनाम्ना प्रसिद्धा, विशेषतो गङ्गेशोपाध्यायाद्याचार्यसेविता, प्रमाणनिरूपणप्रधाना, प्रमाणक्रमेणार्थप्रतिपादिका, प्रतियोगितानुयोगिताकार्यताकारणतादिपारिभाषिकपदबहुला, परिष्कारप्रधाना च वर्तते । न्यायसिद्धान्तमुक्तावलीनामको विश्वनाथपञ्चाननभट्टाचार्यविरचितो ग्रन्थो नव्यन्यायसरणीमवलम्ब्य वैशेषिकाभिमतसप्तपदार्थानां न्यायदर्शनाभिमतचतुर्भिः प्रमाणैर्नव्यन्यायशैल्या प्रतिपादको ग्रन्थो वर्ततेऽत एतद्ग्रन्थप्रतिपाद्यविषयाणां परिज्ञानाय पारिभाषिकपदानामर्थज्ञानमावश्यकमिति धिया जिज्ञासूनां छात्राणां पारिभाषिकपदानामर्थबोधायार्थाद्येषां परिभाषयैवार्थबोधो भवति न तु शक्त्यादिवृत्त्या तेषां केषाञ्चन पारिभाषिकपदानामर्थास्तेषां प्रयोगविधिश्च ग्रन्थार्थबोधदिङ्निर्देशनायात्र प्रस्तूयते । यथा-

**प्रकारः–** संसर्गांशे भासमानप्रतियोगी प्रकारः, तस्य भावः प्रकारत्वम् । यथा घटवद् भूतलमित्यत्र घटः प्रकारः, घटे प्रकारता, प्रकारता च सर्वत्र किञ्चिद् धर्मावच्छिन्ना किञ्चित्संबन्धावच्छिन्ना च भवति । घटवद् भूतलमित्यत्र घटनिष्ठा प्रकारता घटत्वावच्छिन्ना संयोगसंबन्धावच्छिन्ना च वर्तते । प्रकारताविशेष्यतयोर्नित्यसाकांक्षत्वनियमात् प्रकारतानिरूपिता विशेष्यता भवति । तथा च प्रयोगः– संयोगसंबन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठप्रकारतानिरूपितभूतलत्वा-वच्छिन्नभूतलनिष्ठविशेष्यतावद् भूतलमिति ।

**विशेष्यम्–** संसर्गानुयोगि विशेष्यम् । यथा घटवद् भूतलमित्यत्र भूतलं विशेष्यम्, भूतले विशेष्यता, भूतलनिष्ठा विशेष्यता भूतलत्वावच्छिन्ना, विशेष्यता किञ्चित्सम्बन्धावच्छिन्ना न भवति । विशेष्यतायाः प्रकारतानिरूपितत्वनियमः । तथा च प्रयोगः– संयोगसंबन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठप्रकारतानिरूपितभूतलत्वावच्छिन्नभूतलनिष्ठ-विशेष्यतावद् भूतलमिति । शाब्दबोधीयविशेष्यताविषये विवदन्ते दार्शनिकाः । तत्र वैय्याकरणा धात्वर्थव्यापरो विशेष्यो भवति तत्र च विशेष्यता– तिष्ठतीति वदन्ति । मीमांसका भावनायां मुख्यविशेष्यत्वं स्वीकुर्वन्ति । नैय्यायिकास्तु प्रथमान्तार्थमुख्यविशेष्यकं शाब्दबोधं स्वीकुर्वन्ति । अर्थाद् वाक्यघटकप्रथमान्तपदस्यार्थो मुख्यं

विशेष्यं तत्र वाक्य इति वदन्ति । अत एव भूतले घट इत्यत्र संयोगसम्बन्धावच्छिन्नाधेयतासम्बन्धस्यानुयोगी घटः स एवात्र विशेष्यम् । घटवद् भूतलमित्यत्र तु संयोगसम्बन्धस्यानुयोगि भूतलमतस्तत्र भूतलमेव विशेष्यम् ।

**सम्बन्धः–** संबन्धिभ्यां भिन्नो विशिष्टबुद्धिनियामकः सम्बन्धः, अर्थाद् वैशिष्ट्यावगाहिबोधविषयः संबन्धः, तस्य भावः संबन्धत्वम् । सम्बन्धस्य प्रतियोग्यनुयोगिनौ द्वौ सम्बन्धिनौ स्तः । तत्र सम्बन्धस्य प्रतियोगी स यस्तिष्ठति तेन सम्बन्धेन । तेन सम्बन्धेन यत्र तिष्ठति सोऽनुयोगी कथ्यते । यथा संयोगेन सम्बन्धेन भूतले घटस्तिष्ठति चेद् घटः संयोगसंबन्धस्य प्रतियोगी, भूतलमनुयोगि भवति । तथा च प्रयोगः– घटत्वावच्छिन्नप्रकारतानिरूपकः भूतलत्वावच्छिन्नानुयोगिताकः संयोगसंबन्धः । सम्बन्धश्च भेदोऽभेदश्चेति द्विविधः । तत्र अभेदसम्बन्ध एक एव । भेदसम्बन्धश्च संयोगसमवायस्वरूपकालिकजन्यत्वजनकत्वादयो नाना ।

**आधारः–** यत्र यस्तिष्ठति स तस्याधारः । अर्थाद् वस्त्वाश्रयो हि आधारः । आधारमेवाधिकरणपदेनापि व्यवह्रियते । आधारे आधारता तिष्ठति, सा चाधारता किञ्चिद्धर्मावच्छिन्ना भवति । आधारतापि किञ्चित्सम्बन्धावच्छिन्ना न भवति । यथा घटवद् भूतलमित्यत्र भूतलम् आधारः भूतले आधारता तिष्ठति, भूतलनिष्ठाधारता भूतलत्वावच्छिन्ना वर्तते । आधारताया आधेयतानिरूपितत्वनियमः । तथा च प्रयोगः– घटवद् भूतलमित्यत्र संयोगसंबन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठाधेयतानिरूपितभूतलत्वा-वच्छिन्नभूतलनिष्ठाधारतावद् भूतलमिति ।

**आधेयः–** वृत्तिमद् वस्तु आधेयः । अर्थाद् यत्र यस्तिष्ठति तद्वर्तमानं वस्तु तत्राधेयः, आधेये चाधेयता तिष्ठति । सा चाधेयता किञ्चिद्धर्मावच्छिन्ना किञ्चित्सम्बन्धावच्छिन्ना च भवति । यथा घटवद् भूतलमित्यत्र घट आधेयः, घटे आधेयता तिष्ठति, घटनिष्ठा चाधेयता संयोगसम्बन्धावच्छिन्ना घटत्वावच्छिन्ना च वर्तते । आधेयताया आधारतानिरूपितत्वनियमः । तथा च प्रयोगः– घटवद् भूतलमित्यत्र संयोगसंबन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठाधेयतानिरूपितभूतलत्वा-वच्छिन्नभूतलनिष्ठाधारतावद्

**(अधिकरणतावद्) भूतलमिति ।**

**स्वरूपयोग्यत्वम्–** कारणतावच्छेदकधर्मवत्वं स्वरूपयोग्यत्वम् । अर्थाद् यस्य कारणस्य स्वाव्यवहितोत्तरक्षणे कार्यं नोत्पद्यते, परं तद्वस्तुनि कारणजननसामर्थ्यं विद्यते, तद्वस्तु तत्कार्यं प्रति स्वरूपयोग्यम्, तत्र च स्वरूपयोग्यता वर्तते । यथा अरण्यस्थदण्डो घटस्वरूपयोग्यः तद्दण्डे घटस्वरूपयोग्यता वर्तते ।

**फलोपधायकत्वम्–** स्वाव्यवहितोत्तरत्वसम्बन्धेन फलविशिष्टत्वम् स्वरूपयोग्यत्वम् । अर्थात् यस्य वस्तुनः स्वाव्यवहितोत्तरक्षणे कार्यं नियमेनोत्पद्यते तद्वस्तु तत्कार्यं प्रति फलोपधायकम्, तत्र च फलोपधायकत्वं वर्तते । यथा कुलालगृहस्थदण्डः कारणान्तरोपहितः सन् स्वाव्यवहितोत्तरक्षणे घटमुत्पादयति । अतः स्वाव्यवहितोत्तरत्वसम्बन्धेनघटरूपफलविशिष्टः कुलालगृहस्थदण्डो घटं प्रति फलोपधायकः, तत्र च फलोपधायकत्वरूपा कारणता वर्तते ।

**प्रयोजकत्वम्–** कार्यपूर्ववर्तिवस्तु कार्यं प्रति प्रयोजकम् । अर्थाज्जनकजनकतावच्छेदकसाधारणं कार्यपूर्ववृत्तिमात्रं वस्तु प्रयोजकम् । यथा - कारणस्य कारणम्, तत्कारणञ्च तेषु च प्रयोजकत्वम् ।

**पाकः** - रूपादिपरावृत्तिजनको विजातीयतेजःसंयोगः पाकः । स च पाकः पृथिव्यामेव सम्भवति न जलादिषु । पाकवशाच्च पृथिव्यां रूपादिकं परिवर्तन्ते । अर्थात् पार्थिवरूपरसादिकं विजातीयाग्निसंयोगेन विपरिणमते, न तु जलीयादिकम् । नहि शतधापि ध्मायमाने जले रूपादिकं परावर्तते । जले सौरभमौष्ण्याञ्चान्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते । पार्थिवं तु रूपरसादिकं पूर्वं कारणगुणपूर्वकमपि पश्चादग्निसंयोगरूपपाकेन परावर्तते । स च पाको विजातीयरूपजनकाद् गन्धजनको विजातीयः, गन्धजनकाच्च रसजनको विजातीयः, भिन्न इत्यर्थः । अत एव तृणपुञ्जनिक्षिप्ताम्रादौ क्वचिद्रूपपरिवर्तनेऽपि तत्र रसादिकं न परावर्तते । क्वचिच्च रसपरिवर्तनेऽपि रूपं न परावर्तते, तथैवानुभवात् । तस्माद्रूपादिजनका विजातीया एव पाकाः स्वीकार्याः । एतत्पाकमहिम्नैव एकस्मिन्नेव पार्थिवावयवे कालक्रमेण भिन्नभिन्नपदार्थानुभवो जायते । यथा गोभुक्ततृणादीनामापरमाण्वन्तभङ्गे तृणारम्भकपरमाणुषु विजातीयतेजःसंयोगात्पूर्वरूपादिचतुष्टयनाशे तदनन्तरं दुग्धे यादृशं रूपादिकं वर्तते तादृशरूपरसगन्धस्पर्शजनकास्तेजःसंयोगा जायन्ते, ततस्तादृशरूपरसादिविशिष्टपरमाणुभ्यां दुग्धद्व्यणुकमारभ्यते ततस्त्र्यणुकादिक्रमेण महादुग्धारम्भः, एवं दुग्धारम्भकैः परमाणुभिरेव दध्यारभ्यते एवमेव पाकमहिम्ना दध्यारम्भकैरेव परमाणुभिर्नवनीतादिकमिति । एवमेव क्रमेण घटादिजनकेषु केषुचन परमाणुष्वेव भिन्नभिन्नानि पत्रमृद्कपालघटादीनि द्रव्याण्यनुभूयन्ते । एतत्सर्वं पाकमहिम्नैव भवति ।

**आकारः–** तदभिन्नत्वे सति तद्भिन्नत्वेन प्रतीयमानं वस्तु आकारः अर्थात् तज्जन्यवस्तुनः स्वरूपमाकारः, यथा मृज्जन्यघटादयो मृद आकाराः ।

**अन्वयः–** अन्वयो नाम सम्बन्धः । सम्बन्धश्चात्र कार्यकारणयोः, तदर्थश्च कारणसत्त्वे कार्यसत्त्वम् इति अन्वयसहचारः, अन्वयसहचाराच्चान्वयव्याप्तिः गृह्यते । यथा धूमसत्त्वे वह्निसत्त्वमित्यन्वयसहचाराद् वह्न्यभाववदवृत्तिः धूम इत्यन्ययव्याप्तिः गृह्यते । अन्वयसहचाराच्च कार्यकारणभावोऽपि ग्रहीतुं शक्यते । यथा दण्डादिसत्त्वे घटसत्त्वमित्यन्वयसहचारज्ञानाद् दण्डादयो घटस्य कारणानीति घटदण्डादीनां कार्यकारणभावो निश्चियते ।

**व्यतिरेकः–** व्यतिरेको नामाभावः । अभावयोः परस्परसम्बन्धोऽपि व्यतिरेकपदवाच्यः । तेन च व्यतिरेकसहचारो गृह्यते । यथा कारणाभावे कार्याभाव इत्यभावयोः साहचर्यम्, तस्य ज्ञानाच्च व्यतिरेकव्यप्तिः गृह्यते । व्यतिरेकसहचारज्ञानात् कार्यकारणभावोऽपि गृह्यते ।

**अवच्छेदकम्–** अन्यूनानतिप्रसक्तधर्म एव अवच्छेदको भवति । अवच्छेदको धर्मोऽवच्छेद्यधर्मसमानाधिकरणो भवति । समानाधिकरणयोरवच्छेद्यावच्छेदकत्वनियमः । तत्र समानाधिकरणयोर्धर्मयोर्मध्ये गौणो धर्मोऽवच्छेद्यः(अवच्छिन्नः) मुख्यो धर्मोऽवच्छेदकः । यथा घटो नास्तीत्युक्तौ घटः प्रतियोगी, घटे प्रतियोगिता वर्तते । घटनिष्ठायाः प्रतियोगिताया अवच्छेदको धर्मस्तत्र घटत्वम्, घटत्वं हि घटनिष्टायाः प्रतियोगिताया अन्यूनानतिरिक्तवृत्ति प्रतियोगितासमानाधिकरणञ्च वर्ततेऽतो घटत्वं घटनिष्ठप्रतियोगिताया

अवच्छेदकं घटत्वावच्छिन्ना च घटनिष्ठा प्रतियोगिता। प्रयोगश्च घटाभाववद् भूतलमित्यत्र संयोगसंबन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठप्रतियोगिताकाभाव-निष्ठाधेयतानिरूपिताधिकरणतावद् भूतलमिति ।

**अवच्छिन्नम्** - यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्नः। यथा घटाभाववद् भूतलमित्यत्र घटः प्रतियोगी घटे प्रतियोगिता घटनिष्ठायाः प्रतियोगिताया अवच्छेदकं घटत्वञ्चेद् घटत्वावच्छिन्ना घटनिष्ठा प्रतियोगिता भवति। प्रयोगश्च संयोगसंबन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठप्रतियोगिताकाभाव-निष्ठाधेयतानिरूपिताधिकरणतावद् भूतलमिति ।

**समवायः** - नित्यसम्बन्धः अथवा अयुतसिद्धयोः सम्बन्धः समवायः । अर्थाद् अवयवावयविनोः, गुणगुणिनोः, क्रियाक्रियावतोः, जातिव्यक्त्योः, नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवायः । स च समवायसम्बन्धो नित्यः, एकश्च ।

## पदानामर्थपरिचयः

| | |
|---|---|
| पारिभाषिकं पदम् | = परिभाषयार्थबोधकं पदम् |
| पल्लवनम् | = विस्तारः |
| वैशिष्ट्यम् | = सम्बन्धः |
| सरणी | = पन्थाः |
| पुञ्जः | = समूहः |
| विजातीयः | = विभिन्नम्, भिन्नं भिन्नमित्यर्थः |
| अयुतसिद्धः | = ययोर्द्वयोर्मध्ये एकमविनश्यत् तदवस्थमपरं तत्रैवावतिष्ठते तावयुतसिद्धः । यथा घटघटत्वे |
| अन्वयसहचारः | = तत्सत्त्वे तत्सत्त्वमर्थात् कारणसत्त्वे कार्यसत्त्वमिति, यथा दण्डसत्त्वे घटसत्त्वमिति |
| व्यतिरेकसहचारः | = तदभावे तदभावः, कारणाभावे कार्याभावः, यथा दण्डाभावे घटाभाव इति |
| प्रतियोगिता | = यस्याभावः स प्रतियोगी, तस्य भावः प्रतियोगिता |

## अभ्यासः

### १. स्वोपज्ञतया व्याख्याङ्कुरुत

(क) सम्बन्धं परिभाष्य सम्बन्धभेदं प्रतिपादयत ।

(ख) पाकजलक्षणं कुत्रचिल्लक्ष्ये समन्वयं कुरुत ।

(ग) किं नाम स्वरूपयोग्यत्वमिति विलिख्य तस्यैकमुदाहरणं दत्त ।

(घ) अन्वयव्यतिरेकयोः पदयोरर्थौ पाठमनुसृत्य प्रतिपादयत ।

(ङ) पाठमनुसृत्यावच्छेदकावच्छेद्यधर्मौ परिचायत ।

### २. अतिसङ्क्षिप्तमुत्तरं देयम्

(क) सम्बन्धः कः ?

(ख) पारिभाषिकपदस्यार्थः कः ?

(ग) विशेषणस्य लक्षणं किम ?

(घ) आधेयस्यैकमुदाहरणं दत्त ।

(ङ) प्रयोजकत्वन्नाम किम् ?

(च) घटवद् भूतलमित्यत्र विशेषणतावच्छेदको धर्मः कः ?

(छ) कयोः सम्बन्धः समवायः ?

(ज) किन्नामावच्छेदकत्वम् ?

(झ) तद्वत्ताबुद्धिं प्रति प्रतिबन्धकं किम् ?

(ञ) पारिभाषिकपदमित्यस्य कोऽर्थः ?